श्रीः ।

सिद्धान्तचन्द्रिका–उत्तरार्धः

(सारस्वतव्याकरणसूत्रवृत्तिः)

पण्डितरामाश्रमप्रणीतः ।

श्रीमत्पण्डितसदानन्दकृता सुबोधिनी

तथा

श्रीक्षेमकरसूनुपण्डितलोकेशकरकृता तत्त्वदीपिका

चैतद्व्याख्याद्वयेन समेतः ।

ऐनापुरेउपाख्य बाळाचार्यतनूजेन उद्धवाचार्येण

संशोधितः ।

सेयम्

श्रीकृष्णदासतनूजनिभ्या

गङ्गाविष्णु–खेमराजगुप्ताभ्याम्

मुम्बय्यां

स्वकीये "श्रीवेंकटेश्वर" नामसुद्रालये

मुद्रित्वा प्रकाशितः ।

शके १८१२ संवत् १९४७

श्रीः ।

व्याकरणग्रंथोंकी सूचना.

व्याकरणमहाभाष्यम् कैय्यटकृतभाष्यप्रदीपसहित और बालशास्त्रिकृत टिप्पणी समेत किंमत १२ रुपये. सिद्धांतकौमुदी अष्टाध्यायी, गणपाठ, धातुपाठ, लिङ्गानुशासन पा० अक्षर मोठा जिल्द अति उत्तम किं० ४॥ रु० अष्टाध्यायी, गणपाठ, धातुपाठ, लिङ्गानुशासन पा० किं० १ रु० लघुसिद्धांतकौमुदी टिप्पणसहित जिल्द अक्षरबडा किं० १ रु० लघुसिद्धांतकौमुदी टिप्पणसहित जिल्द किं० ८ आना. सारस्वतसटीक प्रसाद टीका किं० १२ आना. सारस्वतचंद्रकीर्तिटीकासह परमोत्तम किं० १। रु० कारकवादार्थशब्दबोध व्याकरणन्याय किं० २ आना.

सारस्वतपठनारंभः सं० १८४१ भाद्रपदे मासि

श्रीः ।

सिद्धान्तचन्द्रिका ।

(उत्तरार्द्धम्)

श्रीगणेशाय नमः ।

मूलम्-

धातोः॥ इदमधिक्रियते ।

सुबोधिनी-

सार्वीयं सच्चिदानंदं नामंनामं जगत्प्रभुम् ॥
सिद्धांतचंद्रिकाख्यातवृत्तिश्च क्रियतेतराम् ॥ १ ॥

धातोः । अधिकारोयं प्राङ् नाम्नो य इत्यतः । किमर्थोयमधिकारः । उच्यते । ऊरीकरोति । शुक्लीभवति । सहायीस्यादित्यादौ ऊर्यादिच्व्यंतयोर्द्धातोः प्राक् प्रयोगस्य नियतत्वेन विशिष्टात् प्रत्ययोत्पत्तिर्यथा न स्यात् । अन्यथा अड्द्वित्वयोर्दोषो दुर्वारःस्यादित्यधिकारः ।

तत्त्वदीपिका-

प्रणम्य श्रीपतिं वाणीं नारायणमनामयं ।
सिद्धान्तचन्द्रिकाख्यातव्याकृतिरुच्यतेऽधुना ॥ १ ॥

धातोरिति । अधिकारोयमित्याह । इदमिति । सूत्रमिति विशेष्यं पदं वा नाम्नो य इत्यतः प्रागधिकारो बोध्यः । अधिकारफलन्तु ऊरीकरोति शुक्लीभवतीत्यादौ च्व्यन्तस्य धातोः प्राक्प्रयोगनियमेन तत्सहिताद्धातोः प्रत्ययोत्पत्तिर्यथा न स्यात् । अन्यथाऽड्द्वित्वयोर्दोषो दुर्वारः स्यात् । नच नामव्यावृत्तिरेव फलमिति वाच्यं । ततः विधानेनैव तद्बाधनात् । सिबंततिबन्तव्यावृत्तिरपि न फलं । प्रकृत्यर्थस्याद्रव्यकादेराख्यातार्थकर्तृकर्मणोरनन्वयात् । कारकाणां क्रिययैवान्वयनियमात् । पचतीत्यत्र एकेन क्रिया एकाश्रयिकायां क्रियायां बोधितायामपरेणान्याश्रयाया बोधनस्याशक्यत्वात् । प्रथमस्य समासप्रत्यययोरिति लोपे तु तदर्थस्यानवबोधाच्च । कर्त्तृद्वयादिबोधाकांक्षायां यः वट इत्यादेरन्याय्यत्वात् ।

मू०-भ्वादिः॥ क्रियावाची भ्वादिर्द्धातुसंज्ञकः स्यात् ।

(सुबोधिनी-) भ्वादिः । भवनं भूः क्रियासामान्यं । आदत्ते ग्राहयत्यर्थमित्यादिः ।

अंतर्भावितण्यर्थः । यद्वा । दीयते गृह्यतेऽर्थोऽनेनेति आङ्पूर्वाद्दाञः किप्रत्ययः । शब्दइति यावत् । भुवः क्रियासामान्यस्य आदिर्वाचकः शब्दो धातुसंज्ञो भवति । एवं सति हिरुक् नाना इत्यादावऽव्यये बभूव बभूवे इत्यादावाख्यातांते चातिव्याप्ति-स्तेषामपि क्रियावाचकत्वात् । अतो भ्वादिरित्यावर्त्य भूरादिर्यस्येति बहुव्रीहि-र्व्याख्येयः । अत्रादिशब्दो व्यवस्थायां । तेन भूशब्दादारभ्य ये पठितास्ते ग्राह्याः । तेन क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वं । नामधातूनां सधातुरिति व-चनाद्धातुत्वं । सौत्रास्तु गणे एव पाठ्याः । का पुनः क्रिया । उच्यते । करो-त्यर्थभूता उत्पादनाऽपरपर्याया उत्पत्त्यनुकूलव्यापारसंतानरूपा भावनैव क्रिया । नन्वस्तिभवतिविद्यतिषु क्रियावाचित्वमव्याप्तं । नहि तत्रोत्पादना प्रतीयते । उ-त्पत्तिर्हि आद्यः क्षणसंबंधस्तदऽनुकूलव्यापारश्चोत्पादना तदनुभवश्चास्त्यादिभ्यो नास्त्येव । उच्यते । अस्तीत्यादेः स्वरूपधारणं करोतीत्यर्थः । धारणं चो-त्तरकालसंबंधः । क्रियावचनः किं । याः पश्यसीत्यादौ धातुत्वं माभूत् । स-ति हि तस्मिन्नातोधातोरित्यालोपः ॥

(तत्त्वदीपिका-)भ्वादिरिति।भवनं भूः क्रिया आदीयतेऽर्थोऽनेनेत्यादिः शब्दः आङ्पूर्वा-दाञःकिः।तथाच भूशब्दः क्रियावाचक आदिशब्दः प्रकारवाचक इत्यर्थः। एवं सति हिरुक् व-र्जने इत्यव्ययेऽतिव्याप्तिस्तस्यापि वर्जनरूपक्रियावाचकत्वात् । अतो भ्वादिरित्यावर्त्तनी-यं । अत्रादिशब्दो व्यवस्थार्थः॥तथाच भूशब्दमारभ्य ये पठितास्ते धातुसंज्ञाः। एवं च क्रि-यावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वमिति लक्षणं। वादावव्ययेऽतिप्रसंगवारणाय सत्यं-तं । तावन्मात्रोपादाने च हिरुगादावतिव्याप्तिः । अत्राहुः क्रियावाचित्वलाभायावृत्तिर्न कर्त्तव्या । नच यादावतिव्याप्तिः । याइत्यस्य लाक्षणिकत्वेनैवाग्रहणात् । यदस्त्यदाद्यत्वं आपि येतिसिद्धेः । वेत्यव्ययस्य धातुत्वेप्यनिष्टादर्शनात् । अथ धातुत्वे विकल्पादावपि गं-धनादाविव वातीति रूपमापद्येतेति चेत् शृणु । तस्याव्ययत्वेन अव्ययाद्विभक्तिरिति तिबादे-र्लुकोऽनिवार्यत्वात् । एवं च सूत्रे विभक्तिग्रहणस्य सार्थको न स्यादेरिति नोक्तं । सर्वा-देरुभशब्दस्य तु उभं उभेइत्यत्र पठितत्वेपि उभकावित्याद्यर्थतया सर्वादिपाठस्योक्तत्वेन धातुत्वबाधनात् ॥ धातुत्वे हि स्याद्यनुत्पत्तेरुभकावित्यस्यासंभवात् ॥ अथ द्योदिवावित्य-त्र स्वर्गवाचकस्य धातुत्वं स्यादिति वाच्यं । न तत्रोदितः पाठेनानुदितौ तस्याग्रहणात् । सानुबंधकग्रहणेनातदनुबंधकस्येत्युक्तेरिति । का पुनः क्रिया भावनैव वेति गृहाण । तथा हि । अभवतो गमनादेरक्रियमाणतया भवतश्च घटादेः क्रियमाणतया भवत्यर्थकर्तुः क-रोतिकर्मत्वं । तथा च करोत्यर्थकर्तुर्भवितृप्रयोजकतया भवतेरुत्पत्त्यर्थोप्रयोजकव्यापारे क्रि-रुत्पद्यमानः करोत्यर्थमवलंबते ।

सू०— आदनुदात्तङितः॥ अनुदात्तेतो ङितश्च धातोरात् ।

(सुबोधिनी-) आदनुदात्तङितः । अनुदात्तश्च ङ् च अनुदात्तङौ तावितौ यस्य धातोः सोनुदात्तङित्तस्मात् । द्वंद्वांते श्रूयमाण इच्छब्दः प्रत्येकमभिसं-

बध्यते। द्वंद्वेऽल्पस्वरेति ङस्य पूर्वनिपातो न। हसांतत्वात्। न्यायनणित्यादिज्ञापकसिद्धं हि तत्। ज्ञापकसिद्धं न सर्वत्रेति देवतेदमर्थे इत्यादिना च तस्यानित्यत्वाच्च। अनुदात्तेतो ङितश्च धातोरात्मनेपदं भवति। एधते। शेते। अन्यपदार्थत्वेन धातोराश्रयणं किं। अगमत्। अशिश्रियत्। ङोर्ङित्त्वेपि धातुत्वाभावादान्न॥

(तत्त्वदीपिका-) आदनुदात्तङितइति। आदनुदात्तश्च ङ् च आदनुदात्तङौ तावितौ यस्य स तथा तस्मात्। द्वंद्वांते श्रूयमाण इत्शब्दः प्रत्येकमभिसंबध्यते इत्यत आह। आदनुदात्तेतो ङितश्चेत्यादि। अत्रङ्इत्यस्यास्वरत्वादल्पस्वरस्येत्यप्रवृत्तेः परनिपातःद्वयोःस्वरान्तयोर्मध्येऽल्पस्वरस्य ग्रहणात्। देवतेदमर्थ इत्यादिना तस्यानित्यत्वाच्च। आत्पयोरेव सर्वत्र संज्ञात्वेन दर्शनात्। नामैकदेशेन सर्वनाम लक्ष्यत इति न व्याख्येयम्। अन्यपदार्थत्वेन धातोराश्रयणात्। अगमत् अशिश्रियदित्यत्र अङो ङित्त्वेपि धातुत्वाभावादान्न। अत्र विधेयस्य पश्चाद्ग्रहणस्य युक्तत्वेपि विपरीतकरणात्क्वचिदन्यत्राप्यात्। तेन को जानीत इत्यादि सिद्धं।

मू०-ञित्स्वरितेत उभे॥ ञितः स्वरितेतश्च धातोरात्पे स्तः।

(सुबोधिनी-) ञित्स्वरितेतउभे। ञ् इत् यस्य स ञित्। स्वरित इद्यस्य स स्वरितेत्। ञिच्च स्वरितेच्चानयोः समाहारः ञित्स्वरितेत्तस्मात् उभयपदं। आत्तु संनिहितमेव। पं तु णित्पे इत्यतः परामृश्यते॥

(तत्त्वदीपिका-)ञित्स्वरितेत उभे। ञ् इत् यस्य स ञित् स्वरित इद्यस्य स स्वरितेत्। ञिच्च स्वरितेच्चानयोः समाहारो ञित्स्वारितेत् तस्मात्। उभे आत्पे इत्यर्थः। यथासंख्यमत्र न शंकनीयं। तस्याज्ञापकासिद्धत्वेनासार्वत्रिकत्वात्। अथात्रानुबंधद्वयं न कर्त्तव्यं। ञितः स्वरितेत्सु स्वरितेतो वा ञित एव विधेयास्तथा च ञित उभे स्वरितेत उभे इति वा सूत्रणीयमिति चेन्न। डुकृञ् इत्यस्य डुकृ ञ् इति करणे गौरवत्वात् रुधिर् इत्यत्र रुधिर् इति करणे च स्वरितञित इति कर्तृयुक्तं लाघवात्। अत्र केचित् अत्र आत्पशब्दाभ्यामवयवाभ्यामात्मनेपदपरस्मैपदसंज्ञे गृह्येते ते वाऽन्वर्थे। तथाहि। आत्मने कर्त्रे फलबोधकं पदमात्मनेपदं। परस्मै कर्त्रे फलबोधकं पदं परस्मैपदं। तेन कर्तृगामिनि आत्मनेपदं परगामिनि फले परस्मैपदमित्याहुस्तन्न। उभेग्रहणस्य वैयर्थ्यापत्तेः। तथा हि ञित्स्वरितेतं एतावदेव सूत्रमस्तु। आदिति चानुवर्त्यं। तेन कर्तृगामिनि फले आत्। अन्यत्र परतोऽन्यदिति पदं। किंच करोति कुरुते वा घटमित्यत्र घटनिर्माणफलस्य कुलालादन्यगामित्वस्यासंभवात्। सृष्टिं चकार चक्रे वा ईश्वर इत्यत्र जगन्निर्माणफलस्य ईश्वरे संभवाच्च। यजधातौ तु स्वर्गकामो यजेत होतर्यजेति श्रुतिभ्यां यजमानर्त्विजोरात्पप्रयोगनियमो ऽन्यत्र तु यथेष्टं प्रयोक्तव्यं।

मू०-परतोऽन्यत॥ उक्तनिमित्तहीनाद्धातोः पं।

(सुबो०-)परतोन्यत। परस्मादिति परतः तन्नादिर्विभक्त्यर्थे इति पंचम्यंतात्तस। प०

रत्वस्यसावधित्वादवध्यपेक्षायामनुदात्तङित इत्यादयः संबध्यंते । अन्यत्वस्यापि सापेक्षत्वादादुभेचेति संबध्यते । अनुदात्तेतो ङितो निविशादेर्ञितः स्वरितेतश्च धातोः परतोऽन्यस्माद्धातोः केवलं पं भवति ॥

(तत्त्वदीपिका-) परतोऽन्यदिति । परस्मादिति परतः । तत्रादिर्विभक्त्यर्थे इति पंचम्यन्तात्तस् । परत्वस्य सावधित्वात् । अवध्यपेक्षायामनुदात्तङित इत्यादयः संबध्यन्ते अन्यत्वस्यापि सापेक्षत्वादादुभेवेति संबध्यते इत्याशयेनाह । उक्तनिमित्तेत्यादि । उक्तानि निमित्तानि तैर्हीनात् रहितादित्यर्थः तथा च अनुदात्तेतो ङितो निविशादेः ञितः स्वरितेतश्च धातोरन्यस्मात्पं भवतीत्यर्थः । अनुदात्तेत इत्यादि किं । एधते । प्रवर्त्तते ।

सू०—नवपं ॥ तिबादीनामाद्यानि नव वचनानि पं संज्ञानि । पराण्यात् ॥ पराणि नव वचनानि आत्मनेपदानि स्युः ।

(सुबो०-) नवपं, पराण्यात् । प्रत्येकमष्टादशवचनात्मका दशविधा आख्याता उक्तास्तेषां नव नव वचनानां संज्ञानं विधीयते । तिबादीनामाद्यानि नववचनानि पंसंज्ञानि पराणि नवाऽऽत्संज्ञानि । पराणीति परशब्देन नवपमित्यत्राऽऽद्यानीति लभ्यंते ॥

(तत्त्वदीपिका—) नवपमिति । अत्र पराण्यादित्यत्र परशब्देनाद्यानीतिलभ्यते । अत्र पाच्छब्दयोरेव संज्ञात्वं न तु ताभ्यामवयवभूताभ्यामाक्षिप्तयोः परस्मैपदात्मनेपदशब्दयोरवयविनोः । दादेः पे णित्पे आङ्वीत्यादौ पाच्छब्दयोरेवावृत्तिर्दर्शनाद्भाववाच्च । न च परगामिक्रियाफलात्मगामिक्रियाफलरूपान्वर्थलाभो न पाच्छशब्दाभ्यामिति वाच्यं ॥ विवक्षयैतल्लाभात् । कमलवनोद्घाटनं कुर्वते ये इत्यत्रात्मगामिफलाभावेप्यदर्शनात् । याजको यजति यजमानो यजेतेत्यत्र परगामित्वात्मगामित्वलाभस्तु शिष्टाचारात् । तस्मादत्र समुदायाक्षेपः ॥

सू०—नाम्निचयुष्मदिचास्मदिचभागैः ॥ तिबाद्येकार्थेषु नामादिषूपपदेष्वेते प्रत्ययास्त्रिभिर्भागैः स्युरात्पयोः । नाम्नि नाम्नि प्रयुज्यमाने चादप्रयुज्यमाने प्रथमः । युष्मदि मध्यमः । अस्मद्युत्तमः ।

(सुबोधिनी-) नाम्निचयुष्मदिचास्मदिचभागैः । अत्र पातशब्दावनुवृत्तौ सप्तम्याविपरिणमयितव्यौ । आङ्वीत्यादेः कर्मणि कर्तरीति चानुवर्तते । नामादिशब्देन विभक्त्यर्थं गृह्यते । प्रकरणात्तिबादयो दशविधा आख्याता गृह्यंते । नामाद्यर्थे कर्तरि कर्मणि च विहितानां तिबादीनां धातोर्यानि नववचनानि तानि त्रिभिर्भागैर्विभज्य प्रयोक्तव्यानि । यथासंख्येन नामार्थे कर्तरि प्रयुक्तेऽप्रयुक्ते च प्रथमो भागः प्रयोक्तव्यः । स पचति । तौ पचतः । ते पचंति । स पचते । तौ पचेते । ते पचंते । अप्रयुक्ते । पचति । पचतः । पचंति । पचते । पचेते । पचंते ।

नामार्थे कर्मणि। ओदनः पच्यते । ओदनौ पच्येते । ओदनाः पच्यंते । अप्रयुक्ते। पच्यते। पच्येते। पच्यंते। पं तु कर्मणि नास्ति। युष्मदर्थे कर्तरि त्वं पचसि। युवां पचथः। यूयं पचथ। त्वं पचसे। युवां पचेथे । यूयं पचध्वे। अप्रयुक्ते। पचसि। पचथः। पचथ। पचसे। पचेथे। पचध्वे। युष्मदर्थे कर्मणि प्रयुक्ते। त्वं दुःखी क्रियसे रागैः। युवां दुःखिनौ क्रियेथे। यूयं दुःखिनः क्रियध्वे। अप्रयुक्ते। क्रियसे। क्रियेथे। क्रियध्वे। अस्मदर्थे कर्तरि प्रयुक्ते अहं पचामि। आवां पचावः। वयं पचामः। अहं पचे। आवां पचावहे। वयं पचामहे। अप्रयुक्ते। पचामि। पचावः। पचामः। पचे। पचावहे। पचामहे। अस्मदर्थे कर्मणि प्रयुक्ते। विरागैः सुख्यहं क्रिये। आवां क्रियावहे। वयं क्रियामहे। अप्रयुक्ते। क्रिये। क्रियावहे। क्रियामहे। त्वया पच्यते मया पच्यते इत्यत्र युष्मदाद्यर्थे आख्यातस्य विधानाभावान्न मध्यमोत्तमौ। प्रथमातिक्रमणे कारणाभावात्प्रथम एव। नन्विह भवान्पचतीत्यत्र मध्यमः प्राप्नोति-भवद्युष्मच्छब्दयोरेकार्थत्वादिति चेन्न। तयोरर्थभेदात्। अलिंगः संबोधनविषयश्च युष्मदर्थः। भवदर्थस्तु लिंगवान्न च संबोधनैकविषय इति। त्वद्रूपः त्वत्कल्पः त्वत्तरः पचसि। मद्रूपः मत्कल्पः मत्तरः पचामीत्यत्र तरादेर्विशेषणत्वेनाकर्तृत्वात् युष्मदस्मदर्थस्यैव कर्तृत्वात् मध्यमोत्तमौ भवतः। अतित्वं प्रियत्वं पचति। अत्यहं मियाहं पचतीत्यत्र पूर्वपदान्यपदार्थयोः प्राधान्येन कर्तृत्वात् युष्मदस्मदर्थयोर्गौणत्वेन कर्तृत्वाभावात् न मध्यमोत्तमौ। एवमत्वं त्वं संपद्यते त्वद्भवतीत्यादावपि च्व्यंते हि संघीभवंति ब्राह्मणा इत्यनुरोधेन प्रकृतेः कर्तृत्वं। विकृतेः कर्तृत्वे तु संघीभवति ब्राह्मण इति स्यात्। अत्रापि युष्मदस्मदर्थयोः विकृतित्वेनाकर्तृत्वं। तदुक्तं॥ "यदा च्व्यर्थे विनिर्दिश्ये भवतो युष्मदस्मदी॥ द्वयोरपि तयोर्योगे न धातोर्मध्यमोत्तमौ॥ १॥ प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने॥ वाचकः प्रकृतेः संख्यां गृण्हाति विकृतेर्न तु॥ १॥" अत एव मृद् घटो भवति ओदनस्तंडुला भवतीति प्रयुज्यते वादिभिः। सह एकोऽर्थो येषां ते तिबाद्येकार्थास्तेषु तिबादीनां यः कर्त्रादिरित्यर्थः। स एव कर्त्रादिरर्थो नामादीनामित्यर्थः। तिबाद्येकार्थेष्विति किं। त्वां पश्यति। त्वया क्रियते। तुभ्यं ददाति॥

(तत्त्वदीपिका-) नाम्नि चेति॥अत्राद्भुवीत्यादेः कर्मणीति कर्त्तरीति वानुवर्त्तते। यावच्छब्दावनुवृत्तौ च सप्तम्यां विपरिणम्येते। तिबाद्येकार्थेष्विति॥तिबादिभिरेकार्थास्तेषु यथासंख्यं दर्शयति। नाम्नि प्रयुज्यमानादित्यादिना। ननु भागैरित्युक्ते कथं त्रय एव भागा लभ्यन्ते न चत्वारः पंच वेति चेत्सत्यं। कापिञ्जलालभनन्यायेनेति गृहाण। तथाहि। कपिंजलानालभेतेति वाक्ये कपिंजलानिति बहुवचनेपि एकस्मिन् द्वयोश्च बहुत्वाभावात्। प्रथमबहुत्वस्य त्रिषु लाभात् त्रय एव गृह्यंते न तु पंचादय इति। एवमिहापि बोध्यं। भवान् पचतीत्यत्र तु भवदर्थयोः समर्थत्वाभावान्न मध्यमः। तथाहि। अलिंगः संबोधन-

विषयश्च युष्मदर्थः भवदर्थस्तु लिंगवान्न च संबोधनैकविषयः । त्वत्तरः पचसि मत्तरः पचामीत्यादौ तरादेर्विशेषणत्वादप्रधानत्वादकर्तृता युष्मदस्मदर्थयोरेव प्रधानत्वात्कर्तृत्वेन मध्यमोत्तमावेव । अतित्वं पचतीत्यादौ तु तथात्वाभावान्न तथा । अत्वं त्वं संपद्यते त्वद्भवतीत्यादौ च्व्यन्ते तु संघीभवंति ब्राह्मणा इत्याद्यनुरोधेन प्रकृतेरेव कर्तृत्वं न विकृतेर्युष्मदर्थस्य । उक्तंच । "यदाच्व्यर्थे विनिर्देश्ये भवतो युष्मदस्मदी । द्वयोरपि तयोर्योगे न धातोर्मध्यमोत्तमौ । प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने । वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्नतु । " मृद् घटा भवंति । ओदनस्तंडुला भवंतीत्येव ।

कर्तरिपं च ॥ चादात् । भू सत्तायां ।

(सुबोधिनी-) कर्तरिपं च । कर्तरि वाच्ये धातोः पं भवति चकारादादपि । पचति आख्यातप्रत्ययेनोक्तत्वात् कर्तरि वाच्ये प्रथमा । ननु भावकर्मकर्तृष्वाद्विधानात् कथं निर्णयः स्यात् । मैवं । प्रयोगान्निर्णयसंभवात् । आस्ते शेते नर इत्यत्र कर्तरि प्रथमादर्शनात् कर्तर्यात् । शय्यते आस्यते नरेणेत्यत्र कर्तरि तृतीयादर्शनात् भावे आत् । चक्रे करिष्यते वा घटं कुलाल इत्यत्र कर्तर्यात् । चक्रे करिष्यते वा घटः कुलालेनेत्यत्र कर्मण्यात् । कर्मणि प्रथमायाः कर्तरि तृतीयायाश्च दर्शनात् । कृषीष्ट कर्तेत्यत्र त्वऽनिर्णय एव । यथा रामाभ्यामित्यत्राऽनिर्णयः ।

मू०—वर्तमानेतिपूतस्अंति सिपूथस्थ मिपूवस्मस् तेआतेअंतेसे आथेध्वेएवहेमहे ॥ वर्त्तमानार्थक्रियावृत्तेर्द्धातोस्तिबादयः प्रत्यया भवंति । एषां संज्ञा लट् ।

(सुबोधिनी—) वर्तमाने तिप्तस्अंति सिप्थस्थ मिप्वस्मस् तेआतेअंते से आथेध्वे एवहेमहे ॥ व्यापारे इति शेषः । व्यापारः क्रिया सा च धातोर्वाच्या । सा त्रिविधा । अतीताऽनागतवर्तमानभेदात् । तत्र वर्तमानक्रियावृत्तेर्द्धातोस्तिबादयो भवंति । ते च द्योतकाः । वर्तमानक्रिया धातुनैवोक्तत्वात् । यदि तु सद्यआदिरित्यतः काले इत्यनुवर्तते । वर्तमाने काले वाच्ये तिबादय इति व्याख्यायते तदा तिबादयो वाचका अपि भवंति । कालस्य धातुनाऽभिहितत्वात् । अथ को वर्तमानः । प्रारब्धापरिसमाप्तो वर्तमानः । भूरस्तीत्यादौ कथं वर्तमानादिः प्रारब्धापरिसमाप्तत्वाद्यभावात् । उच्यते । सृष्टिसंहारश्रुतिप्रामाण्यस्वीकर्तॄणां मतेऽत्राप्यस्ति वर्तमानत्वं । कल्पादौ प्रारब्धायाः स्थितेरपरिसमाप्तत्वात् । तस्थुः पर्वता भविष्यति भूरित्यादौ त्वऽतीतानागतकल्पावाऽऽदाय भूतभविष्यत्ते बोध्ये । क्रियाफलयोर्वाचको धातुः । कालः संख्या कारकं चाख्यातार्थः । तत्र तिबादित्वेन कालोर्थः । तिप्तस्त्वादित्वेन एकत्वद्वित्वबहुत्वरूपाः संख्यार्थाः । आत्त्वेन भावकर्मणी अर्थः । आत्त्वेन पत्वेन च कर्तार्थः तत्र फलस्य कर्मण्यन्वयः । फलाश्रयस्य कर्मत्वात् । व्यापारस्य कर्तर्यन्वयो धातूपात्तव्यापाराश्रयस्य

कर्तृत्वात्। संख्यायास्तु कर्तरि प्रत्यये कर्तर्यन्वयः। कर्मणि प्रत्यये कर्मण्यन्वयः। कालस्य क्रियायामन्वयः। कर्तृकर्मणी क्रियाविशेषणे। क्रिया तु विशेष्येति शाब्दिकमतं। वर्तमानोऽर्थो यस्याः वर्तमानार्था सा चासौ क्रिया चेति शाकपार्थिवादित्वान्मध्यमपदलोपः। वर्तमानक्रिया सा वृत्तिर्यस्य स तथा। तस्मात् तिबित्यादेः समाहारे ऐकपद्यं [illegible] न्यथा समासे त्वष्टादशपदत्वम्॥

(तत्त्वदीपिका—) व[illegible] व्यापारे इति शेषः। व्यापारश्च क्रिया। सा च त्रिविधा अतीतानागतवर्त्त[illegible]। सा च धातुवाच्या इत्याशयेनाह। वर्त्तमानार्थेत्या[illegible]र्तमानः [illegible]ः सा वर्त्तमानार्था सा च सा चासौ क्रिया चेति सा तत्र[illegible]स्य स त[illegible]दित्यर्थः। तिबित्यादेः समाहारे ऐकपद्यं। अन्यथा त्वष्टा[illegible]। तिबाद[illegible]मानक्रियायाः द्योतका एव न तु वाचकास्तस्य धातुनैव लाभात् व[illegible]तु प्रार[illegible]माप्तत्वं। विंशत्यादिवर्षपर्यंतं वेदाध्ययनेपि अधीते इति प्रयोगदर्शन[illegible]विषयि[illegible] लक्षणं तु न भविष्यद्वर्त्तमाने भिन्नत्वं भूतत्वं वर्त्तमानभूतभि[illegible]यत्वमि[illegible]त्तथा [illegible] श्रयदोषः स्यात्। पर्वतास्तिष्ठन्तीत्यत्र तु स्वते[illegible]पे का[illegible]नां रा[illegible]देभेदभिन्नपालनादिक्रियाभेदाद्भूतादिव्यवहारः [illegible]लादिव[illegible]। क[illegible]काले स्थास्यंति। इदानीन्तनराजकाले तिष्ठंति। [illegible]त्रापि [illegible] ऽतीतत्वादिव्यवहारोस्तीति दिक्।

मू[illegible]रि॥ कर्त्रर्थेषु [illegible] चतुर्षु दिप्पर्यंतेषु प[illegible]प् स्यात्।

(सुब[illegible]र्तरि। कर्तरीति न[illegible]यमाख्यातोक्तत्वात्। किंत्वऽनुवृत्तस्य चतुर्ष्विक[illegible]णं। धातोरप्स्य[illegible]र्थेषु चतुर्षु परतः। अपः पित्वमपि तादौ[illegible]ावार्थं। अन्यथा[illegible]यादौ ङित्त्वाद्गुणो न स्यात्॥

(त[illegible] अप्कर्त्तरीति। व[illegible]हितेषु चतुर्षु तिबादिषु।

[illegible]ः॥ नाम्यंतस्य [illegible]र्गुणो भवति।

(सु[illegible]णः। अरेदोना। [illegible] नियमान्नामिग्रहणं तस्य धातोर्विशेषणत्वा[illegible]ः।

(त[illegible]णइति। अरेदोनामिन इति नियमान्नामिग्रहणे ह्रस्य च विशेषणत्वादंतलाभ इत्याशयेनाह। नाम्यन्तस्येति।

मू०—अपित्तादिर्ङित्॥ पकारेतं तादिकं च विहाय अन्यप्रत्ययो ङिद्वत्स्यात्।

(सुबोधिनी-) अपित्तादिर्ङित्। पू इत् यस्य स पित् त आदिर्यस्य सः तादिः पिच्च तादिश्च पित्तादी ताभ्यामन्योऽपित्तादिः। नञिति समासः। ङित् ङिद्वदित्यर्थः। अत्र प-

र्युदासबलात्पित्तादिभिन्नः प्रत्यय एव गृह्यते न धातुः । ननु सादेः कृतांचानेन ङित्त्वं कुतो नेति चेन्नैवं । यङ्नङोर्ङित्करणात् ज्ञापकात् । नानिटिसे इति सूत्रारंभाच्च । अतः परिशेषात्तिवादीनां चतुर्विधानामाख्यातानां तद्धिकरणानां चानेन ङित्त्वं नान्येषां । तेन बिभरांचकारेत्यादावामो न ङित्त्वं ॥

(तत्त्वदीपिका-)अपित्तादिरिति । पू इद्यस्य स पित् त आदिर्यस्य स तादिः पिच्च तादिश्च पित्तादी ताभ्यामन्योऽपित्तादिः नञिति समासः । ङित् ङिद्वदित्यर्थः । पर्युदासात्प्रत्यय एव गृह्यते न तु धातुः । न तु दैपूदापूभिन्नस्य धातोर्ङित्वं । सति ङित्वे आत्स्यात् । ङिदित्यपहाय किदिति तु नोक्तं । वक्त इत्यादौ यजादित्वात्किति संप्रसारणप्रसंगात् । कुरुत इत्यत्र ङित्यद्रुरित्यस्याप्रसह्यं । तादीत्यत्रादिग्रहणं तूत्तरार्थं सिसतासीत्यत्रेव नञ्चानां ग्रहणसंभवात् । सिस्योरिति लिंगान्तयोर्ग्रहणार्थमपि न । तशब्देन विग्रहस्तु व्याख्यानानुसारान्न । सादेः कृतां च ङित्वं तु न । नानिटि से इति सूत्रारंभात् । यङ्नङोर्ङित्करणात् ज्ञापकात् । अतस्तिवादीनां तद्धिकरणानामपि न ङित्वं नान्येषां । तेन बिभरांच कारेत्यादौ नङित्वं । यत्तु आदिशब्दादायोपि गृह्यते तेन गोपायतीत्यादिसिद्धिरिति वासुदेवेनो कं । तद्भ्रमसात् ।

मू०—क्ङित्यद्व्युसि ॥ किति ङिति च परे वृद्धिगुणौ न, द्विर्वचनहेतुके उसि गुणः स्यात् । इति तसि गुणप्राप्तौ अपूनिमित्तो गुणः । भवतः ।

(सुबोधिनी-)क्ङिसद्व्युसि । कूच ङ्च क्ङौ ताविती यस्य स तथा तस्मिन् । अद्व्युसीति विशेषणं द्वित्वनिमित्ते उसि न । अजुहुवुः ॥

(तत्त्वदी०-)संज्ञाफलमाह । क्ङित्यद्व्युसि । कूचङ्च क्ङौताविती यस्य सतथा तस्मिन् । अद्व्युसिइतिविशेषणम् द्विरुक्तधातोर्निमित्तभूतादुसः[illegible] तस्मात्अन्यस्मिन्नित्यर्थः । अतोऽजुहुवुरित्यादौ तादृशस्य उसोऽभावान्न गुणः[illegible] नोक्तमनित्यमित्यनेन अजुहुवुरित्यादौ न गुण इति वासुदेवेनोक्तं । तन्न । आदेः स्वरेपि नोपधा . गुण इति सूत्रेणैवात्र गुणनिषेधे सिद्धे तदर्थ नोक्तमनित्यमित्याश्रणस्य व्यर्थत्वात् ।

मू०—अदे ॥ अतो लोपो भवत[illegible]ारे एकारे च परे । भवंति । भवसि । भवथः । भवथ ।

(सुबोधिनी-) अदे । अच्च एचेति पृथक्पदे अविभक्तिके । अत इ[illegible] वृत्तं । अतो लोपो भवति अति एति च परे । भवंति । पचे । अतः किं । ब्रुवं[illegible]वे । तपरः किं । यांति । [illegible]रै । आख्यातप्रकरणे एवायं विधिस्तेन न स्यादावतिव्याप्तिः ॥

(तत्त्वदीपिका-) अदेइति । अच्च एच अदे लुप्तसप्तमीकम् । अत इति त्वनुवर्त्तते । स्यादावतिव्याप्तिस्त्वाख्यातप्रकरणत्वान्न ।

मू०—ध्मोरा ॥ वमयोः परयोरत आत्वं स्यात् । भवामि । भवावः । भवामः । स भवति । त्वं भवसि । अहं भवामि । युगपत्प्राप्तौ

१ वर्तमाने उत्तमपुरुषैकवचनमेतत् ।

परः। स च त्वं च भवथः। अहं च त्वं च भवावः। अहं च त्वं च स च भवामः।

(सुबोधिनी-) व्मोरा। वृच मृच व्मौ तयोः। अत आत्वं भवति व्मोः। भवामि। भवावः। भवामः। अतः किं। चिनुवः। चिनुमः। आख्यातप्रकरणे एव युगपत्प्राप्तौ परः। स च त्वं च पंडितौ भवथः। अहं च स च त्वं च पंडिता भवाम इत्यत्र त्रयाणां नामाद्यर्थानां कर्तृत्वेनैकदा प्राप्तौ परत्वात् मध्यमोत्तमौ भवतः। उक्तंच "एकदा चेत् क्रियाकालसंबंधप्रतिपादनं॥ धातोर्नामादिषूक्तेषु यः परःस पुमान् भवेत्॥१॥" परत्वं चाभिधायकसूत्रापेक्षया न प्रयोगापेक्षया ग्राह्यं। अस्मदर्थस्यैकत्वेपि समुदायाश्रिता संख्या ग्राह्या। तदुक्तं। "द्वयोर्नाम्नोर्बहूनां वा यदि वाक्ये समुच्चयः॥ नामत्रयाश्रिता संख्या कृतिवाद्योर्विशेषणं॥१॥" स च त्वं च अहं चाहेति विवक्षायां त्वेकशेषो भवति। संख्या तु समुदायाश्रिता॥

(तत्त्वदीपिका-)व्मोराइति। अत्रापि स्यादावपि नातिप्रसंग उक्तयुक्तेः। तेन धनवानित्यादौ नात्वम्। समानाधिकरणनामादिसन्निपाते व्यवस्थार्थमाह। युगपदिति। एकदा प्राप्तः परः पुरुषः प्रथमापेक्षया मध्यमः मध्यमापेक्षया उत्तमः पुरुषो भवतीति यावत्।

सू०-विधिसंभावनयोः यात् याताम् युस्। यास् यातं यात। यां याव याम। ईत ईयातां ईरन्। ईथास् ईयाथां ईध्वं। ईय ईवहि ईमहि॥ विधिः कर्तव्यार्थोपदेशः। संभावनं कल्पनं। तत्र यादादयः। एषां संज्ञा लिङ्।

(सुबोधिनी-) विधिसंभावनयोः यात् याताम् युस्। यास् यातं यात। यां याव याम। ईत ईयाताम् ईरन्। ईथास् ईयाथां ईध्वं। ईय ईवहि ईमहि॥ धातोर्यादादयः प्रत्ययाः स्युः विधिसंभावनयोर्वाच्ययोरित्ययं वाचकतापक्षः। नचात्रपक्षे विध्यादिनाऽर्थेनकर्त्राद्यर्थबाधो विरोधाभावात्।यद्वा विधिसंभावनयोर्वर्तमानाद्धातोर्यादादयः प्रत्ययाः स्युः विध्याद्यर्थस्य विशेष्यस्य प्रकृत्यर्थविशेषणत्वे द्योतकतापक्षोयं। विपूर्वाद्विधधातोरंतर्भावितण्यर्थान्नङ्किरिति भावे किः। विधविधाने इत्यस्मादंतर्भावितण्यर्थाद्वा किः। विधानं वेधनं वा विधिः। अनुष्ठापनं कारणा प्रवर्तनेति यावत्। सा प्रवर्तना श्रुतिवाक्यनिष्ठा। लौकिकवाक्ये पित्रादिवक्तृनिष्ठा। संपूर्वकाद्भवतेश्चौरादिकाद्वा प्रेरणे स्वार्थे वा ञिः। भावे युट् ततः स्त्रियामाप्। संभावना कल्पना। ऊहः कर्तव्योर्थस्तस्योपदेशो विधिः॥

(तत्त्वदीपिका-)विधिसंभावनयोरिति। विधानंविधिः विपूर्वाद्धाधातोर्नङ्कीति किप्रत्ययः। संभाव्यते संभावना। भावे युट्। संपूर्वाद्भवतेश्चौरादिकाद्वा। तयोरर्थमाहविधिरित्यादिना। कर्तव्यःकरणीयोयोऽर्थस्तस्योपदेशः कल्पनसमूहः।तत्रेति। तयोरर्थयोर्वाच्ययोर्द्योत्ययोर्वायादा-

द्योर्भवंतीत्यर्थः। पक्षद्वयस्यापि भाष्ये स्वीकृतत्वात्। तत्राद्यपक्षे त्वित्थमुपपत्तिः विध्यादिनार्थेन कर्त्राद्यर्थे बाधो न जायते। विरोधाभावात्। वर्त्तमानत्वादेरपि तिबादिवाच्यत्वादिविशेषेण कर्त्रादेरपि निरवकाशत्वाच्च। क्रियां प्रति प्रत्ययार्थतया विशेष्यत्वं तु तुल्यमेव। द्वितीयपक्षेत्वेषोपपत्तिः विधिसंभावनयोर्वर्त्तमानाद्धातोर्यादादयःप्रत्ययाःस्युः विध्याद्यर्थस्यविशेष्यस्यप्रकृत्यर्थविशेषणत्वे द्योतकतापक्ष आयाति। एवं च विध्यादेः प्रत्ययार्थत्वं नोचितम्। प्रत्ययार्थत्वे कर्त्रादेरन्यत्र सावकाशत्वेन विध्यादिना बाधःस्यात्।ततश्च यादिभिरभिधानं कर्त्रादेर्भज्येत। ततस्तत्प्रयुक्तैकत्वादिव्यवस्था प्रथमपुरुषादिव्यवस्थाश्चस्युरिति महदनिष्टं स्यात्। यद्यपि निमंत्रणादयोप्यर्थाः पाणिनीये प्रदर्शितास्तथापि तेषु प्रवर्तनात्वस्यैकत्वान्नात्रभेदविवक्षा। उक्तं च वाक्यपदीये "न्यायव्युत्पादनार्थं वा प्रपंचार्थमथापि वा॥ विध्यादीनामपादानं चतुर्णामादितः कृतम्। अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि। तत्रैव लिङ् विधातव्यः किंभेदस्य विवक्षये" ति। प्रवर्तना तु श्रुत्यादिवाक्यकर्त्रीश्वरादिनिष्ठा लौकिकेवाक्ये तु पित्रादिवक्तरि निष्ठा। वेदाध्ययनादौ बालानां पित्रादिप्रयुक्तप्रवृत्तिदर्शनादिष्टसाधनत्वं विध्यर्थइति मतं नादर्त्तव्यं स्वप्रवृत्तेरिष्टसाधनत्वस्यानुमीयमानत्वात्। उदाहरणमाह। शिष्यो गुरुशुश्रूषको भवेदिति। एकशिष्याश्रयागुरुनिष्ठप्रीतिजननानुकूला या तद्विषया प्रेरणेतिविशेष्यपक्षः प्रेरणाविषया एकशिष्याश्रया गुर्वाश्रया प्रीतिजननानुकूला क्रियेति विशेषणपक्षः भवेदसाविति। अत्रैककोटिकसंशयः स्थाणुर्वापुरुषोवेत्यादौ तु सर्वाः कोटयः समत्वेन भासन्ते। अत्रतु वेदवित्त्वावेदवित्त्वयोर्वेदवित्त्वकोटिरेवाधिका।संशयादयमेवविशेषः संभावनायाम्। ब्राह्मणत्वादिहेतोर्व्यभिचारित्वान्न निश्चयः अवेदविदोपि ब्राह्मणा दृश्यन्ते वेदविदः क्षात्रियाश्च। वेदावाप्त्यनुकूलभावनाश्रयएकोऽपरोक्षार्थस्तदाश्रयात्मधारणानुकूला या भावना तद्विषयाब्राह्मणत्वहेतुका संभावना ब्राह्मणत्वहेतुका या संभावना तद्विषया वेदावाप्त्यनुकूलभवनाश्रयपरोऽक्षैकार्थनिष्ठात्मधारणानुकूला भावनेति वा बोधः। एवं भवेदयं बलवान् क्षत्रियत्वादित्यादिबोध्यम्।

सू०—या॥ अतः परो या इः स्यात्। भवेत् भवेतां।

(सुबोधिनी—) या। अविभक्तिको निर्देशः। अतः परो या इः स्यात्। अत। किं। युयात्। तपरः किं। यायात्॥

(तत्त्वदीपिका—) याइति। अनुकार्यानुकरणयोरभेदविवक्षयाऽविभक्तिको निर्देशः आदात्यइरित्यत इरित्यनुवर्त्तते। अन्त्यादेशः षष्ठ्यभावान्न।

सू०—युसइट्॥ अतः परस्य युस इडागमःस्यात्। भवेयुः। भवेः। भवेतं। भवेत।

(सुबोधिनी—) युसइट्। अतः परस्य युस इट् स्यात्। टित्त्वादादौ॥

(तत्त्वदी०—)युसइट् इति। टित्त्वादागमः। अन्यथा इरित्यस्यानुवृत्तौ इट्ग्रहणं न कुर्यात्।

सू०—यामियं॥अतः परो यामियं स्यात्। भवेयं। भवेव।भवेम। शि-

ष्यो गुरुशुश्रूषको भवेत् । विधिः।भवेदसौ वेदवित् । ब्राह्मणत्वात् ।

(सुबोधिनी-) यामियम् । अतः किं । युयां । तपरः किं । यायां ॥

मू०—आशीःप्रेरणयोःतुप् तां अंतु । हि तं त । आनिप् आवप् आमप् । तां आतां अंतां । स्व आथां ध्वं । ऐप् आवहैप् आमहैप् ॥ अप्राप्तप्रार्थनमाशीः । परस्येष्टार्थशंसनं वा । प्रेरणं प्रवर्तनं । तत्र तुबादयः । एषां संज्ञा लोट् ।

(सुबो०-)आशीःप्रेरणयोःतुप् तां अंतु । हि तं त । आनिप् आवप् आमप् । तां आतां अंतां । स्व आथां ध्वं । ऐप् आवहैप् आमहैप् ॥ धातोस्तुबादयःस्युः आशीःप्रेरणयोर्वाच्ययोः । आशीःप्रेरणयोर्वर्त्तमानाद्धातोरिति द्योतकतापक्षः । आशासनमाशीः । आङः शासुइच्छायां ततःक्विप् आत ईत्वं निपातितं षत्वं । प्रपूर्वादीर्गतावित्यस्मात्प्रेरणार्थेऽन्यंताद्भावे युट् । प्रेरणा प्रवर्तना विधिशब्दार्थ एव । आशीश्च प्रेरणा च आशीःप्रेरणे तयोः । आशासनं चाप्राप्तस्यैव संभवतीत्यऽप्राप्तप्रार्थनमाशीः । सा च स्वस्य परस्य च संभवति परस्येष्टार्थशंसनं वा आशीरिदमप्यप्राप्तविषयमेव । यद्यपि यादादितुबादयो न कालविशेषे विहितास्तथापि भविष्यत्कालोऽत्र गम्यते । अतीतवर्तमानयोर्विध्याद्यसंभवात् ॥

(तत्त्वदीपिका-)आशीःप्रेरणयोरिति । आशासनमाशीः । आङः शासु इच्छायाम् । अस्मात्संज्ञायामकर्त्तरीत्यनुवर्त्तमाने स्त्रियां क्तिरित्यधिकारे संपदादेः क्विब्वेति क्विप् अस्मादेव निपातनात्क्विपि आतइः शासेरित्यनेनेत्वं तु परस्मैपदिनो ग्रहणान्न।आशिषीति निर्देशात्क्विलात्परस्य धातोः सस्य षः। प्रेर्यत इति प्रेरणा। प्रपूर्वादीर्गतावित्यस्मादंतर्भावितण्यर्थाद्भावेयुट्। प्रेरणा विधिरेव । आशीश्च प्रेरणा च आशीःप्रेरणे तयोः । तयोरर्थमाह । अप्राप्तेत्यादिना ।

मू०—तुह्योस्तातङ्ङाशिषिवा ॥ भवतु भवतात् । भवतां । भवंतु ।

(सुबोधिनी-)तुह्योस्तातङ्ङाशिषिवा । तुश्च हिश्च तुही तयोः अनन्यार्थं हि ङित्त्वमंत्यादेशं प्रयोजयति । अत्र तु गुणवृद्धिप्रातिषेधे संप्रसारणे चरितार्थत्वात् ङित्त्वस्य नांत्यादेशता । ब्रूतात् । मृष्टात् । उष्टादित्यादि ॥

(तत्त्वदीपिका-) तुह्योरित्यादि। तुश्च हिश्च तुही तयोः । अत्र तातङो ङित्त्वे गुणप्रतिषेधसंप्रसारणाद्यर्थतायां संभवत्प्रयोजनमतोनान्त्यादेशं प्रयोजयति । अनन्यप्रयोजनमेव ङित्त्वमंत्यादेशं प्रयोजयति ।

मू०—अतः ॥ अतः परस्य हेर्लुक् स्यात् । भव भवतात् । भवतं । भवत । भवानि । भवाव । भवाम । अध्ययनायोद्यतो भव सौम्य । आयुष्मान् भवतु भवान् ।

(सुबोधिनी-) अतः। स्थानिवद्भावेन तातङो ङित्वेपि लोपो न ओर्वा हेरित्यतो वेत्यनुवृत्तस्य व्यवस्थितत्वेन स्वीकारात् ॥

(तत्त्वदीपिका-) अतइति।अत्र ओर्वाहेरित्यतो वेत्यस्यानुवृत्तेस्तस्य व्यवस्थितत्वाश्रयणात्स्थानिवद्भावेन तातङो ङित्वेपि न लोपः।आयुष्मानिति। अतिशयितायुःप्राप्त्यनुकूलैकभवदर्थाश्रयात्मधारणक्रिया या तद्विषया शुभाशंसाविषयभूता दीर्घायुःप्राप्त्यनुकूलैकभवदर्थाश्रयात्मधारणक्रियेति वार्थः।यादादितुबादीनां कालविशेषाकथनेपि भविष्यत्कालोबोध्यः। शब्दं कुर्वाणे नरे विरामशंकायां शब्दं कुर्वित्युक्तावपि भाविशब्दविषयत्वात् विधेर्न वर्त्तमानशब्दविषयता।

मू०-अनद्यतनेऽतीते दिप् तां अन्। सिप् तं त। अमिप् व म। तन् आतां अंत। थास् आथां ध्वं। ई वहि महि ॥ अतीतायारात्र्यामद्वयादर्वाग्यावदागामिन्याः प्रथमं यामद्वयं दिवसः स कालः सोऽद्यतनः। नास्त्यद्यतनो यस्मिन्नतीते तत्र दिबादयः। एषां संज्ञा लङ्। दिसिमीनामिकार उच्चारणार्थः।

(सुबोधिनी-)अनद्यतनेऽतीते दिप् तां अन्। सिप् तं त। अमिप् व म। तन् आतां अंत। थास् आथां ध्वं। ई वहि महि ॥ अनद्यतनेऽतीते काले द्योत्ये वाच्ये वा धातोर्दिबादयो भवंति। अस्मिन्नहनीत्यद्यशब्दवाच्यः कियान्कालः। अतीतरात्रेरंतिमं यामद्वयमागामिन्याः प्रथमं यामद्वयं मध्यवर्ती दिवसः स कालोऽद्यशब्दवाच्यः। अद्य भवोऽद्यतनः। त्यतनाविति तनः। अद्यतनकालस्त्रिविधः अतीतोऽनागतो वर्तमानश्च। तत्राद्यतने अतीते भूते सिः। अद्यतने वर्तमाने तिबादिः। अद्यतनेऽनागते लृट्। नास्त्यऽद्यतनो यस्मिन्निति बहुव्रीहिः। यद्वा। अद्यतनादन्योऽनद्यतन इति नञ्तन इति नञ्तत्पुरुषःअन्स्वरे इत्यन् नाम्नो नोलोपशिति नलोपस्तु न। विधानसामर्थ्यात्। तस्मिन् ह्यस्तने काले दिबादिरर्थादपरोक्षे। परोक्षेणादिविधानात् ॥

(तत्त्वदी०-)अनद्यतनेइति। अस्मिन्नहनीत्यद्य। सद्यआदित्वादिदमः अद्यप्रत्ययश्चाहनीत्यर्थे निपात्यते। ताद्धितोक्तत्वात्प्रथमा। अद्यशब्दवाच्यः कियान् काल इत्याह। अतीताया इत्यादि।अतीता गता या रात्रिश्चतुर्यामात्मिका तस्या यद्यामद्वयं ततोऽर्वाकं आगामिन्या रात्रेः प्रथमं यामद्वयं यावद्भवति तावानष्टयामात्मकः कालोऽद्यशब्दवाच्यः। केचित्तु अरुणोदयादारभ्य अरुणोदयपर्यन्तः कालः। अन्येतु सूर्योदयादारभ्य सूर्योदयपर्यन्तं इत्याहुः। लौकिकानां ह्योऽद्य एव इति तत्रैव व्यवहारदर्शनात्। अद्यभवोऽद्यतनः त्यतनाविति तनः अद्यतनश्च कालस्त्रिविधः। अतीतवर्तमानानागतभेदात्। अतीते सिः वर्त्तमानेतिबादिः अनागते स्यप्। नास्त्यद्यतनो यस्मिन्निति बहुव्रीहिः। तस्मिन् ह्यस्तने काले दिबादिरर्थादपरोक्षे। नन्वेवं ह्यस्तनइत्येवास्तु अनागतकालशंकापि नेति चेत्सत्यम्। नञोक्तमनित्यमित्यद्यतनेपि परोक्षेऽपरोक्षेणादिविध्यर्थमिदम्। तेन बहुजगदपुरस्तात्तस्यमत्ताकिलाहामित्यादिप्रयोगाः सिद्धाः। बहुव्रीहिपक्षेद्यतनेऽद्यतनाभावादद्यतने दिबादिप्रसंगाशंका तु न। अद्यतनेऽव्यापकेऽद्यतनस्यव्याप्यस्यसत्त्वात्।

मू०—दिबादावट् ॥ धातोः । अभवत् । अभवतां । अभवन् । अभवः । अभवतं । अभवत । अभवं । अभवाव । अभवाम । ह्योभवत् त्वत्पुत्रः ।

(सुबोधिनी-) दिबादावट् । दिबादाविति सप्तमीनिर्देशादबादिव्यवधानेऽप्राप्तावादावेव पश्चाद्दिबादिः ॥

(तत्त्वदीपिका-)दिबादावडिति। यद्यपिप्रत्ययाधिकारस्तथापिटित्त्वादागमत्वादागमत्वमस्याप्रत्ययत्वेधातोःपरत्वंस्यात्।परत्वेचप्रयोजनाभावाट्टित्त्वं व्यर्थंस्यात्।धातोरितिषष्ठ्यंतानुवृत्तेरागामित्वं तस्यैवदिबादाविति सप्तमीनिर्देशादबादिव्यवधानेऽप्राप्तेरादावेव पश्चादबादिरिति बोध्यम्। न च वचनसामर्थ्याद्व्यवहितेपि भविष्यतीति वाच्यम्। लुप्तविकरणे चारितार्थत्वात्। न च नित्यत्वादबादिनैवादौ भाव्यमिति वाच्यम्। अन्तरंगत्वादट्। अंतरंगत्वं चास्य शब्दस्य मात्रापेक्षत्वात्। अबादेस्तु कर्त्राद्यपेक्षत्वाद्बहिरंगत्वम्। ह्योऽभवदिति। गतदिवसाधिकरणिका युष्मजन्यपुत्राश्रयात्मधारणानुकूलातीता क्रिया।(त्यादाविति वतुः।यादादाविति सुवचम्।) (१)

मू०—परोक्षे णप् अतुस् उस् । थप् अथुस् अ । णप् व म । ए आते इरे । से आथे ध्वे । ए वहे महे । धातोः परोक्षेऽतीते काले णबादयः । एषां संज्ञा लिट् ।

(सुबोधिनी-)परोक्षे णप् अतुस् उस् । थप् अथुस् अ । णप् व म । ए आते इरे । से आथे ध्वे । ए वहे महे । अनद्यतनातीतपरोक्षार्थक्रियावृत्तेर्धातोर्णबादिरिति द्योतकतापक्षः । अनद्यतनातीतपरोक्षार्थे णबादिरिति वाचकतापक्षः । अक्ष्णः परः परोक्षः टाडका इत्यः । यस्य लोपः । अक्षादिंद्रियात्पर इति वा । क्वचिदमाद्यंतस्य परत्वमिति पंचम्यंतस्य परत्वं । परशब्दस्याकारस्योकारो निपातनात् ॥

(तत्त्वदीपिका-) परोक्षे इति । अक्ष्णः परः परोक्षः टाडकाइत्यः । अक्षादिंद्रियात्पर इति वा । क्वचिदमाद्यन्तस्य परत्वमिति पंचम्यन्तस्य परत्वम् । अस्मादेव निपातनात्परशब्दस्यौकारः । अनद्यतनातीतपरोक्षार्थवृत्तेर्धातोर्णबादयः । ननु पचयर्थो विक्लित्यनुकूलो व्यापारसंतानोऽधःश्रवणान्तः क्रियाशब्दवाच्यः तस्य समुदायस्य युगपदुत्पत्त्यभावादाशु विनाशित्वाच्च परोक्षत्वमस्त्येवातो णबादिरस्त्विति वाच्यम् । एकैकव्यापारस्य प्रत्यक्षत्वेन समुदायस्यापि लौकिकानां प्रत्यक्षत्वाभिमानात् यत्र त्वेकोप्यवयवः प्रत्यक्षस्तत्र क्रिया परोक्षा । अनद्यतने किम् । ग्रामान्तरे घटोऽभूत् । अत्र घटभवनपरोक्षमतीतमपि न चिरातीतम् । अतीते किम्। अयं कटं कर्त्ता।अत्र करणस्य भविष्यदनद्यतनत्वेप्यतीतत्वाभावः । परोक्षे किम् । रामो राज्यमचीकरदिति हनुमदुक्तिः ।

मू०—द्विश्च ॥ उक्तार्थणबादियोगे धातोर्द्विर्वचनं ।

(सुबो०-)द्विश्च। णबादीत्यनुवृत्तं सप्तम्या विपरिणम्यते। धातोर्द्विर्वचनं भवति णादौ परे । द्वौ वाराविति द्विः द्वित्रिचतुर्भ्यइति क्रियावृत्तौ सुः । अत्र क्रियावाचकं विना क्रियावृत्तेरसंभवाद्वचनमित्यध्याह्रियते । तच्च कृदंतं । तदपेक्षया धातोरिति कर्मणि

षष्ठी। धातोर्द्वे उच्चारणे कर्तव्ये इत्यर्थः। अनंतरस्येति न्यायेनोक्तणादियोगेनैव द्वित्वं न विदोनवानामिति विहितणादियोगे। अत्र द्विर्वचनं द्विःप्रयोग एव न त्वादेशः। तेन तुतोसेसादौ कृतस्य सस्याभावात् षत्वं न॥

(तत्त्वदीपिका–)द्विश्चेति। द्वौवाराविति द्वित्रिचतुर्भ्यः सुरिति क्रियावृत्तौ सुः। क्रियावृत्तिश्च क्रियावाचकं विना न संभवतीति वचनपरयोगः। अत्र द्विर्वचनंद्विःप्रयोग एव नत्वादेशः। तेन तुतोसेत्यादौ कृतस्याभावात्षत्वं न। अनन्तरस्येति न्यायाडुक्तणादिरेव गृह्यते न तु विदोनवानामित्यादिविहितोपि। तेन वेदेत्यादौ द्वित्वं न।

मू०–सस्वरादिर्द्विरद्विः॥ अनेकस्वरस्य धातोः सस्वराद्योऽवयवोऽद्विरुक्तो द्विर्भवति।

(सुबोधिनी–) सस्वरादिर्द्विरद्विः। अद्विरुक्तः किं। बोभूयिषते॥

मू०–णादिःकित्॥ अपित् णादिः कित्।

(सुबो०–)णादिःकित्। अपित्वादिर्ङिदित्यतोऽपिदित्यनुवृत्तं। ण आदिर्यस्याऽष्टवृशात्मकस्य समुदायस्य स णादिः कित्। किद्वत्कार्यातिदेशोयं। ईजतुः। जुहुवतुः॥

(तत्त्वदी०–)णादिःकिदिति। ण आदिर्यस्य स णादिः। अपित्त्वादिर्ङिदिति सूत्रादपिदित्यनुवर्तते। नन्वत्र किदिति किमर्थम्। पूर्वसूत्रात् ङिदित्यस्यानुवृत्तेरेव सत्त्वादिति चेत्सत्यम्। ईजतुरित्यादौ संप्रसारणं न सिद्ध्येत्। चक्रतुरित्यादौ ङिस्युदुरित्युत्वप्रसंगापत्तेश्च। अथ णादिरित्यत्र ज्वलादेर्णे इति विहितःकुतो न गृह्यते इति चेत्सत्यम्। क्यपृक्किपोः कित्वेन तद्ग्रहणस्य सिद्धत्वात्। यत्तु वासुदेवेन ऋसंयोगान्नेत्यनंतरं क्त्वासेटः किद्वेत्यतोऽनन्तरतोवानुकर्षणात्कचित्संयोगाद्वा कित्त्वम्। तेन ममंथतुः ममथतुरिति रूपद्वयमपि स्वीकृतं तदपाणिनीयत्वादुपेक्षितं। ममंथतुरित्यस्यैवोचितत्वात्।

मू०–आभ्वोर्णादौ॥ पूर्वस्याकारस्य भूशब्दस्य चाकारो णादौ परे।

(सुबो०-) आभ्वोर्णादौ। अश्च भूश्च अभ्वौ तयोःपूर्वस्य हसादिरित्यतः पूर्वस्येत्यनुवृत्तं॥

(तत्त्वदीपिका) आभ्वोर्णादाविति। आ अभ्वोरिति छेदः। अश्च भूश्च अभ्वौ तयोः पूर्वस्य।हसादिरिति सूत्रात् पूर्वस्येत्यनुवर्त्तते। षष्ठीनिर्दिष्टत्वाद्भुवऊकारस्य"नानर्थकेऽलोंत्याविधिरनभ्यासविकारे" इत्यत्र अभ्यासविकारत्वान्नान्त्यस्य निषेधः। यत्तु नो वेत्यतो वेत्यनुवृत्तेर्व्यवस्थयाभावकर्मणोर्भुवोनात्वम्। तेनबभूवेसुखमनुबभूवेइत्युक्तंवासुदेवेन। तन्न। बभूवे अनुबभूवेइतिरूपस्यैवन्याय्यत्वात्। तस्यातपत्रैर्बिभरांबभूवे। विभावरीभिर्बिभरांबभूविरेइत्यादौ तथादर्शनात्। यद्यपि भूकारस्य दीर्घाकारकरणंनिरर्थकंतथाप्यानर्थेत्याद्यर्थं।

मू०–ह्रस्वः॥ पूर्वसंबंधिनोदीर्घस्य ह्रस्वः।

(सुबोधिनी-)ह्रस्वः। पूर्वस्य स्वरस्य ह्रस्वः स्यात्। बभूवेत्यत्र तु आभ्वोरिति कृतस्य दीर्घस्य ह्रस्व इत्यर्थः॥

मू०-झपानांजबचपाः ॥ पूर्वस्य झपानां जबाश्चपाः स्युः । झ ढ ध घ भानां ज ड द ग बाः। ख फ छ ठ थानां च ट त क पाः स्युः।

(सुबोधिनी) झपानांजबचपाः । वर्ग्यो वर्ग्येणेति स्थानैक्या आदेशा भवंति ॥

मू०-भुवोवुक् ॥ भुवो वुगागमो णादौ स्वरे। बभूव। बभूवतुः। बभूवुः।

(सुबोधिनी-) भुवोवुक्। कृताकृतप्रसंगित्वेन नित्यत्वात्प्रथमं वुक् ततो वुको धात्ववयवत्वाद्गुणवृद्धीन।

(तत्त्वदीपिका-) भुवइति। वुकोधात्ववयवत्वाद्गुणवृद्धीन। नचप्रथमंगुणवृद्धिप्रसंगइतिवाच्यम्। कृताकृतप्रसंगित्वेनानित्यत्वात्प्रथमंतस्यैवप्रवृत्तेः।

मू०-क्रादेर्णादेः॥कृ सृ भृ वृ द्रु स्तु श्रु स्रु इत्येतेभ्यः परस्य वसादेर्णादेरिट् न भवति अन्यस्मात् भवतीति नियमादिट् स्यात्। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम। बलिर्बलवान् बभूव।

(सुबोधिनी-) क्रादेर्णादेः। डुकृञ् करणे कृञ् हिंसायामित्युभौ गृह्येते। सृ गतौ। भृ भरणे। डुभृञ्धारणपोषणयोरित्युभौ। वृङ् सम्भक्तौ वृञ् वरणे इत्युभौ। द्रु गतौ। ष्टुञ् स्तुतौ। श्रु श्रवणे। स्रु गतौ। एते क्रादयः। कृ सृ भृ इति त्रयाणामनुदात्तत्वान्नैकस्वरादिति प्रकृत्याश्रये इण्निषेधे प्राप्ते वृङ्वृञोस्तूदात्तत्वात् क्नित इति प्रत्ययाश्रये इण्निषेधे प्राप्ते द्रुस्त्वादीनां चतुर्णां स्वरांतत्वात् स्वरांतादत्वतश्चेतीड्विकल्पे प्राप्ते च नियमः॥

(तत्त्वदीपिका-)क्रादेरिति। डुकृञ्करणे। सृगतौ। डुभृञ्धारणपोषणयोः। वृञ्वरणे। द्रुगतौ। स्रुप्रश्रवणे। ष्टुञ्स्तुतौ। एतेक्रादयः। नियमादिति। विध्यभावादिडभावेसिद्धे सत्यारंभोनियमायभवतीतिनियमः।

मू०-आशिषि यात् यास्तां यासुस्। यास् यास्तं यास्त।यासं यास्व यास्म। सीष्ट सीयास्तां सीरन्। सीष्ठास् सीयास्थां सीध्वं। सीय सीवहि सीमहि॥ धातोराशिषि यादादयः। एषां संज्ञा लिङ्।

(सुबोधिनी-) आशिषि यात् यास्तां यासुस्। यास् यास्तं यास्त। यासं यास्व यास्म। सीष्ट सीयास्तां सीरन्। सीष्ठास् सीयास्थां सीध्वं। सीय सीवहि सीमहि॥ धातोर्यादादय आशीर्वादे वाच्ये। यद्वा। प्रार्थ्यमानक्रियावृत्तेर्धातोरिति वा॥

(तत्त्वदीपिका-) आशिषीति। स्वस्यपरस्यचेष्टार्थस्यशासनमाशीः। तस्यांवाच्यायां यादादयः। यद्वाप्रार्थनप्रक्रियावृत्तेर्धातोर्यादादयः।

मू०–आशीर्यादादेःपंकित्॥भूयात्। भूयास्तां। भूयासुः भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म। स श्रीमान् भूयात्।

(सुबोधिनी-) आशीर्यादादेः पंकित्। ननु ङित्त्वेनैव गुणवृद्धिनिषेधः सिद्ध इथिचेन्न।इज्यात्सुप्यादित्यादौ संप्रसारणार्थं जागर्यादित्यादौ जागर्तेरिति गुणातच किद्वचनं।

(तत्त्वदीपिका–) सश्रीमानिति । एकतदभिन्नाश्रयाश्रीमदनुकूलाभवनाशंसना। आशंसाविषयाभवनक्रियावेतिबोधः।

मू०-श्वस्तने ता तारौ तारस्। तासि तास्थस् तास्थ। तास्मि तास्वस् तास्मस्। ता तारौ तारस्। तासे तासाथे ताध्वे। ताहे तास्वहे तास्महे॥ श्वोभाविन्यर्थे तादयः। एषां संज्ञा लुट्।

(सुबोधिनी–) श्वस्तने ता तारौ तारस्। तासि तास्थस् तास्थ। तास्मि तास्वस् तास्मस्। ता तारौ तारस्। तासे तासाथे ताध्वे। ताहे तास्वहे तास्महे। आगामिनि दिने श्वोऽव्ययं। श्वोभवः श्वस्तनः कालस्तस्मिन्वाच्ये धातोस्तादयः। यद्वा। श्वस्तने व्यापारे वर्तमानाद्धातोरिति वा॥

(तत्त्वदीपिका–) श्वस्तनेइति । अद्यतनदिनातिरिक्तागामिदिनेश्वःशब्दोवर्त्तते। तत्रभवःश्वस्तनःकालस्तस्मिन्वाच्येधातोस्तादयः।

मू०–सिसतासीस्यपामिट्॥ भविता। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः। श्वो भविता राज्यभारः कुमारस्य।

(सुबोधिनी–) सिसतासीस्यपामिट्। धातोरित्यनुवृत्तं॥

(तत्त्वदीपिका–)श्वोभवितेति। चिरागामिदिनाधाराएकराज्यभाराभिन्नाश्रयकागामिकालभाविनीआत्मधारणानुकूलाक्रियेत्यर्थः।

मू०–त्यादौभविष्यतिस्यप्॥ धातोर्भविष्यति काले स्यप्रत्ययो भवति तिबाद्यष्टादशसु परतः। एषां संज्ञा लृट्। भविष्यति। भविष्यतः। भविष्यंति। भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः। कल्की धर्मपालको भविष्यति॥

(सुबोधिनी–)त्यादौ भविष्यतिस्यप्। तिरादिर्यस्य तस्मिन् भविष्यत्यर्थे वर्तमानाद्धातोः स्यप्रत्ययो भवति त्यादौ परे इति भविष्यत्त्वं द्योत्यं। यद्वा धातोः स्यःभविष्यति काले वाच्ये तिबादौ परे। भविष्यतीति शत्रंतात्सप्तमी॥

(तत्त्वदीपिका–)त्यादौभविष्यतीति।तिपआदिर्यस्यसत्यादिस्तस्मिन्स्याद्विशिष्टत्यादिवाच्यं भविष्यत्त्वमितिद्योतयन्नाह। धातोरित्यादि। शतृशानयोरपितिप्तेवादितिदेशात्स्यप्। तेन यक्ष्यन् यक्ष्यमाणः इत्यादिसिद्धं।

मू० स्यप्क्रियातिक्रमे॥ क्रियाया अतिक्रमे कुतश्चिदनिष्पत्तौ सत्यां स्यप्प्रत्ययो भवति दिबादिषु परतः। एषां संज्ञा लृङ्। यदि सुवृष्टिः सुराज्यं चाभविष्यत् तदा सुभिक्षमभविष्यत्। अभविष्यतां। अभविष्यन्। अभविष्यः। अभविष्यतं। अभविष्यत। अभविष्यं। अभविष्याव। अभविष्याम।

(सुबोधिनी–) स्यप्क्रियातिक्रमे। क्रियाया अतिक्रमः अनिष्पत्तिः असिद्धिरित्यर्थः भविष्यतीत्यनुवृत्तं उत्तरसूत्राद्भूते इति च। भूते भविष्यति चार्थे वर्तमानाद्धातोर्दिबादिर्भवति। क्रियाऽनिष्पत्तौ गम्यायां दिबादौ च परे स्यप् भवति। यद्वा। धातोर्भूते भविष्याति चार्थे वाच्ये दिबादिर्भवति। तस्मिंश्च परे स्यप् क्रियातिक्रमे गम्ये॥

(तत्त्वदीपिका–) स्यप्क्रियातिक्रमइति। क्रियायाअतिक्रमःअनिष्पत्तिःअसिद्धिरितियावत्। भूतत्वभविष्यत्त्वंचानुक्तमपिपरिशेषाल्लब्धम्। यदिसुवृष्टिरिति। सुवृष्ट्याश्रयात्मधारणानुकूलाभूताभविष्यन्तीवायाक्रियातदभावप्रयुक्तासुभिक्षाश्रयात्मधारणानुकूलायाः क्रियायाअसिद्धिः। क्रियातिक्रमेकिम्। सुवृष्टिरभूत्। सुभिक्षमभूत्। सुवृष्टिर्भविष्यतिसुभिक्षंभविष्यति। दिबादौकिम्। कृष्णंनमेच्चेत्सुखंयायात्। कर्त्रादिकमाख्यातवाच्यम्। कालस्तुधातोराख्यातस्यवायस्तुविकरणत्वादनर्थकत्वमेव। एवं त्यादावपि सिरपि। अत्रात्यादौ भविष्यतीत्यतः स्यन्ननुवृत्तिसंभवे स्यन्ग्रहणं शत्रादावपि विधानार्थम्। तेन करिष्यन् करिष्यमाण इत्यादिसिद्धम्।

मू०–भूतेसिः॥ धातोर्भूतमात्रे काले सिः प्रत्ययो भवति दिबादिषु परतः। एषां संज्ञा लुङ्।

(सुबोधिनी–) भूतेसिः। अभूत इति भूतः। अकर्मकत्वात्कर्तरिक्तः। भूतसामान्याथ वर्तमानाद्धातोर्दिबादिर्भवति। यद्वा। धातोः परः भूतसामान्ये वाच्ये दिबादिर्भवति तस्मिंश्च परे सिप्रत्ययो भवति। सिसहितस्य दिबादेर्भूतसामान्योर्थः। अबादिसहितस्य तु भूतविशेषोऽनद्यतनोऽपरोक्षोर्थः॥

(तत्त्वदीपिका–) भूतेसिरिति। अभूदितिभूतः अकर्मकत्वात्कर्त्तरिक्तः। भूतसामान्ये सिरित्याह भूतमात्रे इति। तथा च सिविशिष्टदिवादेर्भूतसामान्यमर्थः अबादिविशिष्टस्य तु भूतविशेषाद्यतनेऽपरोक्षः भूतानद्यतनपरोक्षेणबादिः।

मू०--दादेःपे॥ पे परे अपिद्दाधास्थाइणूभूपिबतिभ्यः परस्य सेर्लोपः

(सुबोधिनी-) दादेःपे। दा आदिर्यस्य स दादिस्तस्मात्सेर्लोपः पे परे। डुदाञ् दाने। दाण् दाने। दो अवखंडने इत्येतेषां दाशब्देन ग्रहणं। दाप् लवने दैप् शोधने देङ् पालने। एषां तु लक्ष्यानुसारान्न ग्रहणं। डुधाञ् धारणपोषणयोः। ष्ठा गतिनिवृत्तौ। इण् गतौ। भू सत्तायां। पा पाने॥

(तत्त्वदीपिका-) दादेःपेइति । दाआदिर्यस्य दादिस्तस्या अपिदिति दाप्लवनेदैपशोधने एता विहायएतयोस्त्यागस्तु लक्ष्यानुसारेण। डुधाञ् धारणपोषणयोः। ष्ठा गतिनिवृत्तौ इणु गतौ भू सत्तायाम् पा पाने एभ्यः सेर्लोपः लोपाद्ह्रस्वादलोपेनुवर्त्तते । नोवेत्यतो व्यवस्थितत्वावृत्तेश्शादीनांवा । शो तनूकरणे । छोछेदने । षोन्तकर्मणि । घ्रा गंधोपादाने । धेट् पाने एषां सेर्वालोप इत्यर्थः ।

मू०-शाछासाघ्राधेटांवा ॥

(सुबोधिनी-) शाछासाघ्राधेटांवा । एभ्यः सेर्वा लोपः । शो तनूकरणे । छो छेदने । षो अंतकर्मणि । घ्रा गंधोपादने । धेट् पाने ॥

मू०--भुवःसिलोपेअयङ्लुकिगुणोन ॥ अभूत् । अभूतां ।

(सुबोधिनी-) भुवःसिलोपेअयङ्लुकिगुणोन । भुवो गुणो न सिलोपे सति । यङि लुकि तु भुवो गुणो भवति सिलोपे । प्रकृतिग्रहणे यङ्लुगंतस्यापि ग्रहणमिति परिभाषया गुणनिषेधे प्राप्ते विधिः । अभूत् । अबोभूत् ॥

(तत्त्वदीपिका-) भुवइति नानिटि सेइत्यतो नेत्यनुवृत्तेराह भुव इति । अयङ्लुकीति । यङ्लुकि तु अबोभीदित्यत्र सिलोपोपि गुणे भवत्येव ।

मू०-भुवःसिलोपेस्वरेवुक् ॥ अभूवन् । अभूः । अभूतं । अभूत । अभूवं । अभूव । अभूम ।

(सुबोधिनी-) भुवःसिलोपेस्वरेवुक् । भुवो वुगागमः स्वरे परे सिलोपे सति ॥

मू०-माङिसिरेव ॥ स्मसहितेदिवादिर्वा ॥

(सुबोधिनी-)माङिसिरेव । माङ्शब्दप्रयुज्यमाने धातोर्दिवादिपरः सिरेव भवति सर्वेषामाख्यातानांविषये ॥ स्मसहितेदिवादिर्वा ॥ स्मोत्तरे माङि प्रयुज्यमाने धातोर्दिवादिर्वा । पक्षे भूते सिः । सर्वलकारविषये लङ्लुङावित्यर्थः ॥

(तत्त्वदी०-)माङिसिरिति ।मेट इत्यत्र मे इतियोगं विभज्यसिरिति धातुवृत्त्याह माङीति। सिरेव सिसहितो दिवादिरित्यर्थः । स्मयुक्ते माङि तु विकल्पेन दिवादिः केवलः सिसहितश्च पक्षे। न च भूतेसिरित्यनेनैव सिर्विहितः पुनः किमनेनेति चेत्सत्यम् । कालान्तरेपि विधानार्थमेतत् । तेन माङ्योगे सर्वलकारविषये लुङेव भवति ।

मू०-मेटः ॥ माङ्योगे अटो लोपः । मा भवान् भूत् । मास्म भूत् । मा स्म भवत् ।

(सुबोधिनी-) मेऽटः ॥ लोपइत्यनुवृत्तं । माशब्दे प्रयुज्यमाने सत्यटो लोपः ॥

(तत्त्वदीपिका- मेटइति । मे अट इति छेदः लोप इत्यनुवर्त्तते । मेकिम् । नाभवत् । अट इति किम् । मा भभूत् । अस्य लोपोन ।

मू०-भूप्राप्तावात्वान् ॥ भवते ।

(सुबोधिनी) भूप्राप्तावात्वान्। आद्विद्यते यस्य स आत्वान् आत्मनेपदीत्यर्थः॥
(तत्त्वदीपिका–) भूप्राप्तावात्वानिति। आत विद्यते यस्येति आत्वान्

मू०-आदाथईः॥ अतः परस्यात आथश्चात ईः भवति। भवेते। भवंते। भवसे। भवेथे। भवध्वे। भवे। भवावहे। भवामहे। भवेत। भवेयातां। भवेरन्। भवेथाः। भवेयाथां। भवेध्वं। भवेय। भवेवहि। भवेमहि। भवतां। भवेतां। भवंतां। भवस्व। भवेथां। भवध्वं। भवै।। भवावहै। भवामहै। अभवत। अभवेतां। अभवंत। अभवथाः। अभवेथां। अभवध्वं। अभवे। अभवावहि। अभवामहि। बभूवे। बभूवाते। बभूविरे। बभूविषे। बभूवाथे।

(सुबोधिनी-) आदाथईः। अत इत्यनुवृत्तं। आच्च आच्च आदात् तस्य। आति आतां आथे आथां इत्येतेषां टिं विहायानुकरणं। अतः परस्य आथश्चाकार ईर्भवति। एधेते। एधेथे। एधेतां एधेथां॥

(तत्त्वदीपिका–) आदाथ ईरिति। आ आदाथईरिति छेदः आच्च आच्च आदात्। तस्य आते आतां। आथे आथाम्। एषां आतोतः परस्यईर्भवति। आकिम्। अन्त्यस्य मा भूत्। तपरः किम्। गाते। अन्तरंगत्वादयः सवर्णदीर्घे कृते पुनः सवर्णदीर्घः।

मू०–नामिनोर्ध्वितुर्णांधोढः॥ नाम्यंताद्धातोः परस्य सीध्वंलुङ्लिटां धस्यढः।

(सुबोधिनी) नामिनोर्ध्वितुर्णांधोढः नामिइति धातोर्विशेषणत्वेन तदंतविधिः॥

मू०-सेटोहलाद्वा॥ बभूविढ्वे। बभूविध्वे। बभूवे। बभूविवहे। बभूविमहे। भविषीष्ट। भविषीयास्तां। भविषीरन्। भविषीष्ठाः। भविषीयास्थां। भविषीढ्वं भविषीध्वं। भविषीय। भविषीवहि। भविषीमहि। भविता। भवितारौ। भवितारः। भवितासे। भवितासाथे। भविताध्वे। भविताहे। भवितास्वहे। भवितास्महे। भविष्यते। भविष्येते। भविष्यंते। भविष्यसे। भविष्येथे। भविष्यध्वे। भविष्ये। भविष्यावहे। भविष्यामहे। अभविष्यत। अभविष्येतां। अभविष्यंत। अभविष्यथाः। अभविष्येथां। अभविष्यध्वं। अभविष्ये। अभविष्यावहि। अभविष्यामहि। अभविष्ट। अभविषातां।

(सुबोधिनी–) सेटोहलद्वा। सेटो हयवरलात्परेषां सीध्वंलुङ्लिटां धस्य वा ढः॥

मू०— आतोंतोऽदनतः ॥ आतो अंतोऽद्भवत्यकारादुत्तरस्य न । अभविषत । अभविष्ठाः । अभविषाथां ॥

(सुबोधिनी-) आतोंतोदनतः । अंते अंतु अंता तेषां वचनानां टिं विहाय प्राग्भावस्यानुकरणं । आदिति तु अंत्यानां संज्ञेत्युक्तं । आत्संबंधिनोऽनकारात् परस्यातो अद्भवति । आतः किं । युवंति । अनत इति किं । एधंते । तपरः किं गाते ॥

(तत्त्वदीपिका-)आतोन्तोदनतइति । आतइत्यात्मनेपदस्य नत्वादन्तशंका । अनत इति प्रतिषेधात् । तपरः किम् । गाते । गाअन्ते इतिस्थिते अन्तरंगत्वादयः सवर्णदीर्घे पश्चात् । अनत इति पर्युदासो लाघवात् प्रसज्यप्रतिषेधेत्वनन्वितसमासो वाक्यभेदश्चाश्रितः स्यात् ।

मू०—ध्वे सलोपः ॥ अभविढ्वं । अभविध्वं । अभविषि । अभविष्वहि । अभविष्महि । चिती संज्ञाने ।

(सुबोधिनी) ध्वेसिर्लोपः । ध्वे प्रत्यये परे सिप्रत्ययस्य लोपः । चिती संज्ञाने । सम्यग् ज्ञानं संज्ञानं ॥

मू०—उपधायालघोः ॥ धातोरुपधाया लघोर्नामिनो गुणः । चेतति ।

(सुबोधिनी-) उपधायालघोः । गुण इत्यनुवृत्तं । ह्रस्वं लघु ॥

(तत्त्वदीपिका-) उपधाया लघोरिति । गुण इत्यनुवृत्तेर्नामिन इति लभ्यते । उपधायाः किम् । भिनत्ति । लघोः किम् । ऊहते ।

मू०—पूर्वस्यहसादिःशेषः ॥ पूर्वस्यादिर्हसः शिष्यते अन्ये हसा लुप्यंते । चिचेत । चिचेतिथ ।

(सुबोधिनी-) पूर्वस्यहसादिःशेषः । आदिश्चासौ हसश्चेति विशेषणस्याप्यनेन परनिपातो ज्ञाप्यते ।

(तत्त्वदीपिका-) पूर्वस्य हसादिरिति । हस आदिरिति छेदः । हस इति लुप्तप्रथमान्तरम् ।

विद्यमानात्

मू०— सेः ॥ सिशब्दात्परयोर्दिस्सिपोरीट् ।

(सुबोधिनी) सेः । अस्तेरीट् इत्येतदनुवृत्तं । अस्तेरिति सेर्विशेषणं विद्यमानात् सिप्रत्ययात् परयोर्दिस्योरीडागमः । विद्यमानात्किम् । अद्रात् । अत्र प्रत्ययलक्षणेन सेःपरत्वमस्ति विद्यमानादिति विशेषणान्नेट् ॥

(तत्त्वदीपिका-) सेरिति । अत्रास्तेरीडिति सूत्रात् पदद्वयमप्यनुवर्तते । पूर्वपदन्तु सेर्विशेषणम् । तेन विद्यमानात्सेरीति लब्धम् । अन्यथा अद्रादित्यत्र प्रत्ययलक्षणेन सिरीट्प्रसंगः स्यात् ।

मू०—इटईटि ॥ इटः परस्य सेर्लोपः ईटि । अचेतीत् । अचेतिष्टां ।

(सुबोधिनी-) इटईटि । सेरिति लोप इति चानुवृत्तं । लुङि अचेतिस् ईडित

स्थिते। सेर्लोपः। सिलोपो दीर्घे सिद्धो वक्तव्यः। दीर्घे कर्त्तव्ये सिलोपःसिद्धो वाच्यो नत्वसिद्धः। अचेतीत्। इटः किम्। अहार्षीत्। ईटि किम्। अचेतिष्टाम्॥

मू०-स्याविदः॥सेरातो विदश्च परस्यान उस् भवति। अचेतिषुः। च्युतिरासेचने। च्योतति। च्योतेत्। च्योततु च्योततात्। अच्योतत्। चुच्योत। च्युत्यात्। च्योतिता। च्योतिष्यति। अच्योतिष्यत्।

(सुबोधिनी-) स्याविदः। सिश्च आश्च विद् च एषां समाहारः स्याविद् तस्मात् एभ्यः परस्यान उस् स्यात्। अत्राऽप्यस्तेरित्यनुवृत्त्य विद्यमानात् सेः परस्यान इति व्याख्यानान्नेह। अभूवन्। अदुः। अविदुः। च्युतिर् आसेचने। आसेचनमार्द्रीकरणम्। इरितीरितोवेति विशेषणार्थः॥

(तत्त्वदीपिका-) स्याविद इति। सिश्च आश्च विदश्च एतेषां समाहारः स्याविद् तस्मात्। अत्र वाक्यत्रयं बोध्यम्। सेत्याद्यम् तत्र प्रत्ययाप्रत्ययन्यायेन प्रत्ययएव गृह्यते। विकरणव्यवधानेन धातोः परस्यानोऽसंभवात्। अत्राप्यस्तेरित्यनुवर्त्य विद्यमानात्सेरितिव्याख्येयम्। तेनाभूवन्नित्यत्र प्रत्ययलक्षणेन सेः परस्याप्यनोऽविद्यमानत्वान्नो सादेशः। आ इति द्वितीयं वाक्यम्। अत्र सिग्रहणं नानुवर्त्तते। यद्यनुवर्त्तते तर्हि प्रत्ययलक्षणेन आदन्तादेव सेरन्। उसस्यान्नान्यस्मादिति नियमः स्यात्। तथाचानद्यतने न स्यात्। तेन विकल्पः फलितः। अयुः अयान्। विद इति तृतीयम् अत्राप्यनद्यतने विकल्पेन। भूतमात्रे तु सिरित्यनेनैव सिद्धम्। अत्राहुः। अत्र सिविद् इति सूत्रणीयम्। तत आत इति सूत्रणीयम्। ततो नवाविति। इत्थं वाकारग्रहणं न कर्त्तव्यम्। इति लाघवम्। एवं कुतो न कृतमिति चिंत्यमिति॥ अत्रेदमवधेयम्। एकमात्रालाघवाय योगविभागस्यानिष्यमाणत्वेनोपेक्षणीयत्वात्। अतो न तथा कृतमिति विभाव्यम्। आसेचने इति॥ सेचनमार्द्रीकरणं। आङीषदर्थेऽभिव्याप्तौ च।

मू०-इरितोवा॥ इरितो धातोर्वाङ् प्रत्ययो भवति पे। सेरपवादः। अच्युतत्। अच्योतीत्। श्च्युतिर् क्षरणे। श्च्योतति श्च्योतेत्। श्च्योततु श्च्योततात्। अश्च्योतत्।

(सुबोधिनी-) इरितोवा। इरित् यस्य स तस्मात् इरितो धातोर्वाङ्। भूतमात्रार्थे दिबादौ पे सेरपवादः। लित्पुषादेरित्यतोऽङ् इत्यनुवृत्तं॥

(तत्त्वदीपिका-) इरितोवेति। इर् इत् यस्य स इरित् तस्मात्। सेरपवाद इति भूतमात्रार्थे दिवादौ पे इत्यपि बोध्यम्। तेन अवेवेकभूतार्थत्वेपि न। रुणद्धीत्यत्र दिवादिपरत्वाभावान्न। न चात्र भूतार्थे ताभावादेवाप्राप्तिरिति वाच्यम्। वर्त्तमानसमीप इत्यनेन भूतेपि तिवादिविधानात्। अरुद्धेत्यत्र यत्वाभावात्।

मू०-नशसात्खपाः॥ पूर्वशसात्पराः खपाः शिष्यंते न शसाः।

चुश्च्योत। श्च्युत्यात्। श्च्योतिता। श्च्योतिष्यति। अश्च्योतिष्यत्। अश्च्युतत्। अश्च्योतीत्। यकाररहितोप्ययम्। श्चोतति। श्चोतेत्। श्चोततु श्चोततात्। अश्चोतत्। चुश्चोत। श्चुत्यात्। श्चोतिता। श्चोतिष्यति। अश्चोतिष्यत्। अश्चुतत्। अश्चोतीत्। मन्थ विलोडने। मंथति। मंथेत्। मंथतु मन्थताद्वा। अमंथत। न लोप इति नलोपे प्राप्ते।

(सुबोधिनी–) नशसात्खपाः। शस् प्रत्याहारः। मंथ विलोडने क्र्यादावपि।

(तत्त्वदीपिका–) नशसादिति। शसःप्रत्याहारः खपानां शेषत्वोक्तेः शसानां निषेध इत्याह। नशसाइति। यकाररहितइति। मधुश्चुतं घृतमिव सुपूतमिति प्रयोगश्चानुकूलः। मंथविलोडने। हिंसासंक्लेशनयोरनपीत्येके।

मू०–ऋसंयोगाणादिरकित्। ममंथ। ममंथतुः।

(सुबोधिनी-)ऋसंयोगाणादिरकिदिति। इह ऋसंयोगान्नेति मूलसूत्रं तत्र णादिः। किदित्यनुवृत्तं ऋश्चसंयोगश्चानयोः समाहारः ऋसंयोगं तस्मात् णादिः किन्न। जजरतुः। यादादौ कित्वात्॥

(तत्त्वदीपिका–)ऋसंयोगादिति। ऋश्च संयोगश्च ऋसंयोगं तस्मात्। णादिः किदिति पूर्वसूत्रमनुवर्त्तते कित्वाभावात्संप्रसारणाभावोपि कित्वाविधानात् ङित्वमपि न। अत्र केचित्। अर्ति प्रश्लिष्य आरतुरित्यादिसिद्धमित्याहुः। अन्ये तु ऋ अतुरिति स्थिते रइत्यत्वे ऋ अरिति च कृते पूर्ववद्ग्रहणेन आभ्वोरित्यात्वे आरतुरिति। अत्रादिग्रहणमनुवर्त्य तंत्रेण द्वितीयवाक्यार्थः। ऋदंतात्संयोगादेर्णादिरकित्। तेन सस्मरतुरित्यादि। अथ कथं सस्मरतुरितिचेत्। नञोक्तस्यानित्यत्वात्। अत्र ऋहसादित्येव सुवचम्। ऋश्च हसश्च ऋहसं तस्मात्। एवं संयोगान्तस्य लोप इत्यत्र हसान्तस्य लोप इत्यस्यैव न्याय्यत्वम्। हसावन्ते यस्येति विग्रहः हस्य वर्गचतुर्थ इति। स्थानेन्तरतम इत्यनेन घोषवत्वादिगुणवतो हस्य तादृशो वर्गचतुर्थ एव। एतच्चानधीतं ग्रंथांतरैर्दुर्ज्ञेयं।

मू०–नोलोपः॥ धातोर्हसांतस्योपधाभूतस्य नकारस्य लोपः किति परे। पूजार्थांचतेर्न। निरुपपदात् कुञ्चेः क्विपि न। मथ्यात्। मंथिता। मंथिष्यति। अमंथिष्यत्। अमंथीत्। कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः।

(सुबोधिनी–) नोलोपः। मथ्यात॥

मू०–इदितोनुम्॥ इदितोधातोर्नुम्। कुंथति। कुंथेत्। कुंथतु कुंथताद्वा। अकुंथत्।

(सुबोधिनी-) इदितोनुम्। इत् इयस्य स इदित् तस्य नुम् स्यात्॥

मू०—कुहोश्चुः ॥ पूर्वस्य कवर्गहकारयोश्चुत्वं भवति हस्यवर्गचतुर्थः। चुकुंथ।

(सुबोधिनी-) कुहोश्चुः। पूर्वस्येत्यनुवृत्तं। कुश्च हच कुहौ तयोःसंवारनादधोषमहाप्राणप्रयत्नस्य हस्यताहश एव वर्गचतुर्थो भवति ॥

मू०—इदितोनलोपोन ॥ कुंथ्यात्। कुंथिष्यति। अकुंथिष्यत्। अकुंथीत्। चुबि वक्रसंयोगे। चुम्बति। षिध गत्याम्।

(सुबोधिनी—)इदितोनलोपोन। इदितोधातोर्नस्य लोपो न भवति। नोलोप इत्यस्यापवादः। षिधगत्यां। अयमुदिदित्येके ॥

(तत्त्वदीपिका—) इदितो नलोपोनेति। इदं च नोलोप इत्यत्र नेवित्यतो वेत्यस्यापकृष्टस्य व्यवस्थितत्वाल्लभ्यते। नचेदितोनुम्विधिसामर्थ्यादेव लोपोनेतिवाच्यम्। नंदतीत्यादावकिति तस्य चरितार्थत्वात्। षिधगत्यामिति। काश्यपादिभिरयमुदिदुक्तः। माधवादिभिस्तु वृत्तिस्वरसादनुदिदेव स्वीकृतः।

मू०—आदेःष्णःस्नः ॥ धात्वाद्योः षकारणकारयोः सकारनकारौ भवतः। सेधति। सेधेत्। सेधतु सेधताद्वा। असेधत्। सिषेध सिध्यात्। सेधिता।

(सुबोधिनी-) आदेःष्णःस्नः। षूच णूच ष्ण् तस्य ष्णः सच् नश्च स्नः। धातोः किं। षट्। आदेः किम्। लषति। अणाति। षोपदेशानाह। "सेक् सृप्सृ स्तृञ् सृज् स्तृस्त्यान्ये दंत्याजंतसादयः ॥ एकाचः षोपदेशाः ष्वष्क् स्विद् स्वद् स्वंज् स्वप् स्मिङः॥ १॥"दंत्यश्च अच्च दंत्याचौ तौ अंते अव्यवहितौ यस्य स दंत्याजंतः दंत्याजंतश्चासौ सश्च दंत्याजंतसः दंत्याजंतस आदिर्येषां धातूनां ते दंत्याजंतसादयः। दंत्यांतसादयोऽजंतसादयश्चैकाचः,एकस्वरा धातवः षोपदेशाः। कथंभूताः। सेकृ गतौ। सृप्लृ गतौ। सृ गतौ। स्तृञ् आच्छादने। सृज् विसर्गे। स्तॄञ् आच्छादने। स्त्यै शब्दसंघातयो। एभ्यो अन्ये। उक्तलक्षणस्यातिव्याप्तिं वारयितुमिदं विशेषणम्। पुनः कथंभूताः। ष्वष्क गतौ। ञिष्विदा गात्रप्रक्षरणे। ष्वद आस्वादने। ष्वंज परिष्वंगे। ञिष्वप् शये। स्मिङ् ईषद्धसने एतैः सहिताः। एकाचः किम्। सोसूच्यते। चुरादावदंतोयं। दंत्याजंतेति किम्। चुस्कुंदे। दंत्यः केवलदंत्यो न तु दंतोष्ठजोपि। ष्वष्कादीनां पृथक्ग्रहणात्। तेन स्वाद आस्वादने। इत्यस्यासिस्वददित्यादौ षत्वं न। णो[illegible] अनर्द नाटि नाथ नाध नंद नक्क नॄ नृतः। नर्द शब्दे। नट अवस्यंद[illegible] नटनृत्ताविति घटादिस्तु नेह गृह्यते। नाटीत दीर्घनिर्देशात्। नाथृ[illegible]ौ टुनदि समृद्धौ। नक्क नाशने। नॄ नये। नृती गात्रविक्षेपे। ए[illegible]न्ना णोपदेशाः।नाधृ नंद नॄ इति त्रयाणां केचिण्णोपदेशतामाहुः।

[illegible]ा—) आदेरिति। षृचणच ष्णूतस्य। स नश्च स्नः।

मू०-प्रादेश्चतथातौसुनमाम् ॥ प्रादेः परेषां स्वादीनां नमादीनाञ्च धातूनां सकारनकारयोः षकारणकारौ भवतः षत्वणत्वनिमित्ते सति। निषेधति।

(सुबोधिनी-) प्रादेश्चतथातौसुनमां। प्रादिसंबंधिनः क्रिलात् परेषां स्वादीनां सस्य षः नमादीनां नस्य णश्च। षत्वनिमित्तं क्रिलं। णत्वनिमित्तं षकाररेफऋवर्णाः। स्वादीनाह। उपसर्गस्थान्निमित्तात् सुनोति स्यति स्तौति स्तोभति स्था सेनय सेध सिच संज स्वञ्जां। प्रतिभिन्नात् सदेश्चाऽवादालंबनाविदूर्ययोस्तंभेश्च व्यवाभ्यां भोजने स्वनश्च परिनिविभ्यः सेव सित सय सिवु सह सुट् स्तु स्वंजादेः स्कभ्नातेश्च सस्य षः षुञ् अभिषवे। षू प्रेरणे। षो अंतकर्मणि। ष्टुञ् स्तुतौ। ष्टुभ स्तंभे। एषां स्तिपानिर्देशाद्यङ्लुकि षत्वं न। तेनाभिसोषवीति। अभिस्तोषोतीत्यादि। ष्ठा गतिनिवृत्तौ। सेनयेति ण्यंतो नामधातुः। सेनया अभियातीति अभिषेणयति। षिधु गत्यां। षिच क्षरणे। षंज संगे। ष्वंज परिष्वंगे। स्तंभु इति सौत्रो रोधनार्थः। ष्टभि प्रतिबंधे। इति तु न गृह्यते। लक्षणप्रतिपदोक्तन्यायेन सौत्रो हि नोपध इति प्रतिपदोक्तः। इदित्त्वान्नुमि कृते ष्टभिर्लाक्षणिकस्तेन विस्तंभते इत्यादौ षत्वं न। षद्लृ विशरणादौ। प्रतिभिन्नात्किम्। प्रतिसीदति। आलंबनमाश्रयणम्। अविदूरएवाविदूर्यं सामीप्यं। ण्यः। अवष्टब्धा गौः। निरुद्धा। समीपे आस्ते इत्यर्थः एतयोः किम् अवस्तब्धो वृषलः शीतेन। स्वन शब्दे। विष्वणति। सशब्दं भुंक्ते इत्यर्थः। भोजने किम्। विस्वनति वीणा। षेवृ सेवायाम् परिषेचनं। षिञ् बंधने। क्तांतः सित शब्दः। सयशब्दस्तु स्वरादइति पचादेर्वा अप्रत्ययांतो विषयः। षिवु तंतुसंताने। परिषीव्यति। षह मर्षणे। परिषहते। सुडागमः। परिष्करोति। स्तुस्वंजोःपुनर्वचनं सिवादीनामड्व्यवायेपीति विकल्पार्थं। स्कंभु रोधने। विष्टभ्नाति, एते स्वादयः। णोपदेशा एव नमादय इति॥

(तत्त्वदीपिका-) प्रादेश्चतथातौसुनमाम्। यद्यपि क्रिलादित्यस्यैवानन्तरस्येति न्यायेनानुवृत्तिस्तथापि चकारेण पुनोंणि इत्यनुवर्त्तते। तदेवानुवृत्तौ किं चकारेण तथावित्यस्य तेन प्रकारेण तौ स्तः। षत्वणत्वनिमित्ते सतीति। षत्वनिमित्तं क्रिलम्। णत्वनिमित्तं षकाररेफऋवर्णाः तत्रस्वादयः सप्रत्ययस्यपूप्रत्ययान्त्येषु षुञ् अभिषवे।ष्टुञ स्तुतौ। स्तु भस्तंभे। षोन्तकर्मणि। षु प्रेरणे। ष्ठा गतिनिवृत्तौ ण्यन्तसेनाशब्दः। षञ्ज संगे। ष्वंज परिष्वंगे। षिध गत्याम्। अति प्रति पूर्व षद्लृ विशरणगत्योः। अयङन्त षिच क्षरणे। अव पूर्वष्टंभ निरोधे। व्यवपूर्वको भोजनार्थः। स्वन शब्दे। परिनिविपूर्वकः षेवृ सेचनेसुट् प्रत्ययः। अड्वर्जितषिवु तन्तुसन्ताने। अड्वर्जितषह मर्षणे।

मू०-सेधतेर्गतौनषः ॥ गंगां विसेधति।

(सुबोधिनी-) सेधतेर्गतौनषः। उपसर्गस्थनिमित्ताद्गत्यर्थसेधतेः सस्य षत्वं न। स्तिपानिर्देशाद्यङ्लुकि गत्यर्थसेधतेः षत्वं। षेधीति॥

मू०—अड्द्वित्वव्यवधानेपिष ॥न्यषेधत् । निषिषेध । षिधू शास्त्रे मांगल्ये च ॥

(सुबोधिनी-) अड्द्वित्वव्यवधानेपिषः । सितशब्दात्प्राक्पंचदशानां सुनोत्यादीनामड्व्यवधानेपि षत्वं । अभ्यषुणोत् । सितशब्दात्प्राग्दशानां स्थादीनां द्वित्वव्यवधानेपि षत्वमित्यर्थः । निषिषेध ॥ षिधूशास्त्रे मांगल्येच । शास्त्रं शासनं । मंगलमेव मांगल्यं ष्यः । मंगलक्रियेत्यर्थः ।

(तत्त्वदीपिका—) अत्रान्तरेपीत्यनुवर्त्तते तेनाड्द्वित्वव्यवहितेपीत्याह । अड्द्वित्वेत्यादि । षिधू शास्त्रेमाङ्गल्येच । शास्त्रं शासनं । मांगल्यं मंगलक्रिया ।

मू०—ऊदितोवा ॥ ऊदितो धातोः परस्य वसादेरनपीड्वा ।

(सुबोधिनी-) ऊदितोवा । ऊत् इद्यस्य स ऊदित् तस्माद् अनपीति षण्णां लट् लिङ् लुट् लृट् लङ् लुङां लकाराणामन्येषामपीत्यादिप्रत्ययानाञ्च संज्ञा । अप्प्रत्ययविषयताभावात् ॥

(तत्त्वदीपिका—) ऊदितोवा । ऊत् इद्यस्य स ऊदित् तस्मात् ।

मू०—स्वरतिसूतिसूयतिधूञ्रधनशतृपदृपद्रुहमुहस्नुहस्निहांच॥ स्वरति सूति सूयति धूञां किद्वसादेर्णादेर्नित्यमिट्स्यात् । सेधति । सेधेत् । सेधतु सेधताद्वा । असेधत् । सिषेध । सिषेधिथ ।

(सुबोधिनी-) स्वरतिसूतिसूयतिधूञ्रधनशतृपदृपद्रुहमुहस्नुहस्निहांच । एभ्योऽपि परस्य वसादेरनपीड् वा । स्वृ शब्दोपतापयोः । भ्वादिर्गृह्यतेऽब्विकरणत्वात् । षूङ् प्राणिगर्भविमोचने । आदादिकोदैवादिकश्च गृह्यते न तु षूङ् प्रेरणे तौदादिकः । धूञ् कंपने स्वादिस्थः त्र्यादिस्थश्च । न तु धू विधूनने । सानुबंधानिर्देशात् । रध हिंसासंराध्योः । णश् अदर्शने । तृप् प्रीणने । दृप् हर्षमोहनयोः । द्रुह जिघांसायां । मुह वैचित्ये । ष्णुह उद्गिरणे । ष्णिह प्रीतौ । स्वरतिसूतिसूयतिधूञां किद्वसादेर्णादेर्नित्यमिट् । एभ्यः परस्य कितो वसादेर्णादेर्नित्यमिट् भवति । स्वरत्यादिविकल्पं बाधित्वा कित इतीण्निषेधे प्राप्ते क्रादिनियमादिड्विधिः ॥

(तत्त्वदीपिका-) वा शब्दस्य व्यवस्थावाचित्वादाह । स्वरतीत्यादि ।

मू०-तथोर्धः॥ झभांताद्धातोस्तकारथकारयोर्धकारो भवति दधातेर्न्न । झभेजबाः । सिषेद्ध । सेधिता । सेद्धा । सेधिष्यति । सेत्स्यति । असेधिष्यत् असेत्स्यत् । असेधीत् ।

(सुबोधिनी—) तथोर्द्धः । तश्च थश्च तथौ तयोः आदिजबानामित्यतो झभांतस्येत्यनुवृत्तं पंचम्या विपरिणम्यते । झभांतात् किम् । भूतः । दधातेर्न । डुधाञ् धारणादावस्मात् परयोस्तथोर्द्धो न । धत्तः ॥

(तत्वदीपिका-)तथोर्द्ध इति । तश्च थ् च तथौ तयोः । वेत्यनुवृत्तेर्दधातेर्निषेधः यद्वा तथोधः इति पाठः । तत्र तश्च थ् च एतयोः समाहारः तथ् । तस्य तथः अध इति दधातेर्नेत्यर्थः आदिजबानामित्यतो झभानुवृत्तिः ।

मू०-अनिटोऽनामिवतः॥ अनिटो नामिवतश्च धातोर्वृद्धिः स्यात्पे परे सौ । असैत्सीत् ।

(सुबोधिनी-) अनिटोनामिवतः। द्वयमिदं धातोर्विशेषणं । यद्यपि धातुः सर्वोप्यनिडेव तस्य इड्विधानाभावात्। तथापि न इट् यस्मात् तस्मात्परस्य तादिप्रत्ययस्येति व्याख्येयं । अनिटो धातोरुपधाभूतस्य नामिनो वृद्धिर्भवति पे सौ । नाम्यंतस्य तु धातोर्नामिन इति सूत्रेणैव वृद्धिः। कार्यातिदेशोयं । नामि विद्यते ऽस्येति नामिवान् तस्य तडिदादित्वाद्वतुः ॥

(तत्वदीपिका-) अनिटोनामिवत इति । अनिटः नामि वत् इतिछेदः । नन्वनिट्त्वं धातुमात्रस्यैव न हि कस्यापि धातोरिड्विधीयते किन्तु प्रत्ययस्यैव । तस्मादनिट् इति व्यर्थमिति चेत्सत्यम् । न इट् यस्मात्परस्य प्रत्ययस्येति व्याख्यानात् । तथापीडभावः कस्य प्रत्ययस्य ग्राह्यः तादेरिति गृहाण । णादेस्तु क्राद्यष्टादशातिरक्तात्परस्य सेट्त्वात् । अश्च नामी च अनामिनौ तौ स्तोऽस्यानामिवान् तस्य द्वंद्वांते श्रूयमाणस्य वतोः प्रत्येकमन्वय इत्याशयेनाह अवतोनामिवत इति यद्यपि पूर्वेणाकारनामिनोः प्राप्तिस्तथाप्यनुपधाभूताकारस्योपधाभूतनामिनश्चाप्राप्तारंभः नन्वत्र मान्तोपधात्वाभावात्कथं वतुरितिचेत्सत्यम् । अन्यतोपि वतुर्भवतीत्यनेनैव ज्ञाप्यते । तेन तडित्वानित्यादि सिद्धं इति । अथ तथाप्यनामि न इत्येवास्तु किं वतुना इति चेन्ननञ्समासभ्रमप्रसंगात् । मत्वर्थीयाद्विरूपो मत्वर्थीयो भवतीत्यनेन ज्ञाप्यते । तेन हस्तिमती शालेत्यादि सिद्धम् । अथानिट इत्येवास्तु स्वरादेरित्यतः स्वरस्यानुवृत्तेस्तस्य च मत्वर्थीयाकारान्तत्वेन ग्रहणात् स्वरवतोऽनिटोधातोः सिर्णित् कार्यं क्रदित्यर्थलाभात् । यद्वाणित्कार्यं वृद्धिरेव सा च स्वरस्यैवेति स्वरलाभात् । पूर्वेणाप्राप्तस्यैव स्वरस्य भविष्यतीत्यर्थादनुपधाभूताकारस्योपधाभूतनामिनश्च वृद्धिर्भविष्यतीत्यर्थो लभ्य एवेति चेत्सत्यम् । नामिवद्ग्रहणस्योत्तरार्थत्वादित्यलं पल्लवितेन ।

मू०-झसात्॥ झसादुत्तरस्य सेर्लोपो झसे । असैद्धां । असैत्सुः । असैत्स्व । असैत्स्म । खद स्थैर्ये हिंसायां च । खदति । खदेत् । खदतु खदताद्वा । अखदत् ।

(सुबोधिनी-) झसात् ह्रस्वादित्यतो लोपो झसे इत्यनुवृत्तं सेरिति सूत्रं च । झसात्किं । अचेष्ट । झसेकिम् । असैत्सीत् । इट् पक्षे असेधीत । खद स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थिरस्य भावः स्थैर्य्यं ष्यः ॥

(तत्वदीपिका-) झसादिति । सेरित्यस्यानुवृत्तिः लोपोह्रस्वादित्यतो लोपस्य । झसा-

त्किं अनेष्ट। झसे किं। अरौत्सुः। सेः किम्। अरुधतामित्यत्र ङस्यमा भूत्। अत्र लोपो ह्रस्वझसात्सेरिति पठितुं युक्तं।

मू०–अतउपधायाः॥ धातोरुपधाया अतो वृद्धिः ञ्णिति। चखाद।

(सुबोधिनी–) अतउपधायाः।आदिस्वरस्येत्यतो ञ्णितीति वृद्धिरिति चानुवृत्तं। अतः किं। तुतोद। उपधायाः किं गणयति॥

(तत्त्वदीपिका–) अतउपधाया इति। आदिस्वरस्येत्येतोञ्णिति च वृद्धेरनुवृत्तिः। अत्रात इतियोगं विभज्यादन्तस्य च धातोर्वृद्धिस्तेन वापय इत्यादि सिद्धमिति पुनरुपधायां इत्यत्र नाम्न इति योजनीयं। तेन नाम्न उपाधाया वृद्धिरिति व्याख्येयत्वादयतीत्यादि सिद्धिरिति। पुनरुभयोर्मेलनात्। धातोरुपधाया अतो वृद्धिरिति। ञ्णिति किम्। पक्ता। उपधायाः किम्। ततक्ष। धातोः किम् जगतोयं जागतः। अत्र परत्वादादिवृद्धिं बाधित्वा उपधावृद्धिः प्रसज्येत्। गार्ग्यो जगादित्यादावादिवृद्ध्युपधावृद्ध्योरवकाशः। णित्पे। णू इद्यस्य स णित्। अणितो णित्करणाण्णिद्वदिति गम्यते। अन्यशब्दोऽन्यत्र प्रयुज्यमानोपि वत्यर्थं गमयति। प्राधान्याच्च कार्यातिदेशोयम्। तथा च। णितो यत्कार्यमत उपधाया इत्यादिना वृद्ध्यादि तदतिदिश्यते। यद्यपि णितांणबादीनामातो णडावित्यादिना विहिते अवाद्यपि णित्कार्यं तथापि तत्रातिदिश्यते। कार्यविशेषत्वात्। सामान्यातिदेशोयम्। णबिणादयस्तु णिद्विशेषाः यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र यद्विशिष्टे गोतमे च तन्नातिदिश्यते किंतु ब्राह्मणसामान्यस्य। तथात्रापि णिति यत् दृष्टं कार्यं तदतिदिश्यते।

मू०–णबुत्तमोवाणित्॥ चखाद। चखद। पेसेर्णित्।

(सुबोधिनी–) णबुत्तमोवाणित्। उत्तमपुरुषसंबंधि णब् वा णित्। पेसेरित्यनुकृष्यते पे परे सेर्णिद्भवति। णू इत् यस्य स णित् अणितं णिदित्याह कार्यातिदेशोयं

मू०– अतोहसादेर्लघोर्वावृद्धिःसेटिसौ॥ अखदीत्। अखादीत्। गद व्यक्तायां। वाचि व्यक्ता केथः परिस्फुटवर्णा।

(सुबोधिनी) अतोहसादेर्लघोर्वावृद्धिःसेटिसौ। हसादेर्लघोरकारस्य वा वृद्धिः स्यात् सेटि परस्मैपदे सौ। अतः किम्। अदेवीत्। हसादेः किम्। माअतीत्। लघोः किम्। अगर्दीत्। सेटि किम् अपाक्षीत्। पे किम्। अयतिष्ठ। बदस्थैर्ये। पवर्गीयादिः॥

(तत्त्वदीपिका–) अतोहसादेरिति। अत इत्यस्यैव विशेषणद्वयम्। हस आदिर्यस्य स हसादिस्तस्य।हसादेः किं। मा भवानतीत्। लघोः किम् अनंदीत्। यद्यवकाशादित्यत्र वकारादकारस्य वृद्धिवारणाय। येन नाव्यवधानमिति न्यायेनापद्येकवर्णव्यवधानमाश्रियते तदा त्वरक्षीदित्यत्रापि प्रसक्त्यभावाल्लघोरिति न कर्त्तव्यमिति केचित्। एतच्च अत उपाधाया इत्यत्र नोवेत्यतो वानुवृत्या लभ्यते। एवमन्यत्रापि वृद्धिनिषेधविकल्पयोरिदमेव मूलमूह्यम्।

मू०-प्रादिस्थान्निमित्तान्नेर्नस्यणोगदनदपदपतअपिद्दाधास्थामाङ्मेङ्स्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु ॥

(सुबो०-) प्रादिस्थान्निमित्तान्नेर्नस्यणोगदनदपदपतअपिद्दाधास्थामाङ्मेङ्स्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु । प्रादिषु तिष्ठतीति प्रादिस्थःतस्मात् निमित्तात् षकाररेफऋवर्णरूपात् परस्य नेर्णत्वं गदादिषु परेषु। गद व्यक्तायां वाचि । णद्‌अव्यक्ते शब्दे । पत्‌ल्ट पतने । पद गतौ । एषां चतुर्णामपानिर्देशाद्यङ्लुकि णत्वं न । प्रनिजागदीति । प्रनिनानदीति । अपिद्दाधेति चत्वारः । डुदाञ् दाने । प्रणिददाति । दाण् प्रणियच्छति । दो प्रणिद्यति । देङ् प्रणिदयते । धारूपौ द्वौ । धेट् प्रणिधयति । डुधाञ् प्रणिदधाति । ष्ठा गतिनिवृत्तौ । माङ् माने । मेङ् प्रणिदाने । षो अंतकर्म्मणि । हन् हिंसागत्योः । या प्रापणे । वा गतिगंधनयोः । द्रा कुत्सायाम् । प्सा भक्षणे । टुवप् बीजतंतुसंताने । वह प्रापणे । शमु उपशमे । चिञ् चयने । दिह उपचये । स्यत्यादीनामेकादशानांश्तिपानिर्देशाद्यङ्लुकि णत्वं न । प्रनिसासेति । प्रनिजंघनीतीति ॥

(तत्त्वदीपिका-) प्रादिस्थादिति । प्रादिषु तिष्ठतीति प्रादिस्थम् । तस्मात् निमित्तात् णत्वनिमित्तात् षकाररेफऋवर्णरूपात् निरुपसर्गस्य नस्य णत्वमित्यर्थः । गदादिषु धातुषुपरेषु । यत्तु एतत्पूर्वस्य नेर्णत्वमित्येतावन्मात्रं वासुदेवेनोक्तं तन्न । निर्गतीत्यादावतिव्याप्तिः । विनिगततीत्यत्र च

मू०-अन्यत्राकखादावषांतेआद्योच्चारणेवा ॥ अकखादौ किम् । प्रनिकरोति । प्रनिखादति । अषांते किम् । प्रनिदुरूयति । वेति किम् । प्रणिभवति । प्रनिभवति । आद्योच्चारणे किम् । प्रणिचखाद । प्रनिचखाद । प्रणिगदति । अगदीत् । रद विलेखने रदति । रदेत् । रदतु । अरदत् । रराद ।

(सुबोधिनी-) अन्यत्राकखादावषांतेआद्योच्चारणेवा । आदौ भवा आद्याः । आद्यानां पाणिनिकात्यायनपतंजलीनामुच्चारणमाद्योच्चारणं तस्मिन् । कादिखादिषांतवर्जे गदनदादेरन्यस्मिन् धातौपरे प्रादिस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा । कश्च खश्च कखौ तावादी यस्य सकखादिः कखादेरन्योऽकखादिस्तस्मिन् । षोंऽतो यस्य स षांतस्तस्मादन्योऽषांतस्तस्मिन् । अकखादौ किम् । प्रनिचकार । प्रनिचखाद । अषांते किम् । प्रनिपेक्ष्यति । रद विलेखने विलेखनं भेदनम् ॥

(तत्त्वदीपिका-) अन्यत्रेति । अन्यत्र वा अन्यस्मिन् धातौ परे प्रादिस्थनिमित्तपूर्वकस्य नेर्णत्वं वेत्यर्थः आद्युच्चारणे प्रथममोच्चारणसमये अकखादौ अषान्तेच । कश्च खश्च कखौ

तावदीयस्य सककखादिः ककखादेरन्योऽककखादिस्तस्मिन् । षः अन्ते यस्य स षान्तस्तस्मिन् आद्योच्चारणे इत्युभयत्रान्वेति तथा चायमर्थः । आद्युच्चारणेकादिखादिषांतवर्जगदनदादेरन्यस्मिन् धातौ परे प्रादिस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा भवति । प्रणिभवंति । प्रनिभवंति । अककखादौ किं प्रनिकरोति । प्रनिखादति । अषांते किं प्रनिपिनष्टि । विशेषणेइति । विशेषनं भेदनं ।

मू०-लोपःपचांकित्येचास्य ॥ पचादीनां किति लिट्यनादेशादीनां पूर्वस्य लोपो भवत्यकारस्य एकहसमध्यस्थस्य चैकारः किति णादौ सेटिथपि च । रेदतुः । रेदिथ । णद अव्यक्ते शब्दे । प्रणिनेदुः । नेदिथ । अर्द गतौ याचने च । आम्वोर्णादौ ।

(सुबोधिनी-) लोपःपचांकित्येचास्य । पचामिति बहुवचनेन पचप्रकारा धातवो गृह्यंते । यथा पच् धातुरेकहसमध्यस्थाकारवान् । लिटि अनादेशादिश्च तथान्येपि धातवः । अस्य किम् । दिदिवतुः रराशे । अनादेशादीति किम् । चकणतुः । एकशब्दोत्राऽसहायवचनः । एकौ च तौ हसौ च एकहसौ तयोर्मध्यस्थः एकहसमध्यस्थस्तस्य । एकहसः किम् । तत्सरतुः । त्सर छद्मगतौ ॥ आम्वोर्णादौ ।

(तत्त्वदीपिका-) लोपः पचामिति । पचामिति बहुवचनेन पंचप्रकाराः धातवो गृह्यंते । तथा पचधातुरेकहसमध्यस्थाकारवान् लिटिअनादेशादिश्च तथान्योपिधातुरिति । तथा चपप्रच्छतुरित्यत्र एकहसः मध्यस्थत्वाभावान्नैत्वलोपौ । अनादेशादेः किं ॥ चखनतुः । लिडादेशाविशेषणात् नेमिथ । सेहे । अस्य किं दिदिवतुः ।

मू०-नुगशां ॥ अश्नोतेर्ऋकारादेः संयोगान्ताकारादेश्च पूर्वस्य नुग्भवति णादौ । आनर्द । आर्दीत् । नर्द गर्द शब्दे । तर्द हिंसायां । तर्दति । कर्दकुत्सितेशब्दे । कर्दति । खर्द दंदशूके । खर्दति । क्रदि चेष्टायां । क्लिदि परिदेवने । क्लिन्दति । अत सातत्यगमने । आतिथ । खाद भक्षणे । अखादीत् । क्रदि आव्हानेरोदने च । अति अदिबंधने । अन्तति । अन्तेत् । अन्ततु । आंतत् । आनंत । आनन्द । अंद्यात् अंदिता । अंदिष्यति । आन्दिष्यत् । आंदीत् । टुणदि समृद्धौ । ननन्द । चदि आल्हादने दीप्तौ च । इदितोनुम् । चन्दति । चंदेत् । चंदतु । अचन्दत् । चचंद । चंद्यात् । चंदिता । चंदिष्यति । अचंदिष्यत् । अचंदीत् । शुंध शुद्धौ । शुंधति । शुंधेत् । शुंधतु । अशुंधत् शुशुंध । शुंध्यात् । शुंधिता । शुंधिष्यति । अशुंधिष्यत् । अशुंधीत् । तक्क कक्क हसने । तकि कृच्छ्रजीवने । तंकति । ततंक । अतंकीत् ।

शुक गतौ। शोकति। अशोकीत्। बुक्क भषणे। बुक्कति। कख हसने। कखति। युगि जुगि वर्जने। युंगति। इदि परमैश्वर्ये। इंदति।

(सुबोधिनी—) नुगशाम्। अशूङ् व्याप्तौ। अशामिति बहुवचनसामर्थ्यात्। संयोगांतो यस्य संयोगांतः स्वर आदिर्यस्य स स्वरादिः संयोगांतश्चासौ स्वरादिश्च संयोगांतस्वरादिस्तस्य। अत सातत्यगमने। सततस्य भावः सातत्यं सातत्येन गमनं सातत्यगमनं तस्मिन्। खाद्द भक्षणे। ऋदित्वान्नेरित इत्यङ्। काप्यन्। अचखादत्। टुणदि समृद्धौ टु इति द्वितोथुरित्यत्राथुप्रत्ययार्थः। नंदथुः इदित्वान्नस्य लोपो न। नंद्यात्। चदि आल्हादने दीप्तौ च हर्षे तेजसि चेत्यर्थः। क्लिदि परिदेवने। परिदेवनं शोकः। इदि परमैश्वर्ये। ईश्वरस्य भाव ऐश्वर्यं। ष्यः। परा उत्कृष्टा मा लक्ष्मीर्यस्य तत् परमं परमं च तदैश्वर्यं च परमैश्वर्यं तस्मिन्॥

(तत्त्वदीपिका—) नुगशामिति। अशामिति बहुवचनेनैतत्सर्वं लब्धमित्याह। ऋकारादेरित्यादि। स्वरादेरिति अत्राटं विना स्वरादित्वं बोध्यम्।

मू०—स्वरादेः॥ स्वरादेर्धातोर्द्वितीयोऽडागमो भवति दिवादौ परे। अइए। एऐऐ। ऐन्दत्।

(सुबोधिनी—) स्वरादेः। दिवादावडित्यनुवृत्तं स्वर आदिर्यस्य सः स्वरादिस्तस्य आरंभसामर्थ्यात् द्वितीयोऽडिदित्यर्थः। अटं विना स्वरादित्वमिह विवक्षितमन्यथा दिवादावडित्यग्रे अटिचेति सूत्र्यताम्॥

(तत्त्वदीपिका—) स्वरादेरिति। विधानसामर्थ्यात्। अन्यथा दिवादावडित्यस्यायेवेति सूत्रितेन द्वितीयाटः संभवात्। यत्तु वासुदेवेन आद्युच्चारणे स्वरादिः अन्यथा सर्वस्यैव प्रथमं स्वरादित्वादव्यावृत्तेरित्युक्तं तन्न॥ औष्ट ऐज्यत इत्यादावप्रसंगात्। द्वितीयइति विधानसामर्थ्यात् प्रथमाबाधेन भवतीत्याशयः करणसामर्थ्यादेकेन या धातुकार्यानन्तरं द्वितीयेन कार्यमित्याह एऐ ऐ इति।

मू०—कासादिप्रत्ययादामृक्रसभूपरः॥ कास् आस् दय अय गुरुनाम्याद्यनेकस्वरेभ्यो णबादौ परे आम् प्रत्ययो भवति। स च कृ अस् भू परः प्रयोक्तव्यः।

(सुबोधिनी—) कासादिप्रत्ययादामृक्रसभूपरः। कासृ शब्दकुत्सायां। आस उपवेशने। दय दाने। अय गतौ। गुरुश्चासौ नामी च गुरुनामी गुरुनामीआदिर्यस्य स गुरुनाम्यादिर्धातुः। प्रत्ययग्रहणमनेकस्वरोपलक्षकम्। एभ्य आम् प्रत्ययः स्यात् कीदृशः कृसभुवः परे यस्मात्स कृसभूपर इत्यर्थकथनेन विपर्यासव्यवहितयोर्निवृत्तिः कथिता। कथं तर्हि "तं पातयां प्रथममास पपात पश्चात्। प्रभ्रंसयां यो नहुषं चकार" इत्यादि प्रयोगाः। प्रमादत एव। कृसभुवां क्रियासामान्यवाचित्वादा-

मूप्रकृतीनां क्रियाविशेषवाचित्वात् तदर्थयोरभेदान्वयो भवति। सामान्याविशेषयोरभेदान्वयो लोकतः सिद्धोस्ति। एवं च इंदांचकार। इंदांबभूवेत्यादौ एककर्तृकाभूतानद्यतनपरोक्षापरमैश्वर्याभिन्नाक्रियेति तुल्यो बोधः। ननु करोतिस्सकर्मकः भवति स्त्वकर्मकः कथं द्वयोस्तुल्यबोध इति चेदत्राहुः। यदा हि करोतिरुत्पादनार्थकः स्वातंत्र्येण प्रयुज्यते। तदा तस्य नियमेन सकर्मकत्वं भवति। घटं चक्रे राज्यं चकारेत्यादौ। यदा तु क्रियांतरसमानाधिकरणः करोतिः प्रयुज्यते तदा यत्समानाधिकरणः करोतिस्तत्सकर्मकत्वाऽकर्मकत्वाभ्यां कृत्वा स्वयमपि तथा सकर्मकाऽकर्मकभावौ भजते। जुहवांचकारेति। एवंभ्वस्त्योरप्याम्प्रकृतिसमानाधिकरणत्वेन क्वचित्सकर्मकत्वं बोध्यम्। तथा च "तस्याऽतपत्रं बिभरांबभूवेति माघः। तपर्तुपूर्त्तावपि मेदसांभरा विभावरीभिर्बिभरांबभूविरे" इति श्रीहर्षश्च इत्यत्र क्रियान्तरसमानाधिकरणाद्भवतेः सकर्मकत्वात् कर्मणि लिट्। एवं चाम्प्रकृत्यर्थगतकारकसंख्यादिविशेषाभिव्यक्तिरनुप्रयोगस्य फलमिति। गुरुनाम्यादि किम्। इयेष। अनेकस्वरेति किम्। अइवाचचारेति औ इत्यत्र प्रत्ययांतत्वेप्यनेकस्वरत्वाभावादाम् न॥

(तत्त्वदीपिका–) कासादि। गुरुर्यो नामी सआदिर्यस्य स गुरुनाम्यादिः। प्रत्ययग्रहणमनेकस्वरोपलक्षकं। तेन अइवाचचार औ इत्यत्र प्रत्ययान्तत्वेप्यनेकस्वरत्वाभावान्नाम्।

मू०–विददरिद्राजाग्रुषांवा॥ रः॥ पूर्वस्य ऋवर्णस्याकारः।

(सुबोधिनी–) विददरिद्राग्रुषांवा। एभ्योवाऽऽम् दरिद्राजागर्त्योरनेकस्वरत्वान्नित्यप्राप्तौ वेत्योषत्योश्चाप्राप्तौ विकल्पः। विद् ज्ञाने। दरिद्रा दुर्गतौ। जागृ निद्राक्षणे। उष दाहे आमोमस्य नेत्वम्। आस्कासोराम् विधानात् ज्ञापकात्॥ ॥ रः। ऋ अ इति छेदः पूर्वस्य हसादिःशेष इत्यतः पूर्वस्येत्यनुवृत्तम्॥

(तत्त्वदीपिका–) अत्रोदितोवेत्यतो वानुवृत्तेराह। विददरिद्राजागृउषां वेति। दरिद्राजागत्योरनेकस्वरत्वान्नित्यप्राप्तौ वत्यषत्योश्चाप्राप्तौविकल्पः। रइति। ऋ अ इति छेदः पूर्वस्य हसादिः शेषः इत्यतः पूर्वस्येत्यनुवर्त्तते। यत्तु वासुदेवेन णवादौ पूर्वस्येत्यनुवर्त्ततेइत्युक्तंतन्न। र इत्यत्राख्यायादस्येणबादाविति अस्मात्क्रत्वादस्यादनुवृत्तसंभवात्।

मू०–धातोर्नामिनः॥नाम्यंतस्यादंतस्य च धातोर्वृद्धिः ञ्णितिपरे।

इंदांचकार। इंदांचक्रतुः। इंदांचक्रुः। इंदांचकर्थ। इंदामास। इन्दामासतुः। इंदामासुः। इंदांबभूव। इंद्यात्। ऐंदीत्। णिदि कुत्सायाम्। इदितोनुम्। प्रपूर्वः। प्रणिन्दति। प्रनिन्दति। प्रनिंदेत्। प्रणिन्दतु। प्राणिन्दत्। निनिन्द। निंद्यात्। निन्दिता। निंदिष्यति। अनिन्दिष्यत्। अनिन्दीत्। दघि पालने। ददंघ। उ

खगतौ । अपृक्र्तरि । उपधालघोर्गुणः । ओखति । ओखेत् । ओखतु । औखत् ।

(सुबोधिनी–) धातोर्नामिनः। आदिस्वरस्येत्यतो वृद्धिरिति ञ्णितीति चानुवृत्तं । अत्र हि स्वरस्येति पदमनुवृत्त्य वाक्यभेदेन व्याख्येयं तेन स्वरांतस्य धातोर्वृद्धिः ञ्णिति । तेन श्वानमाचष्टे शावयति। विद्वांसं विदावयतीत्यादि सिद्धं । अदंतस्येति अत उपधाया इत्यत्रात् इति योगविभागात्तस्येहाकर्षणाद्वा लब्धं तेन च अंकायतीत्यादि सिद्धं ॥

(तत्त्वदीपिका–) धातोर्नामिनइति । आदिस्वरस्येत्यतो वृद्धिरितिञ्णितीतिचानुवर्त्तते । धातोः किं आत्रेयः । नात्रादिवृद्धिर्बाधिका नापि यस्यलोपः उभयोरन्यत्रावकाशत्वादत्र परत्वादन्त्यवृद्धिरेव स्यात् तथाहि आदिवृद्धेरवकाशो आश्वयुजः इत्यत्र । अन्त्यवृद्धेः निनाय। इहोभये प्रसंगे परत्वादन्त्यवृद्धिः आतो धातोरित्येकं । अथैवमाग्निभुवोपत्यमाग्निभवइत्यत्रान्त्यवृद्धिः प्राप्नोतिभुवोधातुत्वादितिचेत् । शृणु । धातोरित्येवंशब्देन विहितेञ्णिति वृद्धिरिति व्याख्येयं । अत्र तु नाम्नोविहितोऽण् न तु धातोः एवं चाग्निभुवमिच्छतीतिवाक्ये नाम्नो य ईचास्येति यः ततः क्विप् अल्लोपयलोपौ तस्यापत्यमाग्निभव इत्यत्रापि न भवति । नामशब्देनात्राणोविधानात् अथात्रादिस्वरस्येत्यनुवर्त्य स्वरान्तस्य धातोरिति व्याख्येयं । मैवं स्वरसहचरितादिशब्दास्याप्यनुवृत्तिप्रसंगात् दरिद्रावित्यादावतिव्याप्तेः स्वरमात्रानुवृत्तौ तु गणयतीत्यादावंत्यवृद्धेर्दुर्वारत्वात् न चात्र यत इति लोपोबाधकः तस्यानपि सामान्ये विहितत्वेनास्यानपि विशेषे ञ्णिति विहितत्वादपवादत्वात् । इंदामासेति । कृसभूपरइत्यत्र प्रथमग्रहणादस्तेर्भूभावोन । अन्यथा हि कृभूपर इत्येवोच्येत । आमोमस्येत्त्वमास्कासोर्विधानान्न । अन्यथा मित्वादंत्यस्वरात्परत्र विधानादास्कासोः सकारात्पूर्वविधाने सवर्णदीर्घत्वे वैलक्षण्याभावात् ।

मू०–असवर्णेस्वरेपूर्वस्येवर्णोवर्णयोरियुवौ॥उवोख । ऊखतुः । ऊखुः । उवोखिथ । औखीत् । लुंच अपनयने । अञ्चु गतिपूजनयोः । अश्चति । अंचेत् । अंचतु । आंचत् । आनंच । अच्यात् । पूजायां अंच्यात् । अंचिता । अंचिष्यति । आंचिष्यत् । आञ्चीत् । आछि आयामे । आंछति । आंछेत् । आंछत् ।

(सुबो०–) असवर्णेस्वरे पूर्वस्येवर्णोवर्णयो रियुवौ। धातोः पूर्वस्येवर्णोवर्णयोरियुवौ भवतः असवर्णे स्वरे । पूर्वं द्वित्वं पश्चादुकारस्योपधायालघोरिति गुणेकृते पूर्वस्यं व् । उवोख । कित्वाद्गुणाभावे ऊखतुः । अत्र उ उख् अतुस् इति स्थिते प[...] न्यवल्लक्षणप्रवृत्तिरिति न्यायात् पूर्वस्य ह्रस्वस्यापि ह्रस्वे कृते सवर्णदीर्घः ततो [...] इति पुनर्ह्रस्वो न । लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते इत्युक्तत्वात् । नुगशामिति [...] आनञ्च । गतौ नोलोप इति नलोपः । अच्यात् । आछि आयामे । आयामो दैर्घ्य[...]

मू०—आंछेर्नुग्वा ॥ णादौ। आंछ। हुर्छा कौटिल्ये।

(सुबो०) आंछेर्नुग्वा। आंछेः पूर्वस्य नुग् वा। नुगशामिति नित्ये प्राप्ते विकल्पः॥

मू०·य्वोर्विहसे॥ हूर्छसि। हूर्छतु। जुहूर्छ। हूर्छ्यात् हूर्छिता। हूर्छिष्यति। अहूर्च्छिष्यत्। अहूर्छीत्। युच्छ प्रमादे। युच्छति। वज गतौ। शशददवादिगुणभूताकाराणान्नैत्वपूर्वलोपौ ॥ ववाज। ववजतुः। अवाजीत्। व्रज गतौ। व्रजति। व्रजेत्। व्रजतु। अव्रजत् वव्राज। व्रज्यात्। व्रजिता। व्रजिष्यति। अव्रजिष्यत्।

(सुबोधिनी—) शशददवादिगुणभूताकाराणांनैत्वपूर्वलोपौ। एषामेत्वपूर्वलोपौ न। शसु हिंसायां। दंत्यांतः। दद दाने। वकारो दंतौष्ठ्यः आदौ यस्य स वादिः। गुणशब्देन भूत उत्पादितः गुणभूतः गुणभूतश्चासौ अकारश्च गुणभूताकारः शशरतुरित्यादौ गुणशब्देन क्रियमाणोऽर् तदवयवोऽकारः। लुलविथेत्यादौ तु गुणशब्देन क्रियमाणो य ओकारस्तत्स्थानिकस्यावादेशस्यावयवोऽकारस्तस्यैत्वपूर्वलोपौ न॥

(तत्त्वदीपिका—) शशददेति। शश पूतागताविति तालव्यान्तस्य ग्रहणमिति कश्चिद्भ्राम तद्ग्राह्यविरोधादुपेक्ष्यं। गुणभूतेति। गुणो भवतीति गुणशब्देन भावितो योऽकारस्तस्येत्यर्थः तथा च शशरतुरत्रारि गुणे कृतेवयवस्यास्य न। लुलविथेत्वत्र ओकारेगुणे तस्यापि तदवयवस्यास्य न। गुणभूतत्वं शात्परस्यासाधारणं। तेनोक्तप्रयोगद्वयनिर्वाहः एतच्चलोपःपचामिति सूत्रे चकारादधिकारार्थाल्लभ्यते।

मू०—वदिव्रज्योःसौनित्यंवृद्धिः॥ अव्राजीत्। अज गतौ क्षेपणे च। अजति। अजेत्। अजतु। आजत्।

(सुबोधिनी—) वदिव्रज्योः सौनित्यंवृद्धिः। एतयोर्नित्यं वृद्धिः सौ परे। अतोहसादेरिति विकल्पप्राप्तौ नित्यविधानं॥

(तत्त्वदीपिका—) वदिव्रज्योरिति। अतोहसादेरिति विकल्पप्राप्तौ नित्यं।

मू०— अजेरचतुर्षुवीवसादौवा॥ विवाय।

(सुबोधिनी—) अजेरचतुर्षुवीवसादौवा। अजेर्वीत्यादेशोऽनपि वसादावनपितु वा गुरुत्वात् सर्वादेशः॥

मू०—नुधातोः॥ विकरणस्य नोर्धातोश्चेवर्णोवर्णयोरियुवौ स्वरे। अनेकस्वरस्यासंयोगपूर्वस्य तु य्वौ।

(सुबोधिनी—) नुधातोः। य्वोर्धातोरितिसूत्रं य्वौवेतिचानुवृत्तं। क्नुप्रत्ययसंबंधिनो नु इत्यस्य न ग्रहणं। निरनुबंधकग्रहणे न सानुबंधकस्येत्युक्तत्वात्।

णुस्तुताविति धातोरपि न कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणमिति परिभाषित्वात् । परिशेषात् नु इत्यस्य विकरणस्य ग्रहणं । नुप्रत्ययांतस्य धातोश्चेवर्णोवर्णयोरियुवौ । अनेक स्वरस्यासंयोगपूर्वस्य तु नोर्द्धातोश्चेवर्णोवर्णयोर्य्वौ धातोर्विहिते स्वरादौ परे । शक्नुवंति । शिश्रियतुः । ब्रुवंति । असंयोगपूर्वस्यानेकस्वरस्य तु सुन्वंति । निन्यतुः । जुह्वति । अनेकस्वरस्येति किम् । रियति । पियति । रि पि गतौ । रुवंति । नुप्रत्ययांतस्यानेकस्वरत्वाव्यभिचारात् प्रत्युदाहरणं न । धातोर्विहिते इति किं । सुधीशौ ॥

(तत्त्वदीपिका—) नुधातोरिति । य्वोर्धातोरिति य्वौवेति च पूर्वसूत्रद्वयमनुवर्तते अत्र च धातोर्विहिते स्वरादौ परे इति बोध्यं । तेन सुधीशावत्रपदादिस्वरेन स्यादिभ्यः क्वोरपि नग्रहणंनुग्रहणेन । निरनुबंधकग्रहणेनसानुबंधकस्येति परिभाषया विकरणस्यैव नोर्ग्रहणात् । णुस्तुताविति धातोरपि न ग्रहणं कृत्रिमत्वात् ।

मू०— उवर्णान्तेहुन्वोरेवापि ॥ विव्यतुः ।

(सुबोधिनी—) उवर्णान्तेहुन्वोरेवापि । अपि अप्विषये चतुर्षु अनेकस्वरस्याऽसंयोगपूर्वस्य धातोरुवर्णस्य वत्वं न । हुन्वोरेव वत्वं चतुर्षु अनपि तु जुहुवतुः । विव्यतुरित्यत्र य्वोर्विहसे इति दीर्घोन यत्वस्यासिद्धत्वात् ॥

(तत्त्वदीपिका-) उवर्णान्तेहुन्वोरेवापीति । हुदानादनयोः नोर्विकर्णस्य अपि अप्विषये इत्यर्थः तेन जुव्हति चिन्वतीत्यत्रैव नतु बोभुवतीत्यत्रापि एतच्चानुवृत्यालभ्यते ।

मू०—स्वरान्तादत्वतश्चतादौनित्यानिटस्थपोवेट् ॥ विवयिथ । विवेथ । आजिथ । विव्यथुः । विव्य । आजिव । आजिम । वीयात्

(सुबोधिनी—) स्वरांतादत्वतश्चतादौनित्यानिटस्थपोवेट् । स्वरांतात्तादौ नित्यानिट आद्योच्चारणे ऽत्वतस्तादौ नित्यानिटश्च धातोः परस्य थप इट् वा भवति । अत् विद्यते यस्य स अत्वान् तस्मात् । स्वरांतात् किम् । बिभेदिथ । थपः किम् । पपिव । तादौ नित्यानिटः किम् सस्वर्थ सस्वरिथ । स्वरतिसूतीत्यनेन वेट्कोयं । आद्योच्चारणे इति किं । चकर्षिथ । अत्वतः किं बिभेदिथ । तपरः किम् । रराधिथ । तादाविति किम् । जग्रहिथ । वुःसेइत्यनेन सप्रत्ययेऽयं नित्यमनिट् । नित्यानिटः किम् । आनंजिथ । ऊदित्वाद्वेट्कोयम् ॥

(तत्त्वदीपिका—) अत्वत इति अद्विद्यते यस्य सोऽत्वान् तस्मादित्यर्थः नित्यानिटः किं । अक्ता । अञ्जिता ।

मू०—नैकस्वरादनुदात्तात् ॥ आद्योच्चारणेऽनुदात्तादेकस्वराद्धातोः परस्य वसादेरिण्न स्यात् ।

(सुबोधिनी—)नैकस्वरादनुदात्तात् आद्योच्चारणे इत्युभयत्रान्वेति । आद्योच्चारणेऽ

नुदात्तादेकस्वराच्चेत्यर्थः । तेनबिभत्सतीत्यत्र सांते अनेकस्वरत्वेपीण्निषेधो भवत्येव ॥

(तत्त्वदी० —) नैकस्वरादिति । आद्योच्चारणे इति उभयत्रान्वेति । आद्योच्चारणेऽनुदात्तादेकस्वराच्चेत्यर्थः । तेन बिभित्सतीत्यत्र सांताद्वित्वदशायामनेकाल्त्वेपिइण्निषेधोभवत्येव

मू० — अनिट् स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः । अदन्तमृदन्तमृताश्च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ् श्रिञावपि ॥ १ ॥ गणस्थमूदन्तमुताश्च रुस्नुवौ क्षुवन्तथोर्णोतिमथो युणुक्ष्णवः ॥ इतिस्वरान्ता निपुणैस्समुच्चितास्ततो हसान्तान्नपिसन्निबोधत ॥ २ ॥ शकिस्तु कान्तेष्वनिडेकइष्यते घसिश्च सान्तेषु वसिः प्रसारिणी ॥ रभिश्च भान्तेष्वऽथमैथुने यभिस्ततस्तृतीयो लभिरेव नेतरे ॥ ३ ॥ यमिर्यमान्तेष्वनिडेकइष्यते रमिर्द्दिवादावऽपि पठ्यते मनिः ॥ नमिश्चतुर्थो हनिरेव पंचमो गमिस्तु षष्ठः प्रतिषेधवाचिनाम् ॥ ४ ॥ दिहिर्दुहिर्मिहतिरोहती वहिर्नहिस्तु षष्ठो दहतिस्तथा लिहिः । इमेनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्तिताः ॥ ५ ॥ दिशिं दृशिं दंशिमऽथो मृशिं स्पृशिं रिशिं रुशिं क्रोशतिमष्टमं विशिम् ॥ लिशिञ्च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् । ६ । रुधिस्सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः ॥ इमे तु धान्ता दशचाऽनिटो मतास्ततः परं सिध्यतिरेव नेतरे ॥ ७ ॥ शिषिं पिषिं शुष्यतिपुष्यती त्विषिं विषिं श्लिषिं तुष्यतिदुष्यती द्विषिम् ॥ इमान् दशैवोपदिशंत्यनिड्विधौ गणेषु षान्तान् कृषकर्षती तथा ॥ ८ ॥ तपिन्तिपिञ्चापिमथो वपिं स्वपिं लिपिं लुपिं तृप्यतिदृप्यती सृपिम् ॥ स्वरेण नीचेन शपिं छुपिं क्षिपिं प्रतीहि पांतान् गणितांस्त्रयोदश ॥ ९ ॥ अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन् शदिं सदिं स्विद्यतिपद्यती खिदिम् । नुदिं तुदिं विद्यति विन्ति इत्यपि प्रतीहि दान्तान् दश पञ्च चानिटः ॥ १० ॥ पचिं वचिं विचिरिचिरञ्जिपृच्छतीन्निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन् ॥ त्यजिं यजिं युजिरुजिसञ्जिमज्जतीन् भुजिं स्वजिं सृजि विजि विद्ध्यनिट्स्वरान् ॥ ११ ॥

(सुबोधिनी-) अथानुज्ञाताः । स्वरांतोधातुरनिट् भवति । न इट् यस्मात्सोनिट् इति भवद्भिर्दृश्यतां ज्ञायतां । तु पुनः स्वरांतेष्विमान् धातून् सेटः प्रवदंति । तान् विदंतीति तद्विदः । तानाह । अदंतं धातुं कथवाक्यप्रबंधे इत्यादि ऋदंतं कॄ विक्षेपे इत्यादिकं । ऋतां मध्ये वृङ् वृञौ सेटौ वृङ् संभक्तौ वृञ् वरणे । अथेवर्णेषु इवर्णांतेषु श्विडीङ् सेट् कथ्यते श्विश्चडीङ्चानयोः समाहारः श्विडीङ् । टुओश्वि इर्गतिवृद्ध्योः । डीङ् विहायसागतौ । पुनस्तेषु शीङ्श्रिञावपि सेटौ कथ्येते । शीङ् स्वप्ने । श्रिञ् सेवायामिति ॥ १ ॥ गणे तिष्ठतीति गणस्थस्तं गणस्थं ऊदंतं धातुं भूलूप्रभृति । किंच पुनः उतां उकारांतानां मध्ये रुस्नुवौ सेटौ । रु शब्दे रुङ् गतिरेषणयोरित्युभयं । स्नु प्रस्रवणे । तथा क्षुवं टुक्षुशब्दे । ऊर्णोतिं । उणुञ् आच्छादने । अथो युणुक्ष्णवः धातून् सेटः। यु मिश्रणादौ । अयं सेट्। युञ् बंधने । क्रैयादिकस्त्वनिट्। णु स्तुतौ ।क्ष्णु तेजने प्रवदंतीत्यनेनान्वयः इति अमुना प्रकारेण निपुणैः विचक्षणैः स्वरांता धातवः समुच्चिताः एकीकृताः। ततोऽनंतरं हसांतान् धातून् अनिटःसकाशात् यूयं निबोधत जानीत । लोटो मध्यमपुरुषस्य बहुवचनं ॥ २ ॥ अथ हसांतान् धातूनाह । कांतेषु शकिः एकःअनिट् शक्लृ शक्तौ । शकमर्षणे दैवादिकस्तु सेट्। सांतेषु घसिः । घस्लृअदने । अदादेशोघसिश्च । तु पुनः वसिः प्रसारणी । वस निवासे । प्रसारणं संप्रसारणमस्यास्तीति प्रसारणी एतेन वस् आच्छादने अदादिकः सेट् । तस्य संप्रसारणाभावात् । भांतेषु रभिः । रभ राभस्ये अथ मैथुने यभिः । यभ मैथुने । ततस्तृतीयो लभिः । अनिट् डुलभष् प्राप्तौ अनिट् इष्यते इत्यन्वयः । इतरे धातवोऽनिटो न ॥ ३ ॥ अमांतेषु अमप्रत्याहारांतेषु धातुषु प्रतिषेधवाचिनामिण्निषेधकानां मध्ये एकः अनिट् यमिः । यम उपरमे । रमिश्च रमु क्रीडायां अपि दिवादौ दिवादिगणे यः मनिः विचक्षणे पठ्यते स मनिः मन ज्ञाने दैवादिकः। मनु अवबोधने तानादिकः सेट् । चतुर्थो नमिः णम्प्रह्वत्वे शब्दे च पंचमो हनिःहनहिंसागत्योः ततस्तु षष्ठो गमिः गम्लृगतौ मया इत्यन्वयः ॥४॥ इहानिट्कारिकायामिमेऽनिटोऽष्टौ धातवो हान्ता मया कीर्तिताः कथिताः ॥ कीदृशाः । मुक्तः संशयो येषु ते मुक्तसंशयाः । किं कृत्वा । गणेषु हांतान् प्रविभज्य भिन्नीकृत्य । ते के । दिहिः दिह उपचये । दुहिः दुहप्रपूरणे । दुहिरिति । दुहिर् अर्दने भौवादिको न गृह्यते सानुबंधकत्वात् । आदादिकएवानिडिति प्राञ्चः मेहतिरोहती । मिह सेचने । रुह बीजजन्मनि प्रादुर्भावे च । वहिः वह प्रापणे । तु पुनः षष्ठो नहिः णह बंधने । दहतिः दह भस्मीकरणे । तथा लिहिः लिह आस्वादने ॥ ५ ॥ पुराणगाः प्राचीनाः विद्वांसः गणपाठेषु शांतान् अनिट्कान् दशैव पठंति इतरान् न । तान् कान् दिशिं दिश अतिसर्ज्जने । दृशिं दृशिर्प्रेक्षणे । दंशि दंशने । अथो स्पृशिं स्पृश आमर्शने । स्पृशिंस्पृशसंस्पर्शने रिशिंरुशिं रिश् रुशहिंसायां । अभ्रमं क्रोशतिं क्रुश आह्वाने रोदने च । विशिं विश प्रवेशने । लिशिं लिश अल्पीभावे दिवादिस्थो । लिश गतौ तुदादिस्थ इत्युभयं ॥ ६ ॥ तथाधांता धातव इ-

ये दशानिटो मताः कथिताः। ते के रुधिः रुधिर् आवरणे। अनोरुधकामे। इति दैवादिक इत्युभयं। सराधिः राध संसिद्धौ। युधिबंधिसाधयः। युध संप्रहारे। बंध बंधने। साध संसिद्धौ। क्रुधिक्षुधी। क्रुध कोपे। क्षुध बुभुक्षायां। शुध्यतिबुध्यती। शुध शौचे। बुध अवगमने। दैवादिकौ। बुधिर् बोधने इति बुध अवगमने इत्येतौ भौवादिकौ तु सेटौ। व्याधिः व्यध ताडने। ततः परं सिध्यतिरेव षिधुसंराद्धौ। अनिट्। षिधु गत्यां षिधू शास्त्रे मांगल्ये चैतौ भौवादिकौ सेटौ ॥७॥ गणेषु गणपाठेषु अनिड्विधौ अनिट्प्रकरणे षांतान् इमान् दशैवाऽऽचार्य्या उपदिशंति तानुकान्। शिषिं शिषॢ विशेषणे। पिषिं पिषॢ संचूर्णने। शुष्यातिपुष्यती। शुष शोषणे। पुष पुष्टौ। दैवादिकावनिटौ। भौवादिकः सेट्। त्विषिं त्विष दीप्तौ। विषिं विषॢ व्याप्तौ जौहोत्यादिकः। श्लिषिं श्लिष् आलिंगने। श्लिष दाहे भौवादिकः सेट्। तुष्यतिदुष्यती। तुष तुष्टौ दुष वैकृत्ये दैवादिकौ। द्विषिं द्विष अप्रीतौ। तथा कृषिकर्षती कृष विलेखने। भौवादिकतौदादिकौ ॥ ८ ॥ स्वरेण नीचेन अनुदात्तस्वरेण गणितान् पांतान् अनिटः त्रयोदश त्वं प्रतीहि जानीहि। तानाह तपिं तप संतापे। तप ऐश्वर्ये। दैवादिकः तप दाहे इति चौरादिकोऽपि। ञिप्रत्ययाभावपक्षेऽनिट्। तिपिं तिपृ क्षरणे। च पुनः आपिं आपॢ व्याप्तौ। अथो वपिं डुवप् बीजतंतुसंताने। स्वपिं ञिष्वप् शये। लिपिं लिप उपदेहे। लुपिं लुपॢ छेदने। तृप्यतिदृप्यती। तृप् प्रीणने। दृप् हर्षमोचनयोः। एतौ दैवादिकावनिटौ। तृप् तृप्तौ। दृप् उत्क्लेशे। एतौ दैवादिकौ सेटौ। तृप् तृप्तौ। दृप् संदीपने। एतौ चौरादिकौ च सेटौ। सृप्‌ऌ गतौ। शपिं शप आक्रोशे। शप् उपालंभे च। छुपिं छुप स्पर्शे क्षिपिं क्षिप प्रेरणे। दैवादिकस्तैदादिकश्चानिट्॥९ दांतान् धातून् अनिटः पंचदशत्वं प्रतीहि अवेहि। तानाह। अदिं अद भक्षणे। हदिं हद पुरीषोत्सर्गे। स्कंदिभिदिक्षिदिक्षुदीन्। स्कंदिर् गतिशोषणयोः। भिदिर् विदारणे। छिदिर् द्वैधीकरणे। क्षुदिर् संचूर्णने। शदिं शदॢ शातने। सदिं षदॢ विशरणादौ। स्विद्यतिपद्यतो। ञिष्विदा गात्रप्रक्षरणे। पद गतौ दैवादिकः। ञिष्विदा स्नेहनमोचनयोः। पद स्थैर्ये भौवादिकः सेट्। खिदिं खिद दैन्ये। खिद परिघाते। रौधादिको दैवादिकस्तौदादिकश्चानिट्। नुदिं नुद प्रेरणे। तुदिं तुद व्यथने। विद्यविनत्तिकावपि। विद सत्तायां दैवादिः। विद विचारणे रौधादिकः। विद ज्ञाने। विद्‌ऌ लाभे। एतौ सेटौ। विद्यविनत्ती एव विद्यविनत्तिकौ स्वार्थे कप्रत्ययः। १०। न विद्यते इट् स्वरो येभ्यस्तेऽनिट्स्वराः तान् धातून् त्वं विद्धि जानीहि। तानाह। पचिं डुपचष् पाके। पची व्यक्तीकरणे च सेट्। वचिं वच परिभाषणे। ब्रुवो वचिरपि। विचिरिचिरञ्जिपृच्छतीन्। विचिर् पृथग्भावे। रिचिर् विरेचने रिच वियोजनसंपर्चनयोरिति च। रञ्ज रागे। प्रच्छ ज्ञीप्सायाम्। निजिं णिजिर् शौचपोषणयोः। णिजि शुद्धौ आदादिकः सेट्। सिचिं षिचू क्षरणे। मुचिभजिभंजिभृज्जतीन्। मुचॢ मोक्षणे। भज सेवायां। भंजो आमर्दने। भ्रस्ज पाके। त्यजिं त्यज हानौ।

यजिं यज देवपूजादौ । युजिरुजिसंजिमज्जतीन् । युजिर् योगे । युज समाधौ इति च । भाष्यमते युज समाधौ सेट् । रुज रोगे । षंज संगे । टुमस्ज शुद्धौ । भुजिं भुज पालनाऽभ्यवहारयोः । भुजो कौटिल्ये इति च । स्वजिं स्वंज परिष्वंगे । सृजिवि जि । समाहारे एकवचनं । सृज विसर्गे । दैवादिक स्तौदादिक श्चानिट् । विजिरपृथक्भावे । ओविजीभयचलनयोः । तौदादिकस्सेट् । चांताः षट् । छांत एकः । जांताः पंचदश ११

(तत्त्वदी०–)अनुदात्तस्वरान्संगृह्णाति । अनिट्स्वरांत इति न इट् यस्मात् सोनिट् । स्वरोऽन्तो यस्य स स्वरान्तः स्वरान्तो धातुरनिट् भवति इति दृश्यतामित्यन्वयः । इमानिति स्वरान्तेषु इमान् वक्ष्यमाणान् सेटः प्रवदन्ति । तानाह । अदंतमिति । अदन्ता अतीत्यादयः ऋदंताःस्तृप्रभृतयः । ऋतामिति । ऋदंतानां मध्ये वृङ् संभक्तौ । वृञ्वरणे । टुओश्विर्गतिवृद्ध्योः डीङ् विहायसागतौ शीङ्स्वप्ने श्रिञ्सेवायां । ऊदन्ता-भूप्रभृतयः । रुशब्दे । रुङ् गतौ रेषणे च । स्नुप्रस्रवणे । टुक्षुशब्दे ऊर्णुञ् आच्छादने । नचोर्णोतेर्द्विस्वरत्वात्प्राप्तिरेव न संभवति । कारिकायां ग्रहणकिमर्थमिति वाच्यं । ऊर्णोतेर्नेडिति निषेधादत्र ग्रहणं एतद्बीजं तु वाच्यं । ऊर्णोतेर्नुवद्भावइत्यादिशेषोक्तिरेवेति दिक् । युमिश्रणामिश्रणयोः णुस्तुतौ । क्ष्णुतेजने । स्वरान्तानुक्त्वेदानीं हसांतान् कांतादि क्रमेणाह । शक्लृशक्तौ एक एव कान्तेषु नान्य इत्यर्थः । खगघङान्ता न सन्त्येव । घस्लृअदने । वसनिवासे । द्वावेव सान्तेषु नान्य इत्यर्थः । अदादेशस्य घसेस्तु स्थान्यनिट्त्वेनैव सिद्धं रभराभस्ये । यभमैथुने । डुलभष्प्राप्तौ । भांतेषु त्रय एव नापरे इत्यर्थः । यमुउपरमे रमुक्रीडायां । मनज्ञाने । णम प्रह्वत्वे शब्दे च । गम्लृगतौ मांते चत्वार एव । मनज्ञाने दिवादिः हन हिंसागत्योः नांतेषु द्वावेव । प्रतिषेधवाचिनां अनिटामित्यर्थः । दिहउपचये । दुहप्रपूरणे । मिहसेचने । रुहबीजजन्मनिप्रादुर्भावे च । वहप्रापणे । णहबन्धने । दहभस्मीकरणे । लिहआस्वादने । दह हांतेषु । अष्टावनिटः प्रकीर्तिताः कथिता इत्यर्थः । मुक्तः संशयो येषु ते तथा । गणेषु प्रविभज्य गणविभागेनेत्यर्थः । दिशअतिसर्जने । दृशिर्प्रेक्षणे । दंशदशने । मृशआमर्शने । स्पृशसंस्पर्शे । रिशरुशहिंसायां । क्रुशआह्वाने । विशप्रवेशने । लिशगतौ । लिशअल्पीभावे शान्तेषु दश । रुधिर् आवरणे । अनोरुधकामे । इतिदिवादिश्च । सराधिं राधसंसिद्धावेतत्सहितः । युधसंप्रहारे बंधबंधने । साधसंसिद्धौ । क्रुधक्रोधे । क्षुधबुभुक्षायां शुधशौचे बुधअवगमने । दिवादी । व्यधताडने । षिधसंराद्धौ । धांतेष्वेकादशइतरेनेत्यर्थः । शिष्लृविशेषणे । पिष्लृसंचूर्णने शुषशोषणे पुषपुष्टौ । दिवादी । त्विषदीप्तौ । विष्लृव्याप्तौ । श्लिषआलिंगने । तुषतुष्टौ । दुषवैकृत्ये । दिवादी । द्विषअप्रीतौ कृषिविलेखने भावादिकतौदादिकौ । षांतेष्वेकादश । तपसंतापे । तिपृऐश्वर्ये दिवादिः । तपदाहेइत्यपिन्यभावपक्षे । तिपृक्षरणे । आप्लृव्याप्तौ । टुवपूबीजतंतुसताने क्षिप्वपूशये लिपउपदेहे । लुप्लृछेदने ॥ तृपप्रीणने दृपदर्पविमोचनयोः । दिवादिः सृप्लृगतौ । स्वरेन नीचेन अनुदात्तेनेत्यर्थः । शपउपालंभे । छुपस्पर्शे क्षिपप्रेरणे । दिवादिस्तुदादिश्च पांतान्त्रयोदश प्रतीहि । जानीहि । अदभक्षणे । हदपुरीषोत्सर्गे । स्कंदिर्गतिशोषणयोः भिदिर्विदारणे । छिदिर् द्वैधीकरणे । शद्लृशातने । षद्लृविशरणादिषु क्ष्विदागात्रप्रक्षरणे । पदगतौ । दिवादी । खिददैन्ये खिद्यति

खिंदति। खिनात्तिश्च। नुद प्रेरणे। तुद व्यथने। विद सत्तायां। विद विचारणे। दांतेषु पंचदश। डुपचष् पाके। पच व्यक्तीकरणे द्वावपि। वच परिभाषणे। ब्रुवो वचिरपि विचिर् पृथग्भावे। रिचिर् विरेके। रिचवियोजनसंपर्चनयोरिति रिच क्षरणे। मुच्लृ मोचने। चांतेषु षट्। प्रच्छ ज्ञीप्सायां छांतेष्वेकः त्यज हानौ। णिजिर् शोचपोषणयोः भजसेवायां। भंजो आमर्दने। भुजपालनाभ्यवहारयोः। भुजोकौटिल्ये। इति च। भ्रस्ज पाके। टुमस्जो शुद्धौ। यज पूजादौ। युजिर् योगे। रुजो भंगे। रंज रागे। विजि पृथक्भावे। ष्वंज परिष्वंगे। षंज संगे। सृज विसर्गे। जांतेषु पंचदश। अनिट्स्वरान् अनुदात्तानित्यर्थः॥

मू०—वेत्ता। अवैषीत्। क्षि क्षये। चिक्षयिथ। चिक्षेथ।

(सुबोधिनी--) स्वरांतादादत्वतश्चेति वेट्। विवयिथ, विवेथ, आजिथ। विव्यिव। विव्यिम। वीयात्। लुटि वेत्ता, अजिता। वेष्यति, अजिष्यति। अवेष्यत्, आजिष्यत्। धातोर्नामिन इति वृद्धिः। अवैषीत् आजीत्। क्षि क्षये। अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः। नुधातोरितीय्। चिक्षियतुः॥

मू०—ये। अनपियकारेपरे पूर्वस्वरस्य दीर्घस्स्यात्। क्षीयात्। अक्षैषीत्। तुम्प हिंसायाम्।

(सुबोधिनी-)ये। अनपियकारेपरे पेसेदीर्घ इत्यतोदीर्घ इति अनपीति चानुवर्त्तते। अनपिये किं। चिनुयात्। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वात्र न दीर्घः। क्षि निवासगत्योरिति तौदादिकः॥

(तत्त्वदीपिका—) ये इति। दीर्घस्तु पेसेदीर्घ इत्यतोऽनुवर्तते। सप्तमीनिर्देशात्पूर्वस्येति लभ्यते। यकारस्तु प्रत्ययस्यैव प्रकरणत्वात्। तेनेयाजेत्यादौ नाति प्रसंगः। वानुवृत्तेर्व्यवस्थया वा।

मू०—प्रात्तुम्पतेस्सुट्गविकर्तरि॥ प्रस्तुम्पति गौः। अड् द्वित्वव्यवधानेपि सुट्। प्रास्तुम्पत्। प्रतुस्तुम्प। ओणृ अपनयने। ओणां चकार। वनषन सम्भक्तौ। ववनतुः। अवनीत्, अवानीत्। सेनतुः।

(सुबोधिनी-) प्रात्तुम्पतेःसुट्गविकर्तरि। प्रादुपर्गात् परस्य तुंपतेः सुट् स्यात् गौः कर्त्ता चेत्। ऋसंयोगादिति लिटः कित्वाभावात् नस्य लोपो न। तुतुंपतुः। आशिषि नोलोप इति न लोपः तुप्यात्। स्तिपानिर्देशात् यङ्लुकि सुट् न। प्रतोतुंपीति। ओणृ अपनयने। अपनयनं दूरीकरणं। वन षन संभक्तौ। वनशब्दे च। संभक्तिर्भजनम्॥

मू०—जनसनखनामात्वमनिटिसेक्ङिति॥झसे हे च कौ यादादौ क्ङिति वा। सायात्,सन्यात्। असनीत् असानीत्। चमु अदने।

(सुबोधिनी-) जनसनखनामात्वंसेक्ङिति । झसे यादौ क्ङिति वा जन जनने जुहोत्यादिः । जनी प्रादुर्भावे दिवादिः उभयोर्ग्रहणं । एषमात्वं स्यात् अनिटि सप्रत्यये क्ङिति ङिति झसे च यकारादौ क्ङिति वा सेपरे सिषासति ॥

मू०-ष्ठिवुक्लम्वाचमांदीर्घोपि ॥ आचामति । आङ्क्मिम् । चमति । विचमति । चेमतुः । अचमीत् । ष्ठिवु निरसने ।

(सुबोधिनी-) ष्ठिवुक्लम्वाचमांदीर्घोपि । एषां दीर्घः स्यात् अप्रत्यये । ष्ठिवु निरसने । निरसनं थूत्करणम् ॥

मू०-नामधातुष्वष्कष्ठिवां सत्वं न ॥ ष्ठीवति ।

(सुबोधनी-) नामधातुष्वष्कष्ठिवांसत्वंन । ष्वष्क गतौ । नामधातोरुदाहरणानि षट् दंता अस्येति षोडन् तमाचष्टे नाम्नो ञिर्डितत्करणे इति ञि प्रत्यये टिलोपे च षोडयति । षंडमाचष्टे करोतिवा षंडयति । नाम्नोय इति यप्रत्यये । षंडमिच्छतीति षंडीयति । कटे वर्षावरणयोः । वर्षा वृष्टिः । आवरणमाच्छादनं ॥

(तत्वदीपिका--) नामधातुष्विति ॥ एतच्च विदोनवानामिति सूत्रस्थवानुवृत्तेर्व्यवस्थया बोध्यं षण्डमाचष्टे षण्डयतीत्यादौ ।

मू०-- ष्ठिवेःपूर्वस्यठस्यथोवा ॥ तिष्ठेव , टिष्ठेव । ष्वोर्विहसे । ष्ठीव्यात् । अष्ठेवीत् । कटे वर्षाऽऽवरणयोः । ह्मयंतक्षणश्वसजागृश्वेदितांसेटिसौनवृद्धिः ॥ अकटीत् । हय गतौ । अहयीत् । जु रंहसि ।

(सुबोधिनी-)ह्मयंतक्षणश्वसजागृश्वेदितांसेटिसौनवृद्धिः । हच मच यच ह्मयः ते अंते येषां ते ह्मयंताः एत् इत् यस्य स एदित् । ह्मयंतस्य क्षणादेरेदितश्च वृद्धिर्न सेटि सौ । ग्रह उपादाने अग्रहीत् । टुवमु उद्गिरणे । अवमीत् । हय गतौ । अहयीत् । क्षणु हिंसायाम् । अक्षणीत् । श्वस् प्राणने । अश्वसीत् । जागृ निद्राक्षये । अजागरीत् । टुओश्वि इर्गतिवृद्ध्योः । अश्वयीत् । सेटि सौ किं । दह भस्मीकरणे । अधाक्षीत् । जु रंहसि । रंहो वेगः ॥

(तत्त्वदीपिका)ह्मयंतेति । ह् च म् य् च् ह्मयः ते आंतेयेषांते ह्मयंताः हकारमकारयकारान्ताः इत्यर्थः । क्षणहिंसादौ श्वस प्राणने । जागृ निद्राशये । टुओश्वि गति वृद्ध्योः।एत् इद्येषां ते तथा तेषामित्यर्थः ।

मू०- नानप्योर्वः ॥ अनपि विषये उवर्णस्य वत्वंन । जुजुवतुः । जुजविथ । जुजोथ । अजौषीत् । गुपू रक्षणे ।

(सुबोधिनी-) नानप्योर्वः । उवर्णांतस्य धातोर्वत्वं न स्यात् । अनपि परे । गुपू रक्षणे । रक्षणं पालनं ॥

मू०— आयः ॥ गुपूधूपविच्छिपणिपनिभ्यस्स्वार्थे आयः प्रत्ययः । अनपि तु वा ।

(सुबोधिनी—) आयः । गुभ्म्यः इत्यनुवृत्तं पणिपन्योरनुदात्ते च आयाभावे चरितार्थमात्मनेपदमित्यायान्तान्नाद्भवति । गुपू रक्षणे । धूप संतापे । विछ गतौ । पणव्यवहारे स्तुतौ च । पनच ॥

(तत्त्वदीपिका—) आय इति । इह गुभ्म्य इत्यनुवर्त्तते इत्याह । गुपूधपेत्यादि । स्वार्थे इति । अपरस्यानिर्दिष्टत्वात् स्वार्थ एव लभ्यते ।

मू०— सधातुः ॥ यङादिप्रत्ययान्तः शब्दो धातुसंज्ञको भवति । गोपायति । गोपायाञ्चकार, जुगोप ।

(सुबोधिनी—) सधातुः । तच्छब्देन यङादिः परामृश्यते । यङादिना च प्रत्ययग्रहणपरिभाषया तदंतं गृह्यते तेषां केवलानां संज्ञाप्रयोजनाभावाद्वा । "यङ् ष काम्या ईयङ् चेति यगाय ञिञीङस्तथा ॥ आचारे क्विबथो यश्च ज्ञेया दश यङादयः । १ ।" प्रत्ययविशिष्टस्य धातुत्वात् तिबादिः ॥

(तत्त्वदीपिका—) सधातुरिति । तच्छब्दस्य तदादित्वेन तेषां च प्रधानपरामर्शित्वेन यङादिर्गृहीतः केवलयङादेश्च संज्ञाप्रयोजनाभावात्तदंतलाभः । अनन्तरोक्तस्य ऽरपि ग्रहणं सग्रहणेन निवार्यते । अन्यथानुवृत्त्यैव तद्ग्रहणे सिद्धे सग्रहणं व्यर्थं स्यात् । आदेशादिविधायकप्रकरणेनविच्छेदाद्व्यवहिततिबादेरपि न ग्रहणमतः परिशेषाद्यङादिरेव गृह्येत् इत्याशयेनाह यङादिप्रत्ययान्त इति ।

मू०— यतः ॥ यस्यातश्चानपिलोपः । गोपाय्यात् । गुप्यात् । गोपायिता । गोपिता । गोप्ता । अगोपायीत् । अगौप्सीत् ।

(सुबोधिनी—) यतः । यू च अच्चानयोः समाहारो यत् तस्य । धातोर्विशेषणत्वात्तदंतविधिः । यंतस्य अदंतस्य च लोपः अनपि । अदंतस्य किं । अय पय गतौ । आभ्यां क्विपि यवयोर्वसेहकारेति यलोपे कृते य इत्यलोपो माभूत् । अतएव । ऊदित्वाद्वेट् । गोपिता । गोप्ता । इडभावपक्षे अनिटोनामिवत इति वृद्धिः । अगौप्सीत् । क्रमु पादविक्षेपे । पादविक्षेपः पादविहरणं ॥

(तत्त्वदीपिका—) यत इति । यू च अच्च अनयोः समाहारः यत् तस्य ।

मू०— झसात् ॥ अगौप्ताम् । एवं धूप संतापे । तपसंतापे । तेपिथ, ततप्थ । अताप्सीत् । जप जल्प व्यक्तायां वाचि । जेपिथ । जपिता । अजापीत् । क्रमु पादविक्षेपे ।

मू०—भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषांयोवाकर्त्रर्थेषुचतुर्षु ॥

(सुबोधिनी—) भ्राशूभ्लाशूभ्रमुक्रमुक्लमुत्रसित्रुटिलषांयोवाकर्त्रर्थेषुचतुर्षु । भ्राशृभ्रा-

स्वविभाषेयं। अनवस्थानार्थो भ्रमिः क्रमिः त्रसिश्च दिवादयस्तेभ्यो नित्ये प्राप्ते इतरेषामप्राप्तेश्चारंभः। भ्राशृ भ्लाशृ दीप्तौ। फणादावेतौ। भ्रमु चलने। भ्वादिर्ज्वलादिश्च। भ्रमु अनवस्थाने। दिवादिः पुषादिः शमादिः तत्र भ्वादेः भ्रमति, भ्रम्यति। शमादेस्तु शमादीनातिदीर्घे भ्राम्यति। इति त्रैरूप्यं। क्लमु ग्लानौ। त्रसी उद्वेगे। त्रुट च्छेदने। लष कांतौ॥

सू०— क्रमःपेदीर्घोऽब्विषये॥ क्राम्यति, क्रामति। अक्रमीत्। यम उपरमे।

(सुबोधिनी—) क्रमः पे दीर्घोऽब्विषये। क्रमो दीर्घः स्यात् पे चतुर्षु। पेकिं उपक्रमते। प्रोपाभ्यामित्यात्। स्नुक्रमोरितिनेट् स्नुक्रमोरुदात्तत्वादिटिसिद्धे नियमार्थोयम्। आभ्यां परस्य परस्मैपदस्यैवेट् स्यान्नातः। स्नु प्रस्रवणे। उपस्नोष्यते जलेन। उपक्रंस्यते। यमु उपरमे उपरमो निवृत्तिः॥

सू०—गमांछः॥ गम यम इषुणां छः स्यादब्विषये। यच्छति। येमिथ, ययंथ।

(सुबोधिनी—) गमांछः। गम्लृ गतौ। यम उपरमे। इषु इच्छायाम्। बहुवचनमाद्यर्थम्॥

(तत्त्वदीपिका—) गमामिति। बहुवचननिर्देशस्य फलमाह गमादय इत्यादि।

सू०— यमिरमिनमातांसक्सेरिट्पे॥ अयंसीत्। अयंसिष्टां। णम प्रव्हत्वे शब्दे च। नेमिथ। ननंथ। अनंसीत्। ईक्ष्यं ईर्ष्यं ईर्ष्यायां। ईक्ष्यति। ऐक्ष्यीत्। ऐर्ष्यीत्। गम्लृ। गतौ गच्छति।

(सुबोधिनी—) यमिरमिनमातांसेरिट्पे। एषां सक् स्यात्। एभ्यः सेरिट् पे परे। अयंसीत्। अयंसिष्टाम्। व्यरंसीत्। व्यरंसिष्टाम्। अनंसीत् अनंसिष्टां। पे किम्। उदायत। अरंसाताम्॥

सू०— गमांस्वरे॥ गम् हन् जन् खन् घसामुपधायालोपः स्यात्स्वरे क्ङिति। नतु ङे। जग्मतुः। जगमिथ, जगंथ।

(सुबोधिनी—) गमांस्वरे। गम्लृगतौ। हन् हिंसागत्योः। खनु अवदारणे। घस्लृ अदने। एषामुपधाया लोपः स्यात् स्वरादौ क्ङिति प्रत्यये नतु ङे। नोवेत्यतो व्यवस्थितार्थत्वानुवर्त्तनात् जग्मतुः। जघ्नतुः। चख्नतुः। जक्षतुः। ङेकिं। अगमत्।

(तत्त्वदीपिका—) गमां स्वरइति। बहुवचनस्य बहूपलक्षकत्वमभिप्रेत्य गणयति। गमहनेत्यादि नोवेत्यतो वानुवृत्तेर्व्यवस्थया क्वचिन्नेत्यभिप्रेत्याह। नतुङेइति। तेन अगमदित्यत्र लोपो न।

मू०-- हनृतःस्यपः ॥ हंतेः ऋदंताच्च परस्य स्यप इड्भवति गमे स्तुपे गमिष्यति ।

(सुबोधिनी-) हनृतःस्यपः । अनुदात्तत्वादिण्निषेधे प्राप्ते विधिः । हन् च ऋच्चानयोः समाहारो हनृत् तस्मात्हनृतः । गमेः परस्मैपदस्यैवेट् नातः । तेन संगंस्यते इत्यादौ न ॥

(तत्त्वदीपिका-)हनृतः। हन् च ऋच्च हनृत् तस्मात् उदितोवेत्यतो वेत्यनुवृत्तेर्व्यवस्थया गमेः परस्मैपदं एवेत्याह । गमेस्त्विवति । तेन संगस्यत इत्यादौ न । हन्तेऋदन्ताच्चोभयपदेपि । आहनिष्यते करिष्यते ।

मू०--लित्पुषादेर्ङः ॥ लितो धातोः पुषादेश्च ङः प्रत्ययः स्यात्पे । सेरपवादः । अगमत् । म्रुचु म्लुचु गतौ । म्रोचति ।

(सुबोधिनी-) लित्पुषादेर्ङः । लृ इत् यस्य स लित् पुष् आदिर्यस्य स पुषादिः । लिच्च पुषादिश्चानयोः समाहारो लित्पुषादिः तस्मात् सात्रत्वात्पुंस्त्वम् । संज्ञापूर्वकविधेरनित्यत्वान्ननुम् । ञेरङ्द्विश्चेत्यतोऽङित्यनुवृत्त्यैव सिद्धे ङइति योगविभागेन तु द्युतादिभ्योऽस्यतिवक्तीति च लब्धम् । पुषादिश्च दिवाद्यंतर्गणो ग्राह्यः लित्साहचर्यात् । लितोहि प्रायेणानिट्साहचार्यात्पुषोऽप्यनिड् ग्राह्यः सच दिवादिः। भ्वादिः । सेटत्वात् न चुरादिर्भिना व्यवधानाच्च ॥

(तत्त्वदीपिका-) लित्पुषादेरिति । लृ इत् यस्य स लित् । पुष् आदिर्यस्य स पुषादिः लिच्च पुषादिश्चानयोः समाहारः लित्पुषादिस्तस्य । नुमोऽनित्यत्वात् क्लीवत्वस्यैव वापुंस्त्वं। ननु ञेरङ्द्विश्चेत्यनन्तरोक्तसूत्रादङनुवृत्तेः किंङग्रहणेनेति चेत्सत्यम् । ङग्रहणं योगविभागेनान्यतोपि विधानार्थम् । तेन द्युतादिभ्योपि अस्यतिवक्तिख्यातिभ्यश्च भवति । अथैकयोगनिर्दिष्टन्यायेनाङिद्वित्वं भवेदिति वाच्यम् । ञेरिति ग्रहणात् । ण्यंतादेवाङिद्वित्वविधानात् । नत्वन्यस्मात् । अङिलघोर्ह्रस्वउपधाया इतिर्ह्रस्वस्तु लित्पुषादेर्दीर्वोपधत्वाभावादेव न द्वित्वाभावेन पूर्वपदत्वाप्रसंगाच्च ।

मू०--म्रुचादेर्वाङः॥ अम्रुचत् । अम्रोचीत् , अम्लोचीत् अम्लुचत् । ग्रुच ग्लुच चौर्य्ये । अग्रुचत् । अग्रोचीत् । अग्लुचत् । अग्लोचीत् । ग्लुंचु गतौ । अग्लुचत् । अग्लुंचीत् । ञिफलाविशरणे ।

(सुबोधिनी-) म्रुचादेर्वाङः । म्रुचु म्लुचु ग्रुचु ग्लुचु ग्लुंचुइति म्रुचादयः । ञिफलाविशरणे । विशरणमवयवानां विभागः ॥

मू०-- तॄफलभजत्रपां ॥ किति णादौ सेटि थपिचैत्वपूर्वलोपौ । फेलतुः । फेलिथ ।

(सुबोधिनी-) तॄफलभजत्रपां । किति णादौ सेटि थपि चैत्पूर्वलोपौ । तरतेर

कारस्य गुणशब्देन भावितत्वात् फलभजोस्तु वैरूप्यसंपादकादेशत्वात् त्रपतेश्च एकहसमध्यस्थत्वाऽभावादप्राप्ते विधिः । तेरतुः । तेरुः । फेलतुः । फेलुः । भेजतुः । भेजुः । त्रेपे । त्रेपाते ॥

मू०—ल्रांतस्य ॥ ऌसमीपाकारस्य सौ नित्यं वृद्धिः । अफालीत् । फल निष्पत्तौ । फेलतुः अफालीत् । चर गतिभक्षणयोः । अचारीत् स्वृ शब्दोपतापयोः । स्वरति । सस्वार ।

गुणोर्तिसंयोगाद्योः ॥ सस्वरिथ । सस्वर्थ । सस्वरिव । स्वर्यात् । स्वरिष्यति । अस्वेरीत् । अस्वारिष्टां । अस्वार्षीत् । अस्वार्ष्टां । अस्वार्षुः । जि जये ।

(सुबोधिनी—) ल्रांतस्य । ऌसमीपाकारस्य सौ नित्यं वृद्धिः । अतोहसादेरिति विकल्पस्यापवादः । ल्रांतस्य किं । अल्पीत् । अरणीत् । अत्र ऌसमीपत्वेपि ल्रांतत्वाभावान्न नित्यं वृद्धिः । ऌसमीपाकारस्य किं । श्वल्ल आशुगमने । अस्य अश्वल्लीत् । अत्र समीपत्वेपि अंत्यलसमीपत्वाभावान्न वृद्धिः । जिजये । जयउत्कर्षप्राप्तिः । अकर्मकोऽयं ॥

(तत्त्वदीपिका—) ल्रान्तस्येति । ल्रांतस्याकिम् । अल्पीत् । अरणीत् । अत्र ऌसमीपत्वेपि ल्रान्तत्वाभावान्न । ऌसमीपाकारस्य किम् । श्वल्ल आशुगमने इत्यस्य अश्वल्लीत् । अत्र ऌसमीपत्वेपि अन्त्यऌसमीपत्वाभावान्न । अतो हसादेरिति प्राप्तविकल्पस्यापवादः । जय इति । जयउत्कर्षप्राप्तिः ।

मू०— सपरोक्षयोर्ज्जेर्गिः ॥ जिगाय । जिग्यतुः । जिग्युः । जिगयिथ । जिगेथ । जीयात् । अजैषीत् । कृष विलेखने । कर्षति । चकर्ष । चकर्षिथ ।

(सुबोधिनी—) सपरोक्षयोर्जेर्गिः । जेर्गिःस्यात् स प्रत्यये णबादौ च द्वित्वनिमित्तयोरितिव्याख्येयं । तेन यङ्लुगंतात्से ग्यादेशो न जेजयांचकारेत्यत्र । कृष् विलेखने । विलेखनमाकर्षणं ॥

(तत्त्वदीपिका—) सपरोक्षयोरिति । परोक्षशब्देन तदर्थकणबादिग्रहः द्वित्व निमित्तयोरिति व्याख्येयम् । यथाश्रुतव्याख्याने तु यङ्लुङन्ताज्जेर्ग्यादेशः स्यात् ।

मू०— रारोऽझसेद्दशां ॥ दृशसृजकृषमृशस्पृशतृपदृपसृपां झेऽऽ रो रौ भवत्यरो रश्च ।

(सुबोधिनी—)रारोऽझसेद्दशां । अश्च आश्च तयोः समाहारःअं तेन सहितो र अरः तस्य अरः अरःस्थाने आरःस्थाने च रो भवति तेन द्रक्ष्यति अद्राक्षीदित्युभयत्रापि गु-

णवृद्धिस्थाने र आदेशःसिध्यति । बहुवचनंत्वाद्यर्थम् । दृशिर् प्रेक्षणे । मृज विसर्गे कृष विलेखने । मृश आमर्शने । स्पृश स्पर्शने । तृप प्रीणने । दृप हर्षमोहनयोः । सृप्लृ गतौ ।

मू०-- कृषादीनांवा ॥ क्रष्टा, कर्ष्टा ।

(सुबोधिनी-) कृषादीनांवा । कृषादीनां षण्णांतु वाऽरःस्थाने रः ।

मू०-षढोःकस्से । धातोः षढयोःकत्वं स्यात्सेपरे । क्रक्ष्यति, कर्क्ष्यति । अक्राक्षीत्, अकार्क्षीत् ॥

(सुबोधिनी-) षढोःकस्से । धातोरित्यनुवृत्तम् । सेकिं । क्रष्टा । षढोःकिम् । त्रप्स्यति । धातोःकिं । लिट्सु ॥

(तत्त्वदीपिका-) षढोः कस्सेइति । धातोरिति । अत्र धातुग्रहणद्वयानुवर्त्तनं विधेयम् । तेन धातोरेव धातोर्नतुर्नामत्वविशिष्टस्यापि । अतो लिह्य इत्यत्र नातिप्रसंगः । नचात्र क्यस्यबाधकत्वम् । तदपवादकत्वादस्य । न चात्र नामत्वेन धातुत्वमिति भ्रमितव्यम् । तेन तदनपायात् ।

मू --कृषमृषस्पृशमृशतृपदृपांवासिः ॥ हशषांतात्सक् ॥ हांतात् छांतात्षांतान्नाम्युपधादनिटः सक्प्रत्ययः स्याद्दिवादिपरो न तु दृशेः । सेरपवादः । अकृक्षत् । सृप्लृ गतौ । सर्पति । स्रप्ता । सर्प्ता । असृपत् । कुश अह्वाने रोदने च क्रोशति । क्रोष्टा । अकुक्षत् । रुष रिष शिष हिंसायां ।

(सुबोधिनी-) कृषमृषस्पृशमृशतृपदृपांवासिः । एभ्यो वा सिः स्यात् पक्षे । हशषान्तात्सक् । तृपदृपृभ्यां पुष्षादित्वात्तु ङः हशषांतात्सक् । अनिटोनामिवत इत्यनुवृत्तं । हशषांतात्सक् । अतिप्त नाम्युपधात्किं । अगाढ । अनिटःकिं । औहिष्ट । हशषान्तात्सक्षोक्तात हश्च शश्च षश्च हशषाः ते अंते यस्य स तस्मात् । अत्रांतग्रहणं चिंत्यं । हशषाक्षितिवक्तव्यं । तेन च धातोर्विशेषणादंतलाभः ॥

(तत्त्वदीपिका-)हशषान्तात्सगिति । हश्च शश्च षश्च ते अन्ते यस्य स तस्मात् । अनिटोनामिवत इति पूर्वसूत्रान्नामिवत इत्यनुवर्त्य स च विशेषार्थतया विवक्षणान्नाम्युपधात्वलाभः इत्यभिप्रेत्याह । नाम्युपधादिति तेन स्तृंहेरस्ताक्ष्यदित्येव रूपमिति बोध्यम् हशषादित्येव युक्तं धातोर्विशेषणत्वेनान्तलाभात् ॥

मू०-- इषुसहलुभरिषरुषामनपितस्येड्वा ॥ रोषिता रोष्टा । रेषिता । रेष्टा । अशिक्षत् । उष गतौ । ओषति ओषाञ्चकार, उवोष । मिह सेचने ।

(सुबोधिनी-) इषुसहलुभरिषरुषामनपितस्येड्वा । इषु इच्छायां । षह मर्षणे । लुभ गार्ध्ये । रुष रिष हिंसायामेभ्यःपरस्य तकारस्य इड्वा भवति अनग्नि परे । विदद्रिद्रेत्याम् उपधायालघोरिति गुणः । ओषांचकार असवर्णेस्वरे इत्युव् । उवोष । मिह सेचने । सेचनमार्द्रीकरणं ॥

सू०-- ढिढोलोपोदीर्घश्च ॥ ढेपरे ढस्य लोपः स्याच्चानृतोदीर्घः मेढा । षढोः कः से ॥ अमिक्षत् । दह भस्मीकरणे । देहिथ ददग्ध । धक्ष्यति । अधाक्षीत् । झसात् । अदाग्धां । इवि व्याप्तौ । इन्वति । इन्वांचकार । ऐन्वीत् । हिवि दिवि धिवि जिवि प्रीणने । हिन्वति ।

(सुबोधिनी-) ढिढोलोपोदीर्घश्च । अनृतः किं । जर्गृढात् । होढ इति ढत्वं । तथोर्धं इति तस्य धः । ष्टुभिष्टुः इति ढः । ढलोपे मेढा । झशषांतात् इति सक् । अमिक्षत् । हिवि दिवि धिवि जिवि प्रीणने । प्रीणनं तर्पणं । इदितोनुमिति नुम् हिन्वति

(तत्त्वदीपिका-) ढिढोलोप इति । वान्यत्रेत्यतो[illegible] वस्थयाऽनृतः पूर्वस्येति बोध्यम् । ढ्रोढ्रोर्लोपो दीर्घश्चेति सुवचम् । एवं च [illegible] सूत्रणीयम् । प्रीणनमिति । प्रीणनं तृप्तिस्तर्प्पणश्च ।

सू०-- धिन्विकृण्व्योर्वस्यलोपोगुणा[illegible]भावश्चाऽविषये ॥ विकरणस्य नुप्रत्ययस्योप्प्रत्ययस्य च गुणो[illegible] । धिनोति

(सुबोधिनी-) धिन्विकृण्व्योर्वस्यलोपोगुणाभा[illegible]षये । आभ्यामुप्रत्ययः स्यात् धातोर्वकारस्य लोपो गुणाभावश्च [illegible] । धिवि प्रीणने । कृवि हिंसायां । नूप इति गुणे धिनोति ॥

सू०-- ओर्म्वोर्वालोपः ॥ असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा वमयोः । धिन्वः धिनुवः । धिन्मः धिनुमः । मिपि तु गुणोबाधकः धिनोमि ।

(सुबोधिनी-) ओर्म्वोर्वालोपः । उकारः प्रत्ययावयवः प्रत्ययरूपश्च गृह्यते ओर्वाहेरित्यतो वेत्यनुवृत्तं तस्यासंयोगपूर्वस्य प्रत्ययस्येत्यर्थः । प्रत्ययोकारस्य किं । युवः युवः । असंयोगपूर्वस्य किं । शक्नुवः । तक्ष्णुमः । धिनोमीत्यत्र परत्वाद्गुणः ।

(तत्त्वदीपिका-) ओर्म्वोर्वालोप इति । ओर्वा हेरित्यतो वेत्यनुवर्त्यव्यवस्थया संयोगपूर्वप्रत्ययोकारलाभः । उकारश्च प्रत्ययस्तदवयवश्च ।

सू०-- ओर्वाहेः ॥ असंयोगपूर्वात्प्रत्ययोकाराद्धेर्लोपो भवति । धिनु । धिनुतात् । कृवि हिंसाकरणगतिषु । कृणोति । कृण्वन्ति । चकृण्व । अक्षू व्याप्तौ । [illegible] नुप्रत्ययोऽविषये । अक्ष्णो

ति । अक्ष्णुवन्ति । अक्षति । आनक्षिथ । आनष्ट । अक्षिता । अष्टा । अक्षिष्यति । अक्ष्यति। आक्षीत् । आक्षिष्टाम् । आक्षीत् । आष्टाम् । आक्षुः । तक्षू त्वक्षू तनूकरणे ।

(सुबोधिनी--) ओर्वाहेः । वेति न विकल्पार्थं । किंतु प्रत्ययसंबंधिनोऽसंयोगपूर्वादिसस्यार्थस्य प्रतिपादनार्थम् । उप्रत्ययरूपः प्रत्ययावयवश्च गृह्यते । प्रत्ययसंबंधिनः किं । युहि रुहि । असंयोगपूर्वात्किं । शक्नुहि । अक्षू व्याप्तौ । व्याप्तिः कात्स्न्र्यं । अक्षो वा नुप्रत्ययोऽनुविषये । अक्षेर्नुप्रत्ययो वा स्यात् चतुर्षु । अपोपवादः लृटि स्कोरितिकलोपः षढोःकःसे इति कः षत्वं॥अक्ष्यति लुङि ऊदित्वादेट् । आक्षीत् । आक्षिष्टाम् । इडभावपक्षे तु माअक्षीत् । झसादिति सिलोपे आष्टां आक्षुः ॥

(तत्त्वदीपिका-) ओर्वाहेरिति । वा शब्दोत्र न विकल्पार्थः ॥ किंतु व्यवस्थार्थः । तत्फलं तूक्तमेव ।

मू०- तक्षस्तनूकरणेनुर्वाऽब्विषये ॥ तक्ष्णोति तक्षति वा काष्ठान् । ततक्षिथ । ततष्ठ । अतक्षीत् । अतक्षिष्टाम् । अताक्षीत् । अताष्टाम् । तनूकरणे किम् । वाग्भिस्सन्तक्षति । भर्त्सयतीत्यर्थः । णिक्ष चुम्बने । प्रणिक्षति । निक्षति । ग्लै म्लै हर्षक्षये ।

(सुबोधिनी-) तक्षस्तनूकरणेनुर्वाऽब्विषये । तनूकरणेऽर्थे तक्षेर्नु प्रत्ययो वा चतुर्षु । अपोपवादः । ग्लैम्लै हर्षक्षये हर्षक्षयो धातुक्षयः ॥

मू०- संध्यक्षराणामा ॥ अनपि ।

(सुबोधिनी) संध्यक्षराणामा । संध्यक्षरांतानां धातूनामा । अनपि धातोः किं । गोभ्यां नौभ्यां ॥

मू०-आतोणब्डौ ॥ आदन्ताद्धातोः परो णब् डौ । जग्लौ ।

(सुबोधिनी-) आतोणब्डौ आत इति धातोर्विशेषणात्तदंतविधिः । आदंतादाकाररूपाच्च धातोः परो णब् डौ स्यात् अड्वाचचारेति औ ॥

(तत्त्वदीपिका-) अतोणब्डाविति धातोर्विशेषणत्वात्तदन्तलाभ इत्यभिप्रेत्याह । आदन्तादिति । आदन्ताकाररूपाच्चेति बोध्यम् । प[illegible]यग्रहणप्रथमपुरुषबहु[illegible] गाते इत्यादावतिप्रसंगवारणाय डित्करणं । आतो[illegible]त्वं वा स्थानिवत्वात् । तज्ज्ञापकं चात्र उग्रहणमेव नित्यत्वात्प्रथमप्रा[illegible]काशन्यायेन वारितः ।

मू०-आतोऽनपि ॥ धातो[illegible]पि ङ्किति स्वरे इटि च । जग्लतुः । जग्लिथ । जग्ला[illegible]

(सुबोधिनी) आतोनपि । [illegible]भागात सेटि थपि चेति लब्धं ॥

(तत्त्वदीपिका-)आतोऽनापि आतइति योगविभागात्सेटि थपि चेत्यस्य लाभः। संयोगादेरिति।

मू०-संयोगादेरादन्तस्यकितिलिङ्चेकारोवा॥ ग्लायात्। ग्लेयात्। अग्लासीत्। कै गै रै शब्दे। जगौ।

(सुबोधिनी-) संयोगादेरादंतस्य किति लिङ्चेकारो वा संयोगादेरादंतस्य धातोरेत्वं वा किति लिङि॥

मू०-- दादेरे॥ अपिद्दा धा मा गै हाक् पिबति सो स्थामात एकारो भवत्याशीर्य्यादादौ पे। गेयात्। अगासीत्। स्त्यै ष्ट्यै शब्दसंघातयोः। स्त्यायति। तस्त्यौ। स्त्यायात्। स्त्येयात्। अस्त्यासीत्। दैप् शोधने। ददौ। दायात्। अदासीत्। धेट् पाने। दधौ। धेयात्। अधासीत्। सिलोपपक्षे। अधात्। अधाताम्।

(सुबोधिनी-) दादेरे। इह दारूपाश्चयः। डुदाञ् दाने। दाण् दाने। दो अवखंडने। नदेङ्रक्षणे गृह्यते लिङि कित्वासंभवात। धारूपौ द्वौ। डुधाञ् धारणपोषणयोः। धेट् पाने। दाश्चदाश्चदाश्चदाः। धाश्चधाश्चधौ दाश्च धौच दाधाइति विग्रहः। दाप् लवने। दैप् शोधने। एतौ पित्त्वात् न ग्राह्यौ। मा माने माङ्मेङौ नेह गृह्यते। लिङि कित्त्वासंभवात। गै शब्दे। गाङ् गताविति तु न गृह्यते। लिङि कित्वासंभवात्। ओहाक् त्यागे। पा पाने। षोंनकर्मणि। ष्ठागतिनिवृत्तौ। एषामेत्वं किति लिङि। देयात्। धेयात्। मेयात्। हेयात्। पेयात्। अवसेयात्। स्थेयात्। कितिकिम्। दासीष्ट॥

(तत्त्वदीपिका-) दादेरित्यत्रदादेरित्यतो दादेरित्यस्यानुवृत्त्यैव सिद्धेऽत्र दादेरिति ग्रहसामर्थ्यादेतल्लाभः।यादादौपे इति।एतदप्युक्तयुक्तेर्लभ्यते।ष्ट्यैस्त्यै इति। अत्र वासुदेवः नातुष्वष्कष्टचैष्ठिवां सत्वंनेत्युक्तवान्। तद्भाष्यविरुद्धम्। पृथक्पाठस्तुतिष्ठचासति अतिसादित्यत्र षत्वार्थः।

मू०-- उस्यालोपः॥ अधुः।

(सुबोधिनी-) उस्यालोपः। आदंतस्य धातोरातो लोप उसि परे॥

मू०- धेटोभूतमात्रेदिवादिपरोङोवाद्वित्वञ्च॥ आतोऽनपि। अदधत्। दृशिर् प्रेक्षणे।

(सुबोधिनी-) धेटो भूतमात्रेदिवादिपरोङोवाद्वित्वंच धेटो ङ प्रत्ययो वा स्यात् द्वित्वं च लुङि सेरपवादः। पक्षे यमिरमिनमातामिति सक्। अधासीत्। शाछेति सिलोपे अधात्। दृशिर् प्रेक्षणे। प्रेक्षणं दर्शनं॥

मू०-दृशादेः पश्यादिः॥ चतुर्ष्वपि दृश ऋ सृ शद सद पा घ्रा

ध्मा म्ना दाण् स्थां पश्य ऋच्छ धौ शीय सीद पिब जिघ्र धम मन यच्छ तिष्ठाः। पश्यति। ददर्श। ददृशतुः।

(सुबोधिनी-) दृशादेःपश्यादिः। दृशिर् प्रेक्षणे। ऋ गतौ। सृ गतौ। शद्लृ शातके। षद्लृ विशरणादौ। पा पाने। पा रक्षणे इति तु न गृह्यते। लुग्विकरणत्वात्। घ्रा गंधोपादाने। ध्मा शब्दाग्निसंयोगयोः। म्ना अभ्यासे। दाण् दाने। ष्ठा गतिनिवृत्तौ। एषामेकादशानां यथासंख्यमेकादश पश्यादय आदेशा भवंति अप्प्रत्यये परे॥

(तत्त्वदीपिका-) दृशादेः पश्यादिरिति। पापाने इत्यस्यैव ग्रहणं न तु पारक्षणे इत्यस्यापि लुग्विकारणालुग्विकरणयोर्लुग्विकरणस्यैव ग्रहणमिति केचित् तन्न। न्यायेन सिद्धौ साहचर्यस्यागतिकत्वात्।

मू०- सृजिदृशोःस्थपोवेट्॥ ददर्शिथ दद्रष्ठ। द्रष्टा॥ अद्राक्षीत् अद्राष्टाम्।

(सुबोधिनी-) सृजिदृशोस्थपोवेट्। ऋादेर्णादेरितिनियमान्नित्ये प्राप्ते विभाषेयम्। लुङि इरितोवेति ङः॥

मू०- ऋवर्णदृशोर्ङेगुणः॥ अदर्शत्। ऋ गतौ। ऋच्छति। आर्च्छत्

(सुबोधिनी-) ऋवर्णदृशोर्ङेगुणः। ऋवर्णांतस्य धातोर्दृशेश्च गुणःस्यात् ङप्रत्यये। ङाभावे अनिटोनामिवत इति वृद्धिः। ततो रारोझसेदृशामित्यारोरः अतउपधायाइति पुनर्वृद्धौ अद्राक्षीत्॥

मू०-गुणोर्तिसंयोगाद्योः॥ अर्तेः संयोगादेर्ऋदन्तस्य च गुणो य कि यङि किति णादावाशीर्य्यादादौ च। आरतुः। आरुः।

(सुबोधिनी-) गुणोर्तिसंयोगाद्योः। अर्तीतिभ्वादिह्वाद्योर्ग्रहणं। लुकानिर्देशस्तु सौत्रस्तिप्निर्देशो यङ्लुङ्निवृत्त्यर्थः। व्याख्यानात् ऋत इति लभ्यते तच्च संयोगादित्वेन विशिष्यते तेन अर्तेः संयोगादेः ऋदंतस्य च धातोर्गुणः यक्यङोः परयोः कितोलिङ्लिङोश्च। संयोगादेरितिकिम्। क्रियात्॥

(तत्त्वदीपिका-) गुणोर्त्तिसंयोगाद्योरिति। अर्तिश्च संयोगादिश्च तौ तयोः। ऋदन्तस्य चेति अर्त्तिसाहाचर्यादेवैतल्लभ्यते।

मू०- अत्यर्तिव्ययतीनांथपोनित्यामिट्॥ आरिथ। अर्य्यात्। अर्ता। अरिष्यति आरिष्यत्।

(सुबोधिनी-) अत्यर्त्तिव्ययतीनांथपोनित्यमिट्। अद भक्षणे। ऋ गतौ। व्येञ् संवरणे। स्वरांतादृत्वतश्चेति विकल्पे प्राप्ते विधिः॥

मू०- सर्तिशास्त्यर्तिभ्योङोलुङि॥ सेरपवादः। स्वरादेः। आ

रत्। आरताम्। अर्तेर्ह्वादेरिति केचित् आर्षीत्। आर्ष्टाम्। सृ गतौ। धावति। अधावत्। शीघ्रगतावेवायम्। अन्यत्र सरति। ससार। सस्रतुः। ससर्थ। सस्रृव। सस्रृम।

(सुबोधिनी-) सर्तिशास्त्यर्तिभ्योङ्लुङि। इह लुका निर्देशात् सर्त्यर्ती जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योर्नङ इति केचित्। शासु अनुशिष्टौ। अस्यैव ग्रहणं नतु आङः शासु इच्छायामित्यस्य। परस्मैपदिसर्त्यर्तिभ्यां साहचर्यात् परस्मैपदिनः शासेर्ग्रहणात् क्रादेरिति नेट्। ससर्थ। सस्रृव॥

(तत्त्वदीपिका-) शीघ्रगतावेवेति। एतच्च विदो नवानामित्यतो वेत्यस्यानुवृत्तेर्व्यवस्थया बोध्यम्।

सू०-यादादौपे॥यादादौ धातोः। ऋतो रिङ् भवति। ङोव्यवधानार्थस्तेन येऽइति न दीर्घः। स्रियात्। सर्ता। सरिष्यति। असरत्। असरताम्। स्रु गतौ। स्रवति। अस्रवत्। सुस्राव। सुस्रुवतुः। सुस्रोथ। स्रूयात्। स्रोता।

(सुबोधिनी-) यादादौपे। धातोर्ऋतोरिङ् स्यात् क्ङिति लिङि ङकारोंत्यादेशार्थो न किंतुमध्यव्यवधानार्थः॥

(तत्त्वदीपिका-)ङोव्यवधानार्थ इति। न त्वन्त्यादेशार्थः। धातोरधिकारात्षष्ठीनिर्दिष्टत्वेनैतल्लाभात्। व्यवधानफलमाह। तेनेति।

सू०-श्रिस्रुद्रुभ्योङो धातोश्च द्वित्वं लुङि॥ सेरपवादः। असुस्रुवत्। दु द्रु गतौ। दुदविथ। दुदोथ। दोता अदौषीत्। द्रवति। दुद्रोथ। दुद्रुव। अदुद्रुवत्। श्रु श्रवणे।

(सुबोधिनी-) श्रिस्रुद्रुभ्योङोधातोश्चद्वित्वंलुङि। एभ्योङ्प्रत्ययः स्याद्धातोर्द्वित्वं च लुङि। नतु सिः॥

श्रुवःशृआदेशोनुप्रत्ययश्चाप्विषये॥ नूपः। शृणोति। शृणोमि। ओर्व्योर्वालोपः। शृणुवः। शृण्वः। शृणुमः। शृण्मः। शृणुयात्। शुश्राव। श्रूयात्। अश्रौषीत्। शद्लृ शातने।

(सुबोधिनी-) श्रुवःशृआदेशोनुप्रत्ययश्चाप्विषये। श्रुवो नुप्रत्ययः स्यात् धातोः शृइत्यादेशश्च चतुर्षु अपोपवादः शद्लृ शातने। शातनं विशीर्णता॥

(तत्त्वदीपिका-) शातन इति विशिर्णतायामित्यर्थः।

सू०-शीयादेशेआत्॥ शीयते। अशीयत्। शशाद। शेदिथ। शशत्थ। शत्ता। अशदत्। षद्लृ विशरणगत्यवसादनेषु। सीदति

(सुबोधिनी-) शीयादेशेआत् । शदेरात्मनेपदं भवति शीयादेशे कृते सति। षद्लृ विशरणगत्यवसादनेषु। विशरणमवयवानां विभागः। अवसादो नाशः॥

मू०-सदिस्वंजोर्लिटिपरस्यनषः॥ निषसाद। सत्ता। सत्स्यति। असदत्। पा पाने। पिबति। पपौ। पेयात्। पाता। पास्यति। दादेः पे। अपात्। घ्रा गन्धोपादाने। जिघ्रति। जघ्रौ। घ्रेयात्। घ्रायात्। घ्रास्यति। अघ्रासीत्। अघ्रात्। ध्माशब्दाग्निसंयोगयोः। धमति। दध्मौ। ध्मेयात्। ध्मायात्। अध्मासीत्। ष्ठा गतिनिवृत्तौ। तिष्ठति। तस्थौ। दादेरे। स्थेयात्। म्ना अभ्यासे। मनति। मम्नौ। म्नायात्। म्नेयात्। अम्नासीत्। दाण् दाने। यच्छति। ददौ। देयात्। अदात्। ह्वृ कौटिल्ये। ह्वरति जह्वार। गुणोर्तिसंयोगाद्योः। जह्वरतुः।

(सुबोधिनी-) सदिस्वंजोर्लिटिपरस्यसस्यनषः। द्वित्वात्परस्यैतयोः सस्य षो न लिटि। अड्द्वित्वव्यवधानेपीति प्राप्तौ निषेधः। लिटिकिं। निषिषत्सति। पिबतीत्यत्र पिबादेशोऽदंतः। अदेइत्यलोपः। अल्लोपस्यासिद्धत्वादुपधायाल्घोरि ति गुणो न। अकारयुक्तोच्चारणसामर्थ्याद्वा। घ्रागंधोपादाने गंधोपादानं गंधग्रहणं। शाच्छासेति वा सिलुक् यमिरमीतीट्सकौ। अघ्रात्। अघ्रासीत्। ध्मा शब्दाग्निसंयोगयोः। शब्दशब्देन तदनुकूलो वायुरिह गृह्यते तेन शंखं धमतीतिवत् मृदंगंधमतीति प्रयोगोन। अग्निसंयोगे सुवर्णं धमति। अग्निना संयुनक्तीत्यर्थः। म्ना अभ्यासे। मनति। विद्याम् अभ्यस्यतीत्यर्थः। अदादित्यत्रदादेः पेइति सिलुक्। गुणोर्तीति गुणः। जह्वरतुः॥

(तत्त्वदीपिका-) सदिस्वंज्योरिति। लिटिपरेपरस्यसस्येतिशेषः स्वंजिग्रहणं तु भाष्यानगुणमपि वृत्त्यादिसंमत्वात्कृतम्।

मू०-ऋदन्तात्थपोनेट्॥ जह्वर्थ। ह्वर्य्यात्। ह्वर्ता। ह्वरिष्यति अह्वरिष्यत्। अह्वार्षीत्। स्वृ शब्दोपतापयोः। स्वरति। सस्वरिथ। सस्वर्थ। सस्वरिव। स्वरिता। स्वर्ता। स्वरिष्यति। अस्वरिष्यत्। अस्वार्षीत्। अस्वरीत्। अस्वार्ष्टाम्। अस्वार्षुः। बुध अवगमने। बोधति। बोधिता। रुह बीजजन्मनि प्रादुर्भावे च। रोढा रोक्ष्यति। अरुक्षत्। स्कन्दिर् गतिशोषणयोः। स्कन्दति चस्कन्दिथ। चस्कन्थ। स्कद्यात्। स्कंत्ता। स्कंत्स्यति। अस्कांत्सीत्।

अस्कदत् । यभमैथुने । यभति । ययाभ । येभतुः । येभुः । येमिथ । ययब्ध । यभ्यात् । यब्धा । अयाप्सीत् । अयाब्धाम् । अयाप्सुः । तृप्लुवनतरणयोः । तरति । ततार । तेरतुः । तेरिथ ।

(सुबोधिनी—) ऋदंतात् थपोनेट् । ऋदंतात् धातोः परस्य थप इण्न भवति स्वरांतादिति पाक्षिके प्राप्ते निषेधः । हन्तृतइतीट् । व्हरिष्यति । स्वृ शब्दोपतापयोः । उपतापो रोगः स्वरतीसूतीतिवेट् । सस्वरिथ । सस्वर्थ । गुणोर्तीति गुणः । स्वर्यात् । लृटिं हन्तृतइति नित्यमिट् । स्वरिष्यति । लुङि अस्वारीत् । अस्वारिष्टां । इडभावे अस्वार्षीत् । अस्वार्ष्टां । स्वरांतादत्वतइतिवेट् । चस्कंदिथ । चस्कंत्थ । आशिषिनोलोपइति नलोपः । स्कद्यात् । लुङि इरितोवेति वाङः । अस्कदत् । ङाभावे सार्वनिटो नित्यं वृद्धिः । अनिटोधातोरनुपधाभूतस्यातो वृद्धिः स्यात् सि प्रत्यये । अस्कांत्सीत् । तृफलेत्स्येत्वपूर्वलोपौ । तेरतुः ॥

मू-०ॠतइर् ॥ ॠकारस्य इर्भवत्यगुणवृद्धिविषये । तीर्य्यात् ।

(सुबोधिनी—) ॠतइत् । धातोर्ॠकारस्य इर् भवति गुणवृद्धिनिमित्ताभावे । र्वोरिति दीर्घः । तीर्यात् ॥

मू ०—ईटोग्रहाम् ॥ ग्रहादीनामिट ईकारो न तु णादौ ।

(सुबोधिनी—) ईटोग्रहाम् । ग्रहादेः परस्येटो दीर्घः स्यान्नतु लिटि । ग्रहामिति बहुवचनेन वक्ष्यमाणव्यवस्था ॥

(तत्त्वदीपिका—) न तु णादावित्यादि । ऊदितोवेत्यतो वानुवृत्तेर्व्यवस्थया लाभः ॥

मू०—वृङ्वृञॄदन्तानांवा ॥ तरिता । तरीता ।

(सुबोधिनी—) वृङ्वृञॄदंतानांवा । एभ्यः परस्येटो वा दीर्घः । नतु लिटिकिम् । तेरिथ ॥

मू०—पेसेरिटोनदीर्घः सीष्टादेश्च ॥ अतारीत् । अतारिष्टाम् । अतारिषुः । दंश दशने ।

(सुबोधिनी—) पेसेरिटोनदीर्घःसीष्टादेश्च । वृङ्वृञॄदंतात्परस्येटो न दीर्घः । पे सौ सीष्टादौ च परे । दंश दशने । दशनं दंष्ट्राव्यापारः । निपातनान्नस्य लोपः ॥

(तत्त्वदीपिका—)दशन इति । इहैवनिपातनान्नलोपः

मू०— अपिरञ्जदंशसंजस्वञ्जाम् ॥ एषां नस्य लोपोऽपि दशति । दंष्टा । अदाङ्क्षीत् । षञ्जसंगे । ससञ्जिथ । ससङ्क्थ । व्यषाङ्क्षीत् । कित रोगापनयने संशयेच ।

(सुबोधिनी—) अपिरंजदंशसंजस्वंजाम् । रंज रागे दंश दशने संजसंगे

ष्वंज परिष्वंगे। एषामुपधाभूतस्य नस्य लोपो भवति अप्प्रत्यये। लुङि साव-
निट इति वृद्धिः छशषेति षत्वं षढोरिति कत्वं। यमांयमस्येति परसवर्णः। अदा-
ङ्क्षीत्। अड्द्वित्वव्यवधानेपीति षत्वम्। व्यषाङ्क्षीत्। कित रोगापनयने सं-
शये च। रोगापनयनं व्याधिप्रतीकारः। संशये प्रायेण विपूर्वः विचित्सा तु
संशय इत्यमरः॥ गुणो दीन॥ स्वार्थे सप्रत्ययगुणो दीनं भवति

मू०-गुप्भ्यः॥ गुप्तिज् कित् मान् बध दान् शान्भ्यः स्वार्थे स
प्रत्ययो भवति धातोश्च द्वित्वम्। चिकित्सति। चिकि
त्सांचकार। चिकित्सिता। अचिकित्सीत्। पत्लृ पतने। पपात पेततुः।
पतेर्ङपुम्॥ अपप्तत्। भ्रमु चलनेयोवा। भ्राम्यति भ्रमति।

(सुबोधिनी-) गुप्भ्यः। गुप् गोपने। तिज निशाने। मान पूजायां। बंध
बंधने। दान आर्जवे। शान तेजने। बहुवचनमाद्यर्थं। गुपेर्निंदायां। तिजेः क्षमायां
कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च। मानेर्जिज्ञासायां। ब-
धेश्चित्तविकारे। दानेरार्जवे। शानेर्निशानेवाच्ये नित्यं स्वार्थे सप्रत्ययः धातो-
र्द्वित्वं च। गुपिप्रभृतयः। कित्भिन्ना अनुदात्तेतः। दानशानौ स्वरितेतौ। अत्र
सप्रत्ययस्य सिसेतत्यनेनेण्न भवति। आगमजमनित्यमित्युक्तत्वात्। नानिटिसे
इत्युपधाया गुणो न सधातुरिति धातुत्वात्तिबादिः। कितेर्व्याधिप्रतीकारादावेव
सइत्युक्तं तदुदाहरति। चिकित्सति। रोगमपनयनतीत्यर्थः। शत्रुंचिकित्सति।
निगृण्हातीत्यर्थः। क्षेत्रे तृणानि चिकित्सति। अपनयति नाशयतिवेत्यर्थः। कासादि-
प्रत्ययादामइत्याम् यतइत्यलोपः चिकित्सांचकार। भ्रमु चलने। मंडलाकारे-
ण चलनमेव धात्वर्थो न। किंतु चलनमात्रम्। भ्राशभ्लाशिति वा यः। भ्राम्यति॥

(तत्त्वदीपिका-)गुप्भ्यइति। बहुवचनमाद्यर्थमतो गणयति। गुप्तिज इत्यादि। स्वार्थ
इति। अन्यार्थानुक्तेरिति भावः। चिकित्सतीति। आगमजस्यानित्यत्वादिडभावस्ततो
नानिटि से इति गुणाभावः। भ्रमु इति। उदित्वं क्त्वाप्रत्ययेभ्रमित्वाभ्रांत्वेतीड्विकल्पार्थम्।

मू०-- फणृराजृभ्राजृभ्राशृभ्लाशृस्यमुस्वनृजृषृभ्रमुत्रसाम्॥
एत्वपूर्वलोपौ वा। भ्रेमतुः। बभ्रमतुः। अभ्रमीत्। टुवम् उद्गिरणे।
वम एत्वपूर्वलोपौ वेति केचित्। वेमतुः। ववमतुः। अवमीत्। फ-
णृगतौ। फेणतुः। पफणतुः। अफाणीत्। अफणीत्। स्वनस्यमु
शब्दे। स्वेनतुः। सस्वनतुः। अस्वानीत्। अस्वनीत्। स्येमतुः।
सस्यमतुः। अस्यमीत्। शसु हिंसायाम्। शशसतुः। शशसिथ।
तुहिर् दुहिर् उहिर् अर्दने। अतुहत् अतोहीत्। दोहिता। अदु-
हत्। अदोहीत्। उवोह। ऊहतुः। वस निवासे।

गतिर्जीवनं च

(सुबो०–)फण्राजृभ्राजृभ्राशृभ्लाशृस्यमुस्वनजूषृभ्रमुत्रसां।एत्वपूर्वलोपौ वा । फण् गतौ । राजृ दीप्तौ । टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । स्यमु स्वन शब्दे । जॄष् इरवयोहानौ । भ्रमु चलने । त्रसी उद्वेगे । एषामेत्वपूर्वलोपौ वा किति लिटि सेटि थपि च । टुवम् उद्गिरणे । केचिदमुमुदितं पठंति । वामनस्तु नोदितम् । शृधातोर्युट् प्रत्यये गुणे कृते तूद्गिरणइति स्यात्ततो निपातनादिरिति सुधाकरः । उद्गिरणं वमनं । वादित्वादेत्वपूर्वलोपौ न । ववमतुः वेमुश्च केचिद्वुधिरमित्यादि प्रयोगाभाष्यविरुद्धाः ॥॥

(तत्त्वदीपिका–)अभ्रमीदिति ह्मयन्तेत्यादिना न वृद्धिः टुवम उद्गिरण इति । वेमथुरित्ययप्रत्ययार्थ द्वित्वं । इहैव निपात्तनादुद्गिरणे इत्यत्र गुणाभावः इशशासतुति । न शसददेति निषेधः । निमित्त इति क्लिात्परस्येत्यर्थः ॥

सू०-- णबादौपूर्वस्य ॥ यजादीनां ग्रहादीनाञ्च पूर्वस्य सम्प्रसारणं णबादौ ।

(सुबोधिनी–)णबादौ पूर्वस्य । यजामिति ग्रहामिति चानुवृत्तेः । यद्यपि ग्रहि वृश्चि पृच्छति भ्रज्जतीनां पूर्वस्य संप्रसारणे कृते विशेषो नास्ति । तथापि पर्जन्यवल्लक्षणं प्रवर्त्तते । जग्राह । वव्रश्च । पप्रच्छ । बभ्रज्ज । लिटिकिं । विवक्षति । पिप्रक्षति ॥

सू०-- यवराणामिदुद्दतः ॥ सस्वरस्य सम्प्रसारणं । दीर्घस्य दीर्घो ह्रस्वस्य ह्रस्वः । उवास । [illegible] पूर्वकार्यं प्रबलम् ॥१॥

(सुबोधिनी–) यवराणामिदुद्दतः । यकारवकाररकारणां स्थाने इकारोकारऋकारा भवंति । ते संप्रसारणसंज्ञकाः स्युः ॥

सू०-- यजांयवराणांय्वृतस्सम्प्रसारणंकिति ॥ यजादीनांसम्प्रसारणंकिति । यजिर्वपिर्वहिश्चैव वेञ्व्येञौ ह्वयतिस्वपी । वदिवसी श्वयतिर्वक्तिरेकादश यजादयः ।

(सुबोधिनी–)यजांयवराणांय्वृतःसंप्रसारणंकिति । यजादिधातूनां यकारवकाररकारणामिकारोकारऋकाराः संप्रसारणं भवंति किति प्रत्यये परे । यजिर्वपिर्वहिश्चैववेञ्व्येञ्ह्वेञ्स्वपवदस्तथा । वसिश्चश्वयतिर्वक्तिरेकादशयजादयः ॥ १ ॥ यज देवपूजादौ टुवप् बीजतन्तुसंताने वह प्रापणे वेञ् तंतुसंताने । व्येञ् संवरणे । ह्वेञ् स्पर्द्धायाम् । ञिष्वप् शये । वद व्यक्तायांवाचि । वस् निवासे । टुओश्वि इरगतिवृद्धयोः । वच् परिभाषणे । एते एकादश धातवो यजादयो ज्ञेयाः ॥

सू०-घसादेष्षः ॥ घसिशासिवसीनां सस्य षो निमित्ते सति ऊषतुः उवसिथ । उवक्थ । उष्यात् । वस्ता।

(सुबोधिनी-) घसादेषः। सस्याकृतत्वत्वादप्राप्ते विधिरयम्। घस्लृ अदने। शासु अनुशिष्टौ वस् निवासे। कित्परस्यैषां सस्य षः स्वरान्तादावत इतिवेट् उवसिथ। उवस्थ॥

मू०-सस्तोऽनपि॥ सस्य तोऽनपि से। वत्स्यति। अवात्सीत्। अवात्ताम्। वदव्यक्तायां वाचि। वदति उवदिथ। उद्यात्। वदिव्रज्योः सौ नित्यवृद्धिः। अवादीत्। टुओश्विइर् गतिवृद्ध्योः।

(सुबोधिनी-) सस्तोनपि। धातोः सस्य तो नपि। सकारे परे। से किं। वस्ता। सस्येतिकिं रप्स्यते। धातोः किं वेघः। से लुङ्णित्पे इति सेर्णित्वादतउपधाया इति वृद्धिः। अवात्सीत्। सस्य ते कृते झसादिति सिलोपः। अवात्ताम्। वदिव्रज्योरिति वृद्धिः अवादीत्। टुओश्विइर् गतिवृद्ध्योः। टुइतीत्संज्ञकः द्वितोथुरित्येदर्थः। श्वयथुः। ओरिति ल्वाद्योदितश्चैतदर्थः। इरिदिरितो वेतिङप्रत्ययार्थः॥

मू०-श्वयतेर्णादौसम्प्रसारणंवा ततो द्वित्वम्॥ शुशाव। शुशुवतुः। शुशविथ। शिश्वाय। शिश्वियतुः। शिश्वयिथ। शूयात्। श्वयिता। अश्वयीत्।

(सुबोधिनी-) श्वयतेर्णादौसंप्रसारणंवा ततो द्वित्वम्। श्वयतेः पूर्वं संप्रसारणं स्याद्वा पश्चाद्द्वित्वं लिटिनुधातोरित्युव्। शुशुवतुः। आशिषि यजामिति संप्रसारणे कृते ये इति दीर्घः। शूयात्। ह्मयंतेति न वृद्धिः। अश्वयीत्। पक्षे इरितोवेति ङप्रत्यये॥

मू०- श्वयतेरितोलोपोङे॥ अश्वत्।

(सुबोधिनी-) श्वयतेरितोलोपोङे। श्वयतेरिकारस्य लोपः स्यात् ङप्रत्यये। अश्वत्॥

मू०-श्वयतेर्ङेद्वित्वंवाएरलोपः॥ अशिश्वियत्। घस्लृ अदने। घत्स्यति। घसेत्। जघास। जक्षतुः। जघसिथ। जघस्थ। घस्ता। घसति। अघत्स्यत्। इति पं प्रक्रिया।

(सुबोधिनी-) श्वयतेर्ङेद्वित्वंवाएरलोपः। श्वयतेर्वा द्वित्वं भवति इकारस्य लोपाऽभावश्चङेपरे। नुधातोरितीय् अशिश्वियत॥ इतिपम्॥

(तत्त्वदी०-) श्रीविद्यानगरस्थायिलोकेशकरशर्मणा॥
कृतायांदीपिकायां हिपरस्मैपदपूरणम्
॥ इति पंप्रक्रिया॥

मू०-- एध वृद्धौ । एधते । एधाञ्चक्रे ।

(सुबोधिनी-) एध वृद्धौ । अकारोऽनुदात्तआत्मनेपदार्थः ॥

(तत्त्वदीपिका-) एध वृद्धाविति । अकारोनुदात्त आत्मनेपदार्थः ।

मू०--आमोभ्वसोर्नात्कर्त्तरि ॥ एधामास एधाम्बभूव । ऐधिष्ट । ईक्ष दर्शनाङ्कनयोः । ईक्षाञ्चक्रे । ऐक्षिष्ट । ष्वष्क गतौ । ष्वष्कते । ष्वष्किषीष्ट । अष्वष्किष्ट । वेष्ट वेष्टने । विवेष्टे । चेष्ट चेष्टायाम् । चिचेष्टे । अचेष्टिष्ट । ऋज गतौ स्थैर्य्येच अर्जते । आनृजे । आर्जिष्ट ष्वञ्ज परिष्वङ्गे । स्वजते ।

(सुबोधिनी-) आमोभ्वसोर्नात्कर्त्तरि । आम्प्रत्ययांतात्परयोर्भ्वसोः कर्तर्यर्थे आत्मनेपदं न भवति । भावकर्मणोस्त्वात्मनेपदमेव । नामधातुष्वष्कष्टिवामिति सत्वाभावः । ष्वष्कते । नानृजे इत्यत्र द्वित्वं हसादिःशेषः रइत्यत्वम् आभ्वोरित्यात्वम् नुगशामितिनुक् । ष्वंज परिष्वंगे परिष्वंग आलिंगनम्।अपि रंजेति नलोपः॥

(तत्त्वदीपिका-) नात्कर्त्तरीति । आत् आत्मनेपदम् । कर्त्तरीत्युक्तेर्भावादात्मनेपदमेव ष्वष्केति । नामधातुष्वष्कष्टिवामिति सत्वनिषेधः । आनृजे इति । द्वित्वं हसादिः शेषः र इत्यत्वं । आवनोरीत्यात्वं । नुगशामिति नुक् ।

मू०-- स्वजतेर्णादेर्वाकित्वम् ॥ सदिस्वंज्योर्लिटि परस्य न षः । परिषस्वञ्जे । परिसस्वजे । स्वङ्क्षीष्ट । स्वङ्क्ता स्वङ्क्ष्यते । अस्वङ्क्त । अस्वङ्क्षाताम् । पर्य्यष्वङ्क्त । पर्य्यस्वङ्क्त । त्रपूष् लज्जायाम् । त्रपते । त्रेपे । ऊदितोवा । त्रपिषीष्ट । त्रप्सीष्ट । अत्रपिष्ट । अत्रप्त । तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणे तेपते तितिपे । तिप्सीष्ट । अतिप्त । तेपृ । तेपते । तितेपे । तेपिषीष्ट । अतेपिष्ट । ष्टिपृ । स्तेपते । तिष्टिपे । स्तेपिषीष्ट । ष्टेपृ । स्तेपते । तिष्टेपे । स्तेपिषीष्ट । जभी जृभी गात्रविनामे । रधिजभोस्वरेनुम् । जम्भते । अजम्भिष्ट । जृम्भते । जजृम्भे । ष्टुभ स्तम्भे । विष्टोभते । तुष्टुभे । स्तोभिता । स्तोभिषीष्ट क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे । चक्षंसे । मोनो धातोः । मान्तस्य धातोर्मकारस्य नः स्यात् झसेपदान्ते वमयोः परयो । चक्षमिवहे । चक्षमिमहे । चक्षण्वहे । चक्षण्महे । अक्षमिष्ट। अक्षंस्त । क्रूयी शब्देच । क्रूयते । अक्रूयिष्ट ।क्ष्मायी विधूनने क्ष्मायते। चक्ष्माये। अक्ष्मायिष्ट स्फायी ओप्यायीवृद्धौ । स्फायते पस्फाये। अस्फायिष्ट । प्यायते ।

(सुबोधिनी-) स्वजतेर्णादेर्वाकित्वम् । स्वजतेः परस्य लिटो वा कित्वं भवति । सदिस्वंजोरिति परस्य न षः । परिषस्वजे । झसादिति सि लोपः । अस्वंक्त । तॄफलभजत्रपामित्येत्वपूर्वलोपौ । त्रेपे । ऊदितोवेतिवेट् । त्रप्सीष्ट । त्रपिषीष्ट । लुङि झसादिति सिलोपः । अत्रप्त । तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणे । आद्यो ऽनिट् । क्षीरस्वामीत्वयं सेडिति बभ्राम । क्रादेर्णादेरिति नित्यमिट् तितिपिषे । सिस्योः । उपधाभूतस्य नामिनो गुणो नानिटि सि प्रत्यये सीष्टादौच परे लुङि झसादिति सिलोपः । अतिप्त । जभी जृभि गात्रविनामे । गात्रस्वेदे इत्यर्थः । ईदित्वात् आदीदित इतिक्तवत्वोर्नेट् । रधिजभोः स्वरेनुम् । एतयोर्नुमागमः स्यात् स्वरे । धू हिंसायां । ञिप्रत्यये तु रंधयतीत्यत्र ञिनिमित्ता परापि वृद्धिर्नित्येन नुमा बाध्यते। स्वरे किं। रब्धा जब्धा । ष्टुभ स्तंभे । स्तंभो निरोधः । क्षमूष् सहने । षकारः। षिद्भिदामङ्इत्यङ्प्रत्यार्थः । मोनोधातोरिति मस्य नः । अवकुप्वंतरेपीति णत्वं । चक्षण्वहे । क्रूयी शब्दे उंदेच । उंदः क्लेदनमार्द्रीभाव इत्यर्थः ॥

(तत्त्वदीपिका-) परिषस्वजे इति । कित्वान्नलोपः । सदिस्वंज्योरिति परस्य षत्वनिषेधः । त्रप्सीष्टेति । ऊदितोवेति वेट् । चक्षण्महे इति । इडभावपक्षे वमयोश्चेति न णत्वं । क्रूयी शब्दे उंदे चेति । ईदित्वं क्तक्तवत्वोरिडभावार्थम् ।

मू०-लिट्यङोःप्यायःपी ॥ पिप्ये ।

(सुबोधिनी-) लिट्यङोः प्यायःपी । लिटि यङि च प्यायः पी । आदौ परत्वात् पीभावे पश्चात् पीशब्दस्य द्वित्वे कृते नुधातोरिति यः । पिप्ये।यङि पेपीयते।

(तत्वदीपिका-)पिप्ये इति । आदौपरत्वात्पीभावे पुनः प्रसंगविज्ञानात्पीशब्दस्य द्वित्वम् । ततो नेकस्वरपूर्वकत्वाद्यत्वम् ॥

मू०-दीपजनबुधपूरितायिप्यायिभ्योवाइणूतनिकर्तरि॥सेरपवादः।

(सुबोधिनी-) दीपजनबुधपूरितायिप्यायिभ्योवाइणूतनिकर्तरि । दीपी दीप्तौ । जनी प्रादुर्भावे । बुध अवगमने। पूरी आप्यायने। एते दिवादयः । तायृ संतानपालनयोः । ओप्यायी वृद्धौ । एतौ भौवादिकौ । एभ्य इण् प्रत्ययो वा स्यात् कर्त्रर्थे तनि परे । सेरपावदः ॥

(तत्त्वदीपिका-) दीपजनेति । अत्र पण्डिताः दीपपूरादिभिरात्मेनपदिभिः साहचर्यात् । बुधबोधने बुध जनने इति परस्मैपदिनो न ग्रहणम् । तेनाभ्यां कर्मव्यतिहारे आत्मनेपदे तनि न भवति ।

मू०-- लुक् ॥ इणः परस्य तनो लुक् । अप्यायि । अप्यायिष्ट । तायृ संतानपालनयोः । तताये । अतायिष्ट । वल वल्ल संवरणे । वलते । वल्लते । टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । भ्रेजे । बभ्राजे । भ्राश्यते, भ्राशते । भ्रेशे, बभ्राशे । भ्लाश्यते, भ्लाशते । भ्लेशे । बभ्लाशे । तिज

निशाने क्षमायाञ्च। गुब्भ्यः तितिक्षते। तितिक्षाञ्चक्रे। गुपू गोपनकुत्सनयोः। जुगुप्सते। मान विचारणे।

(सुबोधिनी-) लुक्। इणतनीत्यत इणिति तनीति चाऽनुवृत्तं। इणिति पंचम्या विपरिणमनीयं तनीति षष्ठ्या च अप्यायि। तायृसंतानपालनयोः। संतान प्रबंधः। टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ। दीप्तिस्तेजः। फणिराजृभ्राजृइत्येत्पूर्वलोपे भ्रेजे बभ्राजे। भ्र।शभ्लाशिति वा यप्रत्ययः। भ्राश्यते।तिज निशाने।निशानं तीक्ष्णीकरणं। गुब्भ्य इति तिजेः क्षमायां सः। तितिक्षते। क्षमां करोतीत्यर्थः। गुप गोपनकुत्सनयोः। गोपनं रक्षणं। गुपेर्निंदायां सः। जुगुप्सते। निंदां करोतीत्यर्थः।

(तत्त्वदीपिका-) लुक्। अत्रेणतन्यकर्त्तरीति पूर्वसूत्रादनुवृत्तं तनीति षष्ट्या विपरिणमणीयमिति इणितिपंचम्या। तत्रषष्ठीनिर्देशादऽन्त्यलोपः। आदेरित्यस्यानुवृत्या आदेरपि लोप इति सूत्रपाठपक्षे। क्वचित्तु लुगिति पाठः। तत्र सर्वस्य तनो लुग्भवतीति। अत्रेदं वक्तव्यम्। अत्र तनीति नानुवर्त्यं इणः परस्य लुक् स्यात् इत्येव व्याख्येयम्। तथाचेण परस्यान्यस्यासंभवात्तन एव लुग्भविष्यति। न चाकारितरामित्यत्रातिप्रसंगः। तत्रासिद्धत्वे तनः परत्वात्। निशाने। निशानं तीक्ष्णकरणम्।

मू०-- यःसेः ॥ पूर्वस्यात इत्से।

(सुबोधिनी-) यःसे। इ अः से इति पदच्छेदः। पूर्वस्येत्यनुवृत्तं तपरः किं पापचिषति। यङंतात्सः॥

(तत्त्वदीपिका-) यः से। इअः से इति छेदः॥

मू०-- मानादीनांपूर्वस्येतोदीर्घः॥ मीमांसते। बध निन्दायाम्। आदिजबामिति बीभत्सते। पण व्यवहारे स्तुतौ च पनच पणायति। स्तुतावेवायः। पणते। पणायाञ्चक्रे। पेणे। एवं पन्। कमु कान्तौ।

(सुबोधिनी-) मानादीनां पूर्वस्येतोदीर्घः। एषां पूर्वस्येकारस्य दीर्घः स्यात्। मान विचारणे बधनिंदायाम्। दान् आर्जवे। शान् तेजने। इत्यादि। मानेर्जिज्ञासायांसः। मीमांसते। जिज्ञासां करोतीत्यर्थः। बध निंदायां। निंदा परापवादः। बधेश्चित्तविकारे सः। आदिजबानामिति भः। खसे चपा इति तः। बीभत्सते। ग्लानिं करोतीत्यर्थः। पण व्यवहारे स्तुतौ च। पनच क्रयविक्रयरूपो व्यवहारः। पनेति स्तुतावित्येनेन संबध्यते। पृथग्निर्देशात्। पनिसाहचर्यात् पणेरपि स्तुतावेवायप्रत्ययः। स्तुतावनुबंधस्य केवले चरितार्थत्वादायप्रत्ययांतादात्मनेपदं न भवति पणायति। यतइत्यल्लोपे पणायांचकार। भट्टिस्तु व्यवहारेप्यायप्रसयं कृतवान्। न चोपलेभे वणिजा पणायामिति व्यवहारमित्यर्थः। आयांतादङ् प्रत्यये आप्।

कमु कांतौ। कांतिरिच्छा। णिङभावे उदित्त्वात् क्त्वायामिड् विकल्पः। कमित्वा कांत्वा। क्तक्तवत्वोस्तु क्वचिद्वेद् इति निषेधात्। कांतः। कांतवान्॥

(तत्त्वदीपिका-) पनचेति। व्यवहारे स्तुताविति चार्थः। पणायतीति व्यवहारे पणते इत्यत्र चारितार्थत्वादनुबंधस्यायप्रत्ययान्न त्वात्।

मू०- कमेस्स्वार्थे णिङनपितुवा॥ कामयते कामयाञ्चक्रे। चकमे॥

(सुबोधिनी-) कमेस्स्वार्थेणिङ्अनपितुवा। कमेर्णिङ्स्यात्चतुर्षु नित्यमनपिवा धात्वर्थे॥

मू०-- णेरङ्द्विश्च॥ ण्यन्ताद्धातोः कर्तरि अङ् लुङि। सेरपवादः। धातोश्च द्वित्वम्

(सुबोधिनी-) णेरङ्द्विश्च। णेरित्यस्य प्रत्ययत्वात्तदंतलाभः। अपूकर्त्तरीत्यतो मंडूकप्लुत्या कर्त्तरीत्यनुवृत्तं। ङकारोङिल्घाविति विशेषणार्थः अङि परे चकारात् णंतस्य धातोर्द्वित्वं। तच्च नित्यत्वात् णिलोपे कृते प्रवर्त्तते। कर्त्तरि किं। अकारयिषातां घटौ कुलालेन॥ लोपात्द्विधा प्राप्त्यप्रवृत्त॥

(तत्त्वदीपिका-) णेरङ् द्विश्च। णेरिति। अस्य प्रत्ययत्वात्तदन्तलाभः अपूकर्त्तरीत्यतो मण्डूकप्लुत्या कर्तरीत्यनुवर्त्तते। कर्त्तरि किम् अकारयिषातां घटौकुलालेन। अत्राहुः। ङकारो ङिल्घवाविति विशेषणार्थः चकारस्य वा भेदेन व्याख्यानात्। श्रिश्रुद्रुभ्योङः क्वचिद्विकल्पेनेत्यादि। अत्रेदं वक्तव्यम्। अशिश्रियदित्यादौ ङकारस्य गणप्रतिषेधार्थतया दृष्टत्वेनान्यार्थताया अन्याय्यत्वात्। अचूचुरदित्यादौ तु ह्रस्वविधिसामर्थ्यादेव न।

मू०-- णेः॥ अनपि णेर्लोपो नत्विडामन्ताल्वाय्येत्न्विष्णुषु।

(सुबोधिनी-) णेः णेरिति णियिङोः सामान्येन ग्रहणं। इडादिषु प्रत्ययेषु परेषुणेर्लोपोनान्यत्र। अनपि णेर्लोपः स्यात् इटि। कामयिता। आमि कामयामास। विशादेरंत इत्यौणादिकेन्ते गंडयन्तः।आलुप्रत्यये स्पृहयालुः। चादेराप्य इत्यौणादिके आप्ये स्पृहयाप्यः इत्नुप्रत्यये औणादिके स्तनयित्नुः। इष्णुप्रत्ययेच्छान्दसिके वीरुधः पारयिष्णवः॥ द्वितात् प्रधा प्राप्तप्रवृत्त॥

(तत्त्वदीपिका-) णेरिति। णिणिङोः सामान्येन ग्रहणम् न त्विडित्यादिषु। इट् कारयिता। आम्। कारयामास। अन्त मण्डयन्तः औणादिकोन्तः।आलु स्पृहयालुः।स्पृहीत्यादिनोक्त आलुः।आप्यः स्पृहयाप्यः औणादिक आप्यः। इत्नु स्तनयित्नुः औणादिकः। इष्णुःपारयिष्णवः एषु णेर्लोपो नेत्यर्थः।

मू०- अङिल्घौन्हस्वउपधायाः॥ अङि सत्युपधाया ह्रस्वो भवति पूर्वस्यातो लघुनि धात्वक्षरे इकारः।

(सुबोधिनी-) अङ्गिलघौन्हस्वउपधायाः। येन नाव्यवधानं तेन व्यवहितेपी वचनसामर्थ्यात् धात्वक्षरस्य ककारेण व्यवधानेपि पूर्वस्यातोऽत्रेत्वं। अजजागरदित्यत्र त्वनेकवर्णव्यवधानत्वान्नेत्वं। उपधायाः किं। अचकांक्षत् ॥

(तत्त्वदीपिका-) अङि लघौ न्हस्व उपधायाः। धात्वक्षरस्य ककारेण व्यवधानेऽपि येन नाव्यवधानं संभवति। तेन व्यवहितेपीति वचनसामर्थ्याद्भवति। अजजागरदित्यत्र त्वनेकवर्णव्यवधानत्वान्न भवति। नचाचिचक्षणदित्यत्राप्यनेकवर्णव्यवधानत्वान्न भविष्यतीति वाच्यम्। अत्स्मृद्दत्वरेतीत्वबाधनार्थमत्वेन संयोगव्यवधाने भवतीति ज्ञापितत्वात्। तेनस्वरहससमुदाय एव न भविष्यतीति बोध्यम्।

मू०--लघोर्दीर्घः॥ अङि सति पूर्वस्य लघोर्दीर्घो भवति लघुनि धात्वक्षरे परे। अचीकमत्। ञेरभावे।

(सुबोधिनी--) लघोर्दीर्घः। अङि लघावित्यतोलघावित्यनुवृत्तं। लघोः किम्। अचिक्षणत्। ञेरभावे॥

(तत्त्वदीपिका-) लघोर्दीर्घः। अत्राङिलघावित्यनुवर्तते इत्याह लघुनीत्यादि। अत्र प्रांचः। हसादेर्धातोः पूर्वस्य लघोर्दीर्घो भवति। तेनारिरदित्यादावप्रसंग इति। वस्तुतस्तु अत्र दीर्घाप्राप्तिरेव लघुधात्वक्षरपरत्वाभावात्।

मू०-- कमेरङ्द्वित्वे॥ अचकमत्। अयगतौ। अयते।

(सुबोधिनी-) कमेरङ्द्वित्वे। अन्यंतात्कमेरङ् स्यात्। धातोर्द्वित्वं लुङि ञेरपवादः॥

मू०-अयतौ प्रादे रेफस्य लत्वम्॥प्लायते। अयांचक्रे। आयिष्ट। दय दानगतिरक्षणहिंसादानेषु। दयते। दयाञ्चक्रे। घटचेष्टायाम्। घटते। जघटे। अघटिष्ट। ईहचेष्टायाम्। ईहाञ्चक्रे। ऊह वितर्के। ऊहाञ्चक्रे। कासृ शब्दकुत्सायाम्। कासाञ्चक्रे। षेवृ सेवने। सिषेवे असेविष्ट। प्रुङ् प्लुङ् च्युङ् गतौ। अप्रोष्ट। अप्लोष्ट। अच्योष्ट। गाङ् गतौ। गाते। अन्तरङ्गत्वात्सवर्णदीर्घः सह। गाते। गाते। जगे। गावहे। गामहे। जगे। अगास्त। रुङ् गतौ भाषणेच। रवते। रुरुवे। अरविष्ट। अनिडयमित्येके। मूङ् बन्धने। मविता। अमविष्ट। पूङ् पवने। अपविष्ट। देङ् त्रैङ् पालने। दयते।

(सुबो०-) अयतौ प्रादेरेफस्य लत्वं। प्रादिस्थरेफस्य लत्वमयतौ। अयताविति रेफस्य विशेषणं नतु प्रादेः। येननाव्यधानमिति वचनादेकव्यवधाने लत्वं पलायते। प्रत्यय इत्यादौ त्वनेकव्यवधानान्न। कासादिप्रत्ययादाम्। अयांचक्रे। आशिषि सेटो

हलादेति वा ढः। अयिषीध्वं। अयिषीढ्वं। लुङि आयिष्ट। आयिढ्वं आयिध्वं। अथ कथमुदयति विततोर्ध्वरश्मिरज्जाविति माधवः। अत्र शानप्रत्ययेन भाव्यमिति शंकितुराशयः। उच्यते। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यं चक्षिङो ङित्करणाज्ज्ञापितं। दयदानगतिरक्षणहिंसादानेषु। हिंसा हननं। आदानं ग्रहणं। कासादिप्रत्ययादित्याम्। दयांचक्रे। ऊह वितर्के। वितर्को विचारः। गाते इत्यत्र पूर्वमप्प्रत्ययेन सह सवर्णे दीर्घे कृते पश्चादादाथ इरिति न। आर्तोतोदनत इति तु प्रवर्त्तते एव। ते अंते परत तुल्यं रूपमिति भावः। गातेऽत्र आदादिकोयमिति हरदत्तादयः। फले तु न भेदः। रुङ्‌ गतौ रेषणेच। रेषणं हिंसा। देङ्‌ त्रैङ्‌ पालने पालनं रक्षणम्॥

(तत्त्वदीपिका–) अयताविति अयताविति रेफस्य विशेषणं न तु प्रादेरित्यभिप्रेत्याह। प्रादेरेफस्येति। तेन रेफस्याव्यवधानेनायतौ परे लत्वं नान्यत्र प्रत्ययत इत्यादौ। तिशब्देन व्यवधानात्। न च छायत इत्यत्राप्यकारेण व्यवधानमेवास्तीति वाच्यम् येन नाव्यवधानमिति वचनादेकव्यवधानेपि प्रवृत्तिसंभवात् अथ निर्दुरोरव्यवधानसंभवः तदर्थनिर्दुरोरित्येव ब्रूयात्। अन्तरंगत्वादिति गा अ आते इति स्थिते प्रकृत्याश्रयत्वे सवर्णदीर्घे आदाथइरिति न भविष्यतीति भावः। गैरिति। एऐऐर्इतिवृद्धिरेव। यत्तु कैश्चिदालोपे गे इत्युक्तम्। तद्भ्रमसात्।

मू०- देङोणादौदिग्यादेशोद्वित्वाभावश्च॥ दिग्ये। दासीष्ट।

(सुबोधिनी-) देङोणादौदिग्यादेशोद्वित्वाभावश्च। देङः स्थाने दिगिः स्यात् दिगेर्द्वित्वाभावश्च। लिटिनुधातोरिति यत्वं दिग्ये॥

मू०-- अपिद्दाधास्थामित्सेर्ङित्वमाति॥ न तु दीङ्।

(सुबोधिनी-) अपिद्दाधास्थामित्सेर्ङित्वमाति। एभ्यः परस्य सेर्ङित्त्वं भवति। एषामात इश्च आत्मनेपदे लुङि॥

मू०- लोपोन्हस्वात्॥ ह्स्वात्परस्य सेर्लोपो झसे। अदित। अदिषाताम्। त्रायते। तत्रे। अत्रास्त। ष्मिङ्ईषद्धसने। स्मयते। सिष्मिये। स्मेषीष्ट स्मेता। अस्मेष्ट। डीङ् विहायसागतौ। डयते। डिड्ये। अडयिष्ट। द्युत दीप्तौ। द्योतते।

(सुबोधिनी-) लोपोन्हस्वात्। झसे इति सूत्रमनुवृत्तं। ह्स्वात्किम्। अनेष्टां। झसेकिम् अकृषाताम्। डीङ् विहायसागतौ। आकाशेन गमने॥

(तत्त्व०-) लोपोन्हस्वाज्झसे। लोपोन्हस्वझसात्सेरित्येव सूत्रयितुमुचितम्। पृथक्करणस्य व्यर्थत्वात्। डीङ् विहायसा गतौ। विहायसा आकाशेनेत्यर्थः। वा तु पुंस्याकाशविहायसी इत्यमरोक्तेः विहायसामिति त्वपपाठः।

मू०- द्युतेःपूर्वस्यसम्प्रसारणं॥ दिद्युते।

(सुबोधिनी) द्युतेः पूर्वस्यसंप्रसारणम्। द्युतेः पूर्वरूपस्य संप्रसारणं भवति। सस्वरयकारस्य इः॥

मू०- द्युतादिभ्योलुङिवापम् ॥ पेङः ॥ अद्युतत् । अद्योतिष्ट । श्विता वर्णे । अश्वितत् अश्वेतिष्ट । ञिष्विदा स्नेहनमोचनयोः । अस्विदत् । अस्वेदिष्ट । ञिक्ष्विदा च । अक्ष्विदत् । अक्ष्वेदिष्ट ञिमिदा स्नेहने। अमिदत्। अमेदिष्ट। रुचदीप्तावभिप्रीतौ च। अरुचत् अरोचिष्ट । घुट परिवर्तने । अघुटत् । अघोटिष्ट । रुठ लुठ लुट प्रतिघाते । अरुठत् । अरोठिष्ट । अलुठत् । अलोठिष्ट । अलुटत् । अलोटिष्ट । शुभ दीप्तौ । अशुभत् । अशोभिष्ट । क्षुभ सञ्चलने । अक्षुभत् । अक्षोभिष्ट । णभ तुभ हिंसायाम् । नेभे । अनभत् । अनभिष्ट । स्रंसु ध्वंसु भ्रंसु अवस्रंसने । अस्रसत्। अस्रंसिष्ट। ध्वंसु गतौ च । अध्वसत् । अध्वंसिष्ट। स्रंभुविश्वासे । अस्रभत् । अस्रम्भिष्ट । वृतु वर्तने । वर्तते ।

(सुबोधिनी-)द्युतादिभ्योलुङिवापम्। द्युतादयः कृपिपर्यंतास्त्रयोविंशतिधातवस्तेभ्यः परस्मैपदं वा भवति पक्षे आत्मनेपदं च लुङि पे पक्षे लित्पुषादेरिति ङप्रत्ययः। अनिट्कारिकायां स्विद्यतिरिति निर्देशादयं सेट् स्वेदिता । घुट परिवर्तने । परिवर्त्तनमितस्ततो भ्रमणं णादिः किदिति कित्वाद्गुणाभावः। जुघुटे। क्षुभ संचलने प्रकृतिविपर्यासो मथनं चाक्षोभते। दैवादिकः क्र्यादिश्च। णभ तुभ हिंसायां। आद्योऽभावेर्थेपि । नभंतामन्यकेसमे माभूवन्नन्यकेसर्वेइति निरुक्तं। इमौ दिवादी क्र्यादी च। स्रंसु ध्वंसु भ्रंसु अवस्रंसने। अवस्रंसनमधःपतनम् । परस्मैपदपक्षे ङः । नोलोप इति नलोपः । अस्रसत् । नास्रसत् करिणां ग्रैवमिति रघुकाव्ये । नास्रंसदित्यपपाठ एव। नचैवं लङो रूपं तत्र परस्मैपदासंभवादिति भावः। भ्रसु भ्रंसु अधःपतने इति दैवादिकौ च। ऋजिभृजी भर्ज्जने। भर्जनं जलं विना तंडुलादेः संतापविशेषः। ईदित्वादादीदित इति क्तक्तवत्वोर्नेट्। भृक्तः भृक्तवान् ॥

(तत्त्वदीपिका-) क्षुभ संचलने । संचलनं प्रकृतिविपर्यासो मंथनं च ।

मू०- वृतादिभ्यःस्यसयोर्वापम्पेऽनिट्त्वञ्च ॥ वर्त्स्यति । वर्तिष्यते । अवृतत् । अवर्तिष्ट । वृधु वृद्धौ । वर्त्स्यति।वर्धिष्यते।अवर्त्स्यत् । अवर्धिष्यत । अववृधत् । अवर्धिष्ट । शृधु शब्दकुत्सायाम् । शर्धते । स्यन्दू प्रस्रवणे । स्यन्दते । स्यंत्स्यति । स्यन्दिष्यते । स्यंत्स्यते। अस्यदत् अस्यन्दिष्ट । अस्यंत्त । कृपू सामर्थ्ये ।

(सुबो०-) वृतादिभ्यःस्यसयोर्वापंपेनिट्त्वंच । वृतु वृधु शृधु स्यंदू कृपू इति

वृतादयः। स्यंदि कृपोरूदित्वादिड्विकल्पे प्राप्ते इतरेषां नित्यमिटि प्राप्ते निषेधः। वृतादिभ्यः परस्मैपदं वा स्यात् परस्मैपदे इडभावश्च स्यपि सप्रत्यये च गणकार्यत्वादुभयोर्यङ्लुक्यप्रवृत्तिः। वर्त्तिष्यति विवर्त्तिषति। शृधु शब्दकुत्सायाम्। शब्दकुत्सा पर्दनं। शर्द्धजहा माषाः। अपानशब्दं त्यजंतीत्यर्थः॥

मू०— कृपोरोलः॥ कृपो रेफस्य लः ऋकारस्य लृकारः। कल्पते। चक्लृपे। कल्पिषीष्ट।

(सुबोधिनी—) कृपोरोलः। कृप उ इति छेदः। कृपेति लुप्तषष्ठीकं पदमावृत्त्या ऽत्र वाक्यद्वयं बोध्यम्। उः ऋकारस्येत्यर्थः॥

(तत्त्वदीपिका—) कृपो रो ल इति। कृप उ रः ल इति छेदः। कृपेति लुप्तषष्ठीकम्। आवृत्त्या वाक्यद्वयसिद्धिरित्याह। ऋकारस्येति तत्फलं तु अक्लृपदित्यादिसिद्धिः। यद्यपि कृपू सामर्थ्ये इति पाठेनैव रूपसिद्धिः सूत्राकरणलाघवं च। कृपणादिसिद्धिस्तु कृप कृपायामित्यस्योणादयो बहुलमिति बहुलग्रहणात्संप्रसारणे। तथापि अचीक्लृपदिति सिध्यर्थस्तथा पाठः। तथा हि ऋलृवर्णयोः सावर्ण्यादुपधाभूतलृकारस्य लृदादेशे अचीक्लृपदिति स्यात्। लत्वविधौ लसिद्धम्। कृपेत्यादौ तु कृपेः संप्रसारणं चेत्यादि कृपेर्बोध्यम्।

मू०-सिस्योः॥ उपधाया गुणो न सिस्योरनिटोः परतः। क्लृप्सीष्ट। कृपेस्तादौ पम्वापेऽनिटत्वंच॥ कल्प्ता। आति कल्पिता-कल्प्ता। कल्प्स्यति। कल्पिष्यते, कल्प्स्यते अक्लृपत्, अकल्पिष्ट, अक्लृप्त। एते द्युतादयो वृतादयश्च। व्यथ दुःखसञ्चलनयोः। व्यथते।

(सुबोधिनी—) कृपेस्तादौ पं वा पे ऽनिट्त्वं च। कृपेः परस्मैपदं वा भवति परस्मैपदे इडभावश्च। लुटि कल्प्ता। कल्पिता। लुङि परस्मैपदे लित्पुषादेरिति ङः। अक्लृपत्। ऊदितोवेति वेट्। अकल्पिष्टा इडभावे झसादिति सिलोपे अक्लृप्त। व्यथ दुःखसंचलनयोः। संचलनं प्रकृतिविपर्यासो मथनं च॥

मू०—व्यथेर्णादौपूर्वस्ययस्यइः॥ विव्यथे। अव्याथिष्ट। ज्युङ् गतौ। ज्यवते। जुज्युवे। अज्योष्ट। रमु क्रीडायाम्। रमते।

(सुबोधिनी—) व्यथेर्णादौपूर्वस्ययस्यइः। व्यथतेः पूर्वरूपस्य यकारस्येत्वं भवति लिटि। पूर्वस्य हसादिःशेषः इत्यस्यापवाद इस्ततः थस्य हसादिशेषेण निवृत्तिः। विव्यथे। रमु क्रीडायां। माधव स्तूदितमाह। पचाऽद्यप्रत्यये आप्। रमा घञितु रामः॥

मू०- व्याङ्पर्युपेभ्योरमःपम्॥ विरमति। आरमति। परिरमति। उपरमति। रेमे। अरंसीत्। अरंस्त। लोकृ दर्शने। लुलोके।

ग्रन्थः

श्लोकृ संघाते। अश्लोकिष्ट। शकि शंकायाम्। शशंके। अशंकिष्ट। अकि लक्षणे। आनंके। ढौकृ त्रौकृ रघि गतौ। डुढौके। तुत्रौके। अत्रौकिष्ट। लघि भोजननिवृत्तौ। ललंघे। अलंघिष्ट। बाधृ विलोडने बाधते। बबाधे। अबाधिष्ट। नाथृ नाधृ याच्ञोपतापैश्वर्य्याशीःषु।

(सुबोधिनी-) व्याङ्पर्य्युपेभ्योरमः पम्। एभ्यः परस्माद्रमतेः परस्मैपदं भवति, श्लोकृ संघाते। संघातो ग्रंथः। सचेह ग्रथ्यमानस्य व्यापारो ग्रंथितुर्वा। आद्येऽकर्मकः द्वितीये सकर्मकः। अकि लक्षणे। लक्षणं चिन्हम्। नुमशामिति नुक्। आनंके। बाधृ विलोडने। विलोडनं प्रतिघातः। नाथृ नाधृ याच्ञोपतापैश्वर्य्याशीःषु। याच्ञा भिक्षा। उपतापो रोगः॥

मू०- नाथआशिष्येवआत्मनेपदम्॥ नाथते। अन्यत्र नाथति नाथते। ननाथे। अनाथिष्ट। दध धारणे। देधे। अदधिष्ट। स्कुदि आप्लवने। चुस्कुन्दिष्ट। वदि अभिवादनस्तुत्योः। वंदते। ववन्दे। अवन्दिष्ट। भदि कल्याणे सुखे च। बभन्दे। मदिस्तुतिमोदमदस्वप्न-कांतिगतिषु। मंदते। ममंदे। अमंदिष्ट। स्पदिर्किंचिच्चलने। पस्पन्दे। मुदहर्षे। मुमुदे। दद दाने। ददडे। यती प्रयत्ने। येते। ञित्वरा सम्भ्रमे त्वरते। अत्वरिष्ट। षह मर्षणे। सहते। सेहे। सहिता। इषुसहलुभ-रुषरिषामनपितस्येड्वा।

(सुबोधिनी-) नाथआशिष्येवात्मनेपदम्। नाथतेरात् स्यादाशीर्वादेर्थे एवान्यत्र तु पं। स्कुदि आप्रवणे आप्रवणमुत्प्लवनमुद्धरणं च। इदितोनुमिति नुम्। स्कुंदते। वदि अभिवादनस्तुत्योः। अभिवादनं नमस्कारः। मदि स्तुतिमोदमद-स्वप्नकांतिगतिषु। मोदः संतोषः। मदो गर्वः। स्वप्नं आलस्यं। कांतिः। गतिः यती प्रयत्ने। प्रयत्न उद्यमः। षह मर्षणे अपराधे सत्यपि कोपाद्यनाविष्करणं॥

(तत्त्वदीपिका-) भदि कल्याणे सुखेच कल्याणं मंगलं सुखमात्मगुणं। भदि। मोदो हर्षः। मदो गर्वः। स्वप्न आलस्यम्। ददडे इति। न शसददेत्येत्वपूर्वलोपाभावः। षह मर्षणे मर्षणं क्षमा। सहिता। इषु सहेति वेट्।

मू०-सहिवहोरोदवर्णस्य॥ढलोपे सति। सोढा असोढ। असहिष्ट। गाहू विलोडने। गाहते। जगाहिषे, जघाक्षे। जगाहिढ्वे, जगाहिध्वे, जघाढ्वे। गाहिषीष्ट,घाक्षीष्ट। गाहिता, गाढा। गाहिष्यते, घाक्ष्यते। अगाहिष्ट, अगाढ। अघाक्षाताम्। अघाढ्वम्। गृहू ग्रहणे। जघृहि

षे, जघृढ्वे । जगृहिढ्वे, जगृहिध्वे,जगृढ्वे । गर्हिषीष्ट घृक्षीष्ट । गर्ढा, गर्हिष्यते, घर्क्ष्यते । अगर्हिष्ट, अघृक्षत ।

(सुबो०-) सहिवहोरोदवर्णस्य । ढलोपे सहिवहोरवर्णस्यौत्वं भवति ढस्य लोपे सति । इषसहेति वेट् । सहिता । इडभावे ह्रोढ इति ढत्वं । तथोर्द्धइति धत्वं । ष्टुभिःष्टुरिति ष्टुत्वं । ढिढोलोप इति ढलोपः । ततोऽनेन ओत्वे सोढा । गाहू विलोडने । ऊदित्वादिड्वा । जगाहिषे । इडभावे तु ह्रोढ इति ढत्वं आदिजबानामितिघः । षढोः कस्से इति कः । कात्परस्य सस्य षत्वं । जघाक्षे । सेटो हलादिति वा ढः । जगाहिढ्वे।जगाहिध्वे। इडभावेतु आदिजबानामिति घः। ढिढोलोप इति ढलोपः। जघाढ्वे। लुङि अगाहिष्ट। इडभावे तु ढत्वे कृते झसादिति सिलोपः। ततो धत्वष्टुत्वढलोपाः। अगाढ। गृहू ग्रहणे। ऊदितोवेति वेट्। इडभावे ह्रोढइति ढत्वं। आदिजबानामितिघः।षढोरिति कत्वं। षत्वं च । जिघृक्षे।सेटोहलादिति वा ढः।जघृहिढ्वे जगृहिध्वे इडभावे जघृढ्वे। आशिषि गर्हिषीष्ट । सिस्योरिति गुणाभावे घृक्षीष्ट । लुटि गर्हिता, गर्ढा । लृटि । गर्हिष्यते, घर्क्ष्यते । लृङि अगर्हिष्यत अघर्क्ष्यत लुङि अगर्हिष्ट । इडभावे हशषांतादिति सक् । ह्रोढ इति ढत्वं । आदिजबानामिति घः । षढोरिति कः षत्वं च । अघृक्षत ॥

(तत्त्वदीपिका) सोढेति इडभावपक्षे

मू०-आतिसकोलोपस्स्वरे॥अघृक्षाताम् । अघृक्षन्त । अघृक्षध्व

॥ इत्यात्प्रक्रिया ॥

(सुबोधिनी-) आतिसकोलोपःस्वरे । स्वरादावात्मनेपदे परे सको लोपः । षष्ठीनिर्दिष्टस्येत्यंतलोपः अघृक्षाताम् । ॥ इत्यात्मनेपदप्रक्रिया ॥

(तत्त्वदीपिका-) आतिसक इति षष्ठीनिर्दिष्टत्वादन्त्यस्य । लोकेशाकरसंज्ञेन विद्यानगरवासिना । कृतायामिह टीकायामगादातो निरूपणम् ॥ इत्यात् ।

मू०-राजृ दीप्तौ । रेजतुः । रराजतुः ॥ रेजे रराजे । अराजीत् । अराजिष्टाम् अराजिष्ट । खनु खनने । चखान । चख्नतुः । चख्नुः ॥ खायात् । खन्यात् । अखानीत् अखनीत् अखनिष्ट । हृञ् हरणे । जहार ऋदन्तात्थपो नेट् । जहर्थ । जह्रे । ह्रियात् ।

(सुबोधिनी-)राजृ दीप्तौ दीप्तिस्तेजः । फणराजृइत्येत्वपूर्वलोपौ । रेजतुः । रराजतुः । खनु खनने । खननमवदारणं । उदित्वात्क्त्वायां वेट् । खनित्वा, खात्वा । गमांस्वरे इत्युपधालोपः । चख्नतुः जनसनखनामित्यात्वं वा । खायात् खन्यात् । अतोहसादेरिति वा वृद्धिः । अखानीत्, अखनीत्, । हृञ् हरणे हरणं प्रापणं स्वीकारः स्तेयं नाशनं चेति चत्वारोऽर्थाः । भारं हरति प्रापयतीत्यर्थः । अंशं हरति । स्वीकरोतीत्यर्थः । स्वर्णं हरति । चोरयतीत्यर्थः । पापं हरति नाशयती-

त्यर्थः। ऋदंतात्थप इति नेट्। जहर्थ। ऋादेर्णादेरितीट्। जह्रिव। याद्दाशि-तिरिङ्। ह्रियात्॥

(तत्त्वदी०—)राजृ ऋदित्वमङ्च्युक्तोपधाह्रस्वादिनिवृत्त्यर्थम्। हृञ् हरणे हरणं प्रापणं स्वीकारस्तेयं नाशनं च। ग्रामं हरति। अंशं हरति। स्वर्णं हरति। पापं हरति।

मू०-उः॥ ऋवर्णस्य सिस्योरनिटो न गुणः। हृषीष्ट। अहार्षीत्। कोमलता अहृत। दान आर्जवे। गुभ्यः। दीदांसति। दीदांसाञ्चकार। शान तेजने शीशांसाञ्चक्रे। गुहू संवरणे। गूहति गूहते

(सुबोधिनी-) उः। षष्ठ्येकवचनांतमिदम्। ऋवर्णांतस्य धातोर्गुणो न स्यात् अनिटि सिप्रत्यये सीष्टादौ च इन्नतः स्यप इतीट्। हरिष्यति। लोपोऽह्रस्वादिति सिलोपः। अहृत। दान आर्जवे ऋजोर्भाव आर्जवम् तस्मिन्नर्थे अस्मात् गुभ्यः इति सः। यःसेऽइति पूर्वस्येत्वं मानादीनामिति पूर्वस्य दीर्घः। दीदांसति। शानतेजने। तेजनं तीक्ष्णीकरणं। शानेर्निशाने सः अर्थांतरेत्वननुबंधकौ चौरादिकाविमौ। दानयति शानयति॥

(तत्त्वदीपिका—)उः षष्ठ्यैकवचनान्तम्। सिस्योरिति भूतेसिः सीष्टादिः सी तयोङि-त्वादेव गुणाप्राप्तौ नियमार्थमिदम्। ऋवर्णस्यैवानयोः परतो गुणो न तेन वेष्टात्यादौ भवत्येव विशेषाप्रतिपादकलिंगाभावादृवर्णमात्रं गृह्यते न तु ऋगताविति। आरंभसामर्थ्या दुपधाया न। अथ थासिस्योरित्येव सिद्धे किमनेन।

मू०-गुहेरुपधायाऊद्गुणहेतौस्वरे॥ जुगुहतुः जुगूहिथ। जुगोढ। जुगुहिष। जुघुक्षे। जुगुहिध्वे। जुगुढ्वे। गूहिषीष्ट घुक्षीष्ट। गूहिता गोढा। गूहिष्यति। घोक्ष्यति। घू

(सुबोधिनी—) गुहेरुपधायाऊद्गुणहेतौस्वरे। गुह ऊपधाया ऊत्स्यात् गुणविधायके स्वरादौ प्रत्यये परे। गूहति। ऊदितोवेतिवेट्। जुगूहिथ। इडभावे होढ इति ढत्वं तथोर्द्धइति थस्य धः। ष्टुत्वं च जुगोढ। होढ इति ढत्वम् आदिजबानामिति घः षढोरिति कः षत्वं च। जुघुक्षे। सेटो हलादिति वा ढः। जुगुहिढ्वे जुगुहिध्वे। इडभावे होढ इति ढत्वम्। आदिजबानामिति घत्वं ष्टुभिःष्टुरिति ढः ढिढोलोप इति ढलोपदीर्घौ। जुगुढ्वे। लुङि अगूहीत्। इडभावे हशषांतादिति सक्। आदिजबानामिति घः। अघुक्षत। आति अगूहिष्ट। इडभावे तु सक्॥

मू०— दुहदिहलिहगुहूभ्यस्सकोलुग्वावकारतवर्गयोराति॥ अगूढ, अघुक्षत। अघुक्षाताम्। अघुक्षन्त। अगूढाः, अघुक्षथाः। अघुक्षाथाम्। अगूढ्वम्, अघुक्षध्वम्। अघुक्षावहि, अगुह्वहि। अघु-

घू

क्षामहि। अगूहिष्ट। अघुक्षत, अगूहीत्। भज सेवायाम्। भेजिथ बभक्थ। भेजे। भक्षीष्ट। अभाक्षीत्। अभक्त। श्रिञ् सेवायाम्। शिश्रियतुः। शिश्रिये। श्रीयात्। श्रयिषीष्ट। श्रयिता। अशिश्रियत्। अशिश्रियत। त्विषदीप्तौ। तित्विषे। तित्विक्षीष्ट। त्वेष्टा। त्वेक्ष्यते। अत्विक्षत्। स्पश बाधनस्पर्शनयोः। पस्पाश। पस्पशे। अस्पशीत्। अस्पशिष्ट। अस्पाशीत्। लष कान्तौ। लष्यति। लषति। लष्यते। लषते। लषिता। रञ्ज रागे। रजति। ररंजिथ, ररङ्क्थ। ररञ्जे। रज्यात्। रङ्क्षीष्ट। अराङ्क्षीत्। अरङ्क्त। भृञ् भरणे। भरति बभर्थ। बभृव बभृड्वे। भर्ता। धृञ् धारणे। दधर्थ दध्रिध्वे, दध्रिढ्वे। अधार्षीत् अधृत। णीञ् प्रापणे। निनयिथ निनेथ। निन्ये अनैषीत्। अनेष्ट। टुयाचृ याच्ञायाम्। याचति। ययाचे। अयाचीत् अयाचिष्ट। यजदेवपूजासंगतिकरणदानेषु। इयजिथ,इयष्ठ। अयाक्षीत्। अयष्ट अयुड्वम्। डुवप् बीजतन्तुसंताने। उवपिथ,उवप्थ। ऊपे उप्यात् वप्सीष्ट अवाप्सीत् अवाप्ताम्। अवप्त। वह प्रापणे। वहति। उवहिथ। उवोढ। ऊहे। उह्यात्। वक्षीष्ट वोढा। अवाक्षीत्। अवोढाम्। अवोढ। अवक्षाताम्। वेञ् तन्तुसन्ताने।

(सुबो०-)दुहदिहलिहगुहभ्यःसकोलुग्वावकारतवर्गयोराति। लोपइत्यनुवर्तमाने लुक् ग्रहणं सर्वलोपार्थम्। दुह प्रपूरणे। दिह उपचये। लिह आस्वादने। गुहू संवरणे। एभ्यः सको लुग्वाआत्मनेपदस्थवकारे तवर्गे च परे। अदुग्ध, अधुक्षत। अदिग्ध, अधिक्षत। अलीढ, अलिक्षतेत्यादि। ढत्वधत्वष्टुत्व ढलोपदीर्घाः। अगूढ, पक्षे अघुक्षत। आति सकोलोपइत्यल्लोपे अघुक्षातां अघुक्षत। तॄफलभजेत्येत्वपूर्वलोपौ भेजतुः। स्वरांतादत्वत इति वेट्। भेजिथ। बभक्थ। कुत्वषत्वे भक्ष्यति। झसादिति सिलोपः। अभक्त। श्रिश्रुद्रुभ्योङइतिङो द्वित्वंच। अशिश्रियत्,, अशिश्रियत। त्विष दीप्तौ। दीप्तिस्तेजः। हशषांतादिति सक् कत्वषत्वे। अत्विक्षत। आतिसकोलोप इत्यल्लोपः। अत्विक्षातां। स्पश बाधनस्पर्शनयोः स्पर्शनं ग्रंथनं। लष कांतौ। कांतिरिच्छा। भ्राशभ्लाशिति वा यः। लष्यति लषति। लोपःपचामित्येत्वपूर्वलोपौ। लेषतुः। अपिरंजेति न लोपः। रजति। कुत्व षत्वे अराङ्क्षीत्। सावनिटोनित्यमिति वृद्धिः। अरंक्त। स्याविद इत्यनेन उम्।

अरांक्षुः क्रादेर्णादेरितीण् न । बमर्थ आशिषि यादादाविति रिङ् । भ्रियात् । उरिति न गुणः । भृषीष्ट । लृटि हन्तृतःस्यपङ्ट् । भरिष्यति । लोपोऽन्हस्वादिति सिलोपः। अभृत । यज देवपूजासंगतिकरणदानेषु । देवपूजात्विह देवतोद्देशेन विधिबोधितद्रव्यत्यागः । संगतिकरणं मैत्रीकरणम् । णबादौपूर्वस्येति पूर्वस्य संप्रसारणम् । अत उपधाया इतिवृद्धिः । इयाज । यजामिति संप्रसारणम् । ईजतुः छशषेति षः । षढोरिति कः यक्षीष्ट । लुङि । अयाक्षीत् । अयष्ट । ध्वेचेति सलोपः । अयड्ढ्वम् । डुवप् बीजसंताने । बीजसंतानं क्षेत्रे विकरणं गर्भाधानं च अयं छेदनेपि । केशान् वपति । ड्वितस्त्रिममिति त्रिमम् प्रत्ययः । उप्त्रिमं । वहतेर्लिङि होढ इति ढः षढोरिति कत्वं । वक्षीष्ट । लुटि ढत्वं तथोर्द्ध इति धत्वं ष्टुत्वं ढिढोलोप इति ढलोपः सहिवहोरोदित्योत्वं वोढा । लुङि पूर्ववृद्धिस्ततो ढत्वे कृते झसादिति सिलोपः । ढत्वष्टुत्वढलोपाः । ओत्वंच अवोढाम् । ध्वेचेति सलोपः।अवोढ्वं।

(तत्त्वदीपिका—) डुवप् बीजसंताने । बीजसंतानं क्षेत्रे विस्तारणं गर्भाधानं च । केशान्वपतीति प्रयोगाच्छेदनेपि । त्रिममर्थं ड्वित्वं तेनोप्त्रिममिति सिध्यति।

मू०— वेञोणादौनसम्प्रसारणम् ॥ ववौ ववे

(सुबोधिनी—) वेञोणादौनसंप्रसारणं । वेञः संप्रसारणं न स्यात् लिटि । णादौ किम् । उतः। उतवान् । संध्यक्षराणामित्यात्वम् ।आतोणबडौ इति णपो डौत्वं । ववौ।

मू०— वेञोवावयूणादौ ॥ उवाय ॥

(सुबोधिनी—) वेञोवावयूणादौ । वेञो वय् वास्याल्लिटि । अतउपधायाइति वृद्धिः । उवाय ॥

मू०— ग्रहांङितिच ॥ ग्रहिज्यावयिव्यधिवष्टिवृश्चतिपृच्छतिविचतिभृज्जतीनां सम्प्रसारणम् किति ङितिच ॥ वयोयस्यनेत्वम् । ऊयतुः । ऊयुः । ऊवयिथ । ऊये ।

(सुबोधिनी—) ग्रहांङितिच । यजामित्यतः कितीति संप्रसारणमिति चानुवृत्त एषां किति ङिति च संप्रसारणं स्यात् । ग्रह उपादने । ज्या वयोहानौ । वेञ तंतुसंताने । व्यध ताडने । वश् कांतौ । ओव्रश्चू छेदने । प्रच्छ ज्ञीप्सायाम् । व्यच व्याजी करणे । भ्रस्ज पाके । ङिति गृण्हाति । जिनाति । किति गृहीतः । जीनः । ङिति वयेरुदाहरणं न किति तु यजामिति संप्रसारणंसिद्धं । यजादिषु वेञ पाठात् । अतएव णबादाविति पूर्वसंप्रसारणमपि सिद्धम् । वेञो णादाविति संप्रसारणनिषेधस्तु वयो यस्येति निषेधारंभान्न प्रवर्त्तते । तस्मात् ग्रहिज्यादिषु वग्रहणं स्पष्टार्थम् । वयो यस्य नेत्वम् । ग्रहामिति यकारस्य संप्रसारणे प्राप्ते निषेध लिटि वयो यस्य संप्रसारणं नेत्यर्थः ।वयेस्तादावभावात् थपि नित्यमिट् । उवयिथानिवद्भावेन ञित्वादात्मनेपदम् । ऊये ।

मू०— वयोयस्यकितिलिटिवोवा ॥ ऊवतुः । ऊवे । ऊयात् । वासीष्ट । अवासीत् । अवास्त । व्येञ् संवरणे ।

(सुबोधिनी—) वयोयस्यकितिलिटिवोवा । वयो यकारस्य वत्वं वा भवति किति लिटि । ऊवे । वयादेशाभावे । ववे । आशिषि संप्रसारणे कृते । ऊयात् । संध्यक्षराणामित्यात्वे । वासीष्ट ॥

मू०--व्येञोलिटिनात्वम् ॥ विव्याय । विव्ययिथ । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त । व्हेञ् स्पर्द्धायां शब्दे च । द्विरुक्तस्य हूयतेस्सम्प्रसारणम् । जुहाव जुहविथ । जुहोथ । जुहुवे । हूयात् । व्हासीष्ट ।

(सुबोधिनी—) व्येञोलिटिनात्वम् । व्येञ् आत्वं न भवति लिटि । संध्यक्षरणामित्यस्यापवादः । लिटिकिम् । व्याता । व्यास्यति । व्येणप् इति स्थिते परत्वात् हसादिःशेषं बाधित्वा यस्य संप्रसारणं । यजादीनांग्रहादीनामित्युभयेषांग्रहणसामर्थ्याच्च । धातोर्नामिन इति वृद्धिः । विव्याय । नुधातोरिति यः । विव्यतुः । अत्यर्तिव्ययतोनामिति नित्यमिट् । विव्ययिथ । यमिरमिनमातामितीट्सकौ । अव्यासीत् । अव्यासिष्टां व्हेञ् स्पर्द्धायां शब्देच । शब्दे इति सामान्योक्तावपि संबोधनरूपः शब्द एवात्र गृह्यते । तथाच माघे ॥ यांतोऽन्यतः प्लुतकृतस्वरमाशु दूरादुद्बाहुना जुहुविरे मुहुरात्मवर्ग्या इति कर्मणि प्रयोगः । द्विरुक्तस्य हूयतेः संप्रसारणम् । व्हेञः पूर्वं द्वित्वं तेन उभयत्र संप्रसारणं स्यात् ॥

मू०— लिपिसिचिव्हयतीनांङोलुङ्वाआति ॥ अव्हत् । अव्हास्त । अहूत । डुपचष् पाके । पचति । पेचिथ । पपक्थ । पेचे । अपाक्षीत् । अपाक्ताम् । अपाक्षुः । षच समवाये । सेचे । असाचीत् । असचिष्ट । शप आक्रोशे । शेपे । शप्ता । अशाप्सीत् । अशप्त । हिक्क अव्यक्ते शब्दे । जिहिक्क । अहिक्कीत् । अंचु गतौ याचने च । आनंचे । आञ्चीत् । रेटृ परिभाषणे । रिरेटे । अरेटीत् । चते चदे याचने च । चेते अचेतीत् । चेदे । अचदीत् । अचेदिष्ट । प्रोथृ पर्य्याप्तौ । पुप्रोथ । पुप्रोथे । अप्रोथीत् । अप्रोथिष्ट । मिदृ मेदृ मेधाहिंसनयोः । मिमिदे । अमेदीत् । अमेदिष्ट । मिमेदे अमेदीत् अमेदिष्ट मेधृ संगमेच । मिमेधे मेधिता । णिदृ णेदृ कुत्सासन्निकर्षणयोः । नेनेदे । नेदिता । शृधु मृधु क्लेदने । शर्द्धति । शशर्द्ध । शशृधतुः । शशृधे ।

मर्द्धति। ममृधे अमर्द्धीत्। अमर्द्धिष्ट। बुधिर् बोधे। बोधति बोधते। अबोधीत्। अबुधत् अबोधिष्ट। उबुन्दिर् निशामने। बुन्दति। बुबुन्दे। अबुदत्। अबुन्दीत्। अबुन्दिष्ट। वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु। वेणति वेणते। विवेण। अवेणीत्। अवेणिष्ट। नान्तोप्ययम्। वेनति। चीवृ आदानसंवरणयोः। चीवति। चिचीव। चिचीवे। अचीवीत्। अचीविष्ट। चायृ पूजानिशामनयोः। चायति। चचाय। चचाये। अचायीत्। अचायिष्ट। व्यय गतौ। व्ययति। वव्याय। वव्यये। अव्ययीत्। अव्ययिष्ट। दाशृ दाने। दाशति। ददाश। ददाशे। अदाशीत् अदाशिष्ट। भ्रेशृ भ्लेशृ गतौ। भ्रेशति। भेषृ भ्लेषृ गतौ भये च। भेषति। बिभेषे। बिभेष बिभ्लेष। अभेषीत्। अभेषिष्ट। अस गतिदीप्त्यादानेषु। असति। आस। आसे। आसीत्। आसिष्ट। अयं षान्तोऽपि। अषति। चष भक्षणे। चचाष। चेषतुः। चेषे। अचषीत्। अचषिष्ट। छष हिंसायाम्। छषति छषते। चच्छाष चच्छषे। अच्छाषीत्। अच्छषिष्ट। झष आदानसंवरणयोः। झषति। जझाष जझषे। अझाषीत्। अझषीत्। अझषिष्ट। भ्रक्ष भ्लक्ष अदने। बभ्रक्षे। अभ्रक्षीत्। अभ्रक्षिष्ट। दासृ दाने। दासते, ददासे। माहृ माने। ममाह। ममाहिषे। अमाहीत्। अमाहिष्ट॥ ॥ इत्युभयपदप्रक्रिया॥

(सुबोधिनी-) लिपिसिचिह्वयतीनांङोलुङिवाआत्ति। एभ्यो ङप्रत्ययो नित्यं स्यात्परस्मैपदे लुङि। आत्मनेपदेलुङि तु वा। लिप उपदेहे। षिच क्षरणे। अलिपत्। असिचत्। आतोऽनपीत्यालोपः। अह्वत्। षच समवाये। समवायः संबंधः। शप आक्रोशे आक्रोशो विरुद्धाऽनुध्यानम्। अंचुगतौयाचने च नुगशामिति नुक्। आनंचे। नोलोप इति नलोपः। अचद्यात्। अयमिदिदिति मते तु इदितो नलोपो नेति निषेधात्। अंच्यात्।रेदकृपरिभाषणे। "यः सनिंदउपालंभस्तत्र स्यात्परिभाषणमि"त्यमरः। ऋदित्वात् नीरत इत्युपधाया ह्रस्वो न। अरिरेटत्। प्रोथृ पर्य्याप्तौ। पर्याप्तिःसमाप्तिः। मिदृ मेदृ मेधाहिंसनयोः। थांताविमाविति स्वामी। धांताविति न्यासः। मेथृ संगमे च। चात्पूर्वोक्तेर्थे। प्रजाये गृहमेधिनामित्यत्र गृहैर्दारैर्मेधते संगच्छंते इतिविग्रहः। णिन्प्रत्ययांतः। णिदृ णेदृ कुत्सासंनिकर्षयोः। संनिकर्षःसंबंधः। शृधु मृधु उंदने। उंदनं क्लेदनं। आर्द्रीभाव इत्यर्थः। उदित्वात् क्त्वायां वेट्। शर्द्धित्वा

शृध्वा। बुधिर् बोधने। बुध्यतेरेवानिट्कारिकासु पाठादयं सेट्। इरितो वेति च्लेरङ्। अबुधत्। अबोधीत्। दीपजनेतीण् तु न। पूर्वोत्तरसाहचर्येण दैवादिकस्यैव सूत्रे ग्रहणात्। उबुंदिर् निशामने। निशामनं चाक्षुषं ज्ञानमित्यर्थः। वेणृ गति ज्ञान चिंता निशामन वादित्र ग्रहणेषु। गत्यादयः पदार्थाः। वाद्यभांडस्य वादनार्थं ग्रहणं वादित्रग्रहणम्। वेणिः वेणो वेणुरित्यादिरूपाण्यस्यैव धातोः। चीवृ आदानादौ। चीवते औणादिके रप्रत्यये चीवरं वस्त्रं। ह्मयंतेति न वृद्धिः। अव्ययीत्। भेषृक्रु भये च। चाद्गतौ।

॥ इत्युभयपदप्रक्रिया ॥

(तत्त्वदीपिका–) शप आक्रोशे। आक्रोशो विरुद्धानुध्यानम्। अचदीदिति-एदित्वान्न वृद्धिः। भ्रेषृक्र इत्यादीनां ऋदित्वमङ्युक्ताभावार्थम्। अबोधीदिति। दीपजन-इत्यात्मपदिभिः साहचर्य्यात्तथाभूतस्यैव ग्रहणात्। उबुंदिर्। उदित्वादिट्। बुंदित्वा। बुत्त्वा। निशामनं चाक्षुषंज्ञानं। वेणृ वाद्यभाण्डस्य वादनापादनं वादित्रग्रहणम्।

मू०-- ऋत जुगुप्सायां कृपायाञ्च। निन्दा दया

(सुबोधिनी–) ऋत जगुप्सायांच कृपायांच। "अर्त्तनं च ऋतीया च घृणीया च घृणार्थका इति। जुगुप्साकरुणे घृणे" इति चामरः॥

मू०– ऋतेरीयङ्स्वार्थेनपितुवा॥ ऋतीयते। ऋतीयेत। ऋतीयताम्। आर्तीयत। ऋतीयाञ्चक्रे। ऋतीयिषीष्ट। ऋतीयिता। ऋतीयिष्यते। आर्तीयिष्यत्। आनर्त। अर्त्यात्। अर्तिता। अर्तिष्यति। आर्तिष्यत्। आर्तीत्। आर्तीयिष्ट। ॥ इतिभ्वादिप्रक्रिया॥

(सुबोधिनी–) ऋतेरीयङ्स्वार्थेनपितुवा। ऋतिः सौत्रस्तस्मादीयङ् स्यात् स्वार्थे अनपि तु वा। स धातुरिति धातुत्वं आदनुदात्तङित इत्यात्मनेपदम्। ऋतीयते। इयङभावे। परतोन्यदिति परस्मैपदं। नुगशाभिति नुक्। आनर्त॥

(तत्त्वदी०–) रामाश्रमेण विहिता या हि सिद्धांतचंद्रिका।
तट्टीकायामगादेतद्भव्यं भ्वादिनिरूपणम्।

॥ इतिभ्वादिप्रक्रिया ॥

मू०– अदभक्षणे। अदादेर्लुक्॥ अदादेः परस्यापोलुक्। अत्ति। अत्तः। अदंति। अत्सि। अत्थः। अत्थ। अद्मि। अद्वः। अद्मः। अद्यात्।

(सुबोधिनी—) अद भक्षणे। भक्षणं खादनम्॥ अदादेर्लुक्। अप्कर्त्तरीत्यतः अबित्यनुवृत्तं तच्च षष्ठ्या विपरिणम्यते। अद् आदिर्यस्य सोऽदादितस्माददादेः॥

(तत्त्वदीपिका–) अदादेर्लुक्। अदआदिर्यस्य सोऽदादिस्तस्मात्। अप्कर्त्तरीत्यतोनुवृत्तमबितिषष्ठ्याविपरिणम्यते। चतुर्थीति तु न तत्रापोऽभावात्। तद्गुणसंविज्ञानबहुव्रीहेरदेरप्यपोलुक्।

मू०— झसाद्धिर्हेः ॥ झसाद्धकाराच्च परस्य हेर्द्धिर्भवति । अद्धि । अत्तात् । अत्तम् । अत्त ।

(सुबोधिनी-)झसाद्धिर्हेः । झसात् हृ् धिः हेरिति पदच्छेदः । हस्यहोझभा इति घत्वे झबेजबा इति दत्वे हसात्परस्य झसस्येति दलोपः अत्तादित्यत्र स्थानिवद्भावेन तातङो हित्वेपि सकृद्गताविति न्यायेन धिरादेशो न ॥

(तत्त्वदीपिका-)झसाद्धिर्हेः । झसात् हृ धिः हेरिति छेदः हस्य होझभाइति धत्वे झबेजबा इति दत्वे हसात्परस्य झबस्येति लोपेन सिद्धेः । इह लुप्तपंचमीकपदमित्याभिप्रेत्याह । हकाराच्चेति ।

मू०— अदादेर्दिप्सिपोरट् ॥ अदादेश्च परयोर्दिप्सिपोरडागमः । आदत् । आदः ।

(सुबोधिनी-) अदादेर्दिप्सिपोरट् । अदेः परयोर्दिप्सिपोरडागमः स्यात् ॥

मू०— सिसयोरदेर्घस्ल्लिटितुवा ॥ जघास । गमांस्वरे । घसादेरिति षः । जक्षतुः । जघसिथ । जक्षथुः । जक्ष । आद । आदतुः । आदुः । आदिथ । अत्ता । लृदित्वात् ङः । अघसत् । प्साभक्षणे । प्साति । प्सायात् । प्सातु । अप्सात् ।

(सुबोधिनी-) सिसयोरदेर्घस्ल्लिटितुवा । अदो गस्लृ इत्यादेशः स्यात् सि प्रत्यये सप्रत्यये च लिटि तु वा । सप्रत्यये जिघत्सति जघास । गमामित्युपधालोपः । खसे चपा इति घस्य कः । घसादेरिति षत्वं कत्वं च । जक्षतुः घसस्तादावभावात् थपिनित्यमिट् । जघसिथ । पक्षे अत्यर्त्तिव्ययतीनामिति नित्यमिट् । आदिथ ॥

मू०— आदंताद्द्विषोलङोऽनउस्वा ॥ अप्सुः अप्सान् । पप्सौ । आतोऽनपि पप्सुः । प्सायात् प्सेयात् । अप्सासीत् । मा माने माति । अमात् । अमुः अमान् । ममौ । मेयात् । अमासीत् । याप्रापणे । याति । ययौ । अयासीत् । वा गतिगन्धनयोः । वाति । रा दाने । राति । ला दानग्रहणयोः । लाति । ललौ । अलासीत् । श्रा पाके । श्राति । श्रायात् श्रेयात् । दा प्लुवने । दाति । ददौ । दायात् अदासीत् । ख्या प्रकथने। ख्याति चख्यौ ।

(सुबोधिनी-) आदंताद्द्विषोलङोऽनउस्वा । आदंताद्धातोर्द्विषश्च परस्यानो वा उस् स्यात् । उस्यालोप इत्यालोपः अप्सुः । लिटि आतोणबडावित्यौ पप्सौ सयोगादेरादंतस्येत्येकारोवा । प्सेयात् प्सायात् । यमिरमिनमातामितीट्सकौ ।

अप्सासीत्। मा माने। अकर्मकः। "तनौ ममुस्तत्र न कैटभद्विषः" इति माघे॥ उपसर्गवशेनार्थांतरे सकर्मकः। "उदरं परिमाति मुष्टिना" इति नैषधे। या प्रापणे। प्रापणमिह गतिः। रा दाने। ला आदाने। आदानं ग्रहणं। द्वावपि दाने इति चंद्रः। ख्या प्रकथने। चतुर्ष्वेवास्य प्रयोग इतिभाष्यम्॥

(तत्त्वदीपिका-) आदन्तादिति। अत्र स्थानिवद्भावेन तातङो हित्वेपि सकृद्गताविति न्यायेन न धिरादेशः।

मू०--अस्यतिवक्तिख्यातिभ्योङ्लुङि॥ सेरपवादः। अख्यत्। द्रा कुत्सायाम्। द्राति। द्रेयात्। द्रायात् आद्रासीत्। पा रक्षणे। पाति। पपौ पायात्। अपासीत्। भा दीप्तौ। भाति बभौ। ष्णा शौचे। स्नाति। स्नायात्। वश कान्तौ। वष्टि उष्टः। उशन्ति। वक्षि उष्ठः। उष्ठ। वश्मि। उश्वः। उश्मः। उश्यात्। वष्टु। उष्टात्। उष्टाम्। उशन्तु। उड्ढि। उष्टम्। उष्ट। वशानि। वशाव।

(सुबोधिनी-) अस्यतिवक्तिख्यातिभ्योङ्लुङि। असु क्षेपणे। ब्रुवोवचिः। वच परिभाषणे इत्युभयोर्ग्रहणं। एभ्यो ङप्रत्ययः स्यात् लुङि सेरपवादः। वश कांतौ कांतिरिच्छा। छशषेति षत्वम्। वष्टि। ग्रहामिति संप्रसारणम्। उष्टः। उश्यात् वष्टु। उष्टात्। उष्टां। उशंतु। हौ संप्रसारणम्। छशषेति षत्वम् झसाद्धिर्हेरिति धिः। षोड इति डत्वं। ष्टुभिः ष्टुरिति ढत्वं। उड्ढि॥

मू०- दिस्योर्हसात्॥ हसात्परयोर्दिप्सिपोर्लोपः। अवट्, अवड्। औष्टाम्। औशन्। अवट्। अवड्। औष्टम्। औष्ट। औश्व। औश्म। उवाश। ऊशतुः। उवशिथ। उश्यात्। वशिता। अवाशीत्। अवशीत्। हन हिंसागत्योः। हन्ति।

(सुबोधिनी-)दिस्योर्हसात्। दिप्सहचरितस्य सेर्ग्रहणान्नेह अवसि। ननु संयोगांतलोपेनैव गतार्थमिदं। सत्यं। सभिन्नस्य रान्नेति सूत्रमनेन ज्ञाप्यते। तेन अबिभर्भवानित्यादौ संयोगांतलोपाभावादस्यारंभः। अवट्। औष्टां। औशन्। उवाश। ऊशतुः। उश्यात्। वशिता। वशिष्यति। अवशिष्यत्। अतोहसादेरिति वा वृद्धिः। अवाशीत्। अवशीत्॥

(तत्त्वदी०-)दिस्योर्हसात्। दिश्च सिश्च दिसी तयोः अत्र दिसाहचर्याल्लुङ एव सिप् गृह्यते। नत्वन्यः। तेनात्सीदित्यादौ नातिप्रसंगः। संयोगांतलोपेनैव सिद्धे सभिन्नस्य रान्नेति ज्ञापयितुमस्यारंभः सिग्रहणं तूत्तरार्थम्। ननु अरोदीदरोददित्यत्रातिप्रसंगः यदागमास्तद्गुणीभूतास्तद्ग्रहणेनगृह्यंत इतिन्यायादितिचेन्न। तेन विभक्तिप्रत्ययत्वयोरेव ग्रहणान्न तुदित्वसित्वयोः।

मू०—लोपस्त्वनुदात्ततनाम् ॥ अनुदात्तानां ञमान्तानान्तनादीनां वनतेश्च ञमस्य लोपो भवति झसे क्ङिति हकारे च। हतः। घ्नन्ति। हन्यात्। हन्तु। हतात्। हताम्। घ्नन्तु।

(सुबोधिनी) लोपस्त्वनुदात्ततनां। यमि रमि नमि गमि हनि मन्यतयोऽनुदात्ताः षट्। तनु क्षणु क्षिणु ऋणु तृणु घृणु वनु मनु इति तनोत्यादयो नव। अनुदात्तेतेति लुप्तषष्ठीकं पदं। तुशब्देन ञमांतानां ग्रहणं। वन संभक्तौ। वनति। इह हवत्यो नेंडिति इण्निषेधात् किति झसे नस्य लोपः। झसे किं। गम्यते। क्ङितीति किं गंता। गमांस्वरे इत्युपधालोपः। हनोघ्ने इतिघः। घ्नंति ॥

(तत्त्वदीपिका—) लोपस्त्वदनुदात्ततनाम्। यमिरमिनमिगमिहनिमन्यतयोनुदात्ताः। तनुक्षणुक्षिणुऋणुतृणुघृणुवनुमनुतनोत्यादयः। अनुदात्तेति लुप्तषष्ठीकं पृथक्पदम्। तुशब्दोपरलाभार्थं इत्याह। ञमान्तानामिति लुप्तषष्ठीनिर्दिष्टन्यायेनान्त्यलोप इत्याशयेनाह ञमस्येति। अन्यथा ञम्यादिष्वन्त्यस्यापि ञमस्य संभवाल्लोपः स्यात्।

मू०— जह्येधिशाधि ॥ हन्तेर्ज्जहिरस्तेरेधिः शास्तेः शाधिर्निपात्यते हिविषये। जहि। हनानि। अहन्। अहताम्। अघ्नन्।

(सुबोधिनी—) जह्येधिशाधि हिसहितानां हनाऽसशासीनां यथासंख्यमेते स्युः ॥

मू०— पूर्वाद्धन्तेर्हस्यघः ॥ जघान। जघ्नतुः। जघ्नुः। जघनिथ, जघन्थ।

(सुबोधिनी—) पूर्वाद्धन्तेर्हस्यघः। द्वित्वे सति पूर्वरूपात् परस्य हंतेर्हस्य घत्वं भवति। जघनिथ ॥

मू०—हनोलुङ्लिङोर्वधोलुङ्यातिवा ॥ वध्यात्। हनिष्यति।

(सुबोधिनी—) हनोलुङ्लिङोर्वधोलुङ्यातिवा। लुङ्लिङोः परतो हंतेर्वधः स्यात्। आत्मनेपदे लुङि तु वा। वध्यात्। हनृत इतीट्। हनिष्यति ॥

(तत्त्वदीपिका—) हन्तेरिति। लुङि साहचर्य्यादनविषय एव लिङ् गृह्यते तेन विधौ नातिप्रसंगः। यत्तु विधावतिप्रसंगवारणाय किदिति लिङोविशेषणमुपन्यस्तं तद्भ्रमसात्। वृश्चिकभियेति न्यायेन कर्मणि पक्षे वधिषीष्टेत्यत्रातिव्याप्तेरनिवारणात्।

मू०-- जनिवध्योर्नवृद्धिः ॥ अवधीत्। यु मिश्रणे अमिश्रणे च।

(सुबोधिनी—) जनिवध्योर्नवृद्धिः। अनयोर्वृद्धिर्न भवति। जन जनने जनी प्रादुर्भावे च। वध हिंसायां। वधादेशोऽदंतः। तेनाद्योच्चारणेनेकस्वरत्वात् नकस्वरादितीण्निषेधो न प्रवर्त्तते। यत इत्यल्लोपः। अवधीत् ॥

मू०—ओरौ ॥ उकारस्याऽद्विरुक्तस्यौकारो भवत्यवादौ पिति। यौति। युतः। युवन्ति। यौषि यौमि। युवः। युयात्। यौतु। युहि। अयौत्। अयौः। युयाव। युयविथ। यूयात्। यविता। अयावीत्। तु गतिवृद्धिहिंसासु।

(सुबोधिनी—) ओरौ। अद्विरुक्तस्य धातोरुत औ स्यात् पिति तकारसकारदकारादौ लुग्विषये। उतःकिम्। एति एषि। लुकि किं। सुनोति। पिति किं। रुतः। अद्विरुक्तस्य किं। योयोति। नुधातोरित्युव् युवंति। ये दीर्घः स्यात् यूयात्। धातोर्नामिन इति वृद्धिः। अयावीत्। तु इति सौत्रो धातुः गतिवृद्धिहिंसासु। अयं च लुग्विकरण इति स्मरंति॥

तत्त्वदीपिका— ओरौ इति। विदो नवानामित्यतो वेत्यनुवर्त्य व्यवस्थयाद्विरुक्तस्येति बोध्यम्। तेन जुहोतीत्यादौ नातिप्रसंगः।

मू०— तुरुस्तुभ्योऽद्विरुक्तेभ्योहसादीनाञ्चतुर्णामीड्वा॥ तौति, तवीति। तुतः, तुवीतः। तुवन्ति। तौषि, तवीषि। तुथः, तुवीथः तुथ, तुवीथ। तौमि, तवीमि। तुयात्, तुवीयात्। तौतु, तवीतु। तुवीतात्, तुवीताद्, तुतात्, तुताद्। तुहि, तुवीहि। अतौत्, अतवीत्। तुताव। तोता। तोष्यति। अतौषीत्। रुशब्दे। रौति, रवीति रुरविथ। अरावीत्। णुस्तुतौ। नौति। नुतः। नुनाव। नुनविथ। अनावीत्। टुक्षु शब्दे। क्षौति। क्षुयात्। क्षौतु। अक्षौत्। चुक्षविथ। क्षविता। अक्षावीत्। क्ष्णुतेजने क्ष्णौति। चुक्ष्णविथ। अक्ष्णावीत्। ष्णु प्रस्रवणे। स्नौति। सुष्णविथ। अस्नावीत्। द्युअभिगमने। द्यौति। दुद्यविथ, दुद्योथ। अद्यौषीत्। षु प्रसवैश्वर्य्ययोः। सौति। सुषाव। सुषविथ, सुषोथ। असौषीत्। कु शब्दे। कौति। चुकविथ, चुकोथ। अकौषीत्। वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। वेति। वीतः। वियन्ति। वेषि। वेतु। वीहि। अवेत्। अवियन्। विवयिथ, विवेथ। अवैषीत्। एति। इतः। इयात्। ऐत्। ऐयन्। आयम्। अयांचकार। एता। ऐषीत्। इण गतौ। एति इतः।

(सुबोधिनी-) तुरुस्तुभ्योऽद्विरुक्तेभ्योहसादीनांचतुर्णामीड्वा। अद्विरुक्तेभ्यः एभ्यः परेषां हसादिचतुर्णामीडागमो वा भवति। क्ष्णु तेजने। तेजनं तीक्ष्णीकरणं ष्णु प्रस्रवणे प्रस्रवणमुत्कंठा। षु प्रसवैश्वर्य्ययोः। प्रसवोऽभ्यनुज्ञानं। वी गतिव्या-

क्षिप्रजनकांत्यसनखादनेषु । प्रजनोगर्भग्रहणम् । असनं क्षेपणं। अडागमात्प्राग् नु धातोरितीग् अवियन्। नित्यत्वादडागमेकृते सत्यनेकस्वरत्वाद्य इति केचित्। अव्यन्। अत्र ईकारोपि धात्वंतरं प्रश्लिष्यते। तथा च प्रयुंज्यते। नहि तरणिरुदीते दिक्पराधीनवृत्तिरिति। व्याख्यातं च मनोरमायां। कर्मव्यतिहारेभात्। नच गतिहिंसार्थेत्यात्मनिषेधः शंक्यः। उत्पूर्वस्याविर्भावार्थत्वादिति। इण् गतौ॥

(तत्त्वदीपिका–) तुरुस्तुभ्यइति यत्तु प्राचा तुरुणुस्तुभ्य इत्युक्तं यच्च वासुदेवेन व्याख्यातं। यु मिश्रणे। रु शब्दे। णुस्तुतौ ष्टुञ् स्तुतौ। एभ्यः पितिस्मिईकारो वक्तव्य इतितत्सर्वम्प्रामादिकम्। णुणुएतयोरत्राग्रहणस्य सर्वसंमतत्वात्। पितित्स्मीति निमित्तोपादानमप्ययुक्तम्। रुचीत इत्यादावाव्याप्तेः॥

मू०– इणःक्ङितिस्वरेयः॥ यन्ति। एषि। इयात्। एतु। यन्तु। इहि। आयम्। ऐव। ऐम। इयाय।

(सुबोधिनी–) इणःङ्कितिस्वरेयः। इणो यत्वं भवति किति ङिति च स्वरे। यंति। लिटि द्वित्वे वृद्धौ च कृतायाम् असवर्णेस्वरे इतीय इयाय॥

मू०– इणःकितिणादौपूर्वस्यदीर्घः॥ ईयतुः। ईयुः। इययिथ,इयेथ। ईयात्। एता। दादेःपे। इणःसिलोपेगा। अगात्। अगाताम्। अगुः। इक् स्मरणे। इङिकावध्युपसर्गतोनव्यभिचरतः। अध्येति। अधीतः। अधियन्ति। अध्यैत्, अध्यैद्।

(सुबो०–) इणः कितिणादौपूर्वस्यदीर्घः। इणःपूर्वरूपस्य दीर्घो भवति किति लिटि। आशिषिये इति दीर्घः। ईयात्। इक् स्मरणे। ककारेहइण्वदिक इति विशेषणार्थः। अयमधिपूर्वः। तथाच भट्टिः। ससीतयोराघवयोरधीयन्। स्मरन्नित्यर्थः राघवयोरित्यत्र कर्मणिषष्ठी। इङिकाविति। इङिकावध्युपसर्गं विना प्रयोगं नार्हत इत्यर्थः॥

मू०– इण्वदिकः॥ अधीयाय। अधीयतुः। अधीययिथ, अधीयेथ। अधीयिव। अधीयात्। अध्येता। अध्यगात्। विद ज्ञाने। वेत्ति। वित्तः। विदन्ति। वेत्सि। वित्थः। वित्थ। वेद्मि।

(सुबोधिनी–) इण्वदिकः। इणो यत् कार्यमुक्तं तदिकोपि भवति। कार्यातिदेशेयम्। विद ज्ञाने। ज्ञप्तिर्ज्ञानं॥

मू०– विदोनवानान्त्यादीनांणबादिर्नवकोवा॥ विदःपरेषांत्यादीनां नवानां णवादिर्नवको वा। वेद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। विद्व। विद्यात्। वेत्तु। विद्धि।

(सुबोधिनी-) विदोनवानांत्यादिनांणबाणादिर्नवकोवा । वर्तमानार्थकणादियोगे धातोर्द्वित्वं न उक्तार्थणादियोगे इत्युक्तत्वात् । झसादिति धिः । विद्धि ॥

(तत्त्वदीपिका-) वेदेति । अनन्तरस्येति न्यायादुक्तार्थणादियोग एव द्वित्वं नान्यत्र ।

मू०-- वेत्तेर्लोट्याम्गुणाभावः करोत्यनुप्रयोगश्चवा ॥

(सुबोधिनी-) वेत्तेर्लोट्याम्गुणाभावःकरोत्यनुप्रयोगश्चवा । वेत्तेराम् प्रत्ययो गुणनिषेधः करोतेरनुप्रयोगश्च वा स्याल्लोटि ॥

मू०-- तनादेरुप् ॥ विदांकरोतु ।

(सुबोधिनी-) तनादेरुप् । तन आदिर्यस्य स तनादिस्तस्मात्तनादेरुप् प्रत्ययः स्यात् कर्त्तरि चतुर्षु । नूप इति गुणे कृते विदांकरोतु ।

मू०-- ङित्यदुः ॥ कृञोऽतउत् ङिति । विदां कुरुतात् । विदांकुर्वन्तु । अवेत्, अवेद् । स्याविदः । अविदुः ।

(सुबोधिनी-) ङित्यदुः । कृञोये इत्यतः कृञइत्यनुवृत्तं । लङिदिस्योरिति दिप्सिपोर्लोपः स्यात् । अवेत् आदंतविदेत्यन उस् वा । अविदुः ॥

(तत्त्वदीपिका-) ङित्यदुः ङिति अत् उरितिछेदः। कृञो ये इत्यतः कृञइत्यनुवर्त्तते विदांकुरुतादित्यत्र तपरत्वादुप्रत्ययनिमित्तो गुणो न कुर्वंत्वित्यत्र तु संज्ञापूर्वकत्वेनानित्यत्वात् य्वोर्विहस इति दीर्घो न । तपरः किम् । अकार्थे॥ तपरकरणं सुखमुखोच्चारणार्थमिति वासुदेवः । तन्न ङित्यउरिति पाठेपि सुखोच्चारस्याव्याहतत्वात् ।

मू०-- दःसः ॥ पदान्ते दस्य सोवा सिपि । अवेः । अवेद्, अवेत् ।

(सुबोधिनी-) दःसः । पदांते धातोर्दस्य सो वास्यात् । सिपि किं । अवेद् । पदांते किम् । वेत्सि ॥

(तत्त्वदी० -) दःसःअत्र रोरात्रिष्वित्यतो मंडूकप्लुत्या रइत्य नुवर्त्तते । अजर्घा इत्यादिसिद्ध्यर्थम् । स इति त्वव्यवहितमपि न दोषादिकल्पने च गौरवम् । यदि दोषादिकल्पनं व्यवहितानुवृत्त्या गौरवं समानं तदा सानुवृत्तिरप्यस्तु ।

मू०-- आमिविदेर्नगुणः ॥ विदाञ्चकार । अवेदीत् । अस भुवि । अस्ति ।

(सुबोधिनी-) आमिविदेर्नगुणः । वेत्तेर्गुणो न स्यात् आमि विददरिद्रेत्याम् विदांचकार । अस भुवि सत्तायामित्यर्थः ॥

मू०-- नमसोऽस्य ॥ प्र[illegible]त्यनमोऽस्तेश्चाकारस्य लोपो ङिति । स्तः । संति ।

(सुबोधिनी-) नमसोस्य । नम [illegible]नयोः समाहारो नमस् तस्य । नमिति प्रत्ययो गृह्यते प्रतिपदोक्तत्वात् । [illegible]ाक्षणिकत्वात् । तस्य हि आदे-

ष्णः स्नइति कृते नमतिरूपं । अस्तेरीडित्यतोस्तेरित्यनुवृत्त्याऽस्तेरित्यस्ययोऽसूत स्येतिव्याख्यानात् असूप्रत्ययस्य असूदीप्तौ असु क्षेपणे इत्यादीनां च ग्रहणं न भवति । ङित्यदुरित्यतो ङितोति ओर्वमोरित्यतोलोप इति चानुवृत्तं ॥

(तत्त्वदीपिका—) नमसोस्य । नम् च अस् चानयोः समाहारः नमस् तस्य । नमधातोरादेष्णः स्न इति सूत्रेण नत्वकरणाल्लाक्षणिकेनाग्रहात् । अस्तेरीडित्यतोस्तेरित्यनुवृत्तेरस्तेरिति रूपस्य प्रकृतिभूतोयोऽसूतस्येति व्याख्येयम् । तेनासू प्रत्ययः असू दीप्तौ । असु क्षेपणे इत्यादीनां न ग्रहणम् । यत्तु वासुदेवेन असाधातुना साहचर्यान्नमपि धातुरेव गृह्यतां इत्युक्तम् तन्न । अस प्रत्ययस्यापि संभवेन धातोर्ग्रहणमिति निर्णयाभावात् ।

मू०-- सिसः॥ अस्तेस्सस्य लोपो भवति सादौ । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । स्यात् । अस्तु । स्तात् । सन्तु । जह्येधिशाधि । एधि । असानि ।

(सुबोधिनी—) सिसः । नमसोस्येत्यतोऽसूग्रहणमप्यनुवृत्तं जह्येरिति एध्यादेशः । एधि ॥

(तत्त्वदीपिका—) सिसः । अत्र नमःसकारासंभवादस एवानुवृत्तिः ।

मू०-- अस्तेरीट्॥ विद्यमानादस्तेः रुदादेश्च परयोर्दिप्सिपोरीट् । आसीत् । आस्ताम् । आसीः । आसम् ।

(सुबो०)अस्तेरीट् । दिस्योर्हसादित्यतोदिस्योरित्यवृत्तं अस्तेरिति तु तंत्रादिना वाख्येयं तेन विद्यमानादस्तेरिति लभ्यते । विद्यमानात्किं । अस्तेर्भूरित्यादेशेऽभूदित्यादौ माभूत । स्थानिवद्भावेन नमसोस्येत्यत्र ओर्वमोर्वेत्यतो वानुवृत्या व्यवस्थया-लोपाभावे स्वरादित्वात द्वितीयोऽट् । आस्ताम् ॥

(तत्त्वदी०—) अस्तेरीट् । अत्राद्रुदादेरिति सूत्रात् रुदादेरित्येकदेशो नुवर्त्तते नत्वदिति क्वचिदेकदेशोनुवर्त्ततइति स्वीकारात् । अस्तेरित्यस्य तन्त्रादिना विद्यमानादिति । तेन भ्वादेशे अभूदित्यादौ नातिप्रसंगः । आस्तामिति । अत्र ओर्वमोर्वेत्यतो वानुवृत्त्याऽव्यवस्थया लोपाभावद्द्वितीयोट् । उपदेशस्वरादिति तु न । अगादित्यत्रातिव्याप्तेः ।

मू०-- अस्तेरनपिभूः ॥ बभूव । इत्यादिसिद्धम् । मृजू शुद्धौ ।

(सुबोधिनी—) अस्तेरनपिभूः । अस्तेर्भूरादेशः स्यादचतुर्षु । मृजू शुद्धौ । अयं न पित् । भिदादिपाठसामर्थ्यात् ॥

मू०-- मृजेर्वृद्धिः ॥ क्ङिति स्वरे वा । मार्ष्टि । मृष्टः । मृजन्ति, मार्जन्ति।मार्क्षि । मृज्यात् । मार्ष्टु । मृड्ढि । मार्जानि । अमार्ट्,अमार्ड् । ममार्ज । ममृजतुः, ममार्जतुः । ममार्जिथ । ममार्ष्ठ । मृज्यात् । मार्जिता, मार्ष्टा । अमार्जीत् । वचपरिभाषणेवक्ति । नहिवच्चिरन्तिपरः

वक्षि । वक्थः । वच्मि । वच्यात् । वक्तु । वग्धि । अवक्, अवग् उवाच । ऊचतुः । उवचिथ उवक्थ उच्यात् । वक्ता । वक्ष्यति अवक्ष्यत् । अस्यतिवक्तीतिङः ।

(सुबोधिनी—) मृजेर्वृद्धिः । गुणापवादः । अक्ङिति प्रत्यये परे मृजेर्वृद्धिर्भवति क्ङिति स्वरे वेष्यते । छशषेति षत्वम् । मार्ष्टि । झसादिति हेर्द्धिः । छशषेति षत्वं ष्टुत्वं झबेजबा इति षस्य डः स्थानिकत्वात् मृड्ढि । दिस्योरिति दिप्सिपोर्लोपः । अमार्ट् । अमार्ड् । लुङि इडभावे षत्वकत्वे अमार्क्षीत् झसादिति सिलोपः । अमार्ष्टाम् । स्याविदइत्यन उस् । अमार्क्षुः । वच परिभाषणे । अयमंतिपरो न प्रयुज्यते इत्येके । बहुवचनपरो न प्रयुज्यते इत्यपरे । झसादिति हेर्धिः । चोःकुरिति कः । झबेजबा इति गः । वग्धि । दिस्योरिति दिप्सिपोर्लोपः । अवक् । णबादौ पूर्वस्येति संप्रसारणं अतउपधाया इति वृद्धिः । उवाच । अस्यतिवक्तिख्यातिभ्य इति ङः ॥

(तत्त्वदीपिका—) नहिवचिरिति । बहुवचनपरइत्येके अंतिमात्रपरइत्यन्ये ।

मू०-- वचेरुम् ॥ अवोचत् । अवोचताम् । अवोचन् । रुदिर् अश्रुविमोचने ।

(सुबोधिनी—) वचेरुम् । वचेरुमागमः स्यात् ङप्रत्यये । अवोचत् । रुदिर् अश्रुविमोचने । अश्रु विमोचनं रोदनं ॥

मू०--रुदादेश्चतुर्णांह्वसादेः ॥ रुदादेः परस्य तिबादिचतुर्णांमध्ये हकारवसादेः प्रत्ययस्येट् । रोदिति । रुदितः । रुदन्ति । रोदिषि । रुदिथः । रुदिथ । रुद्यात् । रोदितु रुदिहि ।

(सुबोधिनी—) रुदादेश्चतुर्णांह्वसादेः । हच वसश्च ह्वसौ तौ आदी यस्य स ह्वसादिस्तस्य ॥ रोदितिः स्वपितिश्चैव श्वसितिः प्राणिति स्तथा । जक्षितिश्चेति विज्ञेयो रुदादिः पंचको गणः । ह्वसादेः किं । रुदंति । चतुर्णां किं । स्वप्ता । हौ परत्वादिटि कृते धिरादेशो न । रुदिहि ॥

मू०-- रुदादेर्दिस्योरीडटौ ॥ अरोदीत्, । अरोदत् । अरुदिताम् अरुदन् । इरितो वा अरुदत् । ञिष्वप् शये । स्वपिति । स्वप्यात् स्वपितु । अस्वपीत् । अस्वपत् । सुष्वाप । स्वप्ता । अस्वाप्सीत् । श्वस प्राणने । श्वसिति । श्वस्यात् । श्वसितु । अश्वसत् । अश्वसीत् । शश्वास । अन प्राणने । अनिति ।

(सुबोधिनी) रुदादेर्दिस्योरीडटौ । रुदादेः परयोर्दिप्सिपोरीडटावागमौ भवतः

लुङिइरिति इति वाङः। अरुदत्। णबादौ पूर्वस्येति संप्रसारणं। सुषुपतुः। अत-उपाधाया इति वृद्धौ। अस्वाप्सीत्। ह्म्यंतेति न वृद्धिः। अश्वसीत्॥

(तत्त्वदीपिका-) रुदादीराति। रूचवसश्वहसौ तौ आदी यस्य स तथा तस्य। रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा। जक्षितिश्चेतिविज्ञेयो रुदादिः पंचको गणः १ अरुदत्। अरोदीदिति। अद्रुदादेरडित्यट्। अस्तेरीडितिपक्षेईट्।

मू०—प्रादेरेफादनितेर्नस्यणत्वम्॥ प्राणिति। प्राणिहि। आनीत्। आनत्। आन। आनतुः। अन्यात्। अनिता। आनीत्। जक्ष/भक्ष हसनयोः। जक्षिति जक्षितः।

(सुबोधिनी-)प्रादेरेफादनितेर्नस्यणत्वं। प्रादिस्थरकारात्परस्यानेर्नस्य णत्वंस्यात।

मू०—जक्षादेरन्तोऽदनउस्॥ जक्षजागृदरिद्राशासूचकासृभ्यःपरस्यान्तोऽत्। जक्षति जक्ष्यात्। जक्षितु। जक्षिहि।अजक्षीत्। अजक्षत्। जक्षिता॥ इतिरुदादयः॥ जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। जागृयात्। जागर्तु। अजागः। अजागृताम्।

(सुबोधिनी-) जक्षादेरंतोऽदनउस्। जक्षप्रभृतयः सप्त। उक्तं च। "जक्ष जागृ दरिद्राति चकास्ति शास्तयस्तथा॥ दीधीङ्वेवीङ् च विज्ञेयो जक्षादिः सप्तको गणः॥ १॥" दिस्योरिति दिप्सिपोर्लोपः। अजागः॥

मू०--उसिगुणः अजागरुः। जजागार।

(सुबोधिनी-) उसि गुणः। नामन्तस्य धातोर्गुणः स्यादनादेशे उसि परे। विदरिद्रेतिवाऽम्। जागरांचकार॥

मू०—जागर्तेर्वीण्णवृङिद्भिन्नेषुगुणः॥ जजागरतुः जजागरुः जजागरिथ। जागराञ्चकार। जागर्य्यात्। जागरिता। जागरिष्यति।अजागरिष्यत्। अजागरीत्। दरिद्रा दुर्गतौ। दरिद्राति।

(सुबो०-) जागर्त्तेर्वीण्णव्ङिद्भिन्नेषुगुणः। जागर्त्तेर्विइण्णवृङिद्भिन्नप्रत्ययगुणः स्यात्। वि इण्णव् ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेध विषये च। विशब्देन वादि प्रत्ययो गृह्यते। इकारस्तु उच्चारणार्थः क्वसुप्रत्यये जजागृवान्। जजागृवांसौ इति। इणि अजागारि। णपि जजागार। ङिति जागृतः। वृद्धिविषये वुणि जागरकः। घञि जागरः। ञि प्रत्यये। जागरयाति। नचैतेषु गुणेकृतेप्यतउपधाया इति वृद्धिस्स्यादिति वाच्यम्। गुणविधेरिण्णप्प्रतिषेधस्य चानर्थक्यापत्तेः। लुङि जागृ इस् ईदित्यत्र रत्वं प्राप्तं तद्गुणो बाधते। तंणित्पे इति सेर्णित्वाद्धातोर्नामिन इति वृद्धिर्बाधते। तां जागर्तेरिति गुणो बाधते। तत्र गुणे कृते अतोहसादेरिति विकल्पं बाधित्वा ल्रांतस्येति वृद्धिः प्राप्ता ह्म्यंतेतिसूत्रेण निषिध्यते।अजागरीत्।दरिद्रादुर्गतौ।

मू०-दरिद्रातेरिदालोपश्चङिति ॥ दरिद्रातेरातो लोपो ङितिस्वरे इकारश्च ङिति हसे। दरिद्रितः। दरिद्रति। दरिद्रियात्। दरिद्रातु। अदरिद्रात्। अदरिद्रिताम्। अदरिद्रुः।

सुबोधिनी- दरिद्रातेरिदालोपश्चङिति। हसे इति स्वरे इति चानुवृत्तं॥

(तत्त्वदीपिका-) अदरिद्रुरिति। जक्षादेरित्यनेन उस् दरिद्रातेरिदालोपइत्यनेन परत्वादालोपआदन्तत्वाभावादादन्ताद्दिष इत्यादिलक्षणविकल्पाप्रवृत्तिः।

मू०-दरिद्रातेरनप्यालोपःसौवाणञ्वुणनिट्सयुट्सुन ॥ ददरिद्रौ। ददरिद्रतुः। दरिद्राञ्चकार। दरिद्र्यात्। दरिद्रिता। अदरिद्रीत् अदरिद्रिष्टाम्। अदरिद्रासीत्। शासुअनुशिष्टौ। शास्ति।

(सुबोधिनी-) दरिद्रातेरनप्यालोपःसौवाणञ्वुणऽनिट्सयुट्सुन। दरिद्रातेरातोलोपः स्यात् अचतुर्षु सिप्रत्येय तु वा णबादिषु परेषु न वुणि। दरिद्रायकः। अनिटि सप्रत्यये दिदरिद्रासति। युटि दरिद्राणः। लुङि आलोपाभावे यमिरमीतीट्सकौ। अदरिद्रासीत्। अदरिद्रासिष्टां। शासु अनुशिष्टौ। अनुशिष्टिरनुशासनं॥

मू०-शासेरिः॥ शासेरातो हसे क्ङिति ङे च इद्भवाति। षशादेषः। शिष्टः। शासति। शास्सि। शिष्टः। शिष्ट। शास्मि। शिष्यात्। शास्तु। जह्योधिशाधि। शाधि। दिपिधातोः॥ सस्य तः स्याद्दिपि। अशाद्। अशात्। अशिष्टाम्। अशासुः। सिपिवाधातोः॥ सस्यवा तः स्यात्सिपि। अशाः। अशाद् अशात्। अशाः। शशास। शिष्यात्। शासिता। अशासिष्यत्। अशिषत्। चकासृदीप्तौ चकास्ति चकास्तः चकासति झसाद्धिर्हिः। धेसलोपः। चकाधि। अचकात् अचकासुः। अचकाः। अचकात्, अचकाद्। चकासाञ्चकार। अचकासीत्॥ इतिपरस्मैपदम्॥

सुबोधिनी-शासेरिः। शास उपधाया इत् स्यात् ङप्रत्यये हसादौ क्ङिति च। ङस्यानुवर्त्तनात् आङः शासु इच्छायामित्यस्य तु न ग्रहणं। अर्ति सर्ति साहचर्य्यात्परस्मैपदिन एव शासेर्ङविधानात्। तेन पेएवेत्त्वं। नेह। आशास्ते। अन्ये तु व्यतिशिष्टे। व्यतिशिड्ढ्वे। इत्यात्मनेपदेपि इत्वं स्वीकुर्वंति। ह्रौ जह्योधिशाधीति शाधिरादेशः। शाधि। सर्त्तिशास्तीति ङः। अशिषत्। चकास दीप्तौ। दीप्तिस्तेजः। जक्षादेरित्यंतोऽत्। चकासति। धेचसलोपः। धातोः सकारस्य लोपः स्यात् धकारे परे। दिस्योरिति दिप्सिपोर्लोपः। दिपि सस्येतितः। अचकात। सिपि तु

वा तः । अचकाः । अचकात् । कासादित्याम् । चकासांचकार । इति परस्मैपद

(तत्त्वदीपिका-) शासेरिः । ङे चेति । ङानुवृत्तेराङः शासु इच्छायामित्यस्यने त्वम् । अर्तिसाहचर्यात्परस्मैपदिन एव शास्तेर्ङविधानात् । भाष्यसंमतमाह । धेसलोपइ ति ॥ कृतायामिहटीकायां लोकेशकरशर्म्मणा । अगादददादिमध्यस्थंपरस्मैपदसाधनम् ।

मू०—चक्षिङ् व्यक्तायांवाचि । स्कोराद्योश्च । चष्टे । चक्षाते । आतोऽन्तोदनतः । चक्षते । चक्षे । चक्षाथे । चड्ढ्वे । चक्षे । चक्ष्वहे । चक्ष्महे । चक्षीत । चष्टाम् । अचष्ट ।

(सुबोधिनी-) दीधीङ् दीप्तिदेवनयोः । देवनं शोकः । वेवीङ् वेतिनातुल्ये । वीगतीत्यनेन तुल्येऽर्थे वर्त्तत इत्यर्थः । छांदसाविमौ । अत एव न व्याख्यातौ ॥ चक्षिङ् व्यक्तायांवाचि । अयं दर्शनेपि । इकारोऽनुदात्तः इदितोनुमिति नुम् तुन । अंतेदित इति व्याख्यानात् । ङकारस्तु अनुदात्तेत्त्वप्रयुक्तमात्मने-पदमनित्यमिति ज्ञापनार्थः स्कोरिति कलोपः । ष्टुत्वं चष्टे । आतोन्तोदनत इत्यत् । चक्षते । मध्यमे तु स्कोरिति कलोपः । षढोरिति कः । षत्वं चक्षे । कलोपे ष्टुत्वे झबेजबा इति डः । चड्ढ्वे । लङि अचष्ट ॥

(तत्त्वदीपिका-) चक्षिङ् अनुदात्तेत्वलक्षणमात्मनेपदमनित्यमिति ज्ञापनार्थो ङकारः । तेनानुक्तमप्यूहति पंडितो जन इत्यादिसिद्धम् । इदित् इतिनुम् तु नभवतिअन्तेदिति व्याख्यानात् । अकारस्तुवक्तुमुचितः ।

मू०—चक्षिङोनपिख्याञ्क्शाञौणादौतुवा ॥ चख्यौ चख्युः । चख्ये । चख्याते । चक्शौ । चक्शे । चचक्षे । ख्येयात् । ख्यायात् । ख्यासीत् । क्शायात् क्शेयात् । अख्यत् । अख्यत । अक्शास्त । ईर् गतौ कम्पने च । ईर्ते । ईराते । ईर्ताम् । ईराताम् । ऐर्त । ईराञ्चक्रे । ईर्षीष्ट । ऐरिष्ट । आङःशासु इच्छायाम् । आशास्ते । आशशासे । आशासिष्ट । कसिगतिशासनयोः । कंस्ते । कंसाते । अयमनिदिदित्येके । कस्ते । तालव्यान्तोऽप्यनिदित् । कष्टे । कशाते । कक्षे । कड्ढ्वे । अकशिष्ट । णिसि चुम्बने । निंस्ते । निंसाते । निंस्से । निंसिता । णिजि शुद्धौ । चोःकुः । निंक्ते । निंक्षे । निंजिता । शिजि अव्यक्तेशब्दे । शिंक्ते । शिंक्षे । शिंजिता । पिजि वर्णे सम्पर्चने च । पिङ्क्ते, पिपिञ्जे । पिंजिता । पृचि सम्पर्चने । पृङ्क्ते । पपृञ्चे । पृचिता । पृची सम्पर्चने । पृक्ते । पपृचे । अपर्चिष्ट । ईड स्तुतौ । ईट्टे ।

(सुबोधिनी-) चक्षिङोऽनपिख्याञ्कशाञावादेशौ भवतः अचतुर्षु । लिटि परे तु वा । ञित्वात्पदद्वयं । आतोणबूडाविति डौ । चख्यौ । अतोनपीसालोपः। चख्ये चक्शौ । चक्शे । चचक्षे । संयोगादेरादंतस्यैकारो वा । ख्यायात्, ख्येयात् । क्शायात्, क्शेयात् । ख्यासीष्ट, क्शासीष्ट । ख्याता, क्शाता । ख्यास्यति । ख्यास्यते । क्शास्यति । क्शास्यते । अख्यास्यत् । अख्यास्यत । अक्शास्यत्। अक्शास्यत । अस्यति वक्तीति ङः । आतोनपीत्यालोपः । अख्यत्, अख्यद् । अक्शासीत् । अक्शास्त । वर्जने ख्याञ्क्शाञौ नेष्टौ । समचक्षिष्ट । आङः शासु इच्छायाम् । आङ्पूर्वकत्वं प्रायिकं । तेन नमोवाकं प्रशास्महे इति सिद्धम् । वचेर्घञ् चजोरिति कः । कसिगतिशासनयोः । शासनमाज्ञा । तालव्यांतोप्यनिदित् छशषेति षत्वं ष्टुत्वं । कष्टे । षढोरिति कः षत्वं च । कक्षे। षत्वष्टुत्वे। झषे इति डः । कड्ढ्वे । णिजि शुद्धौ । अनिट्केषु णिजिरिति जौहोत्यादिकस्य ग्रहणादयं सेट् । चोः कुरिति जस्य गः । खसेचपा इति कः । निंक्ते । गत्वकत्वषत्वानि । निंक्षे । शिजि अव्यक्ते शब्दे । क्तप्रत्यये शिंजितं । णिन्यंतादीपि कृते शिंजिनी । " भूषणानांतु शिंजितमित्यमरः । मौर्वी ज्या शिंजिनी गुण " इतिच । चोःकुरिति जस्य गः । खसे चपा इति कः । शिंक्ते । पिजि वर्णे संपर्चने च । संपर्चनं मिश्रीभावः ॥

मू०-ईडीशिभ्यांसध्वयोरिट् ॥ ईडिषे । ईडिध्वे ।

(सुबोधिनी-) ईडीशिभ्यांसध्वयोरिट् । आभ्यां परयोः सध्वशब्दयोरिट् स्यात् ।

मू०-लङोध्वस्यनेट् ॥ ऐड्ढ्वम् । ईडाञ्चक्रे । ऐडिष्ट । ईश ऐश्वर्ये । ईष्टे । ईशिषे । ईशिध्वे । ईशांचक्रे । ईशितासे । आसउपवेशने। आस्ते । आध्वे । आसांचक्रे । वस आच्छादने।वस्ते ववसे अवसिष्ट षूङ् प्राणिगर्भविमोचने । सूते । नुधातोः । सुवाते सूताम् ।

(सुबोधिनी--) लङोध्वस्यनेट् । ईडीशिभ्यां परस्य लङो ध्वशब्दस्य इण्न स्यात् । आस उपवेशने । उपवेशनं स्थितिः । धिचेति सलोपे आध्वं । कासादिप्रत्ययादित्याम् ।आसांचक्रे । वस आच्छादने । धिचेति सलोपे । वध्वे शस ददेत्येत्वपूर्वलोपौ न । ववसे । षूङ् प्राणिगर्भविमोचने । प्राणिगर्भविमोचनं प्रसवः ॥

मू०-सुवोनगुणश्चतुर्षु॥ सुवावहै। सुषुवे । सविषीष्ट,सोषीष्ट । सविता,सोता। शीङ् । स्वप्ने ।

(सुबोधिनी-)सुवोनगुणश्चतुर्षु । सुवो गुणो न स्यात् त्यादिषु चतुर्षु । स्वरतिसूतीति विकल्पं बाधित्वा कित इति निषेधे प्राप्ते क्रादेर्णादेरिति नित्यमिट् । नुधातोरित्युव् । सुषुविषे । स्वरतिसूतीति वेट् । सविषीष्ट सोषीष्ट । शीङ् स्वप्ने स्वप्नं आलस्यं निद्रा च ॥

मू०—शीङोगुणश्चतुर्षु ॥ शेते । शयाते ।

(सुबोधिनी—) शीङोगुणश्चतुर्षु । क्ङित्यगुसीत्यस्यापवादः ॥

मू०—शीङोऽतोरुट् ॥ शीङः परस्यातो रुडागमः । शेरते । शेताम् । अशेत । अशेरत । शिश्ये । अशयिष्ट । इङ् अध्ययने अधिपूर्वः । अधीयाते । अधीयीत । अधीयीयाताम् । अध्ययै । अध्यैत । अध्यैयाताम् ।

(सुबोधिनी--) शीङोतोरुट् । शीङः परस्यातः प्रत्ययस्य रुडागमः स्यात् नुधातोरिति यः । शिश्ये । इङ् अध्ययने । अध्ययनं पठनं । नुधातोरितीय् । अधीयाते । आतोंतोदनत इत्यत् । अधीयते । लोटि उत्तम पुरुषे गुणायादेशयोः कृतयो रुपसर्पस्य इयङ्स्वरे इति यत्वं । अध्ययै । लङि अध्यैत । प्रथममियू ततोऽटौ । अध्यैयाताम् । अध्यैयत । उत्तमे तु । अध्यैयि । अध्यैवहि ।

(तत्त्वदीपिका—) अध्यैयातामिति । परत्वादियादेशेपुनरडागमद्वयेन सिद्धिः ।

मू०—इङोणादौगाङ् ॥ अधिजगे । अध्येषीष्ट ।

(सुबोधिनी—)इङोणादौगाङ् । इङो गाङादेशः स्याल्लिटि । आतोनपीत्यालोपे । अधिजगे ॥

मू०—इङोवागीर्लुङ्लृङोर्गुणाभावश्च ॥ अध्यगीष्यत, अध्यैष्यत अध्यगीष्ट, अध्यैष्ट ॥

(सुबोधिनी-) इङोवागीर्लुङ्लृङोर्गुणाभावाश्च । इङो गी इत्यादेशो वा स्यात गुणनिषेधश्च लुङ्लृङोः परयोः । इत्यात्मनेपदं ॥

(तत्त्वदीपेका—) कृतायामिह टीकायां लोकेशाकरशर्मणा ।
अगाददादिमध्यस्थमात्मनेपदसाधनम् ॥

मू०— द्विष अप्रीतौ । द्वेष्टि द्विष्टः । द्वेष्टु द्विड्ढि । अद्वेट् । अद्वेड् । अद्विष्टाम् । अद्विषुः । अद्विषन् । दिद्वेषिथ । द्विक्षीष्ट । अद्विक्षत् । दुह प्रपूरणे । दादेर्घः । तथोर्धः । दोग्धि । दुग्धः । दुहन्ति । धोक्षि । दुग्धे । दोग्धु । दुग्धि दोहानि । अधोक् अधोग् । दुदोह । धुक्षीष्ट । अधुक्षत । अदुग्ध । अधुक्षत । अधुक्षाताम् । अदुग्धाः । अधुक्षथाः । अधुग्ध्वम् । अधुक्षध्वम् । अदुह्वहि, अधुक्षावहि । दिह उपचये । देग्धि लिह आस्वादने । लेढि । लीढः । ष्टुञ् । स्तुतौ । स्तौति, स्तवीति । स्तुतः स्तुवीतः ।

स्तुवन्ति। स्तौषि। स्तुवीषि। स्तुते। स्तुवीते। स्तुवीष्व। अस्तौत्। तुष्टोथ। तुष्टुव। तुष्टुम। स्तोषीष्ट।

(सुबोधिनी–) द्विष अप्रीतौ। अप्रीतिः शत्रुता। ष्टुत्वं द्वेष्टि। द्विष्टे। द्विष्यात् द्विषीत। द्विष्टां। हौ ष्टुत्वं। झबेजबा इति डत्वं। द्विड्ढि। द्वेषाणि। द्वेषै। दिस्योरिति दिप्सिपोर्लोपः वावसाने इति वा टः। अद्वेट् अद्वेड्। आदंतद्विष इत्यत उस् वा। अद्विषुः। अद्विषन्। आतितु। अद्विष्ट। दिद्वेष। दिद्विषे। द्विष्यात्। षढोरिति कः षत्वं च। द्विक्षीष्ट द्वेष्टा। द्वेक्ष्यति द्वेक्ष्यते। अद्वेक्ष्यत् अद्वेक्षत। हशषांतादिति सक्। अद्विक्षत् अद्विक्षत। आतिसकोलोप इत्यल्लोपे अद्विक्षातां। दुह प्रपूरणे। प्रपूरणं त्यजनम्। दादेर्घइति घः तथोरिति तस्यधः झबेजबा इति गः। दोग्धि। सिपि तु घत्वं आदिजबानामिति घः खसेचपा इति कः षत्वं च। धोक्षि। लुङि दिस्योरिति दिप्सिपोर्लोपः। धत्वढत्वकत्वानि। अधोक्। लुङि हशषांतादिति सक्। ढत्वकत्वषत्वानि। अधुक्षत्। आति तु अधुक्षत। दुहदिहेतिसको लुक्पक्षे तनूथासुध्वंवहिषु लङ्वत्। धत्वं तथोर्ध इति धत्वं। झबेजबाइति गः। अदुग्ध। अदुग्धाः। धत्वे अदुग्ध्वं अदुह्वहि। दिह उपचये। उपचयो वृद्धिः। लिह आस्वादने। होढ इति ढः तथोर्द्ध इति धः ष्टुत्वं ढिढोलोप इति ढलोपः। लेढि। सिपि ढत्वं षढोरिति कः षत्वं। लेक्षि। हौ ढत्वं झसादिति हेर्धिः ष्टुत्वं ढिढ इति ढलोपपूर्वदीर्घौ। लीढि। लुङि हशषांतादिति सक्। अलिक्षत्। आति तु अलिक्षत। दुहदिहेति सको लुक्पक्षे ढत्व धत्वष्टुत्व ढलोपपूर्वदीर्घाः अलीढ। आतिसक इत्यल्लोपे। अलिक्षाताम्। अलिक्षत। अलिढाः अलिक्षथाः। अलोपः। अलिक्षाथाम् अलीढ्वम्। अलीक्षध्वं। अलिक्षि। अलिह्वहि। अलिक्षावहि। अलिक्षामहि। ओरौ इत्यौ। स्तौति। तुरुस्तुभ्य इतीड्वा स्तवीति। नुधातोरित्युव्। स्तुवंति॥

सू०–स्तुसुधूञ्भ्यःपेसेरिट्॥ अस्तावीत्। अस्तोष्ट। ब्रूञ्। व्यक्तायांवाचि॥

(सुबोधिनी–) स्तुसुधूञ्भ्यःपेसोरिट्। ष्टुञ् स्तुतौ। षुञ् अभिषवे। धूञ् कंपने। एषां परस्मैपदस्य सेरिट् आति तु न। धातोर्नामिन इति वृद्धिः। अस्तावीत्। आति तु गुणः। षत्वष्टुत्वे। अस्तोष्ट॥

सू०–अबादौपितित्स्मि॥ब्रूञ्ईप्रत्ययोऽबादौपितित्स्मि। ब्रवीति। ब्रूतः। ब्रुवन्ति।

(सुबो०-) अबादौपितित्स्मि। ब्रुवः परेषां पित्तां तिबादीनां चतुर्णां तकारसकारमकारादिप्रत्ययानामिडागमः स्यात्॥

(तत्त्वदीपिका–) अबादाविति। अपूआदिःस्थानीयस्यसतथाअलुक्। तेनलुग्विषय इत्यर्थः। त्स्मीत्यत्रहिसतकारकोनिर्देशः दस्यखसेचपा इतितः। तेनाब्रवीदितिसिध्यति॥

मू०--ब्रुवआहश्चपञ्चानाम् ॥ ब्रुवः परेषां पञ्चानां तिपादीनां णबादयः पंचादेशा वा स्युः ब्रुव आहश्च। आह। आहतुः। आहुः॥

(सुबोधिनी-) ब्रुवआहश्चपंचानां। ब्रुवः धातोरहादेशः। अकार उच्चारणार्थः तिबादीनां पंचानां क्रमेण णबादयः पंचादेशाश्च। अत्रद्विश्चेति द्वित्वं न। उक्तार्थ इत्युक्तत्वात् ॥

(तत्त्वदीपिका-) पंचानामिति। आदेशादेशिनोः संख्यासाम्यादादेशा अपि पंचैव ग्राह्याः। द्विश्चेत्यत्र परोक्षार्थणादियोगेद्वित्वविधानादेतद्योगेद्वित्वंन। तथा। आहइत्यनुवर्त्य तच्च षष्ठ्याविपरिणम्यषष्ठीनिर्दिष्टत्वेनान्तस्येत्याह हस्येति।

मू०--तस्थे ॥ आहो हस्य तस्थे परे। आत्थ। आहथुः। ब्रूते ब्रवीतु। अब्रवीत्।

(सुबोधिनी-) तस्थे ॥ आह इत्यनुवर्त्तते तच्च षष्ठ्या विपरीणम्यते षष्ठीनिर्दिष्टत्वेनांतस्य हस्येत्यर्थः ॥

मू०-- ब्रूञोऽनपिवच् ॥ उवाच। ऊचे। अवोचत्। अवोचत आदाथइः अवोचेताम्। अवोचन्त। अवोचथाः अवोचेथाम्। अवोचध्वम् अवोचे। अवोचावहि। ऊर्णुञ् आच्छादने।

(सुबोधिनी-) ब्रूञोनपिवच्। ब्रूञो वचादेशः स्यादचतुर्षु णबादौ। पूर्वस्येति पूर्वस्य संप्रसारणं। उवाच। यजामितिसंप्रसारणम्। ऊचतुः। अस्यतिवक्तीति ङः। ङेवचेरित्युम्। अवोचत् ऊर्णुञ् आच्छादने। आच्छादनमावरणम् ॥

मू०--ऊर्णोतेर्वावृद्धिर्हसादौपितिचतुर्षु ॥ ऊर्णोति, ऊर्णौति। ऊर्णुतः। ऊर्णुवंति। ऊर्णुते। ऊर्णुयात्। ऊर्णुवीत। ऊर्णौतु ऊर्णोतु। ऊर्णुहि।

(सुबोधिनी-) ऊर्णोतेर्वावृद्धिर्हसादौपितिचतुर्षु। ओरौ इति नित्ये औत्वे प्राप्ते इति विभाषा। हसादौ किं। ऊर्णवानि। पिति किं। ऊर्णुतः। वृद्ध्यभावे गुणः। ऊर्णौति। उर्णोति। नुवातोरित्युव्। ऊर्णुवंति ॥

(तत्त्वदीपिका-) ऊर्णोतेरिति। श्तिपानिर्देशो यङ्लुग्न्यावृत्त्यर्थः

मू०--ऊर्णोतेर्गुणोदिस्योः ॥ वृद्धेरपवादः। और्णोत्। और्णोः।

(सुबोधिनी-) ऊर्णोतेर्गुणोदिस्योः। ऊर्णोतेर्गुणः स्यात् दिपि सिपि च। ऊर्णोतेर्वा इत्यस्यापवादः॥

मू०- ऊर्णोतेराम्न ॥

(सुबोधिनी-) ऊर्णोतेराम्न। अनेकस्वरत्वात्प्राप्त आम् अनेन निषिध्यते॥

मू०-स्वरादेः परः॥ स्वरादेर्द्धातोर्द्वितीयोऽवयवोऽद्विरुक्तस्सस्वरो द्विर्भवति। स्वरात्परास्संयोगादयोवनदराद्विर्न॥ ऊर्णुनाव। ऊर्णुनुवतुः।

(सुबोधिनी--) स्वरात्परःसंयोगादयोवनदराद्विर्न। संयोगादयो वकारनकारदकाररकारास्तेषां द्वित्वंनेत्यर्थः। यथा। उंदो। उंदिदिषति। इदि। इंदिदिषति। अड्ड। अड्डिडिषति। अर्च्च। अर्चिचिषति। स्वरादेः परः सस्वरआदिरित्यस्यापवादः। अद्विरुक्तेत्युक्तत्वात् इयायेत्यादौ नातिप्रसंगः। आद्योच्चारणनकार एव णत्वं तु षूर्णोन इत्यनेन विधीयते तेन नुशब्दस्य द्वित्वं॥

(तत्त्वदीपिका-) स्वरादेरिति। सस्वरआदिरित्यस्यापवादः। अद्विरुक्तइति। तेनइयाजेत्यादौ नातिप्रसंगः।

मू०--ऊर्णोतेरिडादिप्रत्ययोवाङित्॥ ऊर्णुनुविथ, ऊर्णुनविथ। ऊर्णुविता, ऊर्णविता। ऊर्णोतेर्वावृद्धिस्सौपे॥ पक्षे वा गुणः। और्णावीत्। और्णाविष्टाम्। और्णवीत्, और्णुवीत्। और्णुविष्टाम्। और्णविष्ट, और्णुविष्ट॥ इत्यदादयः॥

(सुबोधिनी--) ऊर्णोतेरिडादिप्रत्ययोवाङित्। ङित्वपक्षे तु नुधातोरित्युव्। ऊर्णुनुविथ। पक्षे गुणः। ऊर्णुनविथ। और्णावीत्, और्णवीत् और्णुवीत् इत्यात्पे।

(तत्त्वदीपिका-) कृतायामिहटीकायांलोकेशकरशर्मणा।
गणोदादिरगादेषशेषभाषितदृष्टगः।
इत्यदादयः।

मू०-हु दानादनयोः। ह्वादेर्द्विश्च॥ हुइत्यादेरुत्पन्नस्यापो लुक् धातोश्च द्वित्वम्। जुहोति। जुहुतः।

(सुबोधिनी-) हुदानादनयोः। आदानेचेत्येके। प्रीणनेपीतिभाष्यं। दानं चेह प्रक्षेपः॥ ह्वादेर्द्विश्च। हु आदिर्यस्य स ह्वादिस्तस्य ह्वादेः। अदादेरित्यतो लुगित्यनुवृत्तं सप्तम्या विपरिणम्यते। ह्वादेरिति कर्म्मणिषष्ठी। उच्चारणक्रियायाः कर्म्मत्वात्। तथा च लुकि सति ह्वादिर्द्विर्वारमुच्चारणीय इति फलितम्। द्विःप्रयोगो द्विर्वचनमिति सिद्धांतः॥

(तत्वदीपिका-) हु दानादनयोः दानमिह प्रक्षेपमात्रम्। अग्नौ हविषश्चेति स्वभावाल्लभ्यते। अस्य च नित्यपरस्मैपदित्वात् कुत्रचिद्धोष्यत इत्यादि प्रयोगाः प्रामादिका एव स्मराग्नौ जुह्वाना इत्यत्र न शानः किन्तु आनश प्रत्ययान्तम्। ह्वादेः हु आदिर्यस्य तथा तस्यादौ। वारावििति द्विः योग्यतयेहोच्चारणक्रियालभ्यते। तदावृत्तौ द्विशब्दात्सुः लुगित्यनुवृत्तं सप्तम्या विपरिणम्यते। तस्मिन्सतीत्यर्थः।

मू०—द्वेः ॥ द्विरुक्तात्परस्यान्तोऽत् । जुव्हति । जुहोषि । जुहुथः । जुहुथ । जुहोमि । जुहुवः जुहुमः । जुहुयात् ।

(सुबोधिनी—) द्वेः । द्वेः किं । युवंति । हुन्वोरिति वः । जुह्वति ॥

(तत्त्वदीपिका—) द्वेर्द्विर्वचनमस्यास्तीति विग्रहे मत्वर्थीय इन्प्रत्ययोऽव्ययस्य तद्धितेयस्वरयोष्टिलोपश्चास्मादेव लिंगात् द्विस्तस्मात् । आतोन्त इति द्वयमप्यनुवृत्तम् ।

मू०—जुहोतेर्हेर्द्धिः ॥ जुहुधि । अजुहोत् ।

(सुबोधिनी—) जुहोतेर्हेर्द्धिः । जुहोतेः परस्य हेर्धिः स्यात् । लोडुत्तमे तु परत्वाद्गुणः । जुहवानि ॥

मू०—अनउस् ॥ द्विरुक्तादन उस् । उसि गुणः । अजुहवुः जुहाव ।

(सुबोधिनी—) अनउस् । द्वेरित्यनुवृत्तं । परत्वादुसिचेति गुणः । अजुहवुः ॥

(तत्त्वदी०—) अनउस् । द्वेरित्यनुवृत्तेराह द्विरुक्तादिति ।

मू०—भीन्हीभृहुवामाम्वासचलुग्वत् ॥ जुहवांचकार । ये । हूयात् । होता । होष्यति । अहौषीत् । ञिभी भये । बिभेति ।

(सुबोधिनी—) भीन्हीभृहुवामाम्वासचलुग्वत् । एभ्यश्चतुर्भ्यो वाम् प्रत्ययो भवति लिटि सचाऽऽमलुग्वत् । कार्य्यातिदेशोयं । तेन लुकि सति यत्कार्य्यं द्वित्वादि तदामिपरेपि भवतीत्यर्थः । जुहवांचकार । पक्षे जुहाव । येइति । दीर्घः । हूयात् । होता । होष्यति । अहोष्यत् । धातोर्नामिन इति वृद्धिः । अहौषीत् ॥

मू०—ङितिहसेभीहाकोरिद्वा ॥ बिभीतः, बिभितः । बिभ्यति । बिभीयात्, बिभियात् । बिभेतु । बिभीतात् बिभितात् । अबिभयुः । बिभयांचकार । बिभाय अभैषीत् । न्ही लज्जायाम् । जिन्हेति । अजिन्हयुः । जिन्हयांचकार । जिन्हाय । न्हीयात् । न्हेता । अन्हैषीत् । पॄपालनपूरणयोः ।

(सुबोधिनी—) ङितिहसेभीहाकोरिद्वा । अनयोः स्वरस्य वेकारो भवति ङिति हसे परे ॥

मू०—ऋप्रोरिःपूर्वस्य ॥ ऋप्रोः पूर्वस्यात इत् लुकि । पिपर्ति ।

(सुबोधिनी—) ऋप्रोरिःपूर्वस्य । ऋ गतौ । पॄ पालनादौ । गुणे कृते । पिपर्ति ॥

मू०—पोरुर् ॥ पवर्गात् वकाराच्च ॠत उर् अगुणवृद्धौ प्रत्यये ॥ य्वोर्विहसे । पिपूर्तः । पिपुरति पिपूर्य्यात् पिपूर्ताम् । पिपुरतु । दिस्योर्हसात् अपिपः । पपार । पपरतुः । पपरिथ । पूर्य्यात् । परि-

कृ तपिबासर्वेजनकीन्त्यविक्ते ताकीर्तिनो तज्जा

ता परीता । परिष्यति परीष्यति । अपारीत् । पृपालनपूरणयोः । पिपर्त्ति । पिपूर्तः । पिप्रति । पिपूयात् । पिपर्तु,पिपूर्तात् । पिपूर्ताम् । पिप्रतु । पिपूर्हि, पिपूर्तात् । पिपूर्तम् । पिपूर्त । पिपराणि । पिपराव । पिपराम । अपिपः । अपिपूर्ताम् । पपार । पप्रतुः । पप्रुः । पपर्थ । प्रियात् । पर्ता । परिष्याति । अपरिष्यत् । अपार्षीत् । अपार्ष्टाम् । ओहाक् त्यागे । जहाति ।

(सुबोधिनी-)पोरुर् । पवर्गात् वकाराद्दुत्तरस्य ऋत उर् । यथावुवूर्षति प्वोर्विहसे इति दीर्घः । पिपूर्त्तः । द्वेरित्यंतोऽत्र पिपुरति । दिस्योरिति दिप्सिपोर्लुक् । अपिपः । उसि तु गुणः । अपिपरुः । ऋसंयोगादित्यकित्वाद्गुणः । पपरतुः । वृङ्वृञित्ति वेटोदीर्घः । परिता, परीता ॥

(तत्त्वदीपिका—) पोरुर् । धात्ववयवात्पवर्गादिति बोध्यम् । तेन समीर्णमित्यादौ नानातिप्रसंगः ।

मू०—द्वेस्तौ ॥ द्विरुक्तस्य धातोरातो लोपः ङिति स्वरे । ईकारश्च ङितिहसे । जहीतः जहितः । जहति । जहातेर्यादादावालोपः । जह्यात् ॥

(सुबोधिनी—) द्वेस्तौ । द्वौवाराविति द्विरुच्चारणं । सुप्रत्ययः द्विरकारि इति । ञिर्डित्करणे इति ञिञौ । स्वंतस्य टिलोपः । औणादिके इप्रत्यये ञिलोपः । अत्रानुवृत्त्यैव ईलोपयोर्लाभेपि अनंतरत्वादीकारस्यैव ग्रहणं माभूदित्येतदर्थं तावित्युक्तं । ननु तर्हि द्वेश्चेति पाठ्यं अनंतरत्वादीश्चालोपोनुवर्ततां एवं ङिति हसे लोपः । ङिति स्वरे ईरिति विपर्ययस्यापि संभवात् । तावित्युक्ते तु नातः ईहसे अनयोर्यादृशौ दृष्टौ तावेवाऽत्र स्त इति न दोषः । पक्षे भीहाकोरिति इत्वं । जहितः । हाको यादादावालोपः ॥

(तत्त्वदीपिका—) द्वेस्तौ द्वेरित्यस्य. पूर्ववत्प्रक्रिया । अनुवृत्त्यैव ईलोपयोर्लाभेऽपिअनन्तरत्वादीप्स्यैव ग्रहणं मा भूदित्येतदर्थंतावित्युक्तम् । ओर्वमोरितो लोपः ईहसे इत्यत ईकारस्तस्य हसे इत्यनेन योगाद्धसे ईकारः परिशेषात्स्वरे लोपः

मू०— ईर्वाहौ ॥ जहातेर्हौ परे इकार ईकारश्च वा । जहिहि जहीहि जहाहि । अजहात् । अजहिताम् अजहीताम् । अजहुः । जहौ । दादेरे । हेयात् । अहासीत् । ऋ गतौ । असवर्णे स्वरेइयू । इयर्त्ति । इयृतः । इय्रति । इयृयात् । इयर्तु । ऐयः । ऐयृताम् । ऐयरुः । आर ।

आरतुः । आरुः । अत्यर्तिव्ययतीनामितीट् । आरिथ । आरव । सृ गतौ ससर्ति । ससर्थ । स्रियात् । असरत् । इतिपम् ।

(सुबोधिनी-) ईर्वाहौ । जहातेर्हौ परे इत्वमित्वमात्वं च भवति । अत एव भट्टिः प्रायुंक्त । जहिहि जहीहि जहाहि रामभार्यामिति । दादेरित्येत्वं । हेयात् । यमिरमिनमातामितीट्सकौ । अहासीत् । ऋभोरिति पूर्वस्येत्वं । असवर्णे स्वरे इतीय् । इयर्ति । लङि अडागमोदिस्योरिति दिप्सिपोर्लोपः । ऐयः । उसि तु गुणः । ऐयरुः । अत्यर्तिव्ययतीनामिति थपि नित्यमिट् । आरिथ । आशिषि गुणोर्तीति गुणः अर्यात् । हन्तृत इतीट् । अरिष्यति । सर्त्तिशास्त्यर्त्तिभ्य इति ङः । ऋवर्णदृशोरिति गुणः । आरत् । आरतां । आरन् । इति परस्मैपदम् ।

(तत्त्वदी०-) ईर्वाहौ । ई इरिति छेदः तयोरभावपक्षे आकारः स्थित एव ।

(तत्त्व०-) कृतायामिहटीकायांलोकेशकरशर्मणा ।
अगमह्वादिमध्यस्थपरस्मैपदसाधनम् ।
इतिपम् ।

मू०-ओहाङ्गतौ । भृञ्ञांलुकि ॥ डुभृञ् हाङ् माङां पूर्वस्यात इत् लुकि । जिहीते । जिहाते जिहते । जहे । अहास्त । माङ्माने । मिमीते । ममे । अमास्त । इत्यात् ।

(सुबोधिनी-)भृञ्ञांलुकि । बहुवचनेन डुभृञ् हाङ् माङामिति त्रयाणां ग्रहणं । द्वेरित्यतोत् । जिहते । आतोनपीत्यालोपः । जहे । जहाते । इत्यात्मनेपदं ।

(तत्त्व०-) कृतायामिहटीकायांलोकेशकरशर्मणा ।
अगमद्ह्वादिमध्यस्थमात्मनेपदसाधनम् । इत्यात् ।

मू०-डुभृञ् धारणपोषणयोः । बिभर्ति । बिभृतः । बिभ्रति । बिभृयात् । बिभर्तु । अबिभः । बिभरांचकार । बभर्थ । बभृव । बभृम । बभ्रे बभृढ्वे । भृषीष्ट । अभार्षीत् । अभृत । डुदाञ्दाने । ददाति ।

(सु०-) डुभृञ् धारणपोषणयोः । ड्वितस्त्रिमक् इति त्रिमक् । भृत्रिमं । भृञ्ञांलुकि इति पूर्वस्येत्वं बिभर्त्ति । बिभृते । बिभृयात् । बिभ्रीत । बिभर्तु । भिभृतां । दिस्योरिति दिप्सिपोर्लोपः । अबिभः । उसि तु गुणः । अबिभरुः अबिभृत । भीन्हीभृहुवामिति वाम् । बिभरांचकार । बिभरांचक्रे । पक्षे बभार । बभ्रे । यादादापे इति रिङ् । भ्रियात् । उरिति न गुणः । भृषीष्ट । भर्त्ता । हन्तृत इतीट् । भरिष्यते । अभरिष्यत् । अभरिष्यत । धातोर्नामिन इति वृद्धिः । अभार्षीत् । लोपोन्ह्रस्वादिति सिलोपः अभृत ॥

(तत्त्वदीपिका-) भृञ्ञामिति । कपिञ्जलाधिकरणन्यायेन धातुत्रयमेव लंभ्यतइत्याह डुभृञ् हाङ्माङामिति । डुभृञ् । ड्वितस्त्रिमगर्थोडुः ।

मू०—दादेः ॥ द्विरुक्तानामपिद्दाधमातोलोपोङिति। दत्तः। ददति। दत्ते। ददातु।

(सुबोधिनी–) दादेः द्वेरित्यनुवृत्तं। द्वेस्त इत्यस्यापवादो येननाप्राप्तिन्यायात्॥

(तत्त्वदीपिका–) दादेरिति। द्वेस्तावित्यस्यापवादो येननाप्राप्तिन्यायात्।

मू०—दांहौ ॥ अपिद्दाधामेत्वं पूर्वस्य च लोपो हौ। देहि। अददात्। ददौ। ददिथ। ददाथ। देयात्। अदात्। अदित। अदिषाताम्। डुधाञ् धारणपोषणयोः। दधाति।

(सुबोधिनी–) दांहौ। बहुवचनेन धाञो ग्रहणं। लिटि आतोणबित्यौकारः। ददौ। आतोनपीत्यालोपः। ददे। दादेरित्येत्वं। देयात्। दादेःपे इति सेर्लुक्। अदात्। आति तु अपिद्दाधास्थामितीत्वं स्योर्लोपोऽह्रस्वादिति सिलोपः। अदित। डुधाञ् धारणपोषणयोः। दानेपीत्येके॥

(तत्त्व०–) दामिति। बहुवचनेन दारूपाणां ग्रहणं धाग्रहणं च।

मू०-पूर्वस्याङितिझसेधः॥ धाञ्पूर्वस्य दकारस्य धो भवति ङिति झसे परे। धत्तः। दधति। धत्ते। धेहि। अधात्। धेयात्। अधित। अधिषाताम्। णिजिर् शौचपोषणयोः।

(सुबोधिनी–) पूर्वस्याङितिझसेधः। धाञ्धातोरेवेत्यर्थः। झसे किम्। दधति दधाति। दादेरित्यालोपे तथोर्ध इति धत्वं न। दधातेर्नत्युक्तत्वात्। धत्तः। धत्ते दादेरित्यालोपः। दध्यात्। दधीत। दधातु। धत्तां। अदधात्। अधत्त। दधौ। दधे। धेयात्। धासीष्ट। धाता। धास्यति। धास्यते। अधास्यत्। अधास्यत। दादेःपे इति सिलोपे। अधात्। अपिद्दाधास्थामितीत्वं। अधित॥

(तत्वदीपिका–) धत्त इति। तथोर्द्धइत्यत्र वावसान इत्यतो वानुवृत्तेर्व्यवस्थया तथात्वभावः।

मू०—निजांगुणः॥ णिजिविजिविषां पूर्वस्य गुणो लुकि। नेनेक्ति। नेनिक्तः। नेनिजति। नेनेक्षि नेनिक्ते। नेनिज्यात्। नेनेक्तु। नेनिग्धि।

(सुबोधिनी–) निजांगुणः। बहुवचनमाद्यर्थं। बहुवचनेन त्रयाणां ग्रहणं। णिजिर् शौचपोषणयोः। विजिर् पृथक्भावे। विष्लृ व्याप्तौ। एषां पूर्वस्य गुणो लुकि॥

मू०—द्वेःस्वरेपिनोपधागुणः॥ द्विरुक्तस्य धातोः पितिविषयेस्वरे परे उपधाया गुणो न। नेनिजानि। अनेनेक्, अनेनेग्। निनिजिषे। निनेज। निनिजे। निक्षीष्ट। अनिजत् अनैक्षीत्।

अनैक्ताम् । अनिक्त । विजिर् पृथक्भावे । वेवेक्ति । विवेजिथ। विक्षीष्ट। अविजत्। अवैक्षीत्। अविक्त। विष्लृव्याप्तौ। वेवेष्टि। विविषिध्वे। विक्षीष्ट। अविषत्। तनिहशषान्तात्सक्। अविक्षत्। अविक्षाताम्। अविक्षन्त। इत्युभयपदप्रक्रिया। ॥ इतिह्वादयः ॥

(सुबोधिनी-)द्वेःस्वरेपिनोपधायागुणः। द्विरुक्तस्य धातोरुपधाया गुणो न चतुर्षु पिति स्वरे। द्विरुक्तस्य किं। द्वेषाणि। स्वरे किं। वेवेष्टि। चतुर्षु किम्। निनेज। नेनेक्ति। नेनिक्ते। नेनिज्यात्। नेनिजीत्। नेनेक्त। नेनिक्तां। दिस्योरिवि दिप्सिपोर्लोपः। अनेनेक्। अनङसि अनेनिजुः। अनेनिक्त। निनेज। निनिजे। निज्यात्। सिस्योरिति न गुणः। निक्षीष्ट। नेक्ता। नेक्ष्यति। नेक्ष्यते। अनेक्ष्यत् अनेक्ष्यत। इरितोवेति वा ङः। अनिजत्। अनिटोनामिति वृद्धिः। अनैक्षीत्। आति तु। झसादिति सिलोपः। अनिक्त। अनिक्षातां। विजिर् पृथक्भावे। विवेजिथ। अत्र विजेरिडादिप्रत्यय इति ङित्वं न। ओविजीभयचलनयोरित्यस्यैव तत्र ग्रहणात्। णिजिविजीरुधादावपि। विष्लृव्याप्तौ। व्याप्तिः कात्स्न्यं। ऌित्पुषादेरिति ङः। अविषत्। अति तु। हसषांतादिति सक् षढोरिति कः। अविक्षत। आतिसकोलोप इति स्वरे अल्लोपः। अविक्षातां। अविक्षंत। इत्यात्वे। ॥ इतिजुहोत्यादयः ॥ ३ ॥

(तत्त्वदीपिका-) कृतायामिहटीकायांलोकेशकरशर्मणा।
संक्षिप्तो बालबोधार्थं जुहोत्यादिगणोऽगमत्। इतिजुहोत्यादिः।

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु मू०--दिवादेर्यः॥ कर्त्तरिचतुर्षु। अपोऽपवादः। र्वोर्विहसे।दीव्यति। दीव्येत्। दिदेव दीव्यात्। अदेवीत्। षिवु तन्तुसन्ताने। सीव्यति सिवादेरड्व्यवाये वा षः। न्यषेवीत्। न्यसेवीत्। स्रिवु गतिशोषणयोः। स्रीव्यति। सिस्रेव। ष्ठिवु निरसने। ष्ठीव्यति। ष्णुसु अदनादानदर्शनेषु। सुष्णोस। ष्णसु निरसने। ष्णस्यति। क्नसु कौटिल्ये दीप्तौ च। चक्नसिथ। अक्नासीत्। अक्नसीत्। व्युषु प्लुषु दाहे। वुव्योष। नृती गात्रप्रक्षेपे। नृत्यति ननर्त।

(सुबोधिनी-) दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु। उदित्करणं क्त्वाप्रत्यये इड्विकल्पार्थं क्तक्तवत्वोरनिडर्थं च। क्ङिति झसे क्वौ भ्रमे चेत्यूः। द्यूत्वा। देवित्वा। द्यूतेन दीव्यंति माणवकाः। क्रीडंतीत्यर्थः। शत्रुं दीव्यति। विजिगीषतीत्यर्थः। कांतिरिच्छा। द्युतेः पृथग्ग्रहणात्॥ दिवादेर्यः। दिव

आदिर्यस्य स दिवादिस्तस्माद्यप्रत्ययः स्यात् कर्त्रर्थेषु चतुर्षु परतः। य्वोरिति दीर्घः। दीव्यति। षिवु तंतुसंताने। आदेःष्णः स्नः इति सः। सीव्यति। सिवादेरड्व्यवायेवाषः। उपसर्गस्थान्निमित्तात्परस्य सिवादेः सस्याड्व्यवधाने वा षः स्यात्॥ मादेश्चेत्यत्र सिवादिरुक्तः। नृती गात्रविक्षेपे। नर्तने इत्यर्थः। इदित्करणमादीदित इत्यनेन क्तक्तवत्वोरिण्निषेधार्थम्। यद्यपि नृतवृदेतीटो विकल्पितत्वात् क्वचिद्वेट् इत्यनेनैवेष्टं सिद्ध्यति तथापि क्वचिद्वेट् इति सूत्रस्यानित्यत्वज्ञापनार्थमिदित्करणम्। तेन धावुगतिशुद्ध्योरित्यस्मात् क्तप्रत्यये इटि च धावितमिभराजधियेत्यादि सिद्धं॥

(तत्त्वदीपिका-) दिवु। व्यवहारः क्रयादिः। उकारः क्त्वाप्रत्यये इड्विकल्पार्थः। दिवादेर्यः दिवआदिर्यस्य तथा तस्मात्। अपोपवाद इति। अपो गणविशेषाकांक्षाभावात्प्राप्तेः। दीव्यतीति। यत्प्रत्ययस्य ङित्त्वाद्गुणो न।

मू०—नृततृदछृदचृतकृद्भ्योऽसेस्सादेरिड्वा॥ नर्तिष्यति। नर्त्स्यति। अनर्तीत्। त्रसी उद्वेगे। भ्राशभ्लाशेति वा यः। त्रस्यति। त्रसति तत्रास। तत्रसतुः। कुथ पूतीभावे। कुथ्यति चुकोथ। चुकोथिथ। पुथ हिंसायाम् पुथ्यति अपोथीत्। गुध परिवेष्टने। गुध्यति। अगोधीत्। क्षिप प्रेरणे। क्षिप्यति क्षेप्ता। अक्षैप्सीत्। पुष्प विकसने। पुष्प्यति। पुपुष्प। तिम तीम ष्टिम ष्टीम आर्द्रीभावे। तिम्यति। तीम्यति। तितिम। तिष्टीम। व्रीड लज्जायाम्। व्रीड्यति। विव्रीड। इष गतौ। इष्यति इयेष। ईषतुः। एषिता,एष्टा। ऐषीत्। षह षुह तृप्तौ। सह्यति। ससाह। सेहतुः। सेहुः। असहीत्।सुह्यति। जॄष् झॄष् वयोहानौ जीर्यति। जजरतुः। जेरतुः। जीर्यात्। जरिता, जरीता। ऋवर्णदृशोरित्यनेन गुणः। अजरत् अजारीत्। झीर्यति। जझरतुः। अझारीत्। शो तनूकरणे।

(सुबोधिनी-) नृततृदछृदचृदकृद्भ्योऽसेसादेरिड्वा। एभ्यः परस्य सिभिन्नस्य सादेः प्रत्ययस्येड्वा स्यात्। उतृदिर् हिंसानादरयोः। उछृदिर् दीप्तिदेवनयोः। कृती छेदने। असेरित्युक्तत्वादिह नित्यमिट्। अनर्तीत्। सन्प्रत्यये निनर्तिषति। निनृत्सति। भ्राशभ्लाशेति वा यः। त्रस्यति,त्रसति। फणराजृइत्येत्वपूर्वलोपौ त्रेसतुः। अतोहलादेरिति वा वृद्धिः। अत्रासीत्,अत्रसीत्। कुथ पूतीभावे। पूतीभावः पवित्रभवनं। कुथ्यति भूमिः। पवित्रीभवतीत्यर्थः। पुष्प विकसने। पांतोयं। शतृप्रत्यये पुष्पत्। पचाद्यच्प्रत्यये पुष्पं। संज्ञायां कप्रत्यये पुष्पकं। व्रीड चोदने लज्जायां च नो-

दनं प्रेरणं। गुरोर्हसादित्यङ्प्रत्यये आवत इत्याप् व्रीडा। घञि तु व्रीडः। अत ए-
व "व्रीडादिवाभ्यासगतैर्विलिल्ये" इति माघः। "व्रीडमावहति मे ससंप्रतीति"का-
लिदासः। षह षुह तृप्तौ। तृप्तिस्तर्प्पणम्। इषुसहेतीड्विकल्पस्त्वस्य न भवति सहे-
त्यपानिर्देशात्। नपुंसक भावे क्तप्रत्यये सुहितं तृप्तिः। जॄषिर् वयोहानौ। षित्वात्
षिद्भिदामित्यङ्प्रत्यये जरा। ऋतइर् इतीर्। य्वोरिति दीर्घः। जीर्यति। ऋसंयो-
गाणादिरित्यकित्वाद्गुणे कृते शशददेति गुणशब्देन भावितस्य निषेधाल्लोपः। पचा-
मित्यस्याऽप्रवृत्तौ फणराजॄ इत्येत्व पूर्वलोपविकल्पः।जेरतुः,जजरतुः। वृङ्वॄञ्ऋदंता-
नामिति वा दीर्घः। जरिता,जरीता। इरितोवेति वाङः ऋवर्णदृशोरिति गुणः अ-
जरत्। पक्षे णित्वे इति णित्वाद्धातोर्नामिन इति वृद्धिः। अजारीत्॥

(तत्त्वदीपिका-) नृत। उत्तृदिर् हिंसानादरयोः। उच्छृदिर् दीप्तिदेवनयोः। त्रस्य-
ति। भ्राशेति वा यः पक्षेऽय् पुष्पविकसने। पान्तः। तया नभः पुष्प्यतु कोरकणेति श्रीहर्षः॥
व्रीडा। व्रीडादिवाभ्यासगतैर्विलिल्ये इत्यत्र घञ्। मंदाक्षं ह्रीस्त्रपा व्रीडेत्यत्र गुरोश्चेत्यः
षह अत्रेपसेहतीड्विकल्पः कस्यचिन्मते न भवति। अबन्तनिर्देशाद्भौवादिकस्यैव तत्र ग्रहणा
त् महान्तस्तु। विकल्पं मन्यंते। अकारस्योच्चारणार्थत्वात्। जॄष्। षकारोजरेत्यत्राङर्थः।
अजरत्। ऋवर्णदृशोरिति गुणः।

सू०-घ्योः॥ यप्रत्यये परे धातोरोतो लोपः। श्यति। शशौ। शा-
ता।अशात्।अशासीत्। छो छेदने। छ्यति। अच्छात्। अच्छासी-
त्। षो अन्तकर्म्मणि। स्यति सेयात्। असात्। असासीत्। दोअ-
वखंडने। द्यति देयात् अदात्। राध साध संसिद्धौ।

(सुबोधिनी-) य्योः। यि ओरिति च्छेदः। धातोरोतो लोपः स्यात् दिवा-
दिविकरणे ये परे। तेन लव्यमित्यादौ न। शाछेति वा सेर्लुक्। अशात्। लुगभावे
यमिरमोतीट्सकौ। अशासीत्। षोंतकर्म्मणि। अंतकर्म नाशः। दादेरे इत्येत्वं। से-
यात्। राघव स्य शरैर्घोरैर्घोरं रावणमाहवे इत्यत्र राघवेति संबोधनं स्येति लोटो म-
ध्यमस्यैकवचनांतम् दादेरित्येत्वम्। देयात् उपसर्गस्थान्निमित्तान्नेरिति णत्वम्। प्र-
णिदाता। दादेः पे इति सिलुक्। अदात्॥

(तत्त्वदीपिका-) य्योः। यि ओरिति छेदः। विकरणप्रकरणत्वाद्दिवादेर्य इतिविहि-
त एव गृह्यते। नत्वन्यः। तेन लव्यमित्यादौ नातिप्रसंगः। षो। अन्तकर्म नाशः।

सू०-राधोऽकर्म्मकादेवयः॥ राध्यति। रराधिथ। राद्धा। रा-
त्स्यति। अरात्सीत्। व्यध ताडने। ग्रहांङ्क्तिच। विध्यति। वि
व्याध। विविधतुः। विव्यधिथ। विव्यद्ध। व्यद्धा। अव्यात्सीत्
पुष पुष्टौ। पुष्यति। पुपोषिथ। पोष्टा। पोक्ष्यति। पुषादित्वात्

ङः। अपुषत्। शुष शोषणे। शोष्टा। शोक्ष्यति। अशुषत्। तुष तुष्टौ। तोष्टा। तोक्ष्यति अतुषत्। दुष वैकृत्ये। दोष्टा। अदुषत्। श्लिष् आलिंगने। श्लेष्टा।

(सुबोधिनी-) राधोऽकर्म्मकादेवयः। अकर्म्मकाद्राधेर्यप्रत्ययः स्यात् सकर्म्मकात्तु न। यन्मह्यमपराध्यति। द्रुह्यतीत्यर्थः। विराध्यतं क्षमेत कः। द्रुह्यंतमित्यर्थः राध्यत्योदनः। सिध्यतीत्यर्थः। अकर्म्मकात् किं शत्रुमपराध्नोति। हिनस्तीत्यर्थः। राध संसिद्धौ हिंसायां च। स्वादिश्नुरादिश्यायम्। राधोहिंसायामित्यनेनैत्वपूर्वलोपाविह न। हिंसार्थकस्य सकर्म्मकतया दैवादिकत्वाऽयोगात्। ग्रहामिति संप्रसारणं। विध्यति लित्पुषादेरिति ङः। अपुषत्। षढोरिति कत्वं षत्वं च। शोक्ष्यति॥

मू०-आलिङ्गनेश्लिषेस्सक्॥ ङोऽपवादः। अश्लिक्षत्कन्यांचैत्रः। अनालिंगने तु। समश्लिषज्जतुकाष्ठम्। ष्विदा गात्रप्रक्षरणे। स्वेत्ता। अस्विदत्। क्रुध क्रोधे। क्रोद्धा। अक्रुधत्। क्षुध बुभुक्षायाम्। क्षोद्धा। अक्षुधत्। शुध शौचे। शोद्धा। अशुधत्। सिधु संराद्धौ। सेद्धा। असिधत्। रध हिंसायांच। रध्यति। ररन्ध। ररन्धतुः। ररन्धिथ, ररद्ध। ररन्धिव, रेध्व। ररन्धिम रेध्म।

(सुबोधिनी-)आलिंगनेश्लिषेस्सक्। अनिटः श्लिषेः सक् प्रत्ययः स्यात् आलिंगनेर्थे। नान्यत्र। प्राणिकर्तृकमुपगूहनमालिंगनम्। लित्पुषादेरित्यस्यापवादः। अनिटः किम्। श्लिष दाहे इति सेटो भौवादिकस्य मा भूत्। अश्लेषीत्। हसपांतादिति सकिसिद्धे पुनः सको विधानं नियमार्थम्। तेन कर्म्मणि आतां प्रभृतिषु परतोऽनालिंगने सेरेव न तु सक्। यथा इणतनीतीण्। अश्लेषि। अश्लिक्षातां। अश्लिक्षत। अश्लिष्ठाः। अश्लिक्षाथाम्। अश्लिड्ढ्वम्। अश्लिक्षि। अश्लिक्ष्वहि अश्लिक्ष्महि। ञिष्विदा गात्रप्रक्षरणे। गात्रप्रक्षरणं घर्मस्रुतिः। ञीदिति न्यासकारः। नेति हरदत्तः। ञीतांतक्तवर्तमानेपीति तक्। आदीदित इति नेट्। स्विन्नः। भावे कर्तरि चादित इतीट् वा। स्विन्नम्। स्वेदितं। क्षुध बुभुक्षायाम्। भोक्तुमिच्छा बुभुक्षा अनिडयं। कथं तर्हि क्षुधित इति। क्विबंतादितोजातार्थे इतीत् प्रत्यय इति माधवः वस्तुतस्तु वसिक्षुध्योरिडिति वक्ष्यते। षिधु संराद्धौ। संराद्धिर्निष्पत्तिः। उदितः क्त्वावेति क्त्वाप्रत्यये इड्विकल्पः। सिद्ध्वा। इट्पक्षे इवर्णोवर्णोपधाद्धसादेरिति वा कित्वं। सेधित्वा। सिधित्वा। रधिजभोः स्वरे इति नुम्। ररंध। नुमि कृते संयोगात् परत्वेनाकित्वात् नलोपो न। ररन्धतुः। स्वरतिसूतीति सूत्रे रधाद्यष्टकोऽवांतरगणो ज्ञेयस्तेन गणनिर्दिष्टत्वाद्यङ्लुकि न वेट्। राराधिता। स्वरतीति वेट्। ररंधिथ। ररद्ध। लोपः पचामित्येत्वपूर्वलोपौ रेध्व। इट्पक्षे ररंधिव॥

(तत्त्वदीपिका-) अनालिंगनेत्विति । आलिंगनं प्राणिकर्तृकमुपगूहनं । पिधु । उदितो वेति वेङ्क्त्वार्थ उः । संराद्धिः निष्पत्तिः । रधहिंसायां चेति । चात्संराद्धावित्यर्थः रंधिवेति नित्यत्वान्नुमि संयोगात् । कित्वाभावे न लोपो न ।

मू०-लिड्वर्जितेइटिरधेर्नुम् ॥ रधिता रद्धा । रधिष्यति रत्स्यति । अरधत् । णशू अदर्शने । नश्यति । ननाश । नेशतुः । नेशिथ ।

(सुबोधिनी-) लिड्वर्ज्जितेइटिरधेर्नुम् । रधेर्नुम् न स्यात् इटि परे । लिट्संबंधिनीटि तु नुम् स्यादेव । इटि किं । रंधकः । लित्पुषादेरिति ङः । नुम् नोलोप इति नस्य लोपः । अरधत् ॥

(तत्त्वदीपिका-) णश अदर्शने ।

मू०-मस्जिनशोर्झसेनुम् ॥ ननंष्ठ । नेशिव । नेश्व । नेशिम । नेश्म । नशिता । नंष्टा । नशिष्यति । नङ्क्ष्यति । अनशत् । तृपू प्रीणने । तृप्यति । ततर्पिथ । तत्रप्थ । ततर्प्थ । तर्पिता । त्रप्ता । तर्प्ता । तर्पिष्यति । त्रप्स्यति । तर्प्स्यति । अतृपत् । अतर्पीत् अत्राप्सीत् । अतार्प्सीत् । दृप् हर्षगर्वयोः । दृप्यति । अद्राप्सीत् । अदृपत् । द्रुह जिघांसायाम् । दुद्रोहिथ । दुद्रोढ । दुद्रोग्ध । दुद्रुहिव । दुद्रुह्व । दुद्रुहिम । दुद्रुह्म । दुद्रोहिथ । द्रोग्धा । द्रोढा । द्रोहिष्यति । ध्रोक्ष्यति । अद्रुहत् । मुह वैचित्ये । मुह्यति । मुमोहिथ । मुमोढ । मुमोग्ध । ष्णुह उद्गिरणे । स्नुह्यति । सुष्णोहिथ । सुष्णोढ । सुष्णोग्ध । ष्णिह प्रीतौ । सिष्णेग्ध । शमु । उपशमे । शान्तिः

(सुबोधिनी-)मस्जिनशोर्झसेनुम् । अनयोर्नुम् स्यात् झसे परे । टुमस्जो शुद्धौ । णश् अदर्शने छशषेति पत्वं ष्टुत्वं ननंष्ठ । नंशोरिति कत्वमिह न शक्यं पदांत एव तद्विधानात् । अन्यथा नष्टं नष्टिरित्यादि न सिध्यति । तृप् प्रीणने प्रीणनं तृप्तिस्तर्पणं च । नाग्निस्तृप्यतिकाष्ठानां । करणस्य संबंधविवक्षायां षष्ठी । पितॄन् अतार्प्सीत् इत्युभयत्र दर्शनात् । स्वरतीति वेट् । ततर्पिथ । कृपादीनामिति वा रः तत्रर्प्थ तत्रप्थ,कृपस्पृशमृशतृपदृपामिति वासिःअतर्पीत् । इडभावे अनिटोनामिवत इति वृद्धिः । अतार्प्सीत् । रत्वे अतउपधाया इति पुनर्वृद्धिः । अत्राप्सीत्, अतृपत् दृप हर्षमोहनयोः । मोहनं गर्वः । मुह वैचित्ये । वैचित्यमविवेकः । दुहादेरिति घत्वढत्वे । तथोर्द्धेरीति थस्य धत्वं । झबे इति गः । मुमोग्ध । ष्टुत्वे ढिढ इति ढलोपः । मुमोढ, मुमोहिथ । ह्रादि घत्वढत्वयोस्तुल्यंरूपं खसे इति षढोरिति च

क्त्वविधानात् । मोक्ष्यते । शमु उपशमे । उदित्वात् क्त्वाप्रत्यये वेट् । शमित्वा शांत्वा । क्वचिद्वेट् इति क्तक्तवत्वोरनिट् । शांतः ॥

(तत्त्वदीपिका—) नंष्टेति । अत्र नशेः कोवेति पक्षे ककारोस्त्विति न भ्रमितव्यम् । सस्य पदान्त एव विधानात् । स्याद्यधिकाराच्च ।

मू०—शमांदीर्घः ॥ शमादीनांदीर्घः कर्तरि ये । शाम्यति । शमिता । अशमत् । तमु कांक्षायाम् । ताम्यति । तताम । तेमतु । अतमत् । दमु शमनायाम् । दाम्यति । देमतुः । अदमत् । श्रमु तपसि खेदे च । श्राम्यति शश्राम । शश्रमतुः । अश्रमत् । भ्रमु अनवस्थाने । भ्राम्यति भ्रमति । बभ्राम । भ्रेमतुः । बभ्रमतुः । अभ्रमत् । क्षमू सहने । क्षाम्यति । चक्षमिथ, चक्षन्थ । अक्षमत् । क्लमु ग्लानौ । भ्राशृ भ्लाशेति यो वा । क्लाम्यति । ष्ठिवु क्लम्वाचमांदीर्घोऽपि । क्लामति । मदी हर्षे । माद्यति । मेदिथ । अमदत् । शमादयोऽष्टौ । असु क्षेपणे । अस्यति । अस्येत् । आस । आसतुः । आसिथ ।

(सुबोधिनी-)शमांदीर्घः । शमादीनामष्टानां दीर्घः स्यात् ये परे । लोपःपचामित्येत्वपूर्वलोपौ । शेमतुः । दमु शमनायामकर्मकः । भ्राशृभ्लाशिति यो वा भ्राम्यति, भ्रमति । फण्राजृ इत्येत्वपूर्वलोपौवा । भ्रेमतुः । क्षमू सहने । नायं षित् । भ्वादिस्तु षित् । अषितः क्षाम्यतेः क्षांतिः क्षमूषः क्षमतेः क्षमा । ऊदित इति वेट् । चक्षमिथ, चक्षंथ । मोनोधातोरिति मस्य नत्वणत्वे । चक्षण्व । क्लमु ग्लानौ । अपीवयप्रत्ययेपि ष्ठिवुक्लम्वाचमामित्येव दीर्घे सिद्धे शमादिपाठः शमादिभ्य इति घिनुणर्थः ॥

मू०— अस्यतेस्थुक्ङे ॥ आस्थत् । यसु प्रयत्ने ।

(सुबोधिनी—) अस्यतेस्थुक्ङे । असेःथुगागमाः स्यात् ङे परे असेः पुषादित्वात् ङप्रत्यये सिद्धे अस्यतिवक्तीति वचनमात्मनेपदार्थं । उपसर्गादस्यत्यूहोरित्यात्मनेपदं वक्ष्यते । पर्यास्थत ॥

मू०— अनुपसर्गाद्यसस्सम्पूर्वाच्चयोवा ॥ यस्यति यसति । संयस्यति संयसति । ययास । येसिथ । अयसत् । उपसर्गे तु प्रयस्यति । जसु मोक्षणे । जस्यति । जजास । जेसिथ । अजसत् । तसु दसु उपक्षये । तस्यति । दस्यति । ददास । देसिथ । अदसत् । वसुस्तम्भे । वस्यति ववास । ववसतुः । अव

सत्। बिस् प्रेरणे। बिस्यति। बिवेस। अविसत्। कुश संश्लेषणे। कुश्यति। चुकोश। कोशिता। अकुशत्। बुस उत्सर्गे। बुस्यति। बुबोस। बोसिता। अबुसत्। मुस खण्डने। मुस्यति। मोसिता। अमुसत्। मसी समी परिणामे। मस्यति। मेसिथ। अमसत्। लुठ। विलोडने। लुठ्यति। लोठिता। अलुठत्। उच समवाये। उच्यति। उवोच। ऊचतुः। औचत्। भृशु भ्रंशु अधःपतने। भृश्यति। बभर्शिथ। अभृशत्। भ्रश्यति। बभ्रंश। अभ्रशत्। वृश वरणे। वृश्यति। ववर्शिथ। अवृशत्। कृश् तनूकरणे। कृश्यति। चकर्शिथ। अकृशत्। ञितृष् पिपासायाम्। तृष्यति। ततर्षिथ। अतृषत्। हृष् तुष्टौ। हृष्यति। जहर्षिथ। अहृषत्। रुष् रिष् हिंसायाम्। रुष्यति। रोषिता। रोष्टा। अरुषत्। रिष्यति। रेषिता। रेष्टा। अरिषत्। डिप क्षेपे। डिप्यति। अडिपत्। कुप् क्रोधे। कुप्यति। अकुपत्। गुप् व्याकुलत्वे। गुप्यति। अगुपत्। युप् रुप् लुप् विमोहने। युप्यति। युयोपिथ। अयुपत्। रुप्यति। रुरोपिथ। अरुपत्। लुप्यति। लुलोपिथ अलुपत्। लुभ आकांक्षायाम्। लुभ्यति। लुलोभ। लोभिता। लोब्धा। अलुभत्। क्षुभ् संचलने। क्षुभ्यति। चुक्षोभ। अक्षुभत्। क्लिदू आर्द्रीभावे। क्लिद्यति। चिक्लेद। क्लेत्ता। अक्लिदत्। ञिमिदा स्नेहने।

(सुबोधिनी-)अनुपसर्गाद्यसः संपूर्वाच्चयोवा। अनुपसर्गात् संपूर्वाच्च यसेर्यप्रत्ययो वा स्यात्। वादित्वान्नेत्वपूर्वलोपौ। ववसतुः। वुस उत्सर्गे। उत्सर्गस्त्यागः मसी समी परिणामे। परिणामो विकारः। इषुसहेति वेट्। रोषिता। रोष्टा लुप्यतिः सेट्कः। अनिट्कारिकासु लिपि साहचर्य्यात् तौदादिकस्यैव ग्रहणात् इषुसहेतिवेट्। लोभिता। लोब्धा॥

मू०- मिदेर्गुणोये॥ मेद्यति। मिमेद। मिद्यात्। अमिदत्। ञिक्ष्विदा स्नेहनमोचनयोः। क्ष्वेदिता। अक्ष्विदत्। ऋधु। वृद्धौ। ऋध्यति। आर्ध्यत्। आनर्द्ध। ऋध्यात्। आर्द्धत्। गृधु अभि

कांक्षायाम् । गृध्यति । जगर्द्धिथ । अगृधत् । इतिपुषादयः । इतिपरस्मैपदम् ।

(सुबोधिनी-)मिदेर्गुणोये । मिदेर्गुणः स्यात् दिवादिविकरणे ये परे नुगशामिति नुक्। आनर्द्ध इति परस्मैपदम् ।

(तत्त्व०-) कृतायामिहटीकायांलोकेशकरशर्मणा ।
अगात् दिवादिमध्यस्थंपरस्मैपदसाधनम् ॥

मू०-- षूङ् प्राणिप्रसवे । सूयते । सुषुवे । सुषुविषे । सविता । असविष्ट । दूङ् परितापे । दूयते । दुदुविढ्वे । दुदुविध्वे । अदविष्ट । दीङ् क्षये । दीयते ।

(सुबोधिनी-) षूङ्प्राणिप्रसवे । प्रसव उत्पत्तिः । मृत्पिंडो घटं सूयते इत्यादि प्रयोगाभावात् प्राणीत्युक्तं । स्वादय ओदितः । वक्ष्यमाणत्वात्ल्वाद्योदितश्चेति नत्वं । प्रसूनं । नानप्योरित्युव् सुषुवे । स्वरतिसूतीतिविकल्पं बाधित्वा कितइतीण्निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । सुषुविषे ॥

(तत्त्व०-)सवितेति । स्वरति सूतीति वेट् । ओदित इतिफलं तुक्तक्तवतोस्तस्यनत्वम्-

मू०-दीङोयुट्क्ङितः ॥ स्वरस्य । दिदीये ।

(सुबोधिनी-) दीङो युट्क्ङितः । स्वरस्य दीङः परस्य स्वरादेः क्ङितः प्रत्यस्य युट् स्यात् । स्वरादेः किं । देदीयते । क्ङितः किं । उपादानं ॥

मू०-मीनातिमिनोतिदीङांगुणवृद्धिविषयेक्यपिचात्वम् ॥ दासीष्ट । दाता । दास्यते । अदास्त । डीङ् विहायसागतौ । डीयते । डयिष्यते । अडयिष्ट । धीङ् धारणे । धीयते । दिध्यिढ्वे । दिध्यिध्वे । अधेष्ट । मीङ् प्राणवियोगे । मीयते । मेता । रीङ् स्रवणे । रीयते । रिर्ये । अरेष्ट । लीङ् श्लेषणे । लीयते । लिल्ये ।

(सुबोधिनी-) मीनातिमिनोतिदीङांगुणवृद्धिविषये क्यपि चात्वम् । एषामात्वं स्यात् गुणवृद्धिविधायके प्रत्यये क्यपि च । मीञ् हिंसायाम् । डुमिञ् प्रक्षेपणे।दीङ् क्षये । घञि उपादायः । तव्य प्रत्यये प्रमातव्यम्। लुङिअदास्तेत्यत्रापिद्दाघास्थामितीत्वं न । दीङोऽनुकरणे दारूपासंभवात् । डीङ् विहायसागतौ । आकाशेनगमने । डीनः । डीनवान् । डीङः स्वादिषु पाठसामर्थ्यात् क्तक्तवत्वोरितिइट् । इति सति व्यवधानात् ल्वाद्योदितश्चेति नत्वं न स्यादित्यर्थः। मीङ् प्राणवियोगे । मीयते । प्राणैर्वियुज्यते इत्यर्थः ॥

मू०--लीलीङोरात्वंवागुणवृद्धिविषयेक्यपिच॥ लाता। लेता। अलास्त। अलेष्ट। व्रीङ् वरणे। व्रीयते। विव्रिये। व्रेष्यते। अव्रेष्ट। स्वादयओदितः। पीङ् पाने। पीयते। अपेष्ट। माङ् माने। मायते। ममे। अमास्त। अमासाताम्। ईङ् गतौ। ईयते। अयाञ्चक्रे। प्रीङ् प्रीतौ। प्रीयते। पिप्रिये अप्रेष्ट। जनी प्रादुर्भावे।

(सुबो०-) लीलीङोरात्वंवागुणवृद्धिविषये क्यपि च। अनयो रात्वं वा स्यात् गुणवृद्धिविधायके प्रत्यये क्यपि च परे। ली श्लेषणे क्र्यादिः। लीङ् श्लेषणे। दिवादिः। क्यपि विलाय विलीय। व्रीङ् वरणे। वरणमंगीकारः। व्रीवरणे क्र्यादिः। स्वादय ओदित इति। तत्फलंतु क्तक्तवत्वोस्तस्य नत्वं ल्वाद्योदित इत्यनेन वक्ष्यते। प्रीङ् प्रीतौ। सकर्मकः॥

मू०— ज्ञाजनोर्जा॥ कर्तरि चतुर्षु। जायते। गमां स्वरे। जज्ञे। जनिता। दीपजनेति इण्। जनिवध्योर्नवृद्धिः। अजनि अजनिष्ट। तुरीगतित्वरणहिंसनयोः। तूर्यते। तुतूरिषे। दीपी दीप्तौ। दीप्यते। अदीपि अदीपिष्ट। पूरी आप्यायने अपूरि अपूरिष्ट। तप ऐश्वर्य्ये। तप्यते। तेपे। तप्ता। अतप्त। वावृतु वरणे। वावृत्यते। वावर्त्ताञ्चक्रे। पद गतौ। पेदे। पत्ता।

(सुबोधिनी-) ज्ञाजनोर्जा। अनयोर्जादेशः स्यात् चतुर्षु। ज्ञा अवबोधने। जनी प्रादुर्भावे। चतुर्षुकिम्। ज्ञाता। दीपजनेतीण्वा। अजनि वावृतु वरणे ततो वावृत्यमाना सा रामशालां न्यवीक्षतेतिभट्टिः।

(तत्त्वदीपिका-) अजनि। दीपजनेति वाइण्।

मू०—पदेरिण्तनि॥ अपादि। अपत्साताम्। खिद दैन्ये। खेत्ता। विद सत्तायाम्। विद्यते। वित्सीष्ट। वेत्ता। अवित्त। बुध अवगमने। बुध्यते भुत्सीष्ट। दीपजनेति इण्। अबोधि। अबुद्ध। युध सम्प्रहारे। युध्यते। युयुधे। युत्सीष्ट। अयुद्ध।

(सुबोधिनी-) पदेरिण्तनि। पदेरिण् प्रत्ययः स्यात् कर्त्रर्थे तनि परे। अपादि। दीपजनेइतीण्। वालुगिति तनो लुक्। अबोध। झसादिति सिलोपः। अबुद्ध। आदिजबामिति भः। अभुत्साताम्॥

मू०-अनोरुधकामे॥अनुरुध्यते।अनुरुरुधे। अनुरुत्सीष्ट।अनुरोद्धा।

अन्वरुद्ध। मन ज्ञाने। मन्यते। मेने। मेनिषे। मन्ता। अमंस्त। युज् समाधौ। युज्यते। योक्ता। अयुक्त। सृजविसर्गे। सृज्यते। राद्धेत्यसृष्ट। स्रष्टा। असृष्ट। असृक्षाताम्। लिश अल्पीभावे। लिश्यते। लिक्षीष्ट। लेष्टा। अलिक्षत। अलिक्षाताम्॥ इत्यादि।

(सुबोधिनी-) अनोरुधकामे। अनूपसर्गात् परो रुध्धातुरिच्छायामस्ति। दिवादिपाठसामर्थ्यात् रुधादेरिति नमं बाधित्वा यः। युज् समाधौ। समाधिश्चित्तवृत्तिनिरोधः। अकर्मकः। सृजविसर्गे। अकर्मकः। संसृज्यते सरसिजैररुणांशुभिन्नैरिति। सिस्योरिति न गुणः। सृक्षीष्ट। छशषेति षत्वं ष्टुत्वं झसादिति सिलोपः। असृष्ट। लिश् अल्पीभावे। अनल्पस्याल्पत्वेन भवनमल्पीभावः सिस्योरिति न गुणः। छशषेतिषत्वं षढोरिति कत्वं। लिक्षीष्ट। लुङि हसषांतादिति सक् अलिक्षत्। इत्यादि।

(तत्त्वदीपिका-) कृतायामिह टीकायांलोकेशकरशर्मणा।
अगाद्दिवादिमध्यस्थमात्मनेपदसाधनम्।

मू०-मृष् तितिक्षायाम्। मृष्यति। मृष्यते। ममर्ष। ममृषे। अमर्षीत्। अमर्षिष्ट। ईशुचिर् क्लेदने। शुच्यति। शुच्यते। अशुचत्। अशोचीत्। अशोचिष्ट। रञ्ज रागे। अपिरञ्जदंशेति नलोपः। रज्यते। रज्यति। अराङ्क्षीत्। अरङ्क्त। शप्आक्रोशे। शप्यति। शप्यते। शेपतुः। शेपे। शप्ता। अशाप्सीत्। अशप्त। शक् मर्षणे। शेकिथ। शशक्थ। पुषादित्वात्ङः। अशकत्। अशक्त। सेट्कोऽयमित्येके। शकिता। णह बन्धने। नह्यति। नह्यते। नेहिथ। ननद्ध। नत्सीष्ट। नद्धा। अनात्सीत्। अनद्ध॥ इतिदिवादयः॥

(सुबोधिनी) ईशुचिर् क्लेदे। आदीदित इति नेट्। शुक्तम्। क्लिन्नं। इरितइतिवाङः। ...तादत्वतश्चेति वेट्। नेहिथ। नहइति धः तथोरिति थस्य धः ननद्ध ...इति वृद्धिः। अनात्सीत्।

॥ इतिदिवादिगणः॥

(तत्त्वदीपिका) ननद्धेति नहोधइति। धत्वे तथोर्द्धइति धत्वमित्यर्थः।

(तत्त्वदीपिका) कृतायामिहटीकायांलोकेशकरशर्मणा।
अ...दिवादिगणसाधनम्। इति दिवादयः।

मू० ...वे। स्वादेर्नुः॥ कर्तरि चतुर्षु। नूपः। नुप्रत्ययस्य ...च गुणो भवति पिति। सुनोति।

लोपः। सुन्वः, सुनुवः। सुनोतु। ओर्वाहेः। सुनु। सुनवानि। सुनवै। असुनोत्। असुनुताम्। सुषाव। सुषुवतुः। सोषीष्ट। असावीत्। स्तुसुधूञ्भ्यांपसेरिट्। असोष्ट। षिञ् बन्धने। सिनोति। सिनुते सिष्ये। सिष्यति असैषीत्। असेष्ट। शिञ् निशाने। शेता। अशेष्ट। डुमिञ् प्रक्षेपे। मीनातिमिनोतीत्यात्वम्। ममौ मिम्यतुः। ममिथ, ममाथ। मिम्ये। अमासीत्। अस्मास्त। चिञ् चयने। चिनोमि।

(सुबोधिनी-) षुञ् अभिषवे। स्नपनं स्नानं पीडनं सुरासंधानं चाभिषवः। स्नानेऽकर्मकः॥ स्वादेर्नुः। सुरादिर्यस्य सः स्वादिस्तस्मान्नुप्रत्ययः स्यात् कर्त्रर्थेषुपरेषु। नूपः। उपसाहचर्यान्नुःप्रत्ययएवगृह्यते न धातुः। हुन्वोरिति वः। सुन्वंति ओर्म्वोरित्युकारलोपोवा। सुन्वः,सुनुवः। ओर्वाहेरिति हेर्लुक्। सुनु। नानप्योरित्युव्। सुषुवे। स्तुसुधूञ्भ्यामितीट्। असावीत्। मीनातिमिनोतीत्यात्वं आतोणबित्यौकारः। ममौ। नुधातोरिति यः। मिम्यतुः। यमिरमीतीट्सकौ। अमासीत्। चिञ् चयने। चयनं रचनाविशेषः॥

(तत्त्वदीपिका-) षूञ्। अभिषवः स्नपनं स्नानं पीडनं सुरासंधानं च। तत्रस्नानेकर्मकः। स्वादेर्नुः। स्वादिर्यस्य स तथा तस्मात्। नूपः। उपासाहचर्य्यान्नुप्रत्यय एव गृह्य इत्याह नुप्रत्ययस्येति।

सू०-चिनोतेस्सणादौकिर्वा॥ चिकाय। चिचाय। चिच्यतुः। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति। स्तृणुतः। स्तृण्वन्ति। तस्तार। गुणोर्तिसंयोगाद्योः। तस्तरतुः। ऋदन्तात्थपोनेट्। तस्तर्थ। तस्तरे। स्तर्यात्।

(सुबोधिनी-) चिनोतेःसणादौकिर्वा। चिनोतेः कि[illegible] लिटि सम्त्यये च सेपरे। चिकीषति। चिचीषति। णादौतु चिका[illegible] गुणोर्तिसंयोगाद्योरिति गुणः। तस्तरतुः। स्तर्य्यात्॥

सू०-ऋदन्तात्संयोगादेःसिस्योरिड्वाति॥ स्तारिषीष्ट। स्तृषीष्ट। अस्तारीत्। अस्तरिष्ट। अस्तृत। लोपोन्हस्वाज्झसे। कृञ् हिंसायाम्। कृणोति कृणुते। चकर्थ। चकृवहे। अकार्षीत्। अकृत। वृञ् वरणे। ववार। वव्रतुः।

(सुबोधिनी-) ऋदंतात्संयोगादेःसिस्योरिड्वाति। ऋदंतात्संयोगादेर्द्धातोः [illegible]स्योः सिस्योरिड्वास्यादात्मनेपदे परे। स्तरिषीष्ट। उरिति न गुणः। स्तृषीष्ट

ऋदन्तात्थपो नेट्। चकर्थ। यादादौपे इति रिङ्। क्रियात्। उरिति न गुणः।कृषीष्ट-

मू०—वृञःस्थपइट्॥ ववरिथ।

(सुबोधिनी—) वृञःस्थपइट्। वृञः परस्य थप इट् स्यात्। ववरिथ॥

मू०—वृङ्वृञ्ऋदन्तात्सिस्योरिङ्वाति॥ वरिषीष्ट। वृषीष्ट। वरिता। वरीता। वरिष्यति वरीष्यति। अवारीत्। अवारिष्टाम्। अवरिष्ट। अवरीष्ट। अवृत। धुञ् कम्पने। धुनोति। धुनुते दुधाव। दुधुवतुः। धोष्यति। अधौषीत्। अधोष्ट। दीर्घान्तोप्ययम्। धूनोति। स्तुसुधूञ्भ्यामितीट्। अधावीत्। स्वरतिसूतीतिवेट्। अधविष्ट।अधोष्ट। इत्युभयपदिनः। टुदु उपतापे। दुनोति। दुदाव। दुदुवतुः। अदौषीत्। हिगतौ वृद्धौच हिनोति।

(सुबोधिनी—) वृङ्वृञ्ऋदंतात् सिस्योरिङ्वाति वृङ्वृञ्भ्यां ऋदंताच्च परस्य सिप्रत्ययस्य सीष्टादेश्चेड् वा स्यात् आत्मने पदे परे। पेसेरिटोनदीर्घः। सीष्टादेरितिनदीर्घः वरिषीष्ट वृङ्वृञिति वा दीर्घः। वरिता। वरीता। स्वरतिसूतीति वेट्-दुधविथ। दुधोथ। किति लिटि तु कितइतीण् निषेधं बाधित्वा क्रादिनियमान्नित्य मिट्। नानय्योरित्युव्। दुधुविव। स्तुसुधूञ्भ्यामितीट्। अधावीत् इत्यात्पे॥

(तत्त्वदीपिका—) धुञ्। दीर्घांतोप्ययमिति। तथा च कविरहस्ये। धूनोतिचंपकवनानिधुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तं। वायुर्विधूनयति केशरपुष्परेणून्यत्कानने धवति चंदनमंजरीश्चेति। हिगतौ।

मू०—पूर्वाद्धिनोतेर्हस्यघोनत्वङि॥ जिघाय। जिघ्यतुः। अहैषीत्। आप्लृ व्याप्तौ। आप्नोति। आप्नुवन्ति। आप्नुहि। आप। आपतुः। आप्ता। आपत्। शक्लृ शक्तौ। शक्नोति। शशाक। समर्थ शेकतुः। शक्ता। अशकत्। राध साध संसिद्धौ। राध्नोति। राध्नुवन्ति।

(सुबोधिनी-) पूर्वाद्धिनोतेर्हस्यघोनत्वङि। द्वित्वे सति पूर्वात् परस्य हिनोतेर्हस्य घः स्यात् अङि तु न। अङिकिम्। अजीहयत्। संयोगपूर्वकत्वात् ओर्वाहेरिति नहेर्लुक्। आप्नुहि॥

(तत्त्वदीपिका—) नत्वङीति। अङीति किं। अजीहयत्। ण्यन्तस्य धात्वन्तरत्वेन हिनोग्रहणादग्रहणेपि जिघाययिष्यतीत्यत्रण्यधिकस्यापि कुत्वज्ञापनार्थमिदमिति बोध्यं।

मू०—राधोहिंसायामेत्वपूर्वलोपौकितिलिटिसेटिथपिच॥ ररा-

ध । रेधतुः । रेधिथ । अरात्सीत् । ञिधृषा प्रागल्भ्ये । धृष्णोति । दधर्ष । अधर्षीत् । दम्भु दम्भे । दभ्नोति ।

(सुबोधिनी--) राधोहिंसायामेत्वपूर्वलोपौकितिलिटिसेटिथपिच । हिंसार्थकस्य राध एत्वपूर्वलोपौ स्तः नान्यार्थकस्य । दंभु दंभे । लोकवंचनाय विहितकर्मानुष्ठानं दंभः ॥

मू०-श्रन्थिग्रन्थिदम्भिभ्योलिटःकित्वंवा॥दम्भेर्लिटचेत्वपूर्वलोपौ। ददम्भ । देभतुः, ददम्भतुः । देभिथ,ददंभिथ । अदम्भीत् । ऋधु वृद्धौ। आनर्द्ध । नुगशाम् । आनृधतुः । अर्द्धिता । क्षि हिंसायां । क्षिणोति । क्षिण्वन्ति । क्षेता ॥ इतिपम् ॥ अशूङ् व्याप्तौ संघाते । च । अश्नुते । नुगशाम् । आनशे । अशिषीष्ट, अक्षीष्ट । अशिता अष्टा । आशिष्ट । आक्षाताम् । ष्टिघ आस्कंदने । स्तिघ्नुते । स्तिघ्नुवाते । तिष्टिघिध्वे । अस्तेघिष्ट । इति स्वादयः ॥

(सुबोधिनी-) श्रंथिग्रंथिदंभिभ्यो लिटः कित्वं वा । एभ्यः परस्य लिटः कित्वं स्याद्वा । श्रंथ ग्रंथ संदर्भे । दंभु दंभे । ष्वंज परिष्वंगे । दंभेः किति लिटचेत्वपूर्वलोपौ । श्रंथीति कित्संज्ञायां नोलोपइति नलोपस्तस्यासिद्धत्वापूर्वलोपयोरप्राप्तौ सत्यामारंभः॥ इतिपं । नुगशामिति नुक् । आनशे । ष्टिघ आस्कंदने । आस्कंदनं संग्रामः । स्तिघ्नुते । इत्यात् ॥ इतिस्वादयः ॥

(तत्त्वदीपिका-) कृतायामिहटीकायांलोकेशकरशर्मणा ।
बाधनं दुष्टबुद्धीनामगमत्स्वादिसाधनं ॥ इति स्वादयः ।

मू०-रुधिरावरणे । रुधादेर्नम् ॥ कर्तरि चतुर्षु । रुणद्धि । नमसोऽस्य । रुन्द्धः । रुन्धन्ति । रुणत्सि । रुन्द्धे । रुन्धाते । अरुधत् । अरुद्ध । भिदिर् विदारणे । अभिदत् अभैत्सीत् । अभित्त । छिदिर् द्वैधीकरणे । अच्छिदत् अच्छैत्सीत् । अच्छित्त । रिचिर् विरेचने । रिणक्ति । अरिणग् अरिणक् । अरिचत् अरैक्षीत् । अरिक्त । विचिर् पृथग्भावे । विङ्क्ते । अविचत् । अवैक्षीत् । अविक्त । क्षुदिर् संपेषणे । अक्षुदत् अक्षौत्सीत् । अक्षुत्त । युजिर् योगे । अयुजत् अयौक्षीत् । अयुक्त । उछृदिर् दीप्तिदेवनयोः । छृणत्ति छृन्ते । नृत तृदइति वेट् । छृत्सीष्ट छर्दिषीष्ट । अछृदत् अछर्दीत् । अछर्दिष्ट । उतृदिर् हिंसानादरयोः । अतृदत् अतर्दीत् । इत्युभयपदप्रक्रि-

या। शिष्लृ विशेषणे। शिनष्टि। शिंष्टः। शिंषन्ति। शेष्टा। शेक्ष्यति। अशिषत्। पिष्लृ सञ्चूर्णने। पिनष्टि। पेक्ष्यति। अपिषत्। भञ्जो आमर्दने भनक्ति। बभञ्जिथ। बभंक्थ। भङ्क्ता। अभाङ्क्षीत्। भुज पालनाभ्यवहारयोः। भुनक्ति। भुङ्क्तः। अभुनक् अभुनग्। अभौक्षीत्। तृह हिसि हिंसायाम्।

(सुबोधिनी-) रुधिर् आवरणे। रुधादेर्नम्। रुध् आदिर्यस्य स रुधादिस्तस्माद्रुधादेर्नम् प्रत्ययः स्यात् कर्त्रर्थेषु चतुर्षु। मित्वादंत्यात्स्वरात्परः। नित्यत्वाद्गुणं बाधते। तथोरिति धत्वं। णत्वं। रुणद्धि। नमसोऽस्यइत्यल्लोपः। रुंद्धः। दिस्योरिति दिप्सिपोर्लोपः। वावसाने इति धस्य दकारतकारौ। सिपि दः स इति दस्य वा सः अरुणत्,अरुणः। तृततृदेति वेट् चच्छृदिषे,चच्छृत्से। इत्यात्ते। झसादिति हेर्द्धिः। झबे इति षस्य डत्वं। ष्टुत्वं अनुस्वारपरसवर्णौ शिण्ड्ढि। हसात्परस्य झसस्येति डलोपे शिण्ढि। लित्पुषादेरिति ङः। अशिषत्। भंजो आमर्दने। ओदित्करणं ल्वाद्योदित इति नत्वार्थं। भग्नः। भुजपालनाभ्यवहारयोः। भुजोऽपालनेइत्यात्मनेपदं वक्ष्यते॥

(तत्त्वदीपिका-) रुधिर्। रुधादेर्नम्। रुध् आदिर्यस्य स तथा तस्मात् न च रुदादेरिति भविष्यति। अन्तर्वर्त्तिविभक्त्या पदत्वादिति वाच्यं। असंदेहार्थमिदं। अन्यथा रुध् आदिः रुद् आदिरिति संदेहः स्यात्। यद्यपि व्याख्यानतोविशेषप्रतिपत्तिरिति न्यायाद्रुधिरादिरेव गृह्येत। तथापि क्वचिदान्तरंपदकार्यं नेतिज्ञापनार्थमिदं। नमःप्रत्ययत्वेपि मित्त्वसामर्थ्यादन्त्याचःपरत्वं। अन्यथा मित्वं व्यर्थं स्यात्। नच नमइति विशेषणार्थं तदितिवाच्यं। अनुबंधान्तरस्यैव सुवचत्वात्। अथनमि मध्येपि तिबादि परत्वस्याबाधनादपा भाव्यमिति वाच्यं न दधि ब्राह्मणेभ्यो दीयतां तक्रं कौंडिन्यायेति तक्रकौंडिन्यन्यायेन तक्रदानेन दधिदानस्येव नमापो बाधनात्। नमा नित्यत्वाद्गुणो बाध्यते। उच्छृदिर् उः क्त्वायामिड्विकल्पार्थः। छृत्वा। छृदित्वा।

मू०-तृहोनमिकृतेइमागमःपितिहसे। तृणेढि। अतृणेट्। अतर्हीत्। इदितोनुम्। नमः। नमप्रत्ययात् परस्य नस्य लोपः। हिनस्ति। हिंस्तः। हिंसंति। धेसलोपः। हिन्धि। अहिनः। जिहिंस। अहिंसीत्। उन्दी क्लेदने। उनत्ति। उन्तः। उन्दन्ति। औनत्। औन्दन्। उन्दांचकार। औन्दीत्। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। अनक्ति। नुगशाम्। ऊदितोवा। आनञ्जिथ। आनंक्थ। अञ्जिता अङ्क्ता।

(सुबोधिनी-) तृहोनमिक्ङतेइमागमः पिति हसे । तृहेः पूर्वं नम् ततः इम् स्यात् पितिहसे परे । नमःप्रकरणात्प्रत्ययस्य ग्रहणं । उंदी क्लेदने । क्लेदनमार्द्रीभावः । नम इति नलोपः । उनत्ति । उंद्यात् । उनत्तु औनत् । उंदांचकार । उंद्यात् । उंदिष्यति । औन्दिष्यत् । औंदीत् । अंजू व्यक्तिम्रक्षणकांतिगतिषु । व्यक्तिर्विवेचनं म्रक्षणं स्निग्धता । नुगशामिति नुक् आनंज ॥

(तत्त्वदीपिका-)तृहोनमि ङते इति । यद्येवं न स्यात् तर्हि येन नाप्राप्तिन्यायेनेमा नम् बाध्यते अबाधने वा पूर्वमिमेव स्यादिति शंकानिवृत्तये नमिङते इति । नमः प्रकरणत्वात् प्रत्ययग्रहणम् ।

मू०-अञ्जेस्सेर्नित्यमिट्॥ आञ्जीत् । तञ्चु संकोचने । तनक्ति । अतञ्चीत्, अतांक्षीत् । ओविजी भयचलनयोः । विनक्ति ।

(सुबोधिनी-) अञ्जेःसेर्नित्यमिट् । अञ्जेः परस्य सिप्रत्ययस्य इडागमः स्यात् ऊदित्वाद्विकल्पेप्राप्ते इदं ॥ चलनयो प्रकृति विपजीए;

मू०-विजेरिडादिप्रत्ययोङित्॥ विविजिथ । विजिता । अविजीत् । वृजी वर्ज्जने । वृणक्ति । अवर्जीत् । पृची संपर्के । पृणक्ति । अपर्चीत् ॥ इतिपम्

(सुबोधिनी-) विजेरिडादिप्रत्ययोङित् । विजेः परस्य इट्सहितस्य प्रत्ययस्य ङित्वं स्यात् । इति पम् ॥

मू०-- ञिइन्धी दीप्तौ । इन्द्धे । इन्धीत । ऐंद्ध । इन्धाञ्चक्रे । ऐन्धिष्ट । खिद दैन्ये । खिन्ते । खित्सीष्ट । अखित्त । विद विचारणे । विन्ते । वित्सीष्ट । अवित्त । इतिरुधादयः दैन्यं दीनता

(सुबोधिनी-) ञिइधी दीप्तौ । तथोर्द्ध इतिधत्वं झबेजबाइति दत्वं इंद्धे-र्नमोनकारस्यानुस्वारपरसवर्णौ । नोलोपइति नलोपस्तु न भवत्यल्लोपस्यासिद्धत्वात् स्थानिवत्वाद्वा ॥ इत्यात् इति रुधादयः ॥

(तत्त्व०-)ञिइंधी ञीतांतगित्येतदर्थोञिः इद्ध इत्यत्रेण् निषेधार्थः । इंद्धे इति । नम इति न लोपः नमसोस्ये सलोपः ।

कृतायामिहटीकायांलोकेशकरशर्मणा ।
मताभाष्यकृताभाव्यारुधादिप्रक्रियागता ।

मू०-तनुविस्तारे । तनादेरुप् ॥ कर्तरि चतुर्षु । नूपः । तनोति । तनुतः । तन्वन्ति । ओर्म्वोर्वालोपः । तनुवः, तन्वः । तनुते । ततान । तेनतुः । तेने । अतानीत् । अतनीत् ।

(सुबोधिनी–) तनुविस्तारे । तनादेरुप्। तन्आदिर्यस्य स तनादितस्मादुप् कर्त्रर्थेषु चतुर्षु अपोऽपवादः । तनोति । तनुते । तनुयात् । तन्वीत । तनोतु । तनुतां । अतनोत् । अतनुत । ततान । तेने । तन्यात् । तनिषीष्ट । तनिता । तनिष्याति । तनिष्यते । अतनिष्यत् । अतनिष्यत । अतोहसादेर्लघोरिति वा वृद्धिः । अतनीत्, अतानीत् ॥

(तत्त्वदीपिका–) तनु । उकारः क्त्वायामिड्विकल्पार्थः । तनादेरुप् । तन आदिर्यस्य स तथा तस्मात् नलोपाभावस्त्वसंदेहार्थः । यदि व्याख्यानत इति न्यायादसंदेहस्तदा क्वचिन्नलोपो नेति ज्ञापनार्थः तेन सन्आदिर्येषांतेसनादय इत्यादि सिद्धं । उपःपित्वं कुरुत इत्यादौ गुणार्थे । यदिङित्यदुरिति सामर्थ्याद्गुणः अन्यथाऽकारस्यासंभव इति विभाव्यते । तदा घर्णोतीत्यत्र गुणार्थमिति बोध्यं ।

मू०– तनादेस्तथासोर्वासेर्लुक् ॥ लोपस्त्वनुदात्ततनां ॥ अतत, अतनिष्ट । अतथाः, अतनिष्ठाः । षणु दाने । सनोति । सनुते । सेनतुः । सेने । जनसनखनामात्वमिति । सायात् । सन्यात् । असात् । असनिष्ट । असाथाः । असनिष्ठाः । क्षणु क्षिणु हिंसायाम् । क्षणोति । ह्मयन्तक्षणेति न वृद्धिः । अक्षणीत् । अक्षत् । अक्षणिष्ट । अक्षथाः अक्षणिष्ठाः ।

(सुबोधिनी–) तनादेस्तथासोर्वासेर्लुक् । तनादेः परस्य सेर्लुक् वा भवति तनि थासि च परे । अतत, अतनिष्ट । षणु दाने । नांतोयं । णकारस्तु लाक्षणिकः । तेन यङ्लुकि संसन्ति । संसन्तः । इत्यादावनुस्वारपरसवर्णौ स्तः । जनसनेत्यात्वं । सायात्, सन्यात् । असात्, असनिष्ट । असाथाः, असनिष्ठाः । क्षणु क्षिणु हिंसायां । इमावपि लाक्षणिकौ णकारौ । तेन यङ्लुकि चक्षन्ति । इत्यत्रानुस्वारपरसवर्णौ । ह्मयंतेति न वृद्धिः अक्षणीत् । तनादेस्तथासोरिति वासेर्लुक् लोपस्त्वनुदात्ततनामिति नलोपः । अक्षत, अक्षणिष्ट ॥

(तत्त्वदीपिका–) क्षणु । द्वावपि दन्त्यान्तौ । णत्वं तु सूत्रबलात् । अन्यथा यङ्लुकि-चाक्षंति चक्षंतीत्यत्रानुस्वारो न स्यात् ।

मू०– तनादेरुपधायागुणोवोपि ॥ क्षिणोति क्षेणोति । अक्षेणीत् । अक्षितः अक्षेणिष्ट । अक्षिथाः । अक्षेणिष्ठाः । ऋणु गतौ । ऋणोति अर्णोति । ऋणुतः । आनर्ण । आनृणे । आर्णीत् । आर्त आर्णिष्ट । आर्थाः । आर्णिष्ठाः । तृणु अदने । तृणोतिः तर्णोति । तृणुते तर्णुते । अतर्णीत् अतृत अतर्णिष्ट । अतृथाः अतर्णिष्ठाः ।

घृणुदीप्तौ। घृणोति घर्णोति। जघर्ण। अघर्णीत्। अघृत। अघर्णिष्ट। अघृथाः अघर्णिष्ठाः। डुकृञ् करणे। करोति। ङित्यदुः। कुरुतः।

(सुबोधिनी-) तनादेरुपधायागुणोवापि। तनु षणु क्षणु धातूनां गुणासंभवात् क्षिण्वादिष्वस्य प्रवृत्तिर्बोध्या। अतद्गुणसंविज्ञानो बहुव्रीहिः। उवमिति वः कुर्वंति॥

सू०-कुरछुरोर्नदीर्घः॥ कुर्वंति।

(सुबोधिनी-)कुरछुरोर्नदीर्घः। कृञः कुर्रूपस्य छुरछेदने इत्यस्य च दीर्घो न भवति। कुर शब्दे इत्यस्य तु न निषेधः॥

सू०-कृञोनित्यंवमोरुलोपः॥ कुर्वः। कुर्मः।

(सुबोधिनी-) कृञोनित्यंवमोरुलोपः। कृञः परस्य उप्रत्ययस्य लोपः स्यात् वमयोः परयोः॥

(तत्त्वदीपिका-) कृञोनित्यमिति। कृञो ये इत्यत्र वेत्यनुवृत्तेर्व्यवस्थया बोध्यं।

सू०-कृञोये॥ कृञ उप्रत्ययस्य लोपो यि। कुर्यात्। चकर्थ। कार्देर्नेट्। क्रियात्। कृषीष्ट। अकार्षीत्। अकृत। अकृथाः।

(सुबोधिनी-) कृञोये। लीइत्यनुवृत्तं आशिषि यादादौ पे इति रिङ्। क्रियात्। उरिति न गुणः। कृषीष्ट। तनादेरिति सेर्लुगभावे लोपो ह्रस्वादिति सिलोपः। अकृत॥

सू०-संपर्युपेभ्यः करोतेर्भूषणेसुट्॥ संस्करोति। अड्द्वित्वव्यवधानेपिकात्पूर्वःसुट्। समस्करोत्। संचस्कार।

(सुबोधिनी-) संपर्युपेभ्यःकरोतेर्भूषणेसुट्। संपर्युपपूर्वस्य करोतेः सुट् स्यात् भूषणे संघे चार्थे। संस्करोति। अलंकरोतीत्यर्थः। संस्कुर्वंति। संघीभवंतीत्यर्थः॥ अड्द्वित्वव्यवधानेपि कात् पूर्वः सुट्। संपर्युपेभ्यः परस्य कृञोऽड्व्यवधाने द्वित्वव्यवधाने च कात्पूर्वः सुट् भवति॥

(तत्त्वदीपिका-) संपर्युपेभ्य इति। वृत्तिकारमतेनायं पाठः। भाष्यवार्त्तिककारादिमते तु संपरिभ्यामित्येव।

सू०- ससुटः कृञोलिटइट्॥ सञ्चस्करिथ। संचस्करिव। संस्क्रियात्। संस्कृषीष्ट। एवं परिष्कुरुते। उपस्कुरुते। परिष्करिष्यते। पर्य्यस्कार्षीत्, पर्य्यष्कार्षीत्। इत्यात्वे॥ वनुयाचने वनुते। ववने। परस्मैपद्ययमित्येके। वनोति। शसददइति। ववान। वव-

निथ । अवानीत् । मनु अवबोधने । मनुते । मेने । मनिषीष्ट। अमत, अमनिष्ट ॥ इतितनादयः ॥

(सुबो०-)ससुटः कृञोलिटइट्। सुट्सहितात् कृञोलिट इट् भवति इतितनादयः॥

(तत्त्वदीपिका–)कृतायामिहटीकायांलोकेशकरशर्मणा ।
मताभाष्यकृता भव्या तनादिप्रक्रियागता । इति तनादयः ।

मू०–तुद व्यथने। तुदादेरः ॥ कर्तरिचतुर्षु। तुदति तुदते। तुत्सीष्ट। अतौत्सीत् । अतुत्त । णुद प्रेरणे । नुदति । नुत्सीष्ट । अनौत्सीत् । अनुत्त । दिश अतिसर्जने । दिशति । दिक्षीष्ट । अदिक्षत् । भ्रस्ज पाके । ग्रहांक्ङितिच । झबेचजबाः । भृज्जते ।

(सुबोधिनी–) तुद व्यथने ॥ तुदादेरः । तुद आदिर्यस्य स तुदादिः तस्माद्-प्रत्ययः स्यात् कर्त्रर्थेषु चतुर्षु । अपोपवादः । तुदति । तुदते । तुदेत् । तुदेत । तुदतु । तुदताम् । अतुदत् अतुदत । अतुदेतां । अतुदंत । तुद्यात् तुत्सीष्ट । सिस्योरिति न गुणः । तोत्ता । तोत्स्यति । तोत्स्यते । अतोत्स्यत् । अतोत्स्यत । अतौत्सीत् । झसादिति सिलोपः । अतुत्त । दिश अतिसर्ज्जने । अतिसर्जनं दानं । हशषांतात्सगिति सक् छशषेति षत्वं षढोरिति कत्वं च । अदिक्षत् । अदिक्षत भ्रस्ज पाके । भर्जनरूपः पाकोत्र धात्वर्थो नत्वोदनादेः पाकस्तत्र प्रयोगाभावात् ग्रहामिति संप्रसारणं सस्य श्चुत्वेन शः शस्य झबेजबाइति जः । भृज्जति । भृज्जेत् । भृज्जेत भृज्जतु । भृज्जतां । अभृज्जत् । अभृज्जत ॥

(तत्त्वदीपिका–) तुदादेरः । तुद आदिर्यस्य स तथा तस्मात् । अप्रत्ययस्यापित्वादपितादिर्ङिर्दिति ङित्वंतेन गुणो न । भ्रस्ज भ्रस्जे । इत्ययं पाठः । भ्रष्टः भ्रष्टवानित्यत्रल्वाद्योदित इति नत्वं स्यात् ।

मू०– भ्रस्जोरसोरमनपिवा ॥ बभर्ज, बभ्रज्ज । बभर्जतुः, बभ्रज्जतुः । बभर्जिथ, बभ्रजिथ , बभर्ष्ठ, बभ्रष्ठ । स्वरान्तादत्वतश्चेति वेट् । क्ङितिसंप्रसारणं बाधकम् । भृज्ज्यात् । अभ्राक्षीत्, अभार्क्षीत् । अभ्रष्ट, अभर्ष्ट । क्षिप प्रेरणे । क्षिप्सीष्ट । अक्षेप्सीत् । अक्षिप्त । कृषविलेखने । कृक्षीष्ट । क्रष्टा, कर्ष्टा । अक्राक्षीत् अकार्क्षीत् । अकृक्षत् । अकृक्षाताम् । अकृक्षन्त। मिलसंगमे । मिलति । मिमिले । अमेलीत् । अमेलिष्ट । मुचू-

ऌ मोचने। मुचादेर्मुम्। मुचलुपविदलिपषिचकृतपिशाखिदामप्रत्ययेमुम्। मुञ्चति। मुक्षीष्ट। लितपुषादेर्ङः। अमुचत्। अमुक्त। लुपॢ छेदने। लुम्पति। लुलोप। लुप्सीष्ट। अलुपत्। अलुप्त। विदॢलाभे। विन्दति। अविदत्। अवेदिष्ट। अनिडयमित्येके। वेत्ता। लिप उपदेहे। लिम्पति। लिपिसिचीति ङः। अलिपत्। अलिपत। अलिप्त। षिच क्षरणे। सिञ्चति। सिषिचिषे। असिचत्। असिचत। असिक्त। इत्यात्पे॥ ऋषी गतौ। ऋषति। आनर्ष। ओव्रश्चू छेदने। वृश्चति। वव्रश्च। वव्रश्चतुः। वव्रश्चुः। वव्रश्चिथ, वव्रष्ठ। व्रश्चिता, व्रष्टा। व्रश्चिष्यति व्रक्ष्यति। अव्रश्चीत् अव्राक्षीत्। अव्राष्टाम्। व्यच व्याजीकरणे। विचति। विव्याच। विविचतुः। विच्यात्। व्यचिता। व्यचिष्यति। अव्याचीत् अव्यचीत्। उछि उंच्छे। उंच्छति। उञ्छाञ्चकार। औञ्छीत्। उच्छी विवासे। उच्छति। उच्छाञ्चकार। औच्छीत्। ऋच्छ गतींद्रियमलयमूर्तिभावेषु। ऋच्छति।

सुबोधिनी–) भ्रस्जोरसोरमनपिवा। भृज्जेरेफस्योपधायाश्च स्थाने रमागमो वा स्यात् अनपि। मित्वादंत्यात् स्वरात्परो भवति। स्थानषष्ठीनिर्देशात् रकारोपधयोर्निवृत्तिः। बभर्ज, बभ्रज्ज। बभर्ज्जतुः, बभ्रज्जतुः। थपि बभर्ज्जिथ, स्वरांतादत्वतश्चेतिवेट् बभ्रज्जिथ। स्कोरिति, सलोपः। छशषेतिषः। बभर्ष्ठ, बभ्रष्ठ। आति। बभर्जे। बभ्रज्जे। ङ्किति रमागमं बाधित्वा संप्रसारणं। भृज्यात्। भर्क्षीष्ट, भ्रक्षीष्ट। भर्ष्टा, भ्रष्टा। भर्क्ष्यति, भ्रक्ष्यति। भर्क्ष्यते, भ्रक्ष्यते। अभार्क्ष्यत्, अभर्क्ष्यत् अभ्रक्षत्। अभार्क्षीत् अभ्राक्षीत्। अभर्ष्ट, अभ्रष्ट। कृषविलेखने। कृषादीनांवेति वा रः। क्रष्टा, कर्ष्टा। सिस्योरिति न गुणः। कृक्षीष्ट। कृष स्पृश मृशेति वा सिः। अनिटोनामिवद् इति वृद्धिः अकार्क्षीत्, अक्राक्षीत्। अकार्क्षीत्। पक्षे। हशषांतादिति सक्। अकृक्षत्। सिस्योरिति न गुणः। अकृष्ट। सकि। अकृक्षत। आति सको लोपः स्वरे इत्यलोपः। अकृक्षातां। मिल संगमे। अस्मिन्नेव गणे परस्मैपदिषु मिलसंश्लेषणे इति धातुपाठे पठ्यते इह तस्य पुनः पाठः कर्तर्यात्मनेपदार्थः मिलति। मिलते। मुचादेर्मुम् मुच्लृमोक्षणे लुप्लृछेदने विद्लृलाभे लिपउपदेहे षिचक्षरणे कृतीछेदने पिशअवयवे खिदपरिघाते विद्लृलाभे व्याघ्रभूतिमतेसेट्कः। वेदिता। भाष्यमतेत्वनिट्कः। वेत्ता। लिपउपदेहे। उपदेहोवृद्धिः। लि-

पिसिचीतिङः आतितुवाङः अलिपत् झसादिर्तिसलोपः अलिप्त। अलिपत् ॥ इत्यात्पे ॥ नुगशामिति नुक्। आनर्ष। ओव्रश्चू छेदने। ग्रहामिति संप्रसारणं वृश्चति। लिटि णबादौ पूर्वस्येसनेन पूर्वरेफस्य ऋकारः ततो नसंप्रसारणे संप्रसारणमिति परिभाषया निषेधात्सकृत्सूत्रं प्रवर्त्तते इति न्यायाद्वा पुनर्वस्य संप्रसारणं न। वव्रश्च। ऊदितोवेति वेट्। वव्रश्चिथ। स्कोरिति सलोपः छशषेति षत्वं ष्टुत्वं। वव्रष्ठ। ऊदितोवेतीटि। अव्रश्चीत्। इडभावे स्कोरितिसलोपः। छशषेति षत्वं षढोरिति कः। ततः सस्य षत्वं। अव्राक्षीत्। नन्वत्र शकारस्य कथं लोपः उच्यते। नकारजावनुस्वारपंचमौ झलि धातुषु। सकारजः शकारश्चर्षाट्टवर्गस्तवर्गजइति ॥ १ ॥ व्यच व्याजीकरणे। व्याजीकरणं छद्मकरणं। ग्रहामिति संप्रसारणं णबादौ पूर्वस्येति पूर्वस्य संप्रसारणं च। विचिचतुः। अतोहसादेरिति वा वृद्धिः। अव्याचीत्, अव्यचीत्। उछि उञ्छे। उच्छी विवासे। स्वदेशं परित्यज्य देशांतरे गमनं विवासः। सम्प्रति धातुपाठे इमौ भ्वादिगणे पठितौ इह पुनः पाठस्तु उंछतीत्यत्र वादीपोः शतुरिति नुम् विकल्पार्थः।अपूप्रत्यये तु अप्यपोरान्निसमिति नित्यं नुम्। उंछंती ॥

(तत्त्वदीपिका—) रसोरिति। रश्च स्च रसौ तयोः रेफसकारयोरादेशो भववतीत्यर्थः।

मू०—ऋच्छेर्नाम् ॥ ऋच्छेर्लिटिगुणः ॥ नुगशाम्। आनर्छ। आनर्छतुः। ऋच्छिता। उब्जआर्जवे। उब्जाञ्चकार। उज्झ त्यागे। उज्झाञ्चकार। लुभ विमोहने। लुभति। लोभिता लोब्धा। अलोभीत्। तृप तृम्प तृफ तृम्फ तृप्तौ। तृपति। अतर्पीत्। तृफादीनामप्रत्यये मुम्। तृम्फति। तुप तुम्प तुफ तुम्फ हिंसायाम्। तुपति। तुतोप। अतोपीत्। तुम्पति। अतुम्पीत्। तुफति। तुतोफ। अतोफीत्। तुम्फति। तुतुम्फ। अतुम्फीत्। दृप दृंफउत्क्लेशे। दृपति। दृम्फति। ऋफ ऋम्फ हिंसायाम्। ऋफति। ऋम्फति। ऋम्फाञ्चकार। गुफ गुम्फ ग्रन्थे। गुफति। गुम्फति। अगुम्फीत्। उभ उम्भ पूरणे। उभति। उवोभ। औभीत्। उम्भति। उम्भाञ्चकार। औम्भीत्। शुभ शुम्भ शोभार्थे। शुभति। अशोभीत्। शुम्भति। अशुम्भीत्। दृभी ग्रन्थे। दृभति। अदर्भीत्। चृती हिंसाग्रन्थनयोः। चृतति। नततृदचृतेतीड्वा। चर्तिष्यति चर्त्स्यति। अर्चती-

त् । विध विधाने । विधति । वेधिता । लिख अक्षरविन्यासे । लिखति । लेखिता । कुट कौटिल्ये । कुटति । चुकोट ।

(सुबोधिनी-) ऋछेर्नाम् । ऋच्छतेराम् प्रत्ययो न लिटि । गुरुनाम्यादित्वात्प्राप्तेनिषेधः ॥ ऋच्छेर्लिटिगुणः । ऋच्छतेर्गुणः स्याल्लिटि । लुभ विमोहने विमोहनमाकुलीकरणं । इषुसहेति वेट् । लोभिता, लोब्धा । तृप तृंफ तृप्तौ । कृष स्पृशमृशेति सिविकल्पस्तु पौषादिकस्यैव ङस्यापवादत्वात् । तेनात्र नित्यं सिः । अतर्पीत् । तृंफादीनामप्रत्यये नुम् । आदिशब्दः प्रकारे तेन येत्र नकारानुषक्तास्ते तृंफादयः अप्रत्ययस्य ङित्वान्नोलोपइति नलोपे कृते नुम् । तृंफति । दृपदृंफउत्क्लेशे । उत्क्लेशः पीडा । चृती हिंसाग्रंथनयोः । ईदित्करणमादीदितइतीण्निषेधार्थं । यद्यप्यस्य वेदकत्वादिण्निषेधः सिद्धयति । तथापि क्वचिद्वेदइत्यस्याऽनित्यतां ज्ञापयितुं ईदित् करणं । तेन धावितमिभराजधियेत्यादिसिद्धमिति । नृतत्दृंदेतिवेट् । चर्त्स्यति । विध विधाने । विधानं करणं । कुट कौटिल्ये । कुटिलस्य भावः कौटिल्यं तस्मिन् ॥

(तत्त्वदीपिका-)ऋच्छ गुरुनामित्वादाम्प्राप्त इत्याह । ऋच्छेरिति । ह्रस्वाच्छकारस्य द्वित्वे संयोगपरत्वाल्लघूपधत्वाभावाद्गुणाप्राप्तौ लिटि गुण इति ।

सू०-- कुटादेर्ङिणद्वर्जःप्रत्योङित् ॥ चुकुटिथ । कुटिता । अकुटीत् । पुट संश्लेषणे । पुटति । पुपोट । अपुटीत् । कुच संकोचने । कुचति । चुकोच । अकुचीत् । गुजशब्दे । गुजति । गुजिता । अगुजीत् । गुड रक्षायाम् । गुडति । गुडिता । अगुडीत् । कुड शब्दे । कुडति ।, कुडिता । डिप क्षेपे । डिपिता । छुर च्छेदे । कुरछुरोर्नदीर्घः । छुर्यात् । छुरिता । स्फुट विकसने । स्फुटति । मुट आक्षेपप्रमर्दनयोः । मुटति । मुमोट । मुटिता । त्रुट छेदे । त्रुटयति, त्रुटति । तुत्रोट । त्रुटिता । तुट कलहकर्म्मणि । तुटति । तुटिता । तुटिष्यति । छुट चुट छेदे । । छुटति । छुटिता । चुटिता । जुटबन्धने ।, जुटति । जुटिता कड मदे । कडति । अकडीत् । लुठ संश्लेषणे । लुठति । लुठिता । कुड घनत्वे । कुडिता । कुड बाल्ये । कुडति । पुड उत्सर्गे । पुडिता । घुट प्रतीघाते । घुटिता । स्फुर स्फुरणे । स्फूरिता । स्फुल संचलने । स्फुलिता । छूर्छेदने

(सुबोधिनी-) कुटादेर्ङिणद्वर्जःप्रत्ययोङित् । कुटादेर्गणात्परः प्रत्ययो ङित्

स्यात् ञितं णितं च वर्ज्जयित्वा। ङित्वान्नगुणः। त्रुकुटिथ। छुर छेदने। य्वोर्विह-सेइत्यनेन दीर्घप्राप्ते कुरछुरोरितिनिषेधः। छुर्यात्। त्रुटभ्राशभ्लाशिति वा यः। त्रु-टयति, त्रुटति। कडधातुपाठे भ्वादौ पठितस्य पुनरत्र पाठः शतृप्रत्यये वादीपोरि-ति नुम् विकल्पार्थः। पूर्वं पाठस्तु कंडतीति नित्यनुमर्थः। कुड घनत्वे। घनत्वं सांद्रता॥

मू०— निर्निविभ्यःस्फुरतिस्फुलत्योस्सस्यषोवा॥ निःष्फुरति, निस्स्फुरति निःस्फुरति निष्फुरति निस्फुरति। निःष्फुलति निःस्फुलति निष्फुलति निस्फुलति। णू स्तवने। अनुवीत्। धू विधूनने। अधूवीत्। गु पुरीषोत्सर्गे। जुगुविथ जुगुथ। गूयात् गुता। ध्रु गतिस्थैर्य्ययोः। ध्रुता। अध्रुषीत्। इतिकुटादयः। कृतीछेदने। मुचादेर्मुम्। कृन्तति। नृततृदछृदचृतकृद्भ्योऽसेस्सादेरिड्वा। कर्तिष्यति, कर्त्स्यति। अकर्तीत्। गॄ निगरणे।

(सुबोधिनी—) निर्निविभ्यःस्फुरतिस्फुलत्योःसस्यषोवा। एभ्यः परस्यानयोः सस्य वा षत्वं भवति। णू दीर्घान्तः। परिणूत गुणोदयइत्यत्र कितइतीण्निषेधः। कुटादेरिति ङित्वान्न वृद्धिः। नुधातोरित्युव्। अनुवीत्। लोपोऽन्हस्वादिति सिलोपः। अगुर्ता। वृत्ताः कुटादयः। कृतीमुचादेरिति मुम्। कृंतति। नृततृदेति वेट्। कर्तिष्यति, कर्त्स्यति॥

मू०--गॄलेवा। गिरतेः स्वरेरस्यलोवा॥ ऋतइर्। गिरति, गिलति। गरिता, गरीता, गलिता। गलीता। अगारीत्, अगालीत्। स्पृश स्पर्शने। स्प्रष्टा स्पर्ष्टा। अस्प्राक्षीत् अस्पार्क्षीत् अस्पृक्षत्। प्रच्छ ज्ञीप्सायाम्। ग्रहांक्ङितिच। पृच्छति। पप्रच्छिथ पप्रष्ठ। अप्राक्षीत्। सृज विसर्गे। सृजति। सृजिदृशोः स्थपोवेट्। ससर्जिथ सस्रष्ठ। स्रष्टा। अस्राक्षीत्। टुमस्जो शुद्धौ। मज्जति। मस्जिनशोर्झसेनुम्। ममज्जिथ ममङ्क्थ। मङ्क्ता। अमाङ्क्षीत्। विच्छ गतौ। आयः। विच्छायति। विच्छायाञ्चकार। विविच्छ। इषु इच्छायाम्। गमाञ्छः। इच्छति। इच्छेत्। इच्छतु। ऐच्छत्। इयेष। इयेषिथ। एषिता एष्टा। ऐषीत्। विश प्रवेशने। वेष्टा। अविक्षत्। मृश आमर्शने। अम्राक्षीत् अमार्क्षीत् अमृक्षत्। रि पि गतौ। रियति। पियति। रेता। पेता। धि धारणे। धियति। क्षिनि-

सगत्योः। क्षियति। षू प्रेरणे। सुवति। सविता। कॄ विक्षेपे किरति। चकार। चकरतुः। चकरुः।

(सुबोधिनी-) गॄलोवा। गिरतेः रेफस्य लत्वं वा स्यात् स्वरे परे। वृङ्वृञ्-ॠदंतानां वेति वा इटो दीर्घः। गरिता, गरीता। स्पृशकृपादीनां वेति वा रकारः। छशषेति षत्वं ष्टुत्वं। स्प्रष्टा, स्पर्ष्टा कृषस्पृशेति वा सिः। अनिटो नामिवत इति वृद्धिः। अस्प्राक्षीत्। अस्पार्क्षीत्। पक्षे हशषांतादिति सक्। अस्पृक्षत्। प्रच्छ ज्ञीप्सायां। ज्ञातुमिच्छा ज्ञीप्सा। वुण्प्रत्यये प्रच्छकः। षिद्भिदामङिति भिदादित्वादङ्प्रत्यये संप्रसारणे च पृच्छा। ततो ञिर्डित्करणे इति ञ्यंतात् वुण्प्रत्यये तु पृच्छकः। ग्रहामिति संप्रसारणं। पृच्छति। ऋसंयोगादित्यकित्वान्नसंप्रसारणं। पप्रच्छतुः। स्वरांतादत्वत इति वेट्। पप्रच्छिथ, पप्रष्ठ। सृजिदृशोस्थपोवेति थपि वेट्। ससर्जिथ, राशेझसेदृशामिति रः। सस्रष्ठ। टुमस्जो शुद्धौ। द्वितोथुः। मज्जथुः। श्चुत्वेन सस्य शः। झशेजबाइति शस्य जः। मज्जति। मस्जिनशोरिति नुम् स्कोरिति सलोपः॥ मङ्क्ता। विच्छ तुदादिपाठसामर्थ्यादायप्रत्ययांतादपि अः नत्वम्। तेन विछायंतीति विछायतीत्यत्र वादीपोरिति नुम् विकल्पः। आयइत्यायप्रत्ययः। विछायति। आयादयोनपिवेति वा आयः। कासादिप्रत्ययादित्याम् यतइत्यलोपः। विच्छायांचकार। इषु भाष्यवार्तिकमतेऽनुदित्। गमांछइति छः। इच्छति। इषुसहेतिवेट्। एषिता, एष्टा। विश प्रवेशने। हशषांतादिति सक्। अविक्षत्। मृश आमर्शने। आमर्शनं स्पर्शः। कृषस्पृशमृशेति वा सिः कृषादीनांवेति वा रः। अम्राक्षीत्, अमार्क्षीत्, हशषांतादिति सक्। अमृक्षत्। रि पि नुधातोरितीयु्। रियति। पियति। ऋतइतीर किरति। ऋसंयोगादित्यकित्वाद्गुणः। चकरतुः। वृङ्वृञ्ॠदंतानामिति वेटोदीर्घः। करिता, करीता।

(तत्त्व०) गॄलोवेति। व्यवस्थितविकल्पोयं। तेन गल इति कंठे नित्यं विषे तु गर इत्यत्र न। प्रच्छ अथ कथं वक्तारं पृछकं श्रोतॄनिति। प्रच्छकमित्येव पाठ इति बहवः पृच्छक इतिपाठे तु भिदादेराकृतिगणत्वादङि पृच्छा तत्करोतीति ञ्यन्ताद्वुणि बोध्यं। विछ तुदादिपाठसामर्थ्यादप्रत्ययान्तादपि अतएव नत्वम्। तेन विच्छायती विच्छायन्तीत्यत्र वा दीपोरिति नुम्विकल्पः। केचित्तु तुदादि पाठादिदमेव विकल्पयन्ति तन्मते तुदादिपाठस्य केवले विच्छती विच्छन्तीत्यत्र चरितार्थत्वादाय् प्रत्ययान्तादवेव नत्वः। तेन विच्छायन्तीत्यत्र नित्यमेव नुम्। इषु अनुदित्पाठस्तु भाष्यवार्तिकसम्मतः। रियतीति रिअति इति स्थिते उपधाया लघोरिति गुणः प्राप्तो बहिरंगत्वान्निवारितः। तथाहि। इयु् अकारापेक्षत्वेनअंतरंगः। अल्पाश्रितत्वात्। गुणस्तु अकारातिवपेक्षत्वेबहिरंगः बह्वपेक्षत्वात्।

मू०— उपात्किरतेस्सुट्छेदेऽर्थे ॥

(सुबोधिनी-) उपात् किरतेः सुट्छेदेऽर्थे। उपोपसर्गात् परस्य किरतेः सुडागमः स्यात् छेदे वाच्ये नान्यत्र ॥

मू०– हिंसायाम्प्रतेश्च ॥ उपास्किरति। प्रत्यस्किरत्। रुजो भंगे। अरौक्षीत्। अरौक्ताम्। भुजो कौटिल्ये। भोक्ता। अभौक्षीत्। अभौक्ताम्। छुप स्पर्शे। छोप्ता। अच्छौप्सीत्। रुश रिश हिंसायाम्। रोष्टा। रोष्टारौ। अरुक्षत्। रेष्टा। अरिक्षत्। लिशगतौ। लेष्टा। अलिक्षत्। खिद परिघाते। मुंचादेर्मुम्। खिन्दति। खेत्ता। अखैत्सीत्। पिश् अवयवे। पिंशति। पेशिता ॥ इतिपम् ॥ जुषी प्रीतिसेवनयोः। जुषते। ओविजी भयचलनयोः। विजते।

(सुबोधिनी–) हिंसायांप्रतेश्च। उपात् प्रतेश्च किरतेः सुट्स्यात् हिंसायाम्। अड्व्यवधाने पि सुट् कात् पूर्व इति वक्तव्यं। उपास्किरत् उपचस्कार। उरोविदारंप्रतिचस्करे नखैरिति माघः। कर्म्मणिलिट्। लिश गतौ। हशषांतादिति सक्। अलिक्षत्। मुचादेरिति मुम्। खिंदति। अयं दैन्येपि दिवादौ रुधादौ च वर्त्तते। पिश् अवयवे। मुचादेरिति मुम्। पिंशति। अयं दीपनायामपि। त्वष्टा रूपाणि पिंशतु। दीपयत्वित्यर्थः ॥ इतिपं ॥ ओविजी। प्रायेणायमुत्पूर्वः। उद्विजते ॥

मू०– विजइट् ॥ विजेः परइडादिप्रत्ययोङित्। विजिता। ओलजीओलस्जी व्रीडे। लेजे। ललज्जे। पृङ् व्यायामे।

(सुबोधिनी–) विजइट्। विजेः परइडादिः प्रत्ययो ङित्। इह ओविजी तुदादिः रुधादिश्च गृह्यते न तु विजिर् पृथग्भावे इति जुहोत्यादिः व्याख्यानात्। पृङ् व्यायामे। प्रायेणायं व्याङ्पूर्व्वः ॥

मू०– अयकि ॥ ऋतो रिङ्भवत्यकारे प्रत्यये यकि च। नुधातोः व्याप्रियते। व्यापरिष्यते। व्यापृत। व्यापृषाताम्। मृङ् प्राणोत्सर्गे

(सुबोधिनी–) अयकि। निर्दिष्टत्वादृकारस्यैव रिङि सिद्धे ङकारग्रहणं व्यवधानार्थं। तेन येइति नदीर्घः ॥

मू०– म्रियतेर्लुङ्लिङोश्चतुर्ष्वेवात् ॥ म्रियते। ममार। ममर्थ। मृषीष्ट। अमृत। दृङ् आदरे। आद्रियते। आदद्रे। आदृषीष्ट। आदर्ता। आदृत। धृङ् अवस्थाने। ध्रियते। अध्रियत। लोपो ह्रस्वाज्झसे। अधृत ॥ इतितुदादयः ॥

(सुबोधिनी–) म्रियतेर्लुङ्लिङोश्चतुर्ष्वेवात्। मृङश्चतुर्षु लुङ्लिङोश्च परतः

आत्मनेपदं स्यादन्यत्र पम् । अयकीति स्ङि् नुधातोरितीय् । म्रियते । उरिति न गुणः । मृषीष्ट । हनृतः स्यप इतीट् । मरिष्यति । लोपोऽन्हस्वादिति सिलोपः । अमृत । शानप्रत्यये म्रियमाणः । दृङ् प्रायेणाङ्पूर्वः । तथाद्रियंते न बुधाः सुधामपि इति श्रीहर्षः । इत्यात् इतितुदादयः ।

(तत्त्वदीपिका-) कृतायामिहटीकायां लोकेशकरशर्मणा ।
मताभाष्यकृताभन्यातुदादिप्राक्रिया गता । इतितुदादयः ।

मू०- डुक्रीञ् द्रव्यविनिमये ॥ नाक्र्यादेः ॥ कर्तरिचतुर्षु । क्रीणाति ।

(सुबोधिनी-) डुक्रीञ् द्रव्यविनिमये । विनिमयो व्यतिहारः ॥ नाक्र्यादेः क्रीरादिर्यस्य स क्र्यादिस्तस्मात् ना प्रत्ययः स्यात् कत्रर्थेषु चतुर्षु ॥

(तत्त्वदीपिका-) डुक्रीञ् । विनिमयः परिवर्त्तः ना क्रयादेः क्री आदिर्यस्य स तथा तस्मात् ।

मू०- ईहसे ॥ नाइत्यस्याकारस्य ई ङिति हसे । क्रीणीतः ।

(सुबो०-) ईहसे । ङ्सिदुरितो ङितीत्यनुवृत्तं नातइतिच ॥

(तत्त्वदीपिका-) इहसे । नात इत्यनुवर्त्तते ।

मू०-- नातः ॥ नाइत्यस्याकारस्य लोपो ङिति स्वरे । क्रीणन्ति । क्रीणीते । चिक्रयिथ, चिक्रेथ । अक्रैषीत् । अक्रेष्ट । प्रीञ् तर्पणे कान्तौ च । पिप्रिये । श्रीञ् पाके । अश्रैषीत् । मीञ् हिंसायाम् । मीनातिमीनोतीत्यात्वम् । ममौ । मिम्यतुः । ममिथ, ममाथ । मासीष्ट । माता । अमासीत् । स्कुञ् आप्लुवने ।

(सुबोधिनी-) नातः ना आत इति छेदः । ङित्यदुरित्यतोङितीत्यनुवृत्तं ओर्म्मोरित्यतो लोपइति च ङिति हसे ईविधानात्परिशेषात्स्वरे इति लब्धं । ना इत्यविभक्तिकं । आतोंतादनतइत्यतोनातइत्यालोपे क्रीणते । नुधातोरितीय् । चिक्रिये । वृद्धिः । अक्रैषीत् । अक्रेष्ट । प्रीञ् तर्प्पणे कांतौच । कांतिः कामना । मीञ् मीनातिमिनोतीत्यात्वं । ममौ । नुधातोरितियः । मिम्ये । मीयात् । मासीष्ट । माता । मास्यति । मास्यते । अमास्यत् । अमास्यत । यमिरमिनमातामितीट्सकौ । अमासीत् । अमास्त ॥

(तत्त्वदीपिका-) नातः । न आत इति छेदः । नेत्यविभक्तिकं । षष्ठीनिर्दिष्टत्वेनान्त्यस्यैव स्यादात इत्युत्तरार्थं स्पष्टार्थमिहैव कृतं । हसे ईविधानात्परिशेषात्स्वर इति लभ्यत इत्याह स्वरेपरे । स्कुञ् । आप्लवनमुद्धरणम् ।

मू०- स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्योनुर्नाच ॥ स्कुनो-

ति। स्कुन्वन्ति। स्कुन्वीत। स्कुनुताम्। स्कुनाति। अस्कुनीत। चुस्कुविषे। अस्कौषीत्। अस्कोष्ट। स्तुम्भु स्कम्भु रोधने। एते पमंतः। वेःस्तभ्नादीनांसस्यषःस्यात्। विष्टभ्नोति विष्टभ्नाति। व्यष्टभ्नात्। वितष्टम्भ। वितष्टम्भतुः। विष्टुम्भ्नाति।

(सुबोधिनी-) स्तंभुस्तुंभुस्कंभुस्कुम्भुस्कुञ्भ्योनुश्नाच। स्तंभ्वादयश्चत्वारः सौत्राः सर्वेरोधनार्थाइत्येके। माधवस्तु प्रथमतृतीयौ स्तंभार्थौ द्वितीयो निष्कोषणार्थः चतुर्थोधारणार्थ इत्याह। सर्व्वे पमंताः नोलोपइति नलोपः। स्तभ्नोति स्तभ्नाति॥

(तत्त्वदी०-) स्तंभुः पमन्तइति पं परस्मैपदमस्त्येषामिति पमन्तः।

मू०--हसादानहौ॥ हसान्ताद्धातोर्नास्थाने आनस्स्याद्धौ परे। स्तुभान। स्कभान। अस्तुभत्। अस्तम्भीत्। युञ् बन्धने। युनाति। योता। पूञ् पवने।

(सुबोधिनी-) हसादानहौ। हसादिति धातोर्विशेषणं तेन तदंतलाभः। अतइत्यारंभसामर्थ्यात्संनिपातपरिभाषाया अप्रवृत्तेर्हेर्लुक्। स्तभान। इरितोवेति वाङः अस्तभत् अस्तंभीत्।

(तत्त्वदीपिका-) हसादानहौ। हसादिति धातोः विशेषणात्तदन्तलाभ इत्याशयेनाह। हसान्तादिति। येन नाप्राप्तिन्यायेन न पित्वादान एवायं नतु नोरपि। तेन पक्षेस्तभ्नुहीत्येव।

मू०-- प्वादेर्ह्रस्वः॥ कर्तरि चतुर्षु। पुनाति। अपावीत्। लुञ् छेदने। लुनाति। अलावीत् स्तृञ् आच्छादने। स्तृणाति। तस्तार। तस्तरतुः। स्तीर्यात्। स्तरिषीष्ट। स्तीर्षीष्ट। अस्तारीत् अस्तरिष्ट। अस्तीर्ष्ट। कॄञ् हिंसायाम्। कृणाति। चकरे। करिषीष्ट। कीर्षीष्ट। अकरिष्ट। अकरीष्ट। अकीर्ष्ट। पेसेरिटोनदीर्घः सीष्टादेश्च। वृञ् वरणे। वृणाति। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवरीष्ट। अवूर्ष्ट। धूञ् कंपने। धुनाति। दुधविथ दुधोथ। धविता, धोता। अधावीत्। अधविष्ट अधोष्ट। ग्रहउपादाने। गृह्णाति। गृहाण। जग्राह। जगृहतुः। ग्रहीषीष्ट। ग्रहीता। अग्रहीत्। अग्रहीष्ट। इत्यात्मे। शॄ हिंसायाम्। शृणाति।

(सुबोधिनी-) प्वादेर्ह्रस्वः। प्वादेर्ह्रस्वो भवति चतुर्षु परेषु ऋसंयोगत्यकित्वाद्गुणः। तस्तरतुः। ऋतइरितीर् य्वोर्विहसेइतिदीर्घः। स्तीर्यात

देश्चेतीटो न दीर्घः । स्तरिषीष्ट । वृङ्वृञ्ॠदंतात् सिस्योरिड्वा इति वेट् पक्षे उरिति गुणो न । ॠतइरितीर् । य्वोर्विहसेइति दीर्घः । स्तीर्षीष्ट । वृङ्वृञितिवेटोदीर्घः । स्तरिता, स्तरीता । पेसेरिटो न दीर्घः । अस्तारिष्टां । वृञ् पोरुरित्यर् य्वोर्विहसेइति दीर्घः । वूर्यात् । लुङि अवारीत् । पेसे रिति न दीर्घः । अवारिष्टां । आति तु । वृङ्वृञ्ॠदंतात् सिस्योरिति वेट् अवरिष्ट, अवरीष्ट । उरिति गुणो न पोरुरइत्यर् य्वोरितिदीर्घः । अवूर्ष्ट । धूञ् स्वरतिसूतीतिवेट् । दुधविथ, दुधोथ । स्तुसुधूञ्भ्यामितीट् । अधावीत् । ग्रहामिति संप्रसारणं । गृह्णाति । गृह्णीते । ईटोग्रहामितीटो दीर्घः । ग्रहीषीष्ट । ह्मयंतेति न वृद्धिः । अग्रहीत् । ईटोग्रहामस्मिन्सूत्रे एकस्वराद्ग्रहेर्विहितस्येटो दीर्घ इति वक्तव्यं । एकस्वरादितिकिं । जाग्रहिता । जाग्रहिष्यति इत्यादौ यङ्लुकि मा भूत् । ग्रहेर्विहितस्य किं । ग्राहितः । अत्रञेर्विहितत्वान्नदीर्घः । प्रकृतस्येटो ग्रहणात् ग्राहिष्यते इत्यादाविण्वदिटो न दीर्घः । इत्यात्पे ॥

सू०— शॄदॄप्रां ह्रस्वोवालिटि ॥ किति । शशरतुः शश्रतुः । शीर्यात् । शरिता । शरीता । पॄ पालनपूरणयोः । पृणाति । पपरतुः । पूर्यात् । वॄ वरणे । वृणाति । ववरतुः । वूर्य्यात् । भॄ भर्त्सनभरणयोः । भृणाति । मॄ हिंसायाम् । मृणाति । दॄ विदारणे । दृणाति । ददरतुः दद्रतुः । जॄ वयोहानौ । जृणाति । नॄनये । नृणाति । कॄ हिंसायाम् । कृणाति । ॠ गतौ । ऋणाति । अराञ्चकार ईर्यात् । अरिता । अरीता आरीत् । गॄ शब्दे । गृणाति । ज्यावयोहानौ । ग्रहांकिति च । जिनाति । जिज्यौ । जिज्यतुः जीयात् । अज्यासीत् । री गतिरेषणयोः रिणाति । रियतुः । ली श्लेषणे । लिनाति । ललौ । लिलाय । लिल्यतुः । ललिथ ललाथ । लिलयिथ लिलेथ । लाता । लेता । अलैषीत् । अलासीत् । व्लीवरणे । व्लिनाति । प्ली गतौ ॥ प्लिनाति । इतिप्वादयः ॥ व्री वरणे । व्रीणाति । भ्रीभयभरणयोः । भ्रीणाति । क्षीष् हिंसायाम् । एषां त्रयाणां वा ह्रस्वः । ज्ञा बोधने ज्ञाजनोर्जा । जानाति । जज्ञौ । ज्ञायात् । ज्ञेयात् । अज्ञासीत् । बन्ध बन्धने । बध्नाति । बबंधिथ । बबंध । बंद्धा । भंत्स्यति । अभांत्सीत् । सकारलोप आदेशइति नतु मात्राविधौ । तेन अबांद्धाम् । मन्थ विलोडने । मथ्नाति । मथान । श्रन्थ ग्रंथ संदर्भे । श्रथ्नाति ।

शश्रंथ । जग्रंथ । श्रन्थिग्रन्थीत्यादीनां वा लिटः कित्वम् । शश्राथ । जग्राथ । कुथ कुंथ संश्लेषणसंक्लेशनयोः । चुकोथ । चुकुन्थ । मृद मृड क्षोदे । मृदान । मृडान । गुध रोषे । गुध्नाति । कुष् निष्कर्षे । कुषाण ।

(सुबोधिनी-) शॄदॄप्रां ह्रस्वो वा लिटि । एषां वा ह्रस्वो लिट्येव । शश्रतुः । अन्यत्र ऋसंयोगादित्यकित्वाद्गुणः । शशरतुः । क्तिइति निषेधस्य क्रादिनियमेन बाधः । शशरिव, शश्रिव । ऋतइरिति ीर कृते य्वोर्विहसेइतिदीर्घः । शीर्यात् । वृङ्वृञ्जिति वेटो दीर्घः । शरिता । ऋणाति । ऋणीयात् । ऋणातु आर्णीत् । अरांचकार । ईर्यात् । अरिता, अरीता । अरिष्यति, अरीष्यति । अरिष्यत् । आरीत् ज्याग्रहामिति संप्रसाणं दीर्घस्य दीर्घइति दीर्घे कृते प्वादेर्ह्रस्वइति ह्रस्वः । जिनाति ॥ रिगतिरेषणयोः । रेषणं वृकशब्दः । लिलीङोरित्यात्वं वा । ललौ, लिलाय लेता । ल्वादयः । प्वादयोपि । क्षीष् षित्वादङ् । क्षिया । ज्ञाजनोर्जेति जादेशः । जानाति । बंध नोलोपइति नलोपः । बध्नाति । हसादानहावित्यानः अतइति हेर्लुक् । बधान । आदिजबानामिति भत्वं । भंत्स्यति । सावनिटोनित्यमिति वृद्धिः । अभांत्सीत् । तथोर्द्धइतितस्य धत्वं झसादिति सिलोपः । अबांद्धां । अभांत्सुः । श्रंथ विमोचनप्रतिहर्षयोरित्यस्य श्रंथ ग्रंथसंदर्भेइत्यर्थभेदात् श्रंथेः पुनः पाठः श्रंथिग्रंथीत्यादिना कित्वपक्षे एत्वपूर्वलोपावप्यत्रवक्तव्याविति हरदत्तादयः । श्रेथतुः । श्रेथुः । इदं कित्वं पितामपि इति सुधाकरमते श्रेथिथ । अस्मिन्नपि पक्षे णव् । शश्राथ । उत्तमेतु शश्राथ, शश्रथेति माधवः तत्र मूलं मृग्यं । मृद मृड, ड्रुत्वं । मृड्नाति । कुष निष्कर्षे । अंतर्गतस्य बहिर्निष्कासनं निष्कर्षः ॥

मू०-निरःकुषोवसादेरनपीड्वा ॥ निष्कोषिता, निष्कोष्टा । निरकोषीत्, निरकुक्षत् । क्षुभ् संचलने । क्षुभ्नादिषु न णत्वम् । क्षुभान । णभ तुभ हिंसायाम् । नभान । तुभान । क्लिशू विबाधने । क्लिश्नाति । अक्लेशीत् । अक्लिक्षत् । अश भोजने । अश्नाति । आशीत् । उध्रस् उञ्छे । ध्रस्नाति । उकारो धात्ववयवइत्येके । उध्रसाञ्चकार । औध्रासीत्, औध्रसीत् । विष विप्रयोगे । विषाण । वेष्टा । अविक्षत् । पुष् पुष्टौ । पोषिता । मुष् स्तेये । खच् खव हिठ भूतप्रादुर्भावे । खच्नाति ।

(सुबोधिनी-) निरःकुषोवसादेरनपीड्वा । निरूपूर्वात् कुषेः परस्य वसादिप्रत्ययस्य इड्वा स्यात् अनपि । इडभावे हशषांतादिति सक् । निरकुक्षत् । क्षुभ्नादिषु न

णत्वं । क्षुभ्नादिराकृतिगणः । णभतुभ भ्वादौ दिवादौ च । क्लिशू । नशादिति श्चुत्वनिषेधः । क्लिश्नाति । ऊदितोवेति वेट् । अक्लेशीत् । इडभावे हशषांतादिति सक् । अक्लिक्षत् । पुष् । अनिट्केषु पुष्यति यप्रत्ययेन निर्देशादयं सेडिति भावः । पोषिता । खच् खव् हिठ भूतप्रादुर्भावे भूतप्रादुर्भावः अतिक्रांतोत्पत्तिः । श्चुत्वं । खच्नाति ॥

मू०—खवोवस्यऔने ॥ खौनाति । हिठ्णाति । इतिपम् ॥ वृङ् संभक्तौ । वृणीते । वव्रे । वरिषीष्ट, वृषीष्ट ॥ अवरिष्ट, अवृत ।

॥ इतिक्र्यादयः ॥

(सुबोधिनी-) खवोवस्यऔने । खवेर्द्धातोर्वकारस्य औत्वं भवति नाप्रत्यये परे। परत्वादौत्वे हसांतत्वाभावात् हसादानह्यावितिन । खौनीहि । ष्टुत्वं हिठ्णाति ॥ इतिपं ॥ वृङ् संभक्तौ । संभक्तिर्भजनं । ऋदेरिति नेट् । वव्रषे । वृङ्वृञ्ऋदंतात्सिस्योरिड्वा । वरिषीष्ट,वृषीष्ट । वृङ्वृञ्ऋदंतानामिती वेटो दीर्घः । वरिता, वरीता । इडभावे लोपोन्हस्वादिति सिलोपः । अवृत । इत्यात । ॥ इतिक्र्यादयः ॥

(तत्त्वदी०-)खव । भूतप्रादुर्भावोतिक्रान्तोत्पत्तिः । खच्नातीति । स्तोश्चुभिश्चुरितिञ्नः ।

(तत्त्वदी०-) कृतायामिह टीकायां लोकेशकरशर्मणा ।
बाधनंदुष्टबुद्धीनामगमत्क्र्यादिसाधनं ।
इति क्र्यादयः ।

मू०—चुरस्तेये । चुरादेःस्वार्थेञिः ॥ चोरयति । चोरयेत । चोरयांचकार । चोर्य्यात् । अचूचुरत् । चिति स्मृत्याम् । चिन्तयति । चि अचिन्तत् । चुरादेर्ञिर्वेति केचित् । चिन्तति । यत्रि सङ्कोचने । यंत्रयति । अययंत्रत । ओलडि उत्क्षेपे । ओलण्डयति । ओलण्डति । ओलण्डांचकार । औललण्डत । औलण्डीत् । ओकारइदित्येके । लण्डयति । अललण्डत् । लण्डति । पीड् अवगाहे । पीडयति । पीडयते । या पीडांचक्रे ।

(सुबोधिनी-) चुरस्तेये । चुरादेःस्वार्थेञिः । चुर आदिर्यस्य स चुरादिस्तस्मात् चुरादेर्गणात् स्वार्थे ञिः स्यात् । उपधायालघोरिति गुणः । धातुत्वात् तिपूगुणायादेशौ । ञित्स्वरितेतउभे इत्युभयपदं । चोरयति, चोरयते । चोरयेत्, चोरयेत । चोरयतु, चोरयतां । अचोरयत्,अचोरयत । चोरयामास । चोरयांचक्रे । येरिति ञिलोपः । चोर्यात् । चोरयिषीष्ट । चोरयिता । चोरयिष्यति,चोरयिष्यते । अचोरयिष्यत्, अचोरयिष्यत । लुङि अचूचुरत्, अचूचुरत । चिति स्मृत्यां । चितति पठितव्ये इदित्करणं ञिप्रत्ययस्य पाक्षिकत्वे ज्ञापकं । सर्वेपि चुरादयो विकल्पेन ञिप्र-

त्ययं लभते इत्यर्थः। तेन चिंत्यात् चिंत्यते इत्यादौ नोलोप इत्यनेन लोपो न। यत्रि संकोचने। यंत्रेति पठितुं शक्यं। यत्तु इदित्करणाद्यंत्रतीति माधवेनोक्तं तच्चिंत्यं। यंत्रइत्यत्र नकारे पठितेपि नोलोप इति नलोपो न लभ्यते नकारस्यानुपधात्वात्। चिंत्यादित्यत्र तु चिंत स्मृत्यामिति नकारोपधपाठे नस्यलोपः स्यादेवेति तद्वारणाय क्रियमाण इकारस्तु ज्ञापक इति भावः। ओलडि उत्क्षेपणे। ओदित्करणं ल्वाद्योदितश्चेति धातोरव्यवहितस्य तकारस्य नत्वार्थमिति तद्बलात् नेडित्येके। ओदद्बलादिड्व्यवधानेऽपि नत्वमित्यन्ये दंडिनः॥

(तत्त्वदीपिका–) चुरादेः। चुर आदिर्यस्य स तस्मात्। तद्गुणसंविज्ञानोबहुव्रीहिः। अनुद्भूतावयवभेदसमुदायस्यान्यपदार्थत्वेनाश्रयणादेकवचनं। ननुधातोः प्रेरणे इत्यनेनैव चुरादेरपि स्यात्किमेनेनेत्यत आह स्वार्थे इति। ञिर्वेति। अयं भावः चिन्तेति पठितव्ये इदित्करणं ञेः पाक्षिकत्वे लिंगं तेन चिन्त्यादित्यादौ न लोपोन। यत्रि। यंत्रेति पठितुं युक्तं। इदित्वाभावेपि उपधाभूतनकाराभावे नलोपाभावात्।

मू०–भ्राजभासभाषदीपजीवमीलपीडांवोपधायाऱ्हस्वोऽङ्परेञौ॥ अपिपीडत्, अपीपिडत्। प्रथ् प्रख्याने। प्राथयति।

(सुबोधिनी–) भ्राजभासभाषदीपजीवमीलपीडांवोपधायाऱ्हस्वोऽङ्परेञौ। एषामुपधाया ऱ्हस्वो वा स्यात्। अङ् परो यस्मात् सोऽङ्परस्तस्मिन् ञि प्रत्यये परे। भ्राजृ भासृ दीप्तौ। भाष व्यक्तायां वाचि। दीपी दीप्तौ। जीव प्राणधारणे। मील निमीलने। पीड अवगाहे। ऱ्हस्वपक्षे लघोर्दीर्घ इति पूर्वस्य दीर्घः। अपीपिडत्। ऱ्हस्वाभावे अपिपीडत्। प्रथ प्रख्याने प्रख्यानं कथनं। स्वार्थे ञौ ज्ञपादिभ्यइति वक्ष्यमाणेन मित्वाभावान्न ऱ्हस्वः। प्राथयति॥

मू०–स्मृदृत्वरप्रथम्रदस्तॄस्पृशांपूर्वस्याऽदङ्परेञौ॥ इत्वापवादः। अपप्रथत्। पृथ प्रक्षेपे। पर्थयति।

(सुबोधिनी–) स्मृदृत्वरप्रथम्रदस्तॄस्पृशांपूर्वस्यादङ्परेञौ। एषां द्वित्वे पूर्वस्य आत्वं स्यात् अङ्परे ञौ। अङिलघावित्यस्यापवादः। स्मृ चिंतायां। दृभय। ञित्वरा संभ्रमे। प्रथ प्रख्याने। म्रद मर्दने। स्तृञ् आच्छादने। स्पृश् बाधनग्रंथनयोः॥

मू०–उपधायाऋवर्णस्यऋद्वाङ्परेञौ॥ इररारामपवादः। अपीपृथत्, अपपर्थत्। भक्ष अदने। अबभक्षत्। श्रण दाने। विश्राणयति। अशिश्रणत्, अशश्रणत। तड आघाते। अतीतडत्।

(सुबोधिनी–) उपधायाऋवर्णस्यऋद्वाङ्परेञौ। ऋवर्णोपधस्य धातोरुपधाया ऋद्वा स्यात् अङ्परेञौ। इररारामपवादः। धातोरुपधायाऋतइरिति अचीकृत-

दित्यादौ इर् प्राप्तः। अमीमृजदित्यत्र मृजेर्वृद्धिरिरस्यार् प्राप्तः। इतरेषामृदुपधानामुपधाया लघोरिति अपीपृथदित्यादावर् प्राप्त इति विवेकः। श्रण दाने। प्रायेणायं विपूर्वः। विश्राणनं वितरणं॥

(तत्त्वदीपिका-) इररामिति। दीर्घोपधे उपधाया ऋत इति इर्प्राप्तः। मृजेर्वृद्धिरित्यार्प्राप्तः लघुपद्धत्वेत्वर्प्राप्तः।

मू०-ज्ञपज्ञानज्ञापनयोर्मित्॥

(सुबोधिनी-)ज्ञपज्ञानज्ञापनयोर्मित्॥ ज्ञपधातुर्ज्ञाने ज्ञापने च ञिप्रत्ययं लभते मित्संज्ञकश्च। प्रतिपद्ज्ञप्तिचेतना॥

मू०-मितांह्रस्वः॥ मितां धातूनामुपधाया ह्रस्वो णौ। ज्ञपयति। अजिज्ञपत्।

(सुबोधिनी) मितांह्रस्वः। मइत् येषां ते मितः तेषां। घटादयो मित् इत्यादि मित्संज्ञकानां ग्रहणं।

(तत्त्वदीपिका-) मितां ह्रस्वः मइत् येषान्ते तथा तेषाम्।

मू०-यमवेष्टनेमित्॥ यमयति। अयीयमत्।

(सुबोधिनी-) यमवेष्टनेमित्। चुरादौ यमधातुर्वेष्टने मित् नतु भोजने। यमयति चंद्रं। परिवेष्टते परिवेषंकरोतीत्यर्थः। यमधातुश्चुरादौ घटादौ च घटादौ तु यच्छतिर्भोजनतोऽन्यत्र मिन्नेति भोजने एव मित्संज्ञकः। यमयति ब्राह्मणान्। भोजयतीत्यर्थः। अन्यत्र आयामयती। द्राघयाति। व्यपारयति वेत्यर्थः। जनीजृषित्यमंतत्वादेव सर्वार्थेषु मित्वे सिद्धे विशेषार्थं वचनम्॥

(तत्त्वदीपिका-) यमयति। परिवेष्टत इत्यर्थः।

मू०-चहचयपरिकल्पनेमित्॥ चहयति। अचीचहत्। चययति। अचीचयत्।

(सुबोधिनी-) चहचयपरिकल्कनेमित्॥ परिकल्कनं दंभः शाठ्यं च। अदंतेषु कथादिषु वक्ष्यमाणस्य तु अदंतत्वेनाग्लोपित्वान्नाङ्कार्यं। अचचहत्॥

(तत्त्वदीपिका-) परिकल्कने। परिकल्कनं दंभः शाठ्यं च। कत्थनमित्यन्ये।

मू०-रहत्यागेमित्॥ रहयति। अरीरहत्।

(सुबोधिनी-) रहत्यागेमित्॥ कथादेस्तु अररहत्॥

मू०-बलप्राणनेमित्॥ बलयति। अबीबलत्।

मू०-चिञ्चयने॥ मित्॥

(सुबोधिनी-) चिञ्चयनेमित्। रचनायां मिदयम्॥

मू०-चिस्फुरोर्णौवात्मम्वा॥

(सुबोधिनी-) चिस्फुरोर्ञ्रावात्वंवा। अनयोरात्वं वा स्यात् ञिप्रत्यये परे ॥

मू०-रातोञौपुक्॥ ऋधातोरादंतस्यच पुक् ञौ। चपयति। अचीचपत्। चययति। अचीचयत्। स्वार्थेञौ ज्ञपादिभ्योऽन्येमितोन। कृत संशब्दने।

(सुबोधिनी--) रातोञौपुक्। आच आश्चनयोः समाहारो रात् तस्य आत्वे पुकि ह्रस्वे। चपयति। आत्वाभावे चययति। स्वार्थे ञौ ज्ञपादिभ्योन्ये मितो न। तेन शमादीनाममंतत्वप्रयुक्तं मित्वं न। मुख्यमते पंच ज्ञपादयः। मतांतरे सप्त। कृत संशब्दने ॥

(तत्त्वदीपिका-) रातोञौ। आ च आश्च रात् तस्य रातः ऋइत्यनेनोभयोरपि ग्रहणं तेन ऋच्छंतमिति ऋच्छति वाप्रेरयतीतिविग्रहे अर्प्पयतीतिभवति। ज्ञपादिभ्य इति। सप्तभ्य इति मतान्तरं बोध्यं। तेन शमादीनाममन्तत्वप्रयुक्तं मित्वं न।

मू०-धातोरुपधायाऋतइर्॥ कीर्तयति। अचीकृतत्, अचिकीर्तत।

(सुबोधिनी-) धातोरुपधायाऋतइर्। ननु ऋतइर् इति सूत्रे धातोऋतइर् व्याख्याने सिद्धमिष्टं किमनेन सूत्रेणेति चेन्मैवं तथाहि सति ऋकारीयति इत्यत्रापि इरः प्रसंगः स्यात्। उपधाऋवर्णस्य ऋद्वेति पक्षे अङ्लिघौह्रस्व इति इत्वे कृते लघोर्दीर्घ इति दीर्घः। अचीकृतत्। पक्षेअचिकीर्तत्॥

मू०-आकुस्मादात्मनेपदिनः॥चित् सञ्चेतने। चैतयते। अचीचितत। दंशिदंशने। दंशयते। अददंशत। आकुस्मीयमात्मनेपदं ञिसन्नियोगेनैव। दंशति। न लोपो न संजिसाहचर्य्यात् भ्वादेरेव तत्र ग्रहणात्। तत्रि कुटुम्बधारणे। तन्त्रयते। कुटुम्वयते। अततन्त्रत अचूकुटुम्बत। अचुकुटुम्बत्। मत्रि गुप्तभाषणे। मन्त्रयते। शम लक्ष आलोचने। शामयते। लक्षयते। अशीशमत। अललक्षत। दिवु परिकूजने। देवयते। गॄ विज्ञाने। गारयते। अजीगरत। विद चेतनाख्याननिवासेषु। वेदयते। अवीविदत्।

(सुबोधिनी-) आकुस्मादात्मनेपदिनः। कुस्मनाम्नो वेति वक्ष्यते तमभिव्याप्येत्यर्थः। परगामिफलार्थमिदमात्मनेपदं। चित संचेतने। संचेतनं मूर्च्छाद्यवस्थानिवृत्युत्तरकालकं ज्ञानं। शम् लक्ष् आलोचने ननु निशामयतदुत्पत्तिमिति कथं संगच्छते। आकुस्मीयत्वादात्मनेपदे निशामयस्वेति रूपस्य सर्वसंमतत्वादिति। यदि शमु उपशमे इत्यस्मात् ञि प्रत्ययस्तर्ह्यमंतत्वान्मित्वे सति ह्रस्वेन भाव्यं। अत्राहुः।

स्वार्थण्यंतादस्माद्धातोः प्रेरणे इति ञि प्रत्यये निशामयेति रूपं जानीहि । नचार्थासंगतिरिति वाच्यम् । निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजिष्यते इति सिद्धांतात् । स्वार्थे ञौ ज्ञपादिभ्य इति मित्वनिषेधः । शामयते । विद चेतनाख्याननिवासेषु । "सत्तायां विद्यते ज्ञाने वेत्ति विंत्ते विचारणे ॥ विंदते विंदति प्राप्तौ श्यन्लुक्नम्शेष्विदं क्रमात् " ॥ १ ॥

(तत्त्वदीपिका–)शामयत इति आकुस्मीयत्वादात् । निशामय तदुत्पत्तिमित्यत्र तु निवृत्तप्रेरणात् प्रेरण इति ञौ बोध्यं । धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः ।

मू०–कुस्मनाम्नोवा॥ कुस्मेतिधातुः कुत्सितस्मयने अथवा कुस्मेति नाम । ततो ञिः। कुस्मयते । अचुकुस्मत् । कण निमीलने ।काणयति । अचीकणत्, अचकाणत् ।

(सुबोधिनी–) कुस्मनाम्नोवा । कुपूर्वात्स्मयतेर्डप्रत्यये टिलोपे समासे च कृते निष्पन्नं कुस्मेति नाम । कण निमीलने । एकनेत्रनिमीलने एवायं । शब्दस्वभावात् । काण्यादीनां कणरण भणेति सूत्रेण अङि लघौ ह्रस्व इति ह्रस्वो विकल्प्यते अचीकणत्, अचकाणत् ॥

(तत्त्वदीपिका–) निमीलने स्वभावादेकनेत्रस्यैव ।

मू०–नवगण्यामुक्तेभ्योहिंसार्थेभ्यःस्वार्थेञिः ॥ हिसि हिंसायाम् । हिंसयति । ज्ञानियोगे । आज्ञापयति । अजिज्ञपत् । भू मिश्रीकरणाचिन्तनयोः । भावयति । अबीभवत् । लोकृ लोचृ परिभाषणे ।

(सुबोधिनी) नवगण्यामुक्तेभ्यो हिंसार्थेभ्यः स्वार्थे ञिः नवगण्यामुक्ता हिंसार्थाः स्वार्थे ञिप्रत्ययं लभते । घातयतिहंतीत्येतौ समानार्थौ । भू मिश्रीकरणचिंतनयोः भावयतीति मिश्रीकरोति चिंतति वेत्यर्थः ॥

मू०–नरितः ॥ ऋदितः शासेश्वाङ्युपधाया ह्रस्वो न । अलुलोकत् । अलुलोचत् । धूञ् कम्पने ।

(सुबोधिनी–) नरितः । ऋइद्यस्य स रित् तस्य । शासु अनुशिष्टौ ॥

मू०–धूञ्प्रीञोर्नुक्ञौ ॥ धूनयति । अदुधूनत् । प्रीञ् तर्पणे प्रीणयति । अपिप्रीणत् । अथादन्ताः। कथ वाक्यप्रबन्धने । यतः । अल्लोपस्थानिवत्वेन न वृद्धिः कथयति ।

(सुबोधिनी-)धूञ्प्रीञोर्नुगागमः स्यात् ञिप्रत्यये । धूञ् कंपने । प्रीञ् तर्पणे । धूञ् धातुः स्वादौ क्र्यादौ तुदादौ चुरादौ च । स्वादौ ह्रस्वश्च । तथाच कविरहस्ये काव्ये।"धूनोति चंपकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तं। वायुर्विधूनयति चंपकपुष्परेणून् यत्कानने धवति चंदनमंजरीषु ।१। "अथादंताः।

वक्ष्यमाणेषु धातुषु अंत्यावयवोऽकारो विवक्षितो नतूच्चारणार्थ इत्यर्थः। कथ वाक्यप्रबंधे। यत इत्यल्लोपस्य स्थानिवद्भावान्नवृद्धिः। कथयति॥

(तत्त्वदीपिका-) कथ। अदन्तप्रयोजनमाह। अल्लोप इति।

मू०--अय्वृलोपिनोनाङ्कार्य्यम्॥ अचकथत्। वर ईप्सायाम् वरयति। अववरत्। गण संख्याने। गणयति। गणेः पूर्वस्य ईद्वाङ्परे चौ अजीगणत्। स्तनगदी देवशब्दे। स्तनयति। गदयति। अतस्तनत्। अजगदत्। पत गतौ। वा ञ्यन्तः। पतयति। पतति। पताञ्चकार। पतयांचकार। अपपतत्। अपतीत्। वादन्तइत्येके। पातयति। अपीपतत्। रचप्रतियत्ने। रचयति। सूत्र वेष्टने। सूत्रयति। असुसूत्रत्। मूत्र प्रस्रवणे। मूत्रयति। कल गतौ संख्याने च। कलयति। स्पृह ईप्सायाञ्च। स्पृहयति। अपस्पृहत्। भाम क्रोधे। भामयति। अबभामत्। सूच पैशून्ये। सूचयति। ऊन परिहानौ। ऊनयति। ञिनिमित्तः स्वरादेशो द्वित्वेकर्तव्ये स्थानिवत्। औननत्। अर्थङ् याचने। अर्थयते। आर्तथत। संग्राम युद्धे। अससंग्रामत्। अन्ध दृष्ट्युपघाते। अन्धयते। अन्धयति। आन्दधत्। अङ्क अङ्ग पदे लक्षणेच। आञ्चकत्। आञ्जगत्। ॥इतिचुरादयः॥

(सुबोधिनी-)अय्वृलोपिनाङ्कार्यं। अश्च इश्च उश्च आच तेषां समाहारोऽय्वृ अय्वृणो लोपो अस्यास्तीति अय्वृलोपी तस्य अइउऋलोपिनो धातोरङ् निमित्तं कार्यं न स्यात्। तत्किं। अङ्लिघौ-ह्रस्व इत्युपधा-ह्रस्वत्वं पूर्वस्येत्वं च लघोर्दीर्घ इति दीर्घः अङ्कार्यं। पतगतौ इति वा ञ्यंतः वाऽदंत इत्येके। आद्ये पतयाति। पताति। अनकस्वरत्वात्कासादिप्रत्ययादित्याम्। पतांचकार। पतइत्यल्लोपः। अपतीत्। द्वितीये तु। पातयति। अपीपतत्। स्तन गदी देवशब्दे। स्तनादेर्ण्यंतादित्नुरितीत्नुः। "स्तनयित्नुर्बलाहकः"। स प्रत्यये तु स्तनयिषति। रच। प्रातियत्ने। प्रतियत्नो गुणाधानम्। स्पृह ईप्सायां। आप्तुमिच्छा ईप्सा। भाम क्रोधे। अबभामदित्यत्राल्लोपस्य स्थानिवत्त्वात् चौ अङि लघौ ह्रस्व इति ह्रस्वो न। सूच पैशुन्ये। पिशुनो दुर्जनस्तत्कर्म पैशुन्यं लुङि असुसूचत्। ऊन परिहाने। ञिनिमित्तः स्वरादेशो द्वित्वे कर्तव्ये स्थानिवत्। ञिप्रत्ययो निमित्तं यस्य ईदृशः स्वरस्थाने आदेशः स स्थानिना तुल्यः स्थानिवद्भवति द्वित्वे कर्तव्ये। स्वरादेःपर इत्यनेन नशब्दस्य द्वित्वं। उत्तरखंडे यत इति अल्लोपः। औननत्। अर्थङ् याचने। कथादिषु उपधावृद्धिदीर्घपूर्वेत्वविरहेण भामप्रभृतीन ---ह्रस्वस्य निषेधेन

गृहमृगप्रभृतीनामुपधागुणस्य च व्यावर्तनेनादंतत्वं सार्थकं। इत्वदंतत्वे प्रागुक्तफलाभावात्। किमर्थमदंतत्वमुच्यते बोपदेवस्तु धातोर्नामिन इति वृद्धौ कृतायां रातोञ्ञौ पुकि अर्थापयते इति रूपमाह। शाकटायनस्तु कथादीनां सर्वेषां पुकमाह। तन्मते कथापयपि। गणापयतीत्यादि ॥ ॥ इति चुरादयः ॥

(तत्त्वदीपिका-)प्रयोजनान्तरमाह अग्लोपिन इति। अश्च इश्च उश्च आ च ते तथा तान् लोपयति स तथा तस्य अङ्कार्यं न द्वित्वे सतीकारदीर्घत्वादि न। गणसंख्याने संख्या निमित्तो ज्ञानविशेषः अंकपदं संख्यानमेकत्वादि तेन च तन्निष्ठः क्रियाविशेषो लक्ष्यते। लक्षणं चिह्नकरणं।

कृतायामिहटीकायांलोकेशकरशर्मणा।
इयंदशगणीपूर्णामाननीयामनीषिभिः।

इतिचुरादिः।

मू०--धातोःप्रेरणे॥ धातोः प्रयोजकव्यापारे ऽर्थे ञिप्रत्ययः। भवंतं प्रेरयति। भावयते। भावयाञ्चकार।

(सुबोधिनी-) धातोः प्रेरणे। प्रयोजकः प्रेरकः स च चेतनाचेतनसाधारण्ये न विवक्षितः स च क्वचित्सिद्धः क्वचित फलरूपः देवदत्तः पाचयति गमयतीत्यादौ सिद्धः। भिक्षां वासयति। संग्रामो वासयतीत्यादौ तु फलरूपः। तस्य व्यापारः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्त्तना प्रेरणमाज्ञेत्यर्थः। धातोर्ञिः प्रत्ययः स्यात्प्रेरणेऽर्थे। ननु यदि धातोः प्रेरणे ञिर्भवति लोट् च तदा ञेर्लोटश्च पर्यायता स्यात ततश्चेदानीं पृच्छतु भवानिति वक्तव्ये प्रच्छयतीति ञिप्रत्ययेनापि प्रयुज्येतेति चेन्मैवं। प्रयोज्यप्रवृत्त्युपहिता या प्रयोजकनिष्ठप्रवृत्तिः सा ञिप्रत्ययस्यार्थः। प्रयोज्यवृत्त्यनुपहितादप्रयोजकप्रवृत्तिस्तु लोडर्थ इत्युभयोर्भेदः। उक्तं च द्रव्यमात्रस्य तु प्रैषे प्रच्छादेर्लोट् विधीयते। सक्रियस्य यदि प्रैषः तदा स विषयो णिचः। भवंतं प्रेरयति भावयति। ञित्स्वरितेतउभे इत्युभयपदं। भावयते। भावयेत्। भावयेत। भावयतु। भावयतां। अभावयत्। अभावयत। कासादिप्रत्ययादित्याम्। भावयांबभूव। भावयांचक्रे। ञेरिति ञिलोपः। भाव्यात्। भावयिषीष्ट। भावयिता। भावयिष्याति। भावयिष्यते। अभावयिष्यत्। अभावयिष्यत ॥

(तत्त्वदीपिका-) दशगणीं निरूप्य स्वार्थञिप्रसंगात्प्रेरणार्थं ञिं दर्शयति। धातोः प्रेरणे। प्रेरणं चानेकविधं। प्रेरणाध्येषणा तत्समर्थाचरणभेदात्। तत्र भृत्यादेर्निकृष्टस्यप्रवर्तना प्रेषणमाज्ञेति यावत्। गुर्वादेः प्रवर्त्तनाध्येषणं प्रार्थनेति यावत्। तत्समर्थाचरणं तदनुकूलव्यापारकरणं तच्चानुमित्युपदेशानुग्रहोऽन्नदानादिरूपं। तत्र यस्यानुमितिं विनार्थे निवर्त्तते तस्य राजादेरनुमित्याप्रयोजकत्वं। वैद्यादेस्तूपदेशेन। पलायमानं निरोधेनानुग्रहेण चौरस्यान्नदानेन सर्वश्चार्यं प्रकरणादिलभ्यः। सर्वत्रानुगतप्रकरणमात्रं ञ्यर्थः। अथ पृच्छतु मां भवानित्यत्रास्त्विति चेदुच्यते। प्रयोज्यप्रवृत्त्युपहितप्रयुक्तिर्ञ्यर्थः। केवला तु लोडर्थ

इति। उक्तं च। द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते। सक्रियस्य यदा प्रैषस्तदा स विषयो णिच इति। अथ कथं भिक्षां वासयन्तीति कारीषो अग्निरध्यापयतीत्यत्र ञिः भिक्षादेश्च चेतनतया प्रेरणस्य च चेतनधर्मत्वात्। इति चेत् शृणु। अत्राप्यानुकूल्याचरणमेव प्रयोजकव्यापारित्वेनाध्यारोप्यते यतो भिक्षा अपि प्रचुरा व्यंजनवत्यश्चलभ्यमाना वा संप्रयुजते॥ तथाकारीषो अग्निरेकान्ते निर्वाते प्रज्वलितः शीतकृतमुपद्रवमध्यपविरो। धिनमपनयनाध्ययनेनकूलो भवतीति। ञित्वादुभयपदमाह। भावयतीत्यादि।

मू०—अङ्सयोःपूर्वस्योकारस्येत्वं पवर्गयलजकारेष्ववर्णपरेषु परतः। अबीभवत्। मूङ् बन्धने। मावयति। अमीमवत्। यावयति। अयीयवत्। अरीरवत्। लावयति। अलीलवत्। अजीजवत्।

(सुबोधिनी--) अङ्सयोःपूर्वस्योकारस्येत्वं पवर्गयलजकारेष्ववर्णपरेषु परतः। द्वित्वरूपस्य उत इत्वं भवति। अवर्णः परो येभ्यस्तेऽवर्णपरास्तेषु पवर्गयलजेषु परेषु। अवर्णपरेषु किं। बुभूषति। पवर्गयलजेषु किं। उर्णुनावषति। भू सत्तायां। एरङ्वृद्धिश्चेति अङि कृते द्वित्वे च भूभू इति जातं तत उतरस्य वृद्ध्याचादेशौ ततोऽङि लघौ ह्रस्वे कृते अङ्सयोरिति पूर्वस्येत्वं ततो दीर्घः। अबीभवत् अबीभवत। मूङ् बंधने। अमीमवत्। यु मिश्रणे। अयीयवत्। रु शब्दे। अरीरवत्। लूङ् छेदने अलीलवत्। जु गतौ। सौत्रोयं धातुः। अजीजवत्॥

मू०-- स्रवतिशृणोतिद्रवतिप्लवतिच्यवतीनामङ्सयोः॥ पूर्वस्येत्वं वाऽवर्णपरे धात्वक्षरे परे। असिस्रवत्, असुस्रवत्। अशिश्रवत्, अशुश्रवत्। अदिद्रवत्, अदुद्रवत्। अपिप्रवत्, अपुप्रवत्। अपिप्लवत्, अपुप्लवत्। अचिच्यवत्। अचुच्यवत्। नरितः। अशशासत्। अडुढौकत्।

(सुबोधिनी-) स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनामङ्सयोः। पूर्वस्येत्वं वाऽवर्णपरे धात्वक्षरे परे। स्रु गतौ। श्रु श्रवणे। द्रु गतौ। प्रुङ् च्युङ् गतौ। अक्षर शब्दोत्रावर्णपरः। अवर्णपरे किं शुश्रूषति। अपिप्रवत्, अपुप्रवत्। अचिच्यवत्, अचुच्यवत॥

मू०—ण्यन्तात्ञिः॥ चोरयति। अचूचुरत्।

(सुबोधिनी-) ण्यंतात् ञिः। स्वार्थ ण्यंताद्धातोर्ञिः स्यात् प्रेरणे। अपवादत्वाद्वृद्धिं बाधित्वा ञेरिति ञिलोपः। चोरयति। लुङि आङि लघोर्ह्स्व इति ह्रस्वः। लघोर्दीर्घ इति दीर्घः। नन्वग्लोपित्वाद् द्वयोरप्यसंभवः। अचुचोरदित्येवरूपं स्यात् उच्यते। अङ्गाक्षिप्तस्य ञेर्निऽमित्तत्वेनाश्रयणान्नासंभवः॥

(तत्त्व-) अचुचुरदिति अत्र ञेरिकारस्य लोपेपि अग्लोपिनोनाङ्कार्यमिति निषेधो न शक्यः। अङ्गाक्षिप्तस्य ञेर्निमित्तत्वेनाश्रयणात्। तथाहि ञिजातिरेका निमित्तत्वेनाश्रिता तथा च तस्या एकत्वाद्गोबलीवर्दन्यायेन न्याकृतेरन्यस्यादेर्ञ्लोपः। प्रतिषेधविषयत्वेनाश्रयत इत्यर्थः।यत्तु कैश्चिदुक्तं परत्वादादौ वृद्धौ सत्यामैकारस्य लोपेऽग्लोपित्वाभावादेवाङ्कार्यमिति तन्न। सर्वविधिभ्यो लोपविधिर्बलीयांस्तस्य सर्वसंमतत्वात्।

मू०-हनोघत्॥ हन्तेर्घदादेश इणूवर्ज्जिते ञ्णिति। घातयति। अजीघतत्।

(सुबो०-) हनोघत्। ञ्णिति णिति च प्रत्यये हंतेर्घदादेशः स्यात् इण्प्रत्यये णप्प्रत्यये च परे न। घातः घञ्। घातकः वुण्। ञ्णिति किं हंता॥

(तत्त्वदीपिका-) हनो घत् इति। हनोर्वदादेश इत्यादिव्याख्यानं तु प्राचानुरोधेन। व्याख्यानं त्वीदृशं॥ हश्च न्चानयोःसमाहारो हन् तस्य। घश्च त्चानयोः समाहारो घत् हनोघ्न इत्यतो हन इत्यनुवृत्तेः हन्तेर्हस्य घो ञ्णिति। तस्य तो न्च भवति ञ्णिति। न चेति निषेधादिणवर्जनं। एतेन हनोघ्न इत्यतो हनोनुर्वृतेर्घत्वसिद्धेश्चोभयं व्यर्थमित्युक्तिरपि परास्ता।

मू०-शदेरगतौतोञौ॥ शातयति। अशीशतत्। गतौ तु शादयति। अशीशदत्। रातोञौ पुक्।

(सुबो०-) शदेरगतौतोञौ। शदेर्ञौ तोंतादेशः स्यात् नतु गतौ। शातयति। गतौ तु गाः शादयति गोविंदः। गमयतीत्यर्थः। ऋगतौ। अस्य रातोञौपुगित्यंतरंगत्वादादौ पुक् पश्चाद्गुणः॥

मू०-पुकिगुणः॥ अर्पयति। आर्पिपत्। दापयति अदीदपत्। धापयति। अदीधपत्। स्थापयति।

(सुबोधिनी-) पुकि गुणः। पुगागमे परे गुणो भवति। अर्पयति। लुङि स्वरादेः पर इति पि इत्यस्य द्वित्वे ञेरिति ञिलोपे च आर्पिपत्। डुदाञ् दाने। अङि लघाविति ह्रस्वे इत्वे च कृते लघोर्दीर्घ इति दीर्घत्वं। अदीदपत्। डुधाञ् धारणादौ अदीधपत्। ष्ठागतिनिवृत्तौ। रातोञाविति पुकि स्थापयति॥

मू०-तिष्ठतेरङ्युपधायाइत्॥ अतिष्ठिपत्।

(सुबोधिनी-) तिष्ठतेरङ्युपधायाइत्। तिष्ठतेरुपधाया इत्वं स्यात् अङ्प्रत्यये स्थापीत्यत्रात इत्वं ततो द्वित्वादि। अतिष्ठिपत्। तिष्ठतेरिति तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः। तेन यङ्लुकि लुङि। अतिष्ठपत्॥

मू०-पादेर्युक्॥ पा शो च्छो सो व्हेञ् व्येञ् वेञां युक् ञौ। पायति।

(सुबोधिनी–) पादेर्युक्। एषां युक् णौ परे पा पाने। लुग्विकरणालुग्विकरणेतिपरिभाषया पारक्षणे इति नेह गृह्यते। तस्य तु पालयतीति रूपं। शो तनूकरणे। छो छेदने। षो अंतकर्मणि। व्हेञ् स्पर्द्धायां। व्येञ् संवरणे। वेञ् तंतुसंताने। पाययति॥

मू०– पिबतेरङिपूर्वस्येकारउपधालोपश्च॥ अपीप्यत्। शाययति। अशीशयत्। छाययति। अचिच्छयत्। साययति। असीषयत्। व्हाययति।

(सुबोधिनी–) पिबतेरङिपूर्वस्येकारउपधालोपश्च। पिबतेः पूर्व्वरूपस्य इत्वमुत्तररूपस्योपधाया लोपश्च स्यात् अङि परे। पाथीत्यत्र पाबशब्दस्य द्वित्वे हसादिः शेषेचेत्वमुत्तरत्राकारलोपः। इहाग्लृलोपित्वादलघुत्वाच इत्वदीर्घयोरप्राप्तावीत्वं। अपीप्यत्। शाययति। अशीशयत्। छाययति। ह्रस्वाभावान्न दीर्घः। अचिच्छयत्। शाययति। अशीशयत्। साययति असीषयत् व्हाययति॥

मू०– ह्वयतेर्ण्यन्तस्याङ्सयोस्सम्प्रसारणंयुगभावश्च॥ अजूहवत्। अजुहावत्। व्याययति। अविव्ययत्। वाययति अवीवयत्॥

(सुबोधिनी–) व्हयतेर्ण्यंतस्याङ्सयोःसंप्रसारणंयुगभावश्च स्यात् अङ्। सौ परौ यस्मात् सोऽङ् सपरस्तस्मिन् णौ परे व्हायीत्यत्र पूर्वसंप्रसारणे युगभावे च कृते हूइत्यस्य द्वित्वादि उत्तरत्र उवृद्धौ आवादेशे च कृते कणरणेति ह्रस्वे लघोरिति दीर्घे च अजूहवत्। ह्रस्वाभावे अजुहावत्॥

मू०– पातेर्णौलुक्॥ पालयति। अपीपलत्।

(सुबोधिनी–) पातेर्णौलुक्। लुगागमः स्यात्। रातोञोपुगिति पुकोपवादः। लुगागमस्य पुङ्निवृत्तिरेव फलं। पालयतीति रूपस्य पालरक्षणे इति धातुनापि सिद्धेः॥

(तत्त्वदीपिका–) पातेर्णौलुक्। कित्वादन्ते। पुकोपवादः।

मू०– प्रयोजकात्स्मयेर्णौस्मयतेरात्वम्॥

(सुबोधिनी–) प्रयोजकात्स्मयेर्णौस्मयतेरात्वं। स्मयजनकः प्रयोजकश्चेत्तस्मिन् आत्वं स्यात् णौ परे॥

(तत्त्वदीपिका–) स्मयतेरात्वं। स्मिङ् ईषद्धसने। एवं विस्मापयन्विस्मितमात्मवृत्तावित्यपपाठः। मनुष्य वाचेतिकरणादेवविस्मयात्। अन्यथाशानोपि स्यात्। ण्यन्तात्णौशतावा। विस्माययते मनुष्यवाक्। तया सिंहो विस्मापयन्निति।

मू०– भीस्मिभ्यांण्यन्ताभ्यामात् प्रयोजकाच्चेद्भयस्मयौ। जटिलो विस्मापयते। व्यसिष्मयत। भियःस्वरस्यात्वंवा। तदभावे षु-

क्नौ। हेतोश्चेद्भयम्। मुण्डो भापयते। भीषयते। अबीभषत। अबीभिषत।

(सुबोधिनी–) भीस्मिभ्यांण्यंताभ्यामात्मप्रयोजकाच्चेद्भयस्मयौ। भयस्मययोर्जनकः प्रयोजकश्चेत् ण्यंताभ्याम्भीस्मिभ्यामात्मनेपदं स्यात्। भिय आत्वं। तदभावे षुक् णौ। हेतोश्चेद्भयं भयजनकः प्रयोजकश्चेद्धियोवाऽकारः। आत्वाभावे षुगागमश्च स्यात् णौ। ञिभी भये इत्यस्यानेनात्वे रातोण्णाविति पुकि च मुंडो भापयते। भीषयते। जटिलो विस्मापयते। प्रयोजकाद्भयस्मयावित्युक्तेर्नेह। कुंचिकयैनं भाययति। विस्माययति॥

मू०– रुहेर्णौपोवा॥ रोपयति। अरूरुपत्। रोहयति। अरूरुहत्। कल्पयति। अचीक्लृपत्। अचक्लृपत्। वर्तयति। अवीवृतत्। अववर्तत्। मार्जयति। अमीमृजत्। अममार्जत्।

(सुबोधिनी–) रुहेर्णौपोवा। रुहेर्हस्य वा पकारः स्यात् णौ परे। रुह बीजजन्मनि प्रादुर्भावे च। रुप विमोहने इति दैवादिकस्य धातूनामनेकार्थत्वाज्जन्मनि वृत्तौ सूत्रं स्पष्टार्थं। कृपू सामर्थ्ये। उपधावर्णस्येति ऋद्भावे अङि लघौ ह्रस्व इति पूर्वस्येकारः लघोर्दीर्घ इति दीर्घत्वे कृपोरोल इति लत्वे च अचीक्लृपत्। वृतु वर्तने। अवीवृतत्। मृजूष् शुद्धौ। अमीमृजत्। पक्षे मृजेर्वृद्धिरिति वृद्धौ अममार्जत्॥

(तत्त्वदीपिका–) रुहेः। रुह बीजजन्मनि प्रादुर्भावे च। रुपमोहन इति दैवादिकस्यापि रोपयतीति धातूनामनेकार्थजन्मनि वृत्तिः। सूत्रं तु स्पष्टार्थं।

मू०– इङ्क्रीजीनामात्वंणौ॥ अध्यापयति। अध्यापिपत्।

(सुबोधिनी–) इङ्क्रीजीनामात्वंणौ। इङ् अध्ययने। डुक्रीञ् द्रव्यविनिमये। जि जये। अचिक्रपत्। अजीजपत्॥

(तत्त्वदीपिका–) इङ्क्रि॥ इङ अध्ययने। डुक्रीञ् द्रव्यविनिमये॥ जिजये।

मू०– अङ्सपरेणौ॥ इङो गाङ् वा। अध्यजीगपत्। क्रापयति। अचिक्रपत्। जापयति। अजीजपत्।

(सुबोधिनी–) अङ्सपरेणौ। इङो गाङ् वा। अध्यजीगपत। पक्षे स्वरादेःपर इति पिशब्दस्य द्वित्वे अध्यापिपत्॥

मू०–ह्रीव्लीरीक्नूयीक्ष्मायीनांणौपुक्॥ ह्रेपयति। अजिह्रिपत्। व्लेपयति। अविव्लिपत्। रेपयति। अरीरिपत्।

(सुबोधिनी–) ह्रीव्लीरीक्नूयीक्ष्मायीनांणौपुक्। एषां पुक्। णौ। ह्री लज्जायां व्ली वरणे। रीङ् क्षये। क्नूयी शब्दे उंदेच। क्ष्मायी विधूनने॥

(तत्त्वदीपिका-) ह्रेपयतीति। उपधायालघोरित्यत्रोपधाया इत्यस्य योगविभागाद्धातोरुपधाया नामिनोगुणो भवति। तेन गुरोरपि भवति।

मू०- यवयोर्वसेहकारेचलोपः॥ क्नोपयति। अचुक्नुपत्। क्ष्मापयति। अचिक्ष्मपत्।

(सुबोधिनी-) यवयोर्वसेहकारेचलोपः। यकारवकारयोर्लोपः स्यात् वम्प्रत्याहारे हकारे च परे॥

मू०- दुषेर्णौदीर्घः॥ दूषयति। अदूदुषत्।

(सुबोधिनी-) दुषेर्णौदीर्घः। दुष्यतेः उपधायाऊत्स्याद्णौ। दूषयति। दुष वैकृत्ये दिवादिः। णौ किं दोषः। वा चित्तविरागे। चितीसंज्ञाने इत्यस्मात् क्तः। चित्तं। विरागोऽप्रीतिता। दूषयति दोषयति वा चित्तं कामः। चित्तं दुष्यति स्नानसंध्यादौ विरतं भवति तत् प्रयुंक्ते इत्यर्थः॥

मू०- स्फायोवः॥ णौ। स्फावयति। अपिस्फवत्। अड्ड उद्यमे। अड्डयति। आड्डिडत्। अर्च पूजायाम्। अर्चयति। आर्चिचत्। उन्दी क्लेदने। उन्दयति। औन्दिदत्। उब्ज आर्जवे। उब्जयति। औब्जिजत्। द्रापयति। अदिद्रपत्।

(सुबोधिनी-) स्फायोवः। स्फायो वत्वं स्याद् णौ परे। अड्ड उद्यमे। स्वरादेः परइति डिशब्दस्य द्वित्वे आड्डिडत्। अर्च पूजायां। आर्चिचत्। एघ वृद्धौ- उपधाह्रस्वो द्वित्वात्प्रागेव भवति। ततो धिशब्दस्य द्वित्वे माभवानेदिधत्। उंदी क्लेदने। दिशब्दस्य द्वित्वे। औंदिदत्। उब्ज आर्जवे। उपदेशे दकारोपधोयं। द्वित्वविषये स्वरात्पर इति निषेधात् जिशब्दस्य द्वित्वेकृते ततो निपातनाद्दस्य बः। द्रा कुत्सायां। पूर्वंउपधाह्रस्वः ततो द्वित्वे इत्वे च अदिद्रपत्॥

मू०- रभिलभोःस्वरेनुमनत्वपूलिटोः॥ रंभयति। अररम्भत्। डुलभष् प्राप्तौ। लम्भयति। लम्भयते। अललम्भत्। ह्रापयति ह्रापयते। अजीहपत्। स्मारयति। स्मारयते। असस्मरत्। दारयति। दारयते। अददरत्।

(सुबोधिनी-) रभिलभोःस्वरेनुमनत्वपूलिटोः। स्वरे किं। आरब्धं। अप्लिटोः किं। रभते। रेभे। रभ राभस्ये। डुलभष् प्राप्तौ। अररंभत्। अललंभत्। हि गतौ वृद्धौ च। पूर्वाद्धिनोतेरिति सूत्रे नत्वङीत्युक्ते घत्वं न। अजीहयत्। स्मृ चिंतायां। अङि लघाविति ह्रस्वः। स्मृदृत्वरेति पूर्वस्यात्। असस्मरत्। दृ विदारणे। अत्रापि पूर्वस्यात्। अददरत्। तपरत्वसामर्थ्यादत्र लघोर्नदीर्घः॥

मू०— वेष्टिचेष्टयोःपूर्वस्यात्वंवाङि ॥ अविवेष्टत्, अववेष्टत्, अचिचेष्टत्, अचचेष्टत् । भ्राजृ दीप्तौ । भ्राजयति । भ्राजयते । अबिभ्रजत्, अबभ्राजत् ।

(सुबोधिनी-) वेष्टिचेष्टयोःपूर्वस्याऽत्ववाऽङि । अनयोः पूर्वरूपस्याऽत्वं वा स्यादङ्प्रत्यये परे । वेष्ट वेष्टने । चेष्ट चेष्टायां । भ्राजृ दीप्तौ । भ्राजभाशेत्यादिना वा उपधाह्रस्वः । अबिभ्रजत, अबभ्राजत ॥

मू०— कणरणभणश्रणलुपहेठिह्वेञ्बाणिलोटिलोठिलोपीनां वाह्रस्वोऽङि ॥ अचीकणत्, अचकाणत् । व्यशिश्रणत्, व्यशश्राणत् । अलूलुपत्, अलुलोपत् । अजीहिठत् । अजिहेठत् । अजूहवत्, अजुहावत् । अबीबणत् । अबबाणत् । अलूलुटत् । अलुलोटत् । अलूलुठत् । अलुलोठत् ।

(सुबोधिनी—) कणरणभणश्रणलुपहेठिह्वेञ्बाणिलोटिलोठिलोपीनांवाह्रस्वोऽङिः । कण निमीलने । रण शब्दे । भण शब्दे । श्रण दाने। लुप्लृ छेदने । हेठ विबाधायां । ह्वेञ् स्पर्धायां शब्देच । बाणिर्ण्यंतः शब्दे। लुट प्रतिघाते । लुठ । छेदने । लोपीति ण्यंतनिर्देशः । लापिते पाठान्तरं लप व्यक्तायांवाचि । अचीकणत्, अचकाणत । अरीरणत, अरराणत । अबीभणत अबभाणत । अशिश्रणत्, अशश्राणत् । अलूलुपत अलुलोपत । अजीहिठत्, आजिहेठत् ॥

मू०—स्वापेस्सम्प्रसारणमङि ॥ असूषुपत् ।

(सुबोधिनी-) स्वापेःसंप्रसारणमङि । ञिष्वप्शये । ण्यंतस्यास्य संप्रसारणं स्यादङि । इह संप्रसारणोत्तरं द्वित्वं । असूषुपत ॥

मू०—श्वयतेर्ण्यन्तस्यसम्प्रसारणंवाऽङ्सयोः ॥ अशिश्वयत् । अशूशवत् ।

(सुबोधिनी-) श्वयतेर्ण्यंतस्यसंप्रासारणंवाङ्सयोः । संप्रसारणंतदाश्रयंचकार्यंबलवदिति वचनाद्वृद्धेः पूर्वं संप्रसारणं अलघुत्वान्न दीर्घः॥ अशिश्वयत । अशूशवत

मू०—जिघ्रतेरुपधायाइद्वाङि ॥ अजिघ्रपत् । अजिघ्रिपत् ।

(सुबोधिनी-) जिघ्रतेरुपधायाइद्वाऽङि ॥ घ्रापीत्यस्यातइत्वं वा स्यात् अङि परे । ततो द्वित्वादि ॥

मू०—सिध्यतेरैहलौकिकेऽर्थेस्वरस्यात्वंञौ ॥ अन्नं साधयति । असीषधत् । अन्यत्र तपः सेधयति असीषिधत् ।

(सुबोधिनी-) सिध्यतेरैहलौकिकेऽर्थेस्वरस्यात्वंञौ । इह लोके भवः ऐहलौकिकः तस्मिन् ऐहलौकिकेऽर्थे सिध्यतेः स्वरस्यात्वं ञौ । अन्नं साधयति निष्पादयतीत्यर्थः । सिध्यतेरिति यनिर्देशात् भौवादिकस्याग्रहणं । ऐहलौकिकेकिं । तापसः सिध्यति । तत्त्वं निश्चिनोति । तत्त्वनिश्चयश्चात्मविषयगः स च परलोके उपयुज्यते । तं प्रेरयति तापसं तपः । लुङि असीषधत् । आत्वाभावे असीसिधत् ॥

(तत्त्वदीपिका-) सिद्ध्यतेरैहलौकिकेइति । इहलोकेभवऐहलोकिकस्तस्मिन्नित्यर्थः अन्नंसाधयतीतिनिष्पादयतीत्यर्थः । अन्यत्रपारलौकिके इत्यर्थः । सेधयति । तापसः सिद्ध्यति । हेयमुपादेयश्च तत्वतो ज्ञातुकामः प्रवर्तते तमपरः प्रयुंक्ते ज्ञानविशेषवन्तं करोतीत्यर्थः।

मू०-प्रजनेवीयतेरात्वंवाञौ ॥ वापयति वाययति वा गाःपुरोवातः । गर्भं ग्राहयतीत्यर्थः । चित्तविरागे । दुषेर्दीर्घोवाञौ । चित्तं दूषयति दोषयति वा कामः ।

(सुबोधिनी-) प्रजनेवीयतेरात्वंवाञौ । वीगतिप्रजनादौ आदादिकस्य यकानिर्देशः । अत्र केचिदुत्प्रेक्षयंति । वेत्तेरिति वक्तव्ये यकानिर्देशात् व्येञोन ग्रहणं तस्यापि यकि संप्रसारणे वीधातुना समानरूपत्वात् । अतो द्वयोरपि प्रजनेर्थे आत्वं वा स्यात् । तत्राऽत्वे तदभावे च यद्यपि व्येञः व्यापयतीति रूपंतुल्यं । पादेर्युगिति युकोऽपवादतया पुग्विधानात् । तथापि ण्यंतात् क्विपि व्याः व्यौ व्याः आत्वाऽभावपक्षे व्यैः । व्यायौ । व्यायः । इत्यस्तिविशेषः । सूत्रे विभाषाविधानसामर्थ्यात्पक्षेऽपिसंध्यक्षराणामित्यात्वं न प्रवर्त्तते । रातोञौपुगिति पुक् । वापयाति । आत्वाऽभावे वाययति गाः पुरावातः गर्भ ग्राहयतीत्यर्थः ॥

(तत्त्वदीपिका-) प्रजने वीयतेरिति । वीगतिव्याप्तिप्रजनकान्त्यसनखादनेष्वित्यस्य यकारनिर्देशः अन्यथादादिकत्वेन यकारासंभवः प्रजनो गर्भग्रहणं तत्रेत्यर्थः वापयतीतिगर्भं ग्राहयतीत्यर्थः ॥ वातेरनेकार्थत्वाद्यदि प्रजनोप्यर्थ उच्यते तदास्य वापयाति । वेत्तेस्तु वापयतीति सिद्धौ कृतमेतेन । चित्तविरागे । वाक्यभेदेन व्याख्येयं । दुषेर्दीर्घोञौ । दूषयाति ततश्चित्तविरागे वा । चित्तंविरागोऽप्रीतिता ॥

मू०-इणोञोवागमिः ॥ गमयति । अजीगमत् । आपयति । आपिपत् । घटादयोमितः । घट चेष्टायाम् । मितांन्हस्वः । घटयति । व्यथयति । अविव्यथत् । प्रथयति । अपप्रथत् । प्रसविस्तारे । प्रसयति । म्रद मर्दने । म्रदयति अमम्रदत् । स्खद विद्रावणे । स्खदयति । अचिस्खदत् । त्वरयति । अतत्वरत् । ज्वररोगे । ज्वरयति । नट नृतौ । नटयति । अनीनटत् । चक तृप्तौ । चकयति । लगे संगे।

लगयति । ज्वल दीप्तौ । प्रज्वलयति । स्मृआध्याने । स्मरयति । असस्मरत् । दॄभये । दरयति । अददरत् । नॄ नये । नरयति । अनीनरत् । श्रा पाके । श्रपयति । अशिश्रपत् ।

(सुबोधिनी-) इणोञ्गोवागमिः । गमिरबोधने इणोगमिः स्याद्वाञौ अबोधनेऽर्थे । अजीगमत् । बोधनेतु प्रत्याययति । प्रतिपूर्वस्येणोज्ञानार्थता । स्वरादेःपरइति ञिसहितस्य द्वित्वं । प्रत्यायियत् । घटादयोमितः । घटचेष्टायां । तत्फलंतुमितांन्हस्वइति ऱ्हस्वत्वं । मितां ण्यंतानामिणि णमि च वादीर्घइति च । त्वरत्यंताघटादयः । षितश्च । षित्प्रयोजनं तु षिद्भिदामङित्यङ् । आबतःस्त्रियामित्याप् । तेन घटा व्यथेत्यादि रूपसिद्धिः । विघटयति । कथं तर्हि कमलवनोद्घाटनंकुर्वते ये इत्यादि । शृणु । घटसंघातइति चौरादिकस्येदं व्यथ दुःखसंचलनयोः । अविव्यथत् । प्रथ प्रख्याने । अपप्रथत् । स्मृदॄत्वरेति पूर्वस्यात् । प्रस विस्तारे । अपिप्रसत् । अलघुत्वान्नदीर्घः। म्रद मर्दने । अमम्रदत् । स्मृदॄत्वरेति पूर्वस्यात् । स्खद विद्रावणे । अचिस्खदत् । ञित्वरा संभ्रमे । अतत्वरत् । स्मृदॄत्वरेति पूर्वस्यात् । घटादयः षितः । षित्वादङ् । त्वरा । ज्वर रोगे । आजिज्वरत् । इण् प्रत्यये अज्वरि, अज्वारि णम्प्रत्यये ज्वरंज्वरं, ज्वारंज्वारं । नट नृतौ । गात्रविक्षेपमात्रे नृतिः । अनीनटत् । चक तृप्तौ । अस्य तृप्तिमात्रे मित्वं । परस्मैपदंच । अचीचकत् । लग संगे । अलीलगत् । ज्वल दीप्तौ । अजिज्वलत् । ज्वलादेर्णइति णप्रत्यये ज्वालः । स्मृ आध्याने । उत्कंठापूर्वकं स्मरणमाध्यानं । दॄ भये । दॄणंतं प्रेरयति दरयाति भयादन्यत्र दारयति । केचित्तु घटादौ । स्मृदॄत्वरेतिसूत्रे च दॄइति दीर्घस्थाने ऱ्हस्वं पठंति तन्नेति माधवः। यद्ययंन्हस्वांतो भवेत् तर्हि शॄदॄपांन्हस्वोवेति सूत्रे ऱ्हस्वविकल्पविधायके दॄग्रहणमनर्थकं स्यात् । नॄ नये । नयादन्यत्र नारयाति । श्रा पाके । श्रपयति । विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयाति । स्वेदयतीत्यर्थः ॥

(तत्त्वदीपिका-) मितः । केके पुनर्मित इत्याह । घटादयइति ।

मू०- **मारणतोषणनिशामनेषुज्ञा** ॥ ज्ञपयति । कम्पने चलिः । चलयति शाखांवायुः । अन्यत्र शीलं चालयति । मदीहर्षदैन्ययोः । मदयति । हर्षदैन्ययोः किम् । मादयति । ध्वन शब्दे । मित् । ध्वनयति । अदिध्वनत् ।

(सुबोधिनी-) मारणतोषणनिशामनेषुज्ञा । एष्वेवार्थेषु जानातिर्मित् शम आलोचनइत्यस्मान्निष्पन्नत्वान्निशामनंचाक्षुषज्ञानामिति माधवः । ज्ञापनमात्रमित्यन्ये । निशानेष्विति पाठांतरं । निशानं तीक्ष्णीकरणं । पशुं संज्ञपयति मारयतीत्यर्थः । विष्णुं विज्ञपयाति संतोषयतीत्यर्थः । संज्ञपयाति रूपं । माधवमते दर्शयतीत्यर्थः ।

मतांतरेतु बोधयतीत्यर्थः। प्रज्ञपयति शरं तीक्ष्णं करोतीत्यर्थः। कथंतर्हि विज्ञापना भर्तृषु सिद्धिमेतीति। तज्ज्ञापयत्याचार्यइति च। अत्र ज्ञाधातोर्णौ मित्वाद्ध्रस्वेन भवितव्यमिति। शृणु। माधवमतेऽचाक्षुषज्ञाने मित्वाऽभावात् ज्ञापनमात्रेमित्वमिति मतेतु ज्ञानियोगे इति चौरादिकस्य धातूनामनेकार्थत्वाद्बोध्यं। कंपने चलिः चलयति शाखां। कंपनादन्यत्रतु शीलं चालयति। अन्यथाकरोतीत्यर्थः। हरतीत्यर्थइति स्वामी। सूत्रंचालयति क्षिपतीत्यर्थः। मदीहर्षदैन्ययोः। मदयति। हर्षयति ग्लेपयति वा दैन्यंकरोतीत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। ध्वन शब्दे। ध्वनयति घंटां। अन्यत्र ध्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः॥

(तत्त्वदीपिका-) मारण मारणं हिंसनं निशामनं चाक्षुषज्ञानं। तज्ज्ञापयतीत्याचार्यः विज्ञापना भर्तृषु सिद्धिमेतीत्यादौ ज्ञापनसामान्ये मित्वाभावान्न ह्रस्वः। कम्पने। चलयतीति शाखामिति शेषः। अन्यत्र शीलं चालयति अन्यथा करोतीत्यर्थः। मदयतीति। अन्यत्र मादयति चित्तविरागमुत्पादयतीत्यर्थः। ध्वनयतीति। घंटामिति शेषः। अन्यत्र ध्वानयति अस्पष्टाक्षरमुच्चारयतीत्यर्थः।

मू०-- जनीजॄष्क्नसुरञ्जोऽमन्ताश्च॥ जनयति। जरयति। क्नसु कौटिल्ये दीप्तौ च। क्नसयति।

(सुबोधिनी-) जनीजॄष्क्नसुरंजोऽमन्ताश्च। जनी प्रादुर्भावे। जॄष् वयोहानौ। क्नसु ह्वरणदीप्त्योः। त्रयोपि दिवादयः। रञ्ज रागे। दैवादिकोभौवादिकश्च। अमंताः क्रमिगम्यादयः। जॄषिति षिन्निर्देशाज्जीर्यतेर्ग्रहणं। जृणातेस्तु जारयति॥

(तत्त्वदी०-) अमंताश्च। अम् अन्ते येषान्ते शमादय इत्यर्थः।

मू०-- रञ्जेर्णौमृगरमणेनलोपः॥ रजयति मृगान्। अरीरजत्। अन्यत्र वस्त्रं रंजयति। अररञ्जत्। शमयति। दमयति।

(सुबोधिनी-) रंजेर्णौमृगरमणेनलोपः। रंजेर्नस्य लोपःस्यात् णौ परे आखेटेर्थे। रजयति मृगान्। मृगेतिकिं। रंजयति पक्षिणः। रमणादन्यत्रतु रंजयति मृगान् तृणदानेन। शमु दमु उपशमे। दैवादिकौ। अशीशमत्। अदीदमत्॥

(तत्वदीपिका-)रंजेर्णावित्यादि। मृगरमणमाखेटः। मृगेति किं रंजयति पक्षिणः। रमणे किम्। रंजयति मृगान् तृणदानेन। संक्रामयतीति तु चित्तविरागइत्यतोवेत्यत्यनुवृत्तेर्व्यवस्थयाबोध्यं।

मू०--ज्वलह्वलह्मलनमामनुपसर्गाद्वा॥ ज्वलयति, ज्वालयति। ह्वल ह्मल चलने। ह्वलयति, ह्वालयति। ह्मलयति, ह्मालयति नमयति, नामयति। उपसर्गेतु। प्रह्वलयति।

(सुबोधिनी-) ज्वलह्वलह्मलनमामनुपसर्गाद्वा। ज्वल दीप्तौ। ह्वल ह्मल संचल-

ने इति त्रयाणां पूर्वं घटादौ पठितत्वात् नमेस्तु अमंतत्वान्नित्यं प्राप्ते विभाषेयं। उपसर्गेषु नित्यं मित्वं। प्रज्वलयति। कथंतर्हि। प्रज्वालयति उन्नामयतीति। घञंतात् नाम्नोञिर्डित्करणेइति ञौ बोध्यं। कथं संक्रामयति विश्रामयतीति च मान्तस्य सेटो न वृद्धिरिति वृद्धिनिषेधात्। घञि क्रमः श्रम इत्येव भवति। नतु क्रामः श्रामइति। पूर्वोक्तसमाधानस्यात्रासंभवात् पृथक् प्रश्नः। शृणु। घञंताभ्यां क्रमश्रमाभ्यां स्वार्थेऽणि क्राम श्राम शब्दौ स्वीकृत्य ताभ्यांञिर्डिदिति ञिप्रत्यये संक्रामयति। विश्रामयतीतिसिद्धं॥

(तत्त्वदीपिका—) अनुपसर्गाद्वेति। तेनोपसृष्टोमित्वमेव। प्रज्वालयत्युन्नामयतीति तु-बन्तात्करोतीति ञौ।

मू०—ग्लास्नावनुवमाञ्च॥ ग्लापयति, ग्लपयति। स्नापयति, स्नपयति। वानयति, वनयति। वामयति, वमयति।

(सुबोधिनी—) ग्लास्नावनुवमांच। अनुपसर्गादेषां मित्वं वा। आद्ययोरप्राप्ते वनेर्घटादित्वात्प्राप्ते वमेरमंतत्वाच्च प्राप्ते विभाषा। ग्लापयति, ग्लपयति। स्नापयति, स्नपयाति। वानयति, वनयति। वामयति, वमयति॥

मू०—नकम्यमिचमाम्॥ कामयति। अम गत्याम्। आमयति। आमिमत्। चामयति।

(सुबोधिनी—) नकम्यमिचमां। अमंतत्वात्प्राप्तं मित्वमेषां न स्यात्॥

मू०—शाम्यतिर्दर्शनेमिन्न॥ निशामयति रूपम्।

(सुबोधिनी—) शाम्यतिर्दर्शनेमिन्न। निशामयति रूपं। अन्यत्र प्रणयिनो निशमय्य वधूः कथाः। कथं तर्हि निशामय तदुत्पत्तिं विस्तराद्गदतो ममेति। शृणु। शम आलोचने इति चौरादिकस्यैव। धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः। यथा शाम्यतिर्निशामयतीत्यादौ दर्शने प्रयुज्यते। तथा चुरादिः शमधातुरपि श्रवणे भविष्यतीति॥

(तत्वदीपिका—)दर्शने मिन्नेति। निशामयतदुत्पत्तिमित्यादि तु शमलक्षआलोचन-इत्यस्य धातूनामनेकार्थत्वाच्छ्रवणार्थितापि।

मू०—यच्छतिर्भोजनतोऽन्यत्रमिन्न॥ आयामयति। भोजनेतु। यमयति विप्रान्।

(सुबोधिनी—) यच्छतिर्भोजनतोऽन्यत्र मिन्न। यम उपरमेइत्ययंधातुर्भोजने मित्। अन्यत्र तु न। आयामयति। द्राघयति। व्यापारयति वेत्यर्थः। भोजने तु यमयति ब्राह्मणान्। भोजयतीत्यर्थः॥

(तत्त्वदीपिका—) आयामयति। द्राघयति व्यापारयाति वेत्यर्थः। भोजनेतु यमयति विप्रं भोजयतीत्यर्थः।

मू०–स्खदिरवपरिभ्यांमिन्न ॥ अवस्खादयति । परिस्खादयति । ईर्ष्य अक्षान्तौ । ईर्ष्ययति ।

(सुबोधिनी–) स्खदिरवपरिभ्यांमिन्न । घटादित्वात्प्राप्तं मित्वं न । अवाचिस्खदत् ॥

मू०–ईर्ष्यतेस्तृतीयोद्विः ॥ तृतीयोहसएकस्वरोवा । ऐर्ष्यियत् । अङितु । स्वरादेःपरः । ऐर्षिष्यत् । द्वितीयपक्षे सान्ते ईर्ष्यिषिषति । तृतीयएकस्वरपक्षे सान्ते प्रवर्तते । ण्यन्तेतु । तृतीयएकस्वराभावादित्यर्थः । इतिण्यन्तप्रक्रिया ॥

(सुबोधिनी–) ईर्ष्यतेस्तृतीयोद्विः । तृतीयव्यंजनस्येति पक्षे सस्वरस्य यकारस्य द्वित्वं । ऐर्ष्ययत् । तृतीयैकस्वरस्येतिपक्षे तृतीयाभावेन प्रकृतवार्तिकाऽप्रवृत्तेः । स्वरादेः परइति द्वित्वे षकार एव पूर्व श्रूयते हसादिःशेषात् । ऐर्षिष्यत् । तृतीयहसपक्षे षस्य द्वित्वं वारयितुमिदं । तृतीयैकस्वरस्येति पक्षे तु स्वरादेः परइत्यस्यापवादत्वेन सांते प्रवर्तते ॥ ॥ इति ण्यंतप्रक्रिया ॥

(तत्वदीपिका–) ईर्ष्यतेरिति । तृतीयः कः इत्याकांक्षायांमतभेदेन व्याचष्टे । तृतीयो हसः । स्वरसहित इत्यर्थः । अस्मिन्पक्षे षस्य न द्वित्वं । मतान्तरमाह । एकस्वरोवेति । तृतीय इत्येव । इर्ष्यतेर्यस्तृतीय एकस्वरः स द्विर्वाच्य इत्यर्थः । अत्र पक्षे सान्तेईर्ष्यिषयतीति सस्य द्वित्वं । आद्यपक्षे ईर्ष्यिषिषयतीति सान्तेपि रूपद्वयं । ईर्ष्यतेः सेपि सयोर्वाद्वित्वमिति । द्वितीयव्याख्यायां ण्यंतादाङि द्वितीयस्य द्वित्वे हसादिशेषेण पूर्वत्र षस्यैव श्रवणात्तृतीयाभावेनैतद्वार्त्तिकाप्राप्ते । ऐर्ष्ययदिति । प्रथमपक्षे । ऐर्षिष्यदिति तु द्वितीयपक्षे एतद्बीजं तूक्तमेव । अत्र पण्डिताः क्वचित्तु ऐर्ष्यिष्यदिति षकारादेरपि द्वित्वमुद्ध्रियते तद्भ्रांतप्रक्षिप्तत्वादुपेक्ष्यं तस्मादैर्ष्ययदित्येकमेवात्र रूपं साधनीयं नत्वैर्ष्यिष्यदिति ण्यन्ते तृतीयस्यैकाचोः संभवादित्याहुः । तत्स्वमतिभ्रमोद्भावनायेति मन्यामहे ॥ तथाहि ण्यन्तेद्वितीयव्याख्यायां तृतीयस्यैकाचोऽसंभवात् द्वितीयद्वित्वंकेननिधार्य्यमिति । स्वयमेवोहनीयमितिदिक् । निवृत्तप्रेरणात्धातोर्णौकेवलेन तुल्योऽर्थः तेन प्रार्थयन्ति शयनोत्थितमित्यादिसिद्धं ।

कृतायामिहटीकायांलोकेशकरशर्मणा ।
बाधनं दुष्टबुद्धीनामगमण्ण्यन्तसाधनं ।
इतिण्यन्तप्रक्रिया ।

मू०–इच्छायामात्मनः सः ॥ धातोरात्मनः इच्छायांसप्रत्ययो भवति ।

(सुबोधिनी–) इच्छायामात्मनःसः । इच्छायाः क्रियारूपत्वेन कर्त्तारं विनाऽ-

नुपपन्नत्वात् कर्तुराक्षेपात् इच्छाकर्त्ता इष्यमाणं वस्तु यदि स्वसंबंधित्वेनैव इच्छति तदा धातोः सप्रत्ययइत्यर्थः। तेन शिष्याणां पठनमिच्छति गुरुरित्यादौ सो न॥

(तत्त्वदीपिका–) इच्छायामात्मनः सः। धातोरित्यधिकारात्। इष्टिरिच्छा इषेरिच्छेत्यत एव निपातनात् आत्मशब्दोत्र स्ववाची। न तु चेतनद्रव्यवाची। आत्मन इत्यस्य व्यर्थपातात्। इच्छायां आत्मकर्तृकत्वाव्यभिचारात्। तच्चेदिष्यमाणमिच्छाकर्तृसंबंधि भवति। आङ्भुवि कर्मणीत्यतः कर्मणीत्यनुवर्त्य पंचम्या विपरिणम्य कर्मणो धातोरिति सामानाधिकरण्येन व्याख्येयं॥ इच्छायां किं कर्तुं याति। आत्मनः किं शिष्याणां पठनमिच्छति गुरुः। स्वसंबंधित्वं वेच्छायाः साक्षादेव तेन शिष्याणांस्वसंबंधित्वेपि न। धातोः किं प्रतिष्ठासते इत्यत्र प्रसहितस्थाधातोर्माभूत्तथा सत्यड्द्वित्वयोर्वैषम्यं स्यात्। कर्मणः किं गमनेनेच्छतीति करणान्माभूत्। यत्तु वासुदेवेन व्याख्यातं। इच्छा चेत्स्वस्वसंबंधिनीति। तन्न। शिष्याणांपठनामिच्छतिगुरुरित्यत्रातिव्याप्तेरनिवारणात्। तथाहि। अत्रपठनस्यधात्वर्थत्वेत्संबंधिन्याइच्छायाः सत्त्वात्

मू०–द्विश्च॥ आत्मनः भवितुमिच्छति। बुभूषाञ्चकार। अबुभूषीत्।

(सुबोधिनी–) द्विश्च। सप्रत्ययांतस्य धातोर्द्वित्वं स्यात्। भवितुमिच्छति कर्म्मनियतत्वादिषुकर्मेति लब्धं। धातोः प्रत्ययविधानात् तदर्थत्वं लब्धं। तेन इषिकर्म्मार्थवाचकाद्धातोरिच्छायां सप्रत्ययः स्यात्। तुम् तु स्वार्थिकः साध्यावस्थांक्रियामाह। स च लौकिके वाक्ये प्रयुज्यते। केवलस्य धातोः प्रयोगानर्हत्वात्। अलौकिके तुधातुमात्रं प्रयुज्यतेऽतः तुमः कथं लोप इति नो शंक्यं। अत्रात्मशब्दस्तु स्वशब्दस्य पर्यायः। संबधसामान्ये षष्ठी। आत्मनः स्वस्येत्यर्थः। स्वशब्दे हि इषिकर्तैव गृह्यते॥

(तत्त्वदीपिका–) भवितुमिच्छतीति। साध्यावस्थायाः क्रियावाचकस्य तुमः स्वार्थत्वेनलौकिकएववाक्यप्रयोगः। केवलस्यधातोः प्रयोगानर्हत्वात्। नत्वलौकिकेपितेनतुमः कथंलोपइतिनाशंकनीयं। द्विश्चेत्यतोद्विरित्यनुवृत्तंभिन्नंवाक्यंतेनसप्रत्ययप्रकृतिभूतस्यधातोर्नेद्वित्वं किन्तुसांतस्यतथाचप्रतीषिषतीत्यादि सिद्धं।

मू०–वुस्से॥ उवर्णान्तादवर्णांताद्ग्रहिगुहिभ्याश्च परस्य सस्य नेट्।

(सुबोधिनी–) वुः से। उश्च आचेति वृ तस्मात वुः। सौत्रं पुंस्त्वं। ऋवर्णोवर्णाताभ्यां ग्रहिगुहिभ्यां च सस्य नेट्। गृहेर्नित्यं प्राप्ते गुहेर्विकल्पेन प्राप्ते निषेधोयं। भू सत्तायां। सप्रत्यये द्वित्वेच ह्रस्वे षत्वे च बुभूषति॥

(तत्त्वदीपिका–) वुःसेः। उश्चआचवृत्तस्मात्। सौत्रंपुंस्त्वम्।

मू०–नाऽनिटिसे॥ इङ्वर्जितेसप्रत्ययेगुणो न ई दीर्घः।ऋतइर्।तितीर्षति। जुघुक्षति। चिकीर्षति। चिचीषति। चिकीषति। जिगीषति। यस्से। पिपक्षति। पिपासति। मुमूर्षति।

(सुबोधिनी—) नाऽनिटि से। न इट् यस्य सोऽनिट् तस्मिन् से इत्यस्य विशेषणं। बुभूषेत्। बुभूषतु। अबुभूषत्। कासादिप्रत्ययादित्याम्। बुभूषांचकार। बुभूष्यात्। सिसतासोस्थपामितीट् बुभूषिता। बुभूषिष्यति। अबुभूषिष्यत्। अबुभूषीत्। तॄ प्लवनतरणयोः। ऋत इर्। इतीर्। य्वोर्विहसे इति दीर्घः। तरितुमिच्छति तितीर्षति। गुहू संवरणे। सप्रत्यये द्वित्वे च होढ इति ढत्वं आदिजबानामिति घत्वं। षढोःकस्से इति कत्वं किलात्षःस इति षत्वं। जुघुक्षति। सेदीर्घः स्यान्तस्य धातोर्दीर्घः स्यात् सप्रत्यये। आदौ दीर्घस्ततः इर्। चिकीर्षति। चिनोतेः सणाद्यौ किर्वेति किः। चिकीषति। चिचीषति। सपरोक्षयोर्जिर्गिरिति गिः सेदीर्घ इति दीर्घः। जिगीषति। पूञ् पवने। पुपूषति। वुःसे इतीड् न। डुपचष् पाके। पक्तुमिच्छति पिपक्षति। यःसे इति पूर्वस्येकारः। पा पाने। पातुमिच्छति पिपासति। मॄ हिंसायां। पोरुरित्युर् य्वोर्विहसे इति दीर्घः। मुमूर्षति। पॄ पालनादौ। पुपूर्षति। भृ भर्त्सनभरणयोः। बुभूर्षति॥

(तत्त्वदीपिका) नानिटि नइड्यस्मिन्सतथातस्मिन्। सेइत्यस्यविशेषणं। अपित्तादिर्ङिदित्यनेनङित्त्वेसिद्धेनियमार्थमिदं। अनिटएवङित्त्वंयथास्यात्। चिकीर्षतीति॥ आदौदीर्घस्ततः इर्। शिक्षतीति। शक्तुमिच्छतीतिवाक्येस्वरस्यसादेशपूर्वलोपसलोपषत्वानि।

मू०—रुदविदमुषग्रहिस्वपिप्रच्छिभ्यःसःकित्॥ रुरुदिषति। विविदिषति। मुमुषिषति। होढः। आदिजबानामिति षढोःकःसे। ग्रह उपादाने। ग्रहीतुमिच्छति जिघृक्षति। सुषुप्सति।

(सुबोधिनी—) रुदविदमुषग्रहिस्वपिप्रच्छिभ्यःसःकित्। रुदसाहचर्याद्विदेरेव ग्रहणं रुदविदमुषाणां त्रयाणामिवर्णोपधादिति विकल्पे प्राप्ते ग्रहिस्वपिप्रच्छीनां तु सस्य कित्वस्याऽप्राप्तौ वचनं। अत्र गुणाभावः संप्रसारणं च कित्वस्य फलं। ग्रहामिति संप्रसारणं। ग्रहीतुमिच्छति जिघृक्षति। ञिष्वप् शये। यजांयवराणामिति संप्रसारणं सुषुप्सति॥

मू०—कॄगॄदृधृप्रच्छिभ्यःसस्येट्॥ चिकरिषति। जिगरिषति। जिगलिषति। दिदरिषते। दिधरिषते। पिपृच्छिषति। अत्तुमिच्छति जिघत्सति।

(सुबोधिनी—) कॄगॄदृधृप्रच्छिभ्यःसस्येट्। कॄ हिंसायां। गॄ निगरणे। दृङ् आदरे। धृङ् अवस्थाने। एतौ तुदादौ। प्रच्छ ज्ञीप्सायां। एभ्यः सप्रत्ययस्येट्। चिकरिषति। वुःसेइति निषेधे प्राप्ते विधानं। इह वृङ्वृञ्ऋदंतानामितीटो दीर्घो नेष्टो भाष्यकारेणानुक्तत्वात्। जिगरिषति। जिगलिषति। गिरतेः स्वरे रस्य लो वेति वा लः। आदनुदात्तेत्यात्मनेपदम्। दिदरिषते। दिधरिषते कथमुद्दिधीर्षुरिति

औवादिकयोर्धृङ्धृञोरिति ग्रहाण । शेदीर्घ इति दीर्घे ऋत इरितीर् य्वोर्विहसे इ- तिदीर्घे उद्दिघीर्षुः । ग्रहामिति संप्रसारणं रुदविदेति सस्य कित्वात्पिपृच्छिषाति । अद भक्षणे । सिसयोरदेर्घस्लृलिटितुवेति घस् । नैकस्वरादनुदात्तादिति नेट् । स- स्तोऽनपीति सस्य तकारः । अत्तुमिच्छति जिघत्साति ॥

मू०-हनिङोःसेदीर्घः ॥ जिघांसति ।

(सुबोधिनी-) हनिङोस्सेदीर्घः । पूर्वाद्धतेर्हस्य घत् इति घत्वं । जिघांसति सूत्रे स्वरादेशस्य गमेर्दीर्घ इति वक्तव्यं। तेन गच्छतेर्न दीर्घः । जिगंस्यते। समोग- मृच्छीत्यात् संजिगंसते । तेन इण्इक्इङां स्थाने योगमिस्तस्य दीर्घः स्यात् । इ- णिकोस्तु कर्मोक्तौ जिगांस्यते अधिजिगांस्यते । इत्यादि । अत इङ्स्थाने उक्तव्याख्येयं ॥

मू०-इङस्सेगम् ॥

(सुबोधिनी-) इङःसेगम् । इङो गामिः स्यात्सप्रत्यये । इङ् अध्ययने ॥

मू०-सान्तात्पूर्ववदात् ॥ अधिजिगांसते ।

(सुबोधिनी-) सांतात्पूर्ववदात् । सप्रत्ययात्पूर्वो यो धातुस्तेन तुल्यं सांताद- प्यात्मनेपदं स्यात् । तेन ङित्वादात्मनेपदं । हनिङोरिति दीर्घः । अधिजिगांसते ॥

मू०-गमेःसस्येड्नाति ॥ जिगमिषति ।

(सुबोधिनी-) गमेःसस्येड्नाति । आतिकिं इण् गतौ । जिगांस्यते ॥ क- र्म्मण्यात् । यःसे इति पूर्वस्यात इत् षत्वं । जिगमिषति ॥

मू०-इस्सेअपिद्दाधारभलभशकपतपदामिमीमाङ्मेङां । स्व- रस्येस् । अनिटिसे परे पूर्वस्य च लोपः । दित्सति । धित्सति । रभ राभस्ये । स्कोराद्योश्च । खसेचपाझसानाम् । रिप्सते । लिप्सते । शिक्षति । पित्सते ।

(सुबोधिनी-)इस्सेअपिद्दाधारभलभशकपतपदामिमीमाङ्मेङां । एषां स्वरस्येस् स्यात् पूर्वस्य च लोपः आनिटि से । दैप् शोधने । दाप् लवने । आभ्यां विना । दाण् दाने भ्वादौ पं । देङ् पालने भ्वादावात् । डुदाञ् दाने ह्वादावात्पे । दो अवखंडने दिवादौ पं । एषां दारूपं । धेट् पाने भ्वादौ पं डुधाञ् धारणे ह्वादावा- त्पे । अनयोर्धा रूपं । रभ राभस्ये । डुलभष् प्राप्तौ । शक्लृ शक्तौ स्वादौ पं । शक मर्षणे दिवादावात्पे । पदे गतौ । पत्लृ पतने । डुमिञ् प्रक्षेपणे । मिङ् प्राणवियोगे । दिवादावात् । मीञ् हिंसायां क्र्यादावात्पे । मा माने अदादौपं। माङ् माने । ह्वादौ दिवादौ चात् । मेङ् प्रणिदाने भ्वादावात् । दोदाणोः सस्तो नपीति सस्य तः । दित्साति । देङ् दित्सते । दाञ दित्साति । दित्सते । धेट् धि-

त्सति। धाञ् धित्सति । धित्सते । रभ् स्कोरिति सलोपः खसेचपा इति भस्य पत्वं रिप्सते । शक्लृ स्कोरिति सलोपः । षत्वं शिक्षति । शक् शिक्षति । पित्सते । पत्लृपतने ॥

मू०–पततनदरिद्राभ्यःसस्येड्वा ॥ पिपतिषति, पित्सति । डुमिञ् प्रक्षेपणे । मित्सति । मित्सते । मीञ् हिंसायाम् । मित्सति । मित्सते । मा माने । मित्सति । मेङ् प्रणिदाने माङ्मेङोः । मित्सते ।

(सुबोधिनी–) पततनदरिद्राभ्यःसस्येड्वा । एभ्यः परस्य सप्रत्ययस्य वा इड् भवति । स्कोरिति सलोपः । पित्सति । इट्पक्षे यः से इति पूर्वस्येट् । पिपतिषति । डुमिञ्मीञोः सस्तोऽनपीति सस्य तः । मित्सति । मित्सते । माङ् मेङोर्मित्सते । मा मित्सति । आप्लृ व्याप्तौ ॥ आप्नोतेः

मू०–आप्नोतेरातईस्सेपूर्वलोपश्च ॥ ईप्सति ।

(सुबोधिनी–) आप्नोतेरातईस्सेपूर्वलोपश्च । आपेरातईत्वं पूर्वलोपश्च स्यात् सप्रत्यये आप्तुमिच्छति ईप्सति । अश् भोजने ॥

मू०–अशेरनायोवा ॥ अशेरिच्छायां वानायप्रत्ययः । अशनायति, अशिशिषति । तितनिषति । तनेरनिटिसे वा दीर्घः । तितांसति, तितंसति । दिदरिद्रिषति, दिदरिद्रासति ।

(सुबोधिनी–) अशेरनायोवा । सस्यापवादः । पक्षे सस्येट् । स्वरादेःपर इति शिम् शब्दस्य द्वित्वं इस इति सप्रसयस्यावयवः पूर्वस्य हसादिःशेषः । अशिशिषति । तनु विस्तारे । पततनेति सस्य वेट्। तितनिषति पक्षे तनेरनिटि से वा दीर्घः तनेः सादौ से वा दीर्घः । तितांसति । दरिद्रा दुर्गतौ । पततनेति वेट् दरिद्रातेरनप्यालोप सावेत्यालोपे षत्वेच दिदरिद्रिषति ॥

मू०–दम्भज्ञपिभ्यांसस्यवेट् ॥ दम्भु दम्भे । दिदंभिषति । जिज्ञपयिषति । ज्ञपेस्स्वरस्यानिटिसेईत्पूर्वलोपश्च । ज्ञीप्सति ।

(सुबो०–) दंभिज्ञपिभ्यां सस्य वेट् । यःसेइति पूर्वस्येट् । दिदंभिषति इडभावे ॥

मू०–दम्भेरिच्च ॥ धिप्सति । धीप्सति ।

(सुबोधिनी–) दंभेरिच । दंभेः स्वरस इस् स्यात् ईच्च पूर्वस्य लोपश्च । अनिटि से उपधानस्य लोप इति नलोपः आदिजबानामिति धत्वं । धिप्सति, धीप्सति। पुंगतोमित्संज्ञको ण्यंतो जानातेर्ज्ञपिः पकारांतश्चौरादिको वा दंभिज्ञपिभ्यामिति वेट्। जिज्ञपयिषति इडभावे नानिटिसे इति न गुणः । सेदीर्घ इति दीर्घस्तु परत्वात् ओरि-

ति त्रिलोपे न बाध्यतेऽझपेः स्वरस्य सादौ से ईत्पूर्वस्य लोपश्च।अनिटिसेझीप्सति ॥

मू०-इवन्तऋधभ्रस्जश्रिस्वृयूर्णुभृसनिभ्यःसस्येड्वा ॥ दिदेविषति ।

(सुबोधिनी-) इवन्तऋधभ्रस्जीश्रस्वृयूर्णुभृसनिभ्यःसस्येड्वा। इवंतेभ्यःऋधादिभ्यश्च सस्येड् वा स्यात्। दिवु क्रीडादौ। सिसतासीस्यपामितीट्। दिदेविषति। इडभावे नानिटिसे इति न गुणः ॥

मू०-वस्यानिटिसेउः ॥दुद्यूषति। अर्दिधिषति।

(सुबोधिनी) वस्यानिटिसेउः। धातोर्वस्य उत्वंस्यात् अनिटिसे यत्वं द्वित्वं च। दुद्यूषति। ऋध वृद्धौ। अर्द्धितुमिच्छति स्वरादेःपर इति धिस् शब्दस्य द्वित्वे अर्दिधिषति इडभावे ॥

मू०-ऋधेरनिटिसेस्वरस्यईर्द्वित्वलोपश्च ॥ ईर्त्सति। बिभ्रज्जिषति, बिभर्जिषति, बिभ्रक्षति, बिभर्क्षति। शिश्रयिषति, शिश्रीषति। सिस्वरिषति, सुस्वूर्षति। यियविषति, युयूषति। ऊर्णुनुविषति, ऊर्णुनविषति, ऊर्णुनूषति। बिभरिषति, बुभूर्षति।

(सुबोधिनी-) ऋधेरनिट्सेस्वरस्यइर्द्वित्वलोपश्च। ऋकारस्य इर्, य्वोर्विहसे इति दीर्घः खसेचपाझसानामिति तः। ईर्त्सति। भ्रस्ज पाके। इट् पक्षे भ्रस्जोरसोरिति अर् रायपोद्विरिति द्वित्वं। बिभर्जिषति। अरभावे श्चुत्वं झबजबा इति शस्य जः। बिभ्रज्जिषति। इडभावे स्को रिति सलोपः छशषेति षत्वं षढोःकःसे इति कत्वं बिभ्रक्षति, बिभर्क्षति। श्रिञ् सेवायां। शिश्रयिषाति। इडभावे सेदीर्घ इति दीर्घः शिश्रीषति। स्वृ शब्दोपतापयोः। सिस्वरिषति। इडभावे सेदीर्घ इति दीर्घे पोरुर् इत्युर् द्वित्वं। सुस्वूर्षति। यु मिश्रणे। अङसयोरिति पूर्वोकारस्येत्व। यियविषति। इडभावे सेदीर्घ इति दीर्घे युयूषति। ऊर्णुञ् आच्छादने। ऊर्णोतेरिडादिप्रत्ययो वाङिदिति ङित्वाद्गुणाभावे नुधातोरित्युव् ऊर्णुनुविषति। ङित्वाभावे ऊर्णुनविषाति। अतःपूर्वं द्वित्वं पश्चाद्गुणावादेशौ इडभावे सेदार्घ इति दीर्घः। ऊर्णुनूषाति भृभर्त्सनभरणयोः। बिभरिषति। इडभावे पोरुरित्युर् य्वोर्विहसे इति दीर्घे द्वित्वे च बुभूर्षति ॥

मू०-स्तौतिण्यन्तयोरेवषेपूर्वात्सस्यषः ॥ तुष्टूषति। साधयितुमिच्छति सिषाधयिषति सिषेधयिषति। सुष्वापयिषति। स्तौतिण्यन्तयोरिति किम्। सिसनिषति। षेइतिकिम्। सिषासति। तिष्ठासति।

(सुबोधिनी-) स्तौतिण्यंतयोरेवषेपूर्वात्सस्यषः। पूर्वादित्वात्परस्य स्तौतिण्यंतयोरेव सस्य षः स्यात्षभूते से नान्यस्य। ष्टुञ् स्तुतौ। षत्वे सेदीर्घ इति दीर्घे च। तुष्टूषति तुःसे इति नेट्। साधसंसिद्धौ ण्यंतः। द्वित्वे यःसे इति पूर्वस्येत्वे षत्वे च।

सिषाधयिषति। स्तौतिण्यंतयोः किं। षिच क्षरणे। सेसिक्षति। उपसर्गात्तु प्रादेश्च तथा तौसुनमां इति अड्द्वित्वव्यवधानेपीति च षत्वं परिषिषिक्षति। वन् षन् संभक्तौ। इडभावे जनसनखनामित्यात्वं वा। सिसनिषति सिषासति।किलादिति षत्वं॥

(तत्त्वदी०–) स्तौतिण्यन्तयोरेवषेइति। षेइतिकृतषत्वनिर्देशात्से स्तौतिण्यन्तस्यापिपूर्वात्षत्वं। सिषासतीति। जनसनेत्यात्वविकल्पः षेइतिनिर्देशादत्रनषत्वनिषेधः।

मू०-- अनिटिसेउपधायानस्यलोपः॥ तृहू हिंसायाम्। तितृंहिषति। तितृक्षति।

(सुबोधिनी–) अनिटिसेउपधायानस्यलोपः धातोरुपधाभूतस्य नस्य लोपःस्यात् अनिटि सप्रत्यये। तृहु तृहू तृंहू हिंसार्थास्तुदादौ। ऊदितोवेतिवेट् इडभावे नलोपः ढत्वे कत्व षत्वे च। तितृक्षति, तितृंहिषति॥

(तत्त्वदीपिका–) अनिटिसेउपधायानस्येति। णादिकिदित्यतः किदित्यनुवर्त्यवाक्यभेदेमव्याख्येयं। लक्ष्यानुसारेणसस्यकित्वांकित्वेबोध्ये। ततोगुणाभावसंप्रसारणमलोपाः सिद्धाः। विवृत्सति। वृतादिभ्यः स्यसयोर्वापमितिपरस्मैपदं। पेनिट्त्वंचेतिइड्भावः। दुध्वूर्षती। प्रथमंदीर्घस्ततः पोरुत्ततो र्वोर्विहसइतिदीर्घः।

मू०--इणःसेगमबोधने॥ एतुमिच्छति जिगमिषति। बोधनेतु प्रतीषिषति। इण्वदिकः। अधिजिगमिषति। बोधनेतु अधीषिषति। २

(सुबोधिनी–) इणःसेगमबोधने। इणेर्गम्स्यात् सप्रत्यये परे बोधनेऽर्थे तु न। एतुमिच्छति गमेःसस्येडितीट् जिगमिषति। बोधने तु यःसे इति सरूपस्य पूर्वस्येत्वं प्रतीषिषति। इण्वदिकः। इक् स्मरणे। गमेःसस्येतीट् अधिजिगमिषति॥

मू०-इवर्णोवर्णोपधाद्धसादेरसान्ताद्धान्ताच्चक्त्वासौसेटौवाकितौ दिद्युतिषते। दिद्योतिषते। रुरुचिषते। रुरोचिषते। लिलिखिषति। लिलेखिषति। सिस्निहिषति। सिस्नेहिषति। सिस्निक्षति। राधो हिंसायां। मिसूसेद्वित्वलोपश्च। रित्सति।अन्यत्र आरिरात्सतिगुरुम्।

(सुबोधिनी–) इवर्णोवर्णोपधाद्धसादेरसांताद्धांताच्चक्त्वासौसेटौवाकितौ। द्युत दीप्तौ। द्युतेः पूर्वस्येति संप्रसारणं। कित्वाद्गुणोन। दिद्युतिषते, दिद्योतिषते।एवं रुच दीप्तौ।लिख अक्षराविन्यासे। ष्णिह प्रीतौ। राधो हिंसायां मिस्सेद्वित्वलोपश्च राधस्वरस्येत्यर्थः। राध संसिद्धौ। स्कोरिति सलोपे खसे चपा इति धस्य तः। रित्सति। हिंसायां किं। देवमारिरात्सति। यःसे इति पूर्वस्येत् खसे चपा इति धस्य तः॥

मू०—मुचोऽकर्मकस्यगुणोवासेद्धित्वलोपश्च ॥ मोक्षते मुमुक्षते वा वत्सः स्वयमेव। अकर्मकेति किम्। मुमुक्षति वत्सं कृष्णः। विवर्तिषते। विवृत्सति। निनर्तिषति। निनृत्सति। वृङ्वृञ् ऋदन्तात्सस्येड्वा। तितरिषति। तितरीषति। तितीर्षति। विवरिषते। विवरीषते। वुवूर्षते। विवरिषति। विवरीषति। वुवूर्षति। ध्वृ कौटिल्ये। दुध्वूर्षति। सर्पनिष्पे सपेम्बृद्धि न्यायतीति न्यायप्र

(सुबोधिनी–) मुचोऽकर्म्मकस्यगुणोवासेद्धित्वलोपश्च। मुच्लृ मोक्षणे। चोःकुरिति कः। मोक्षते,मुमुक्षते। अकर्म्मकस्य किं। मुमुक्षति। नानिटिसे इति गुणाभावः। वृतु वर्त्तने। वृतादिभ्यः स्यसयोरिति वा पं। पेनिट्त्वं च नाऽनिटिसे इति न गुणः। विवृत्सति। विवर्तिषते। नृती गात्रविक्षेपे। नृततृदेतिवेट् नानिटिसे इति न गुणः। निनृत्सति, निनर्त्तिषति। वृङ् वृञ् ऋदंतास्येड्वा। तॄ प्लवनसंतरणयोः। वृङ्वृञिति वेटोदीर्घः। तितरिषति,तितरीषति। इडभावे ऋतइरितीर् य्वोर्विहसे। इति दीर्घः। विवरिषति, विवरीषति इडभावे पोरुरित्युर्। वुवूर्षति। एवं वृञ् संभक्तौ। विवरिषते, विवरीषते, वुवूर्षते, ध्वृकौटिल्ये दुध्वूर्षति ॥

मू०—स्मिङ्पूङ्रञ्ज्वशूभ्यः सस्येट् ॥ सिस्मयिषते। पिपविषते। अरिरिषति। अञ्जिजिषति। अशिशिषते॥ उचिच्छिषति अधिजिगापयिषति। अध्यापिपयिषति। शिश्वाययिषति। शुशावयिषति। जुहावयिषति। पुस्फारयिषति। पुस्फोरयिषति। पिपावयिषति। बिभावयिषति। यियावयिषति। रिरावयिषति। लिलावयिषति। सिस्रावयिषति। सुस्रावयिषति।

(सुबोधिनी–)स्मिङ्पूङ्रंज्वशूभ्यः सस्येट्। स्मिङ् ईषद्धसने। आस्यानिट्त्वादिडागमस्याप्राप्तिः। स्तौतिण्यंतयोरेवेति नियमान्न षः। सिस्मयिषते। पूङ् पवने। वुःसे इति निषेधे प्राप्ते अङ्सयोरिति पूर्वीवर्णस्येत्। पिपविषते। ऋ गतौ। अस्याप्यनिट्त्वादिडागमस्याप्राप्तिः। सस्य इटि गुणे च कृते अरिस इति स्थिते। स्वरादेःपर इति रिस्शब्दस्य द्वित्वे अरिरिषति। अंजू व्यक्तिलक्षणादौ। अशूङ्व्याप्तौ। अनयोरुदित्वादिड् विकल्पे नित्यमित्। अश् भोजने इति क्र्यादिस्तु नित्यं सेडेव। अंजिजिषति। आशिशिषते। उछ उंछे। अत्र छ इति छस्य द्वित्वे खसेचपाझसानामिति चकारे कृते च्छसहितसेटो द्वित्वे हसादिशेषे च उचिच्छिषति। इङ् अध्ययने। अध्यापयितुमिच्छाति अङ् सपरेञौ इङोगाङ्वेति वा गाङ् रातोञोपुगिति पुक्। अधिजिगापयिषति। पक्षे इङ्क्रीजीनामित्यात्वं स्वरादेःपर इति पि-

शब्दस्य द्वित्वे अध्यापिपयिषति । टुओश्वीर् गतिवृद्ध्योः श्वयतेर्ण्यन्तस्येति वा संप्रसारणं । शिश्वाययिषति, शुशावयिषति । ह्वेञ् स्पर्द्धायाम् । ह्वयतेरङ्सपरे इति संप्रसारणे पुगभावे च कृते जुह्वावयिषति । स्फुर् विकसने । णौ चिस्फुरोरित्यात्वे कृते ञिनिमित्तः स्वरादेश इति वचनेन तस्य स्थानिवद्भावादुकारविशिष्टस्य द्वित्वं पुस्फारयिषति । आत्वाभावे पुस्फोरयिषति । टुक्षु शब्दे चुक्षावयिषति । पुङ् पवने । अङ्सयोरिति पूर्वोवर्णस्येत्वं । पिपावयिषति भू सत्तायाम् । भावयितुमिच्छति पूर्वस्येत्वं । बिभावयिषति । यु मिश्रणे । अत्रापीत्वं यियावयिषति । रु शब्दे । पूर्वस्येत्वं रिरावयिषति । लूञ् छेदने । लिलावयिषति । स्रु गतौ । स्रवतिशृणोतिद्रवतीतीत्वंवा । सिस्रावयिषति, सुस्रावयिषति ॥

(तत्त्वदीपिका-) स्मिङ्पूङ् । ष्मिङ् इषद्धसने । पूङ्पवने । ऋगतौ । ऋगतिप्रापणयोश्च। अंजूव्यक्तिम्रक्षणकान्तिगतीषु।अशूङ्व्याप्तौ।रंजरागे वशकान्तावित्येतयोर्भ्रमोनकार्य्यः। स्मिङोऽनिट्त्वादप्राप्ते ऋपूङोस्तु वुःसेइतिनिषेधः अंजश्वोस्तूदित्वाद्विकल्पेप्राप्ते वचनं। किरइत्यादीनां ग्रहणाद्दकारांतानग्राह्याः सिस्मयितइति। ण्यन्तयोरेवेतिनियमान्नषः। ङानुबन्धग्रहणात्तुपूञः पुपूर्षतीत्येव॥ अरिरिषतीति। ऋइसइतिस्थितेइतिगुणे अरिसइतिस्थिते। स्वरादेःपर इतिरिशब्दस्य द्वित्वं। पिपावयीषतीत्यादि ण्यंतात्से अङ्सयोः पूर्वस्येति इकारः नदी वृक्षमुन्मूलयिषति वृष्टिराजिमभिषिषिचतीत्याद्येतु चेतनत्वापरोपात्सः । पाषाणादीनां संबोधनवत्।

मू०—सान्तात्सोन॥ चिकीर्षितुमिच्छति । स्वार्थसान्तात्तु स्यादेव। जुगुप्सिषते । ॥इतिसान्तप्रक्रिया ॥

(सुबोधिनी-) सांतात्सोन । "शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ॥ सरूपः प्रत्ययो नेष्टः सन्नंतान्न सनिष्यते" । १ । शैषिकाच्छैषिकः सरूपः प्रत्ययो नेष्टः । शालीये भव इति वाक्यमेव । न तु ईयांतात् पुनरीयः । सरूपः किं । आहिच्छत्रे भवः आहिच्छत्रीयः । अण्णंतादीयः । तथा मत्वर्थीयात् मतुबर्थिकः सरूपः प्रत्ययो न भवति । धनवानस्यास्ति । वत्वंतात् न वतुः । विरूपस्तु स्यादेव । दंडिमती शाला । सरूप इत्यनुसंबध्यते सरूपः सादृश्यं तत्तु अर्थद्वारा । तेनेच्छासन्नंतादिच्छासन् न भवति । स्वार्थसांतात्तुस्यादेव । गुब्भ्यइति स्वार्थे सप्रत्ययः । तदंतादिच्छासः । जुगुप्सिषते । यःसे इतीत्वे मानादीनामिति दीर्घे च । मीमांसिषते । गुप् गोपने । मान विचारणे ॥

॥ इतिसांतप्रक्रिया ॥

(तत्त्व०—) सान्तात्सोनेति । अतिशये हसादेर्यङ्द्विश्चेत्यतश्चकारानुवृत्तेरेतद्बोध्यम्

कृतायामिहटीकायां लोकेशकरशर्मणा ।

बाधनं दुष्टबुद्धीनामगमत्सान्तसाधनम् ॥

इति सप्रक्रिया ।

सू०—अतिशयेहसादेर्यङ्द्विश्च ॥ हसादेरेकस्वराद्धातोरर्थे पौनःपुन्ये च यङ्प्रत्ययो भवति द्वित्वञ्च ।

(सुबोधिनी—) अतिशयेहसादेर्यङ्द्विश्च । हसआदिर्यस्य स हसादिस्तस्मादेकस्वराद्धातोर्यङ् स्यात् । यङंतस्य धातोर्द्वित्वं च अतिशयेऽर्थे । अतिपूर्वात् शीङो भावे स्वराद इत्यः । आतिशयो द्विविधः । पौनःपुन्यं भृशार्थश्च । अतिशये किं । पठति । एकस्वरात्किम् । पुनः पुनर्जागर्ति । हसादेः किम् । भृशमीक्षते । भृशंशोभते । भृशंरोचते इत्यादौ यङ् नेतिभाष्यं । पौनः पुन्ये तु स्यादेव । रोरुच्यते । शोशुभ्यते ॥

(तत्त्वदीपिका—)अतिशयेहसादेर्यङ् द्विश्च । अतिशयनमतिशयः। अतिपूर्वात् शीङोभावे स्वराद इत्यप्रत्ययः। सच द्विविधः पौनःपुन्यं भृशार्थश्च। सचार्थो यङो द्योत्य एव । हसआदिर्यस्य स तथा तस्मात् द्विरित्यपरं वाक्यं धातोर्द्विर्वचनं । धातुश्च यङन्त एव नतु यङः प्रकृतिभूतः अटाट्यत इत्याद्यसिद्धेः ।

सू०— यङि ॥ यङि यङ्लुकि च पूर्वस्य नामिनो गुणः । सधातुः । ङित्वादात् । भृशं पुनःपुनर्वा भवति बोभूयते । बोभूयाञ्चक्रे । बोभूयिषीष्ट । अबोभूयिष्ठ । बोभुज्यते ।

(सुबोधिनी—) यङि । यङ्प्रत्यये लुकि च पूर्वस्येत्यनुवृत्तं । भू सत्तायाम् । सधातुरिति धातुत्वाल्लडादयः । ङिदन्तत्वादात्मनेपदम् पुनःपुनरतिशयेन वा भवति बोभूयते । बोभूयेते । बोभूयतां । अबोभूयत । कासादिप्रत्ययादिसाम् । यत इत्यलोपः । बोभूयांचक्रे । बोभूयिषीष्ट । बोभूयिता । बोभूयिष्यते । अबोभूयिष्यत । अबोभूयिष्ट । भुज पालनादौ । अतिशयेन भुनक्ति बोभुज्यते ॥

(तत्वदी ०—) ङित्वादादिति । अत्र केचित् । कथं यङंतादात् ङितोधातोराद्विधानात् । अत्र च यो ङित् स न धातुः यो धातुः स च न ङित् ।किंच।ङस्य गुणनिषेधादिप्रयोजनत्वेन चरितार्थत्वादात्मनेपदप्रयोजकत्वासंभवः । अवयवे कृतं लिंगमचरितार्थं समुदायविशेषकं भवतीत्युक्तेः। अत्रोच्यते । स धातुरित्यनेन यङंतस्य धातुत्वेन धातोर्ङित्वसत्त्वात्। गुणनिषेधार्थं च ङकारप्रक्षेपस्य कर्तव्यत्वात् । बोभूयत इति । भवनानुकूलएकाभिन्नाश्रयको वर्त्तमानोऽतिशयविशिष्टो व्यापारः ।

सू०—अनपिचहसात् ॥ हसादुत्तरस्य यस्य लोपो भवत्यनपि विषये । बोभुजाञ्चक्रे । बोभुजिता । मोमुह्यते । मोमुहाञ्चक्रे । लेलिह्यते । जोहूयते । वेविद्यते ।

(सुबोधिनी—) अनपिचहसात् । हसात्परस्य शब्दस्य लोपोऽनपि । हसा-

र्लिंक। लोलूयिता योयूयिता। आदेःपरस्य। परस्य यद्विहितं तत्तस्यादेर्बोध्यमिति यलोपः यत इत्यलोपः। बोभुजांचक्रे। बोभुजिषीष्ट। अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः। एवं मुह वैचित्ये। लिह आस्वादने। हु दानादनयोः। ये इति दीर्घः। जोहूयते। विद ज्ञानादौ वेद्यते। डुपचष् पाके॥

मू०- आतः॥ यङि यङ्लुकि च पूर्वस्यात आकारः। पापच्यते। पापठ्यते।

(सुबोधिनी-) आतः। आ अत इति च्छेदः। पूर्वस्येत्यनुवृत्तं। पापच्यते। पठ व्यक्तायां वाचि। पापठ्यते॥

मू०-सिचोयङिनषः॥ सेसिच्यते।

(सुबोधिनी-) सिचोयङिनषः। सिचेः सस्य षत्वं न स्यात् यङ्प्रत्यये परे। षिच क्षरणे। सेसिच्यते॥

मू०-सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतिभ्योयङ्॥ सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते।

(सुबोधिनी-) सूचिसूत्रिसूत्र्यस्यत्यर्यशूर्णोतिभ्योयङ्। सूच पैशून्ये। सूत्र वेष्टने॥ मूत्र प्रस्रवणे। एते त्रयःश्चुरादावदंताः। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते अट गतौ। गौः कुटिलमटति इह व्यशब्दस्य द्वित्वं आत इत्यात्वम्। अटाट्यते। ऋ गतौ। कुटिलमृच्छति गुणोर्तिसंयोगाद्योरिति गुणः॥

(तत्त्वदिपिका) सूचिसूत्रि। सूच पैशुन्ये। सूत्र अवमोचने। मूत्रप्रश्रवणे। अट गतौ ऋ गतौ। अश भोजने अशूङ् व्याप्तौ। ऊर्णुञ् आछादने। तत्राद्यानां त्रयाणांचुरादिन्यन्तत्वेनानेकस्वरत्वादव्यादीनां चाहसादित्वादप्राप्ते वचनं।

मू०-यकारपररेफस्यनद्वित्वनिषेधः॥ अराय्र्यते। अराराञ्चक्रे। अशाश्यते। ऊर्णोनूयते।

(सुबोधिनी-) यकारपररेफस्यनद्वित्वनिषेधः। यकारो परो यस्मात् स यकारपरः यकारपरश्चासौ रेफश्च यकारपररेफस्तस्य ततो र्यशब्दस्य द्वित्वे हसादिशेषे आत इति दीर्घे च अरार्यते इति भाष्योदाहरणात्। लिटि अनपि च हसादिति यलोपः यत इत्यलोपः अराराञ्चक्रे। लुटि अरारिता। अशूङ् व्याप्तौ। अशाश्यते। ऊर्णुञ् आच्छादने। ये इति दीर्घः। ऊर्णोनूयते॥

(तत्त०-) अराय्र्यत इति। ऋय इति स्थिते गुणेकृते र्यशब्दस्य द्वित्वे हसादिशेषे आत्इति दीर्घः। ऊर्णोनूयत इति णत्वस्यासिद्धत्वान्नुशब्दस्य द्वित्वं।

मू०- गत्यर्थात्कौटिल्येएवयङ्॥ कुटिलमटति अटाट्यते। कुटिलं व्रजति वाव्रज्यते।

(सुबोधिनी-) गत्यर्थात्कौटिल्येएवयङ् । कुटिलस्य भावः कौटिल्यं । व्रज गतौ । कुटिलं व्रजाति । आत इति पूर्वस्यात्वं । वाव्रज्यते ॥

(तत्त्वदीपिका-) अटाट्यत इति । एकाभिन्नाश्रयको वक्रगत्यनुकूलो वर्त्तमानो व्यापार इति कौटिल्यस्य फलविशेषणत्वे व्यापारविशेषणत्वे तु वक्रो गत्यनुकूलोव्यापारइति शेषः।

मू०-लुपसदचरजपजभदहदंशगॄभ्योधात्वर्थगर्हायामेवयङ् ॥ गर्हितं लुम्पति लोलुप्यते । सासद्यते ।

(सुबोधिनी-) लुपसदचरजपजभदहदंशगॄभ्योधात्वर्थगर्हायामेवयङ् । लुप्लृ छेदने । गर्हितं लुंपति लोलुप्यते । षद्लृ विशरणादौ । आत इति पूर्वस्यात्वं । गर्हितं सीदति सासद्यते ॥

(तत्वदीपिका-) धात्वर्थगर्हायामेवेति । गर्होपि फलस्य व्यापारस्य वा विशेषणं । लोलुप्यते वनं चैत्रः चैत्राभिन्नाश्रयो वनाभिन्नाश्रितः कुत्सितश्छेदनानुकूलो वर्त्तमानो व्यापारः । वनाभिन्नाश्रयः छेदनानुकूलः कुत्सितो व्यापारइति वा।

मू०-यमजपांनुक् ॥ यमान्तस्य जपजभदहदंशभञ्जपसचरफलां च पूर्वस्य नुग् यङ्यङ्लुकोः ।

(सुबोधिनी-) यमजपांनुक् । जप व्यक्तायां वाचि । जभी गात्रविनामे । दह भस्मीकरणे । दंशदशने । भंजो आमर्दने । पस धातुर्दत्यांतः सौत्रो गत्यर्थः । तालव्यांत इति माधवः । चर गत्यादौ । ञिफला विशरणे । फलनिष्पत्तौ वा । एषां यमप्रत्याहारांतस्य च नुक् यङ्यङ्लुकोः ॥

मू -चरफलोःपूर्वात्परस्यातउद्यङ्लुकोः॥ चञ्चूर्यते । चञ्चुराञ्चक्रे । पम्फुल्यते । नुगित्यनेनाऽनुस्वारो लक्ष्यते । स च पदान्तवत् । जञ्जप्यते । जंजप्यते ।

(सुबोधिनी--) चरफलोःपूर्वात्परस्यातउद्यङ्लुकोः । पूर्वाद् द्वित्वरूपादुत्तररूपस्यात उत्वमित्यर्थः । नुगित्यनेनानुस्वारो लक्ष्यते । स च पदांतवत् । यमजपामिति नुमागमोऽनुस्वारं बोधयाति । सोऽनुस्वारः पदांतकार्य लभते इत्यर्थः । तेन वापदांतस्येत्यनेन वा परसवर्णः चञ्चूर्य्यते ॥

(तत्त्व०--) सच पदान्तवदिति । तेन वेति यथा स्यात् ।

मू०-गिरतेरेफस्यलत्वंयङि ॥ जेगिल्यते । यँय्यम्यते, यंयम्यते । दीङ् क्षये । देदीयते । ओप्यायी वृद्धौ । पेपीयते । वँव्वम्यते । चंचम्यते । चाखायते, चङ्खन्यते । चङ्कण्यते । तन्तन्यते । जञ्जभ्यते । दन्दह्यते । दंदश्यते । बम्भज्यते । पस बाधनग्रंथनयोः । पंपस्यते।

(सुबोधिनी-) गिरतेरेफस्यलत्वंयङि । गॄ निगरणे इत्यस्य रेफस्य लत्वं स्यात् यङि । गर्हितं गिलति जेगिल्यते । यम उपरमे । कण निमीलने । तनु विस्तारे । यमां-तत्वादेर्षां पूर्वस्य नुक् । यंयम्यते । चंकण्यते । तंतन्यते ॥

(तत्वदीपिका-) जेगिल्यतइति ॥ गिलनस्यच गर्हितत्वं विवृत्तास्यचेष्टादिकृतं ।

मू०-रीगृदुपधस्य ॥ ऋत्वतो धातोर्यङि परे पूर्वस्य रीक् । नरीनृत्यते वरीवृत्यते । जरीगृह्यते । वरीवृश्च्यते । परीपृच्छ्यते । चलीक्लृप्यते ।

(सुबोधिनी-) रीगृदुपधस्य । ऋदुपधस्य धातोः पूर्वस्य रीक् यङि । ऋदुपधस्येति किं । चेकीर्त्यते । णेरभावपक्षे एकस्वरत्वाद्यङ् । नृती गात्रविक्षेपे । क्षुभ्नादित्वान्न णत्वम् । नरीनृत्यते । वृतु वर्त्तने । अतिशयेन वर्त्तते वरीवृत्यते । ग्रह उपादाने । ओव्रश्चू छेदने । प्रच्छ ज्ञीप्सायाम् । ग्रहामिति संप्रसारणम् । जरीगृह्यते । वरीवृश्च्यते । परीपृच्छ्यते । रीगिति । योगविभागादुभयत्र रीक् । कृपू सामर्थ्ये । उभयत्र लत्वम् । चलीक्लृप्यते । वश कांतौ । आत इति पूर्वस्यात्वं ॥

मू०-वशेर्यङिनसंप्रसारणम् ॥ वावश्यते । श्वयतेर्वा ॥ शोशूयते । शेश्वीयते । सास्मर्यते ।

(सुबोधिनी-) वशेर्यङिनसंप्रसारणं । ग्रहामिति प्राप्ते निषेधः । अतिशयेन वष्टि वावश्यते । टुओश्वि इर् गतिवृद्ध्योः ॥ श्वयतेर्वा ॥ संप्रसारणं यङि ये इति दीर्घः । शोशूयते । शेश्वीयते । स्मृ चिंतायाम् । गुणोर्तिसंयोगाद्योरिति गुणः । आत इति पूर्वस्यात्वम् । सास्मर्य्यते ॥

मू०-कवतेःपूर्वस्यनचुत्वंयङि ॥ कोकूयते ।

(सुबोधिनी-) कवतेःपूर्वस्यनचुत्वंयङि । कवतेरित्यपानिर्देशात् कुङ् शब्दे इति भ्वादिरेव गृह्यते । न तु कुशब्दे इत्यादादिकः । कुङ् शब्दे इति तौदादिकश्च । ये इति दीर्घः । कोकूयते ॥

मू०-वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दां ॥ यङि यङ्लुकिच पूर्वस्यनीक् । वनीवच्यते । सनीस्रस्यते । दनीध्वस्यते । बनीभ्रस्यते । चनीकस्यते । पनीपत्यते । पनीपद्यते । चनीस्कद्यते ।

(सुबोधिनी-) वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दां ॥ यङि यङ्लुकि च पूर्वस्य नीक् । वंचु वंचने । स्रंसुध्वंसुभ्रंसु अधःपतने । कस गतौ । पत्लृ पतने । पद गतौ । स्कन्दिर् गतिशोषणयोः । आत इत्यस्यापवादः नोलोपः इति नलोप । वनीवच्यते ॥

(तत्वदीपिका-) वंचु । वनीवच्यत इति । नोलोपः दीर्घोच्चारणसामर्थ्याद्ध्रस्वगुणोन ।

मू०-ऋतोरिः ॥ येऽनपि । चेक्रीयते । जेह्रीयते । वेव्रीयते ।

(सुबोधिनी--) ऋतोरिः । यप्रत्यये ये इति दीर्घः । परत्वाद् रि आदेशे कृते द्वित्वम् डुकृञ् करणे । चेक्रीयते । हृञ् हरणे । जेह्रीयते । वृङ्वृञौ वेव्रीयते ॥

मू०-दादेरिः ॥ अपिद्दाधामागैहाकुपिबतिसोमिकारःक्ङिति हसेअनपि । देदीयते । मेमीयते । जेगीयते । जेहीयते । पेपीयते । सेषीयते । तेष्ठीयते ।

(सुबोधिनी--) दादेरिः । डुदाञ् दाने । दो अवखंडने । देङ् पालने । अनयोः संध्यक्षराणामित्यात्वे दारूपम् दाप्दैपौ विना । डुधाञ् धारणादौ । मा माने । माङ् माने । मेङ् प्रणिदाने । गै शब्दे । ओहाक् त्यागे । पा पाने । षो अंतकर्मणि। ष्ठा गतिनिवृत्तौ । एषामिकारः स्यात् क्ङिति हसे ऽनपि । अनेनेत्वे द्वित्वं यङीति गुणः । देदीयते । इत्यादि ॥

मू०-घ्राध्मोरीर्यङि ॥ जेघ्रीयते । देध्मीयते ।

(सुबोधिनी-) घ्राध्मोरीर्यङि । दीर्घोच्चारणं यङ्लुगर्थम् । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः । जेघ्रीयते । देध्मीयते ॥

मू०-हन्तेर्हिंसायांघ्नीभावः ॥ जेघ्नीयते जङ्घन्यते ।

(सुबोधिनी-) हन्तेर्हिंसायां घ्नीभावः । यङि घ्नीभावे सति द्वित्वं । जेघ्नीयते । हिंसायां किम् । जंघन्यते । पूर्वाद्धन्तेरिति घः ॥

(तत्वदीपिका-) जेघ्नीयत इति । घ्नीभावेन न द्वित्वबाधः । विषयभेदात् ह्रस्वेन सिद्धेपि प्रक्रियालाघवाय घ्नी । एवमन्यत्रापि ।

मू०-स्वपिस्यमिव्येञांयङिसंप्रसारणम् ॥ सोषुप्यते । सेसिम्यते । वेवीयते ।

(सुबोधिनी-) स्वपिस्यमिव्येञांयङिसंप्रसारणम् । ञिष्वप् शये स्यमु शब्दे । व्येञ् संवरणे । षत्वं । सोषुप्यते । इत्यादि ॥

मू०-चायःकीर्यङि ॥ चेकीयते । जञ्जन्यते । शीङोऽयङ्ये क्ङिति । शाशय्यते । डोढौक्यते । तोत्रौक्यते । ॥ इतियङंतप्रक्रिया ॥

(सुबोधिनी-) चायःकीर्यङि । यङि परे चायः कीः स्यात् । दीर्घोच्चारणं यङ्लुगर्थम् । चायृ पूजानिशामनयोः । चेकीयते । जनी प्रादुर्भावे । जनखनामिसात्वं जाजायते । पक्षे यमजपामिति पूर्वस्य नुक् । जंजन्यते । शीङोऽयङ्येक्ङिति । ङित्वादंतादेशः । परत्वादंतरंगत्वाच्चायङादेशे कृते द्वित्वं । आत इति पूर्वस्यात्वं ।

यत इत्यल्लोपः । शाशय्यते । ढौकृ त्रौकृ गतौ । ह्रस्व इति पूर्वस्य ह्रस्वे ततो यङीति गुणः । डोढौक्यते । तोत्रौक्यते ॥ इति यङन्तप्रक्रिया ॥

(तत्त्व०–) कृतायामिहटीकायांलोकेशाकरशर्मणा ।
मताभाष्यकृताभाव्यायङन्तप्रक्रियागता॥
इति यङन्तप्रक्रिया ॥

सू०–वान्यत्र ॥ ऊकप्रत्ययसंयोगं विना यङो वा लुक् । यङ्लुगन्तात्वम् । अदादौ बोध्यम् । अदादित्वाद्पो लुक् यङ्लुकि सति ।

(सुबोधिनी–) वान्यत्र। लुगिति सूत्रमनुवृत्तं ऊकप्रत्यये यङो लुग् विधीयते दंदशूक इत्यादौ । अन्यत्र ऊकप्रत्ययाभावे यङ्प्रत्ययस्य वा लुग् भवति । लुगभावे यङ्प्रत्ययांतं भवतीत्यर्थः । अनैमित्तिकोयं अंतरंगत्वादादौ भवति ततः प्रत्ययलक्षणेन यङंत्वाद्द्वित्वादि । धातुत्वाल्लडादयः । परतोऽन्यादिति परस्मैपदम् । आदनुदात्तङित इत्यनेनात्मनेपदं तु न भवति । येपि स्पर्द्धशीङादयोनुदात्तङितस्तेभ्योपि न । अनुबंधनिर्दिष्टत्वात् । उक्तं च । "श्तिपा शपानुबंधेन निर्दिष्टं यद्गणेन च ॥ यत्रैकाजग्रहणं चैव पंचैतानि न यङ्लुकि । १ ।" इति निषेधात् एतानि पंच कार्याणि यङ्लुकि न प्रवर्तते । तान्याह । श्तिप्प्रत्ययनिर्दिष्टं कार्यं इकृश्तिपाविति श्तिप् । शपा अप्प्रत्ययेन निर्दिष्टं अप्कर्त्तरीत्यप् । अनुबंधनिर्दिष्टंयङो ङित्वादि । गणनिर्दिष्टं दिवादेर्य इत्यादि । एकस्वरनिर्दिष्टं नैकस्वरादनुदातादित्यादि । यथा गदनदेति सूत्रे श्तिपा शपा च निर्दिष्टत्वाद्यङ्लुकि णत्वं न । प्रनिजंघति । प्रनिजागदीति । लिप्पुषादेरित्यत्रानुबंधेन गणेन च निर्दिष्टत्वाद् ङो न । अजंगमीत् । अवर्वर्तीत् । नैकस्वरादिसत्रैकस्वरनिर्दिष्टत्वादिण्निषेधो न । बेभेदिता । चेच्छेदितेति । अत एव यादयो न गणेन निर्दिष्टत्वात् । किंतु अबेव । यङ्लुगंतमदादौ बोध्यं । अदादित्वाद्पो लुक् । भू सत्तायाम् । यङि लुकि सति ॥

(तत्वदीपिका—) वान्यत्र । लुक् इति सूत्रमात्रमनुवर्तते तनोकप्रत्ययेयङो लुग्विधीयते॥ दंदशूक इत्यादौ । अन्यत्रेति व्याचष्टे ऊकप्रत्ययसंयोगं विनेति व्यवस्थयामन्यत्र यङोलुगित्यर्थः । प्रक्रियाक्रममाह । यङ्लुकि सतीति ।

मू०–पितितिस्मवेट् ॥ बोभवीतु, बोभोतु । अबोभवीत्, अबोभोत् । अबोभूताम् । अबोभवुः । बोभवाञ्चकार । गुणं बाधित्वा । नित्यत्वाद्वुक् । अबोभूवीत्, अबोभोत् । अबोभूवुः । अबोभूवीः, अबोभोः । अबोभूवम् । पापचीति, पापक्ति । पापक्तः । पापचति । अपापचीत्, अपापक्, अपापग् । अपापचुः । पापचांचकार । पाप-

चिता। अपापाचीत्, अपापचीत्। द्वेःस्वरेऽपिनोपधायागुणः। बोभुजीति, बोभोक्ति। बोभुक्तः। बोभुजति। अबोभुजीत्, अबोभोक्। बोभोजिता। अबोभोजीत्। वावदीति, वावत्ति। वावदीतु, वावत्तु। वावद्धि। वावद्यात्। जाघटीति, जाघट्टि। जाघटीषि। ष्टुभिः ष्टुः। जाघट्षि। अजाघटीत्। स्पर्धसंघर्षे। पास्पर्द्धीति, पास्पर्द्धि। पास्पर्द्धः। पास्पर्धति। हौ। पास्पर्द्धि। अपास्पर्द्धीत्, अपास्पर्त्,। अपास्पर्द्। सिपि। अपास्पर्द्धीः, अपास्पाः, अपास्पर्त् अपास्पर्द्। गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। जागाधीति,। जागाद्धि। जागाद्धः। आदि जबानामिति। जाघात्सि।अजागाधीत्,अजाघात्।सिपि। अजाघाः, अजाघात्। नाथृ। नानाथीति, नानात्ति। नानात्तः। नानाथति। दध। दादधीति, दादद्धि। दाधत्सि। अदादधीत्। अदादध्वाम्। अदादधुः, अदाधः, अदादधीः। दादधिता। अदादधीत्। मुद। मोमुदीति,मोमोत्ति। कुर्द खुर्द गुर्द गुदक्रीडायामेव ।चोकूर्दीति, चोकूर्त चोकूर्त्तः। अचोकूर्त्। सिपि अचोकूः। ऋदन्तानामृदुपधानां च यङ्लुकि पूर्वस्य रुक्रिक्रीकः। चर्करीति, चरिकरीति, चरीकरीति। चर्कर्त्ति, चरिकर्ति, चरीकर्ति। चर्कृतः, चरिकृतः, चरीकृतः। चर्क्रति, चरिक्रति, चरीक्रति। अचर्करीत्, अचरिकरीत्। अचरीकरीत्। अचर्कः अचरिकः,अचरीकः। चर्करिता। वर्वृतीति, वरिवृतीति, वरीवृतीति। वर्वर्त्ति, वरिवर्त्ति, वरीवर्त्ति। वर्वर्त्तामास। वर्वर्तिता।वर्वर्तिष्यति। अवर्वर्तिष्यत्।वनीवञ्चीषि।वनीवङ्क्षि।वनीवञ्च्यात्। वनीवञ्चीतु, वनीवङ्क्तु। वनीवङ्क्तां। अवनीवञ्चीत्। संयोगान्तस्यलोपः। अवनीवन्। जङ्गमीति, जङ्गन्ति। लोपस्त्वनुदात्ततनाम्। जङ्गतः। गमांस्वरे। जंग्मति। जङ्गमीमि। जङ्गन्वः। जङ्गन्मः। जङ्गमीतु, जङ्गन्तु। हौ जङ्गहि। अजङ्गमीत्। अजङ्गन्। अजङ्गताम्। गमांस्वरे। अजङ्ग्मुः। जङ्गमिता। अजंगमीत्। हिंसायान्तु। जेघ्नयीति, जेघ्नेति, जंघनीति, जंघंति। लोपस्त्वनुदात्ततनाम्। जंघतः। जंघ्नति। अजंघनीत्, अजंघन्।

आशिषि वध्यात्। अवधिष्ट। चञ्चुरीति। चञ्चूर्तः। चञ्चुरति। चञ्चूर्यात्। चञ्चुरीतु, चञ्चूर्तु। चञ्चूर्तात्। चञ्चूर्ताम्। चञ्चूर्हि। अचञ्चुरीत्,अचञ्चूः। चोस्कुन्दीति, चोस्कुन्ति। चोस्कुन्तः। चोस्कुन्दति। चोस्कुन्द्यात्। चोस्कुंदीतु, चोस्कुंतु। चोस्कुंत्ताम् अचोस्कुन्दीत्। अचोस्कुन्। अचोस्कुंत्ताम्। अचोस्कुन्दुः। सिपि अचोस्कुन्दीः। अचोस्कुन्। चंखनीति। चंखन्ति। चंखातः। चंख्नाति। चंखनीषि। चंखंसि। चंखाथः। चंखनीमि। चंखन्मि। चंखन्वः। चंखन्मः। चंखायात्, चंखन्यात्। चंखनीतु, चंखन्तु, चंखातात्,चंखाताम्। चंख्नतु। चंखाहि। अचंखनीत्, अचंखानीत्। अचंखानिष्टाम्। योयवीति, योयोति। योयुतः योयुयात्। योयवीतु, योयोतु। अयोयवीत्, नोनवीति, नोनोति। नोनुतः। नोनुयात्। नोनवीतु, नोनोतु,अनोनवीत्। अनोनोत्। सिपि अनोनवीः। अनोनोः। जाहेति, जाहाति। द्वेस्तौ। जाहीतः। जाहीयात्। जाहेतु,जाहातु जाहीतात्। जाहीताम्। अजाहेत्। अजाहात्।अजाहीत्।अजाहीताम्। अजाहुः।जाहायात्। जाहिता। आतोऽनपि। अजाहासीत्। अजाहासिष्टाम्। दादेति, दादाति। दात्तः। दादतिः। दादेषि। दादासि। दात्थः। दात्थ। दाद्वः। दाद्मः। दांहौ। देहि। दादेयात्। आतोऽनपि। दादिता। दादेःपे। अदादेत्, अदादात्। अदादातां। एवं धेट्। दाधेति, दाधाति। दाधः। दाधति। दाध्यात्। धेहि। दाधेयात्। अदाधासीत्। अदाधेत्। अदाधात्। अदाधत्। अदाधताम्। अदाधन्। डुधाञ् दाधेति। दाधाति। धात्तः। धात्थः। दाद्धि। दाध्वः। दाध्मः। लङि अदाधात्, अदाधेत्। पितोस्तु दैप् शोधने। दाप् लवने। दादेति, दादाति। दादीतः। दादति। दादीयात्। दादेतु, दादातु दादीतात्। दादीहि। अदादेत्, अदादात्। अदादीताम्। दादायात्। अदादासीत्। सास्वपीति, सास्वप्ति। सास्वप्तः। सास्वपति। हौ। सास्वब्धि। असास्वपीत्, असास्वप्। सासुप्यात्।

असास्वापीत्, असास्वपीत् । कॄविक्षेपे । चाकरीति, चाकर्ति । चाकीर्तः । चाकिरति । चाकरिता, चाकरीता । तातरीति, तातर्ति तातीर्तः । तातिरति । तातरीतु, तातर्तु । ऋतइद् । तातीर्तात् । तातीर्हि । अतातरीत्, अतातः अतातारीत् । अतातारिष्टाम् । अर्तेर्यङ्लुकि द्वित्वे पूर्वस्य रइत्यत्वं । रुक् रिग्रीकोस्तु पूर्वस्यासवर्णइय् । अररीति, अरियरीति, अरीयरीति, अरर्ति, अरियर्ति, अरीयर्ति अर्क्रतः, अरियृतः अरीयृतः । रुको रिलोप इति लोपः । आरति, अरीयृरति । अर्क्रयात्, अरियृयात् अरीयृयात् । अररीतु, अरियरीतु, अरीयरीतु, अरर्तु, अरियर्तु, अरीयर्तु, आरतु, अरिय्रतु, अरीय्रतु, आररीत्, आरियरीत्, अरीयरीत् । आरः, आरियः, आरीयः । अरियूरतु । आररुः, आरियरुः, आरीयरुः । सिपि आररीः आरियरीः, अरीयरीः । आरः, आरियः, अरीयः । लिङि । यादादाविति रिङ् । आरियात्, अरीयुरियात् । अररिता, अरियरिता, अरीयरिता । लुङि आरारीत्, आरियरीत् । गृहू । जगृहीति, जरिगृहीति । जर्गर्ढि । जर्गृढः । जर्गृहति । जर्गृहीतु । जर्गर्ढु । जर्गढात् । हौ जर्गृढि । अजर्गृहीत् । अजर्घट् । अजर्घड् । ग्रह जाग्रहीति, जाग्राढि । तसादौ ङिन्निमित्तं सम्प्रसारणं । तस्य बहिरंगत्वेनासिद्धत्वान्नरुगादयः । जागृढः । जागृहति । जाग्रहीषि, जाग्राक्षि, जागृढि । जाग्रहिता । गृधु । जर्गृधीति, जर्गर्द्धि । जर्गृद्धः । जर्गृधति जर्गृधीषि, जर्घर्त्सि । अजर्गृधीत्, अजर्घर्त् । सिपि अजर्गृधीः । अजर्घाः । अजर्गर्धीत् । अजर्गर्धिष्टाम् । पाप्रच्छीति, पाप्रष्टि । तसादौ न सम्प्रसारणं । श्तिपानिर्देशात् ।

(सुबोधिनी-) पिंतितिस्मिवेट् । यङंतात्परेषां हसादीनां पितां तकारसकारमकाराणामीड् वा स्यात् यङो लुक्यपि प्रत्ययलक्षणेनात्र यङः तत्त्वं । बोभूवति । बोभोति । बोभूतः । द्वेरित्यंतोऽतहुन्वोरेवापीति नियमात् नुधातोरित्युव् । बोभूवति । बोभूयात् । लोटि बोभवीतु, बोभोतु । बोभूतात् । लङि अबोभवीत् अबोभोत् । अबोभूताम् । अनउसइत्यन उस् उसि गुण इति गुणे अबोभवुः । कासादिप्रत्ययादित्याम् । बोभवांचकार बोभूयात् । सिसतासीस्यपामितीट् । बोभविता । बोभविष्यति । अ-

बोभविष्यत्। लुङि दादेः पे इति सेर्लुक् यङ्लुकि सतीतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्भुवः सि लोपे स्वरे इति वुक्। अबोभूवीत्। भुवः सिलोपे यङ्लुकि गुणो नेत्यनिषेधाद्गुणः अबोभोत्। अबोभूतां। अनउस इत्यनउस् नित्यत्वाद्वुक्। अबोभूवुः। डुपचष् पाके। आत इति पूर्वस्यात्वं। पापचीति,पापक्ति। १। पापच्यात्।। २। पापक्तु,पापचीतु,। पापक्तात्। ३। अपापचीत्। चोःकुरिति कः दिस्योर्हसादिति दिप्सिपोर्लोपः। अपापक्। ४। पापचांचकार। ५।पापच्यात्। ६।पापचिता। ७। पापचिष्यति। ८। अपापचिष्यत्। ९। अतोहसादेरिति वा वृद्धिः। अपापाचीत्,अपापचीत्॥ १०॥ भुजपालनाभ्यवहारयोः। द्वेःस्वरेपि नोपधाया इत्यनेन चतुर्षु गुणो न। यङीति पूर्वस्य गुणः। बोभुजीति। चोःकुरिति गः खसेचपा इति गस्यकः। बोभोक्ति॥ १॥ बोभुज्यात्॥ २॥ बोभुजीतु, बोभोक्तु॥ ३॥ अबोभुजीत्। दिस्योरिति दिपसिपोर्लोपः। अबोभोक्॥ ४॥ बोभोजांचकार॥ ५ बोभूज्यात्॥ ६॥ बोभोजिता॥ ७॥ बोभोजिष्यति॥ ८॥ अबोभोजिष्यत्॥ ॥ ९॥ अबोभोजीत्॥ १०॥ वद व्यक्तायां वाचि। आत इति पूर्वस्यात्वं।वावदीति। खसेचपा इति तः वावत्ति॥ २॥ वावद्यात्॥ २॥ वावत्तु, वावदीतु,वावत्तात्॥ ३॥ अवावदीत्, अवावत्॥ ४॥ वावदांचकार॥ ५॥ वावद्यात्॥ ६॥ वावदिता॥ ७॥ वावदिष्यति॥ ८॥ अवावदिष्यत्॥ ९॥ अवावादीत्॥ १०। घट चेष्टायां। आत इति पूर्वस्यात्वं। जाघटीति। ष्टुभिष्टुरितिः टः। जाघट्टि। १। जाघटयात्। २। जाघटीतु, जाघट्टु, जाघट्टात्। ३। अजाघटीत्।दिस्योरिति दिप्सिपोर्लोपः। अजाघट्। ४। जाघटांचकार। ५। जाघटयात्। ६। जाघटिता।७ जाघटिष्यति। ८। अजाघटिष्यत्। ९। अजाघाटीत्। १०। अतोहसादेर्लघोरिति वा वृद्धिः। स्पर्द्ध संघर्षे। संघर्षः पराभिभवेच्छा। आत इति पूर्वस्यात्वं। यङ्लुकीतीट्। पास्पर्द्धीति। ईडभावे तथोर्द्ध इति धत्वं। हसात्परस्य झसस्येति धलोपे पास्पार्धि धलोपाभावे झभेजबा इति दत्वं। पास्पर्द्धि। सिपि दलोपे खसेचपा इति तः। पास्पार्त्सि। पक्षे पास्पर्त्सि। पास्पर्ध्यात्। २। पास्पर्द्धु, पास्पर्द्धीतु, तुह्योरिति तातङ्। पास्पर्द्धात्। हौ झसाद्धिर्हेरिति धत्वे हसादिति धलोपे पास्पर्द्धि धलोपाभावे दत्वम्। पास्पर्द्धि। ३। लङि अपास्पर्द्धीत्। ईडभावे दिस्योर्हसादिति दिप्सिपोर्लोपः। संयोगान्तस्येति धलोपः। वाऽवसाने इति वा तः। अपास्पर्द्, अपास्पर्त्। सिपि तु अपास्पर्द्धीः। पक्षे दःसः इति दस्य सः। दोषामिति सस्य रः। रिलोपोदीर्घश्चेति रलोपपूर्वदीर्घौ। अपास्पाः। ४। पास्पर्द्धांचकार। ५। पास्पर्द्ध्यात्। ६। पास्पर्द्धिता। ७। पास्पर्द्धिष्यति। ८। अपास्पर्द्धिष्यत। ९। लुङि सिसतासीस्यपामितीट् सेरितीट् इटईटीति दः सिलोपः। अपास्पर्द्धीत्। १०। गाधृ प्रतिष्ठादौ। तथोर्द्ध इति धः झभेजबा इति दः।जागाद्धि। ईट् पक्षे जागाधीति। १।सिपि आदि जबानामिति घः। खसेचपा इति धस्य तः।जाघात्सि। २।जागाध्यात्। ३।जा

गाधीतु,जागाद्धु।४।हौझसादिति हेर्द्धिः।जागाद्धि।९। अजागाधीत् ।आदिजबाना-मिति घः। अजाघात्। सिपि अजागाधीः। ईडभावे दिस्योरिति सिलोपः। वाव-साने वादः। दःसः इति दस्य सः आदिजबानामितिः घः। अजाघात्। सिपि अ-जाघाद्। ४। लुङि अजागाधीत्। अजागाधिष्टां।नाथृ नाधृ याच्ञादौ।आत इति पूर्वस्यात्वं। खसेचपा इति थस्य तः। नानात्ति, नानाथीति। नानाथ्यात्।ना-नात्तु, नानाथीतु,नानात्तात्। अनानात्। अनानाथीद्। लुङि। अनानाथीत्। अना-नाथिष्ठाम्। दध धारणे। ईट् पक्षे दादधीति। पक्षे तथोर्द्ध इति धः। झभेजबा इ-ति दः। दादद्धि। सिपि आदिजबानामिति धः। दाधत्सि। दादध्यात्। दादधीतु दादद्धु,दादद्धात्। हौझसाद्धिर्हेरिति धिः। दादद्धि। लङि अदादधीत्,ईडभावे आ-दिजबानामिति धः। अदाधत्। सिपि दःस इति दस्य सः। अदाधः, अदाधत्, अदादधीः। लुङि अतोहसादेर्लघोरिति वा वृद्धिः।अदादाधीत्, अदादधीत्। स्कु-दि आप्लवने। इदितोनुमिति नुम्। चोस्कुंदीति, ईडभावे चोस्कुंत्ति। चोस्कुंद्यात्। चोस्कुंदीतु, चोस्कुन्तु,चोस्कुन्तात्। अचोस्कुंदीत्। दिस्योर्हसादिति दिप्सिपोर्लोपः संयोगांतस्येति दलोपः।अचोस्कुन्। लुङि अचोस्कुन्दीत्। मुदी हर्षे। मोमुदीति।द्वेः स्वरेऽपि न गुणः मोमोत्ति। मोमुद्यात्। मोमुदीत्, मोमोत्, मोमुत्तात्। अमो-मुदीत्। अमोमोत् सिपि दःस इति दस्य सः।अमोमोः अमोमोत्। लुङि अमोमोदी-त्। कुर्द खुर्द गुर्द गुदक्रीडायाम्। य्वोर्विहसे इति दीर्घः। खसेचपा इति दस्य तः चोकुर्त्ति। ईट् पक्षे चोकूर्दीति, चोकूर्द्यात् चोकूर्त्तु चोकोर्दीतु चोकूर्तात् हौ झसाद्धिर्हे-रिति धिः। चोकूर्द्धि। अचोकूर्दीत्,। अचोकूर्त्। रात्सस्येति तलोपो न। सिपि दःस इति दस्य सः। रात्सस्येति सलोपः। य्वोर्विहसे इति दीर्घः। अचोकूः अचोकू-र्दीः। लुङि अचोकूर्दीत्। डुकृञ् करणे। ऋदंतानामृदुपधानां च यङ्लुकि पूर्वस्य रुक्रिक्रीक्-। अतिशयेन करोति। चर्करोति। ईडभावे चर्कर्ति। द्वेरि-त्यंतोऽत् रत्वं। चर्क्रति। विधिलिङि चर्क्रियात्। लोटि। चर्करोतु, चर्कर्तु चर्कृ-तात्। लङि अचर्करीत्। ईडभावे दिस्योर्हसादिति दिप्सिपोर्लोपः। अचर्कः। आशिषि लिङि यादादापे इति रिङ्। चार्क्रियात्। लुङि णित्पे इति णित्वाद् धातोर्नामिन इति वृद्धिः। अचर्कारात्। वृतु वर्त्तने लटि ईट्पक्षे द्वेःस्वरेपीति न गुणः। वर्वृतीति ईडभावे वर्वर्ति। विधिलिङि वर्वृत्यात्। इटि लोटि वर्वृतीतु ई-डभावे वर्वर्तु, वर्वृतात्॥ हौ झसाद्धिर्हेति धिः। वर्वृद्धि। लङि अवर्वृतीत्। ईड-भावे रात्सस्येति तलोपो न। अवर्वर्त्। दिस्योर्हसादिति दिप्सिपोर्लोपः। सिपि प-क्षे वावसाने इति दः दःस इति दस्य सः। दोषामिति सस्य रः। रिलोपो दीर्घश्चेति रलोपपूर्वदीर्घौ। अवर्वाः अवर्वर्त्। ईटि अवर्वृतीः। लिटि वर्वर्त्तामास। वर्वृत्यात्। वर्वर्तिता। लृटि गणनिर्दिष्टत्वात् वृतादिभ्यः स्यसयोरिति न। वर्वर्तिष्यति। अवर्व-र्तिष्यत्। लुङि गणनिर्दिष्टत्वात् लित्पुषादेरिति ङो न। अवर्वर्तीत। वंचु गतौ गत्य-

र्थात् कौटिल्ये इति यङ्। वंचु स्रंसु इति पूर्वस्य नीगागमः। लुकि न तन्निमित्तमिति यङो लुका लुप्तत्वात्तदाश्रितो नलोपो न। वनीवंचीति। ईडभावे वनीवंक्ति। तसोऽङिस्त्वादिह स्यादेव। नोलोप इति नलोपः। वनीवक्तः। द्वेरित्यंतोऽत्। वनीवंचति। वनीवच्यात्। वनीवंचीतु,वनीवङ्क्तु,वनीवक्तात्। हौ झसादिति हेर्धिः। वनीवग्धि। अवनीवंचीत्। ईडभावे संयोगांतस्येति चलोपः। अवनीवन्। ४। लुङि अवनीवंचीत्। १०। गम्लृगतौ। जमजपामिति पूर्वस्य नुक्। जंगमीति। ईडभावे। जगंति। लोपस्त्वनुदात्ततनामिति मलोपः। जंगतः। गमांस्वरे इत्युपधालोपः। जंग्मति। मोनोधातोरितिनः। जंगन्मि। १। जंगम्यात्। ९। जंगमीतु,जगंतु,जंगतात्। हौलोपस्त्वनुदात्ततनामिति मलोपस्याऽसिद्धत्वादऽत इति न हेर्लुक्। जंगहि। अजगमीत्। ईडभावे दिस्योरिति दिप्सिपोर्लोपः। मोनोधातोरिति न अजंगत्। अनुबंधनिर्दिष्टत्वात् लितुषादेरिति न ङः। झयंतोति न वृद्धिः। अजंगमीत्। हन हिंसागत्योः। पूर्वाद्धंतेरिति हस्य घः। हंतेरिति स्तिपानिर्देशस्तथापि यङ्लुकि भवत्येवेति न्यासकारः। श्तिपाशपेति निषेधस्य अनित्यत्वात्। जमजपामिति पूर्वस्य नुक्। जंघनीति। ईडभावे जंघंति। तसि लोपस्त्वनुदात्ततनामिति नलोपः। जंघतः। गमांस्वरे इत्युपधालोपः। द्वेरित्यंतोऽत्। जंघ्नति। जंघन्यात्। जंघनीतु,जंघंतु,जंघतात्। जह्येधिशाधीतिसूत्रे अयङ्लुकीति वक्तव्यम्। तेन जंघहि। अजंघनीत्। ईडभावे अजंघन्। जंघनांचकार। हनोलुङ्लिङोर्वध इति वधादेशः। द्वित्वविशिष्टस्य हनोवधादेशाद् वधादेशस्य पुनर्द्वित्वं न। वध्यात्। अवधीत्। आङ्पूर्वात्तु आङोयमहन इत्यात्मनेपदम्। आजंघते। इत्यादि। प्रकृतिग्रहणे यङ्लुगंतस्यापि ग्रहणमित्युक्तत्वात्। चर गतौ भक्षणे च। लुपसदेति गर्हायां यङ्। यङो लुक्। जमजपामिति नुक्। चरफलोरित्युत्वं उतस्तपरत्वान्न गुणः। य्वोर्विहसे इति दीर्घस्तु स्यादेव। चंचूर्ति, चंचूरीति। चंचूर्यात्। चंचूर्तु, चंचुरीतु, चंचूर्तात्। अचंचूः। पदांतविषयत्वात् य्वोर्विहसे इति दीर्घः। अचंचुरीत्। खनु अवदारणे। जमजपामिति नुक्। चंखनीति,चंखन्ति। जनसनेत्यात्वं। चंखातः। जनसनेत्यत्र हकारे चेति वाच्यम्। तेन ह्यावप्यात्वं। चंखाहि। अचंखनीत्,अचंखन्। आशीर्लिङि जनसनेतिवाऽत्वं। चंखायात्,चंखन्यात्। लुङि अतोहलादेरिति। वा वृद्धिः। अचंखनीत्, अचंखानीत्। यु मिश्रणेऽमिश्रणे च। ओरौ इति सूत्रेऽद्विरुक्तस्येत्युक्तत्वादुत औत्वं न। यङीति पूर्वस्य गुणः। यो ोति। ईट्पक्षे योयवीति। नुधातोरित्युव्। योयुवति। योयुयात् योयोतु, योयवीतु, अयोयोत्, अयोयवीत् आशिषि ये इति दीर्घः योयूयात्। लुङि। णित्पे इति णित्वात् धातोर्नामिन इति वृद्धिः। आयोयावीत्। णुस्तुतौ। नोनोति, नोनवीति नोनुयात्। नोनवीतु, नोनोतु, नोनुतात्। अनोनवीत्। अनोनोत्। उसिगुण इति गुणे। अनोनुवः। लुङि। अनोनावीत्। ओहाक् त्यागे। ओहाङ् गतौ। अनयोस्तुल्यानि रूपाणि ङित्वप्रयुक्तस्यात्मनेपदस्य यङ्लुक्यप्रवृत्तेः। भृञांलुकीति इत्वस्य लुग्निमित्ते द्वित्वे एव विहितत्वाच्च। आत

इति पूर्वस्यात्वं। ईट्पक्षे जाहेति, जाहाति। द्वेस्तावितीत्वं। जाहीतः। इह ङिति इसेभीहाकोरिद्वेतीत्वं न। अनुबंधनिर्दिष्टत्वात्। द्वेरित्यंतोऽत् द्वेस्तावित्यालोपः। जाहति। जाहेषि, जाहासि। जाहीथः। जाहीथ। जाहेमि, जाहामि। जाहीवः। जाहीमः। द्वेस्तावितीत्वं। जाहीयात्। इह हाकोयादादावालोप इसालोपोन। अनुबंधनिर्दिष्टत्वात्। जाहेतु, जाहातु, जाहीतात्। हौद्वेस्तावितीत्वं। जाहीहि। इह इर्वाहाविति ह्रस्वदीर्घविकल्पे रूपत्रयं न। जहातेरिति श्तिपा निर्दिष्टत्वात्। अजाहेत्। ईडभावे अजाहात्। आशिषि जाहायात्। इह दादे इत्येत्वं दादेरिति इत्वं च न। हागित्युभत्रानुबंधनिर्दिष्टत्वात्। जाहिता। लुङि। यमिरमिनमातामिती ट्सकौ। अजाहासीत्। अजाहासिष्टां। अजाहासिषुः। डुदाञ् दाने। आत इति पूर्वस्यात्वं दादाति। ईट् पक्षे। दादेति। दादेरित्यालोपः। दातः। द्वेरित्यंतोऽत् - दादाति। दादासि, दादेषि। दाद्यात्। दादेतु, दादातु, दात्तात्,। हौ दांहावित्येत्व पूर्वलोपौ देहि, दात्तात् अदादात्, अदादेत्। दादांचकार। दादेरे इत्येत्वं। दादेयात्। देदिता। देदिष्यति अदेदिष्यत्। दादेपे इति सिलोपः अदादात्। धेट् पाने दाधाति, दाधेति। दादेरित्यालोपः। खसेचपाझसानामिति तः। दात्तः। तथोर्ध इति धत्वं न दादेरित्यालोपस्य स्थानिवत्वेन इसांतत्वाभावात्। तत्र सूत्रे व्यवस्थितार्थत्वानुवृत्तेर्वा दाधति। दाध्यात् दाधातु, दाधेतु, दात्तात्। दाधतु। हौ दांहावित्येत्वपूर्वलोपौ। धेहि। अदाधात् अदाधेत्। दाधांचकार। दादेरे इत्येत्वं। दाधेयात्। देधिता। देधिष्यति। अदेधिष्यत्। शाछासाघ्राधेटामिति वा सिलोपः। अदाधात्। पक्षे यमिरमिनमातामितीट्सकौ अदाधासीत्। धेटो भूतमात्रे दिवादिप। रोडेवेति ङः। अदाधत् डुधाञ् धारणादौ। दाधाति। दाधेति पूर्वस्य ङिति इसे ध इति धः। खसेचपा इतितः। धात्तः दाधति। दाध्यात् दाधातु, दाधेतु धात्तात् हौ दांहावित्येत्वपूर्वलोपो धेहि। अदाधात् अदाधेत् दाधाञ्चकार। दादेरे इत्येत्वं दाधेयात्। देधिता। देधिष्यति। अदेधिष्यत्। दादेःपे इति सिलोपः। अदाधात् दाप् लवने। दैप् शोधने। आदादिकभौवादिकयोरनयोर्दादित्वं। दादाति, दादेति द्वेस्तावितीत्व। दादीतः। द्वेरित्यंतोऽत्। द्वेस्तावित्यालोपः। दादति। दादीयात् दादातु, दादेतु, दादीतात्। हौ। दादीहि। अदादात्। अदादेत् दादांचकार। दादायात्। देदिता। देदिष्यति। अदेदिष्यत्। यमिरमिनमातामितीट्सकौ अदादासीत्। ञिष्वप्शये। सर्वविधिभ्यो लुग्विधिर्बलीयान् इति यङो लुक्। लुका लुप्ते प्रत्ययलक्षणत्वाभावात् स्वपिस्यमिव्येञांयङीति विधीयमानं यत्संप्रसारणं तन्न भवति। रुदादेश्चतुर्णां ह्रसादेरति गणनिर्दिष्टत्वादिण्न आत इति पूर्वस्यात्वं। ईट्पक्षे सास्वपीति। ईडभावे सास्वप्ति। सास्वप्तः। सास्वपाति। सास्वप्यात्। सास्वपीतु, सास्वप्तु, सास्वप्तात्। हौ जसाद्धिरिति धिः। झभेजबा इति। बः। सास्वब्धि। रुदादेर्दिस्योरीडडाविति गणनिर्दिष्टत्वान्न। असास्वपीत्, असास्वप्। सास्वपांचकार। आशिषि यजामिति संप्रसारणम्। सासुप्यात्। सास्व-

पिता। सास्वपिष्याति। असास्वविष्यत्। अतो हसादेरिति वा वृद्धिः। असास्वापीत् असास्वपीत्। कॄ विक्षेपे। आत इति पूर्वस्यात्वं। ऋदंतानामिति तपरत्वात् रुकू रिकूरीको न भवंति। ईट्पक्षे चाकरीति। ईडभावे चाकर्त्ति। ऋतइरितीर्। य्वोर्विहसे इति दीर्घः। चाकीर्तः। द्वेरित्यन्तोत्। चाकिरति। चाकीर्यात्। चाकरीतु चाकर्तु, चाकीर्त्तात्। चाकीर्हि। अचाकरीत्। ईडभावे दिस्योर्हसादिति दिप्सिपो र्लोपः। अचाकः। उसि गुणः अचाकरुः। चाकरांचकार। चाकीर्य्यात् चाकरिता चाकरिष्यति। अचाकरिष्यत्। लुङि णित्पे इति णित्वात् धातोर्नामिन इति वृद्धिः अचाकारीत्। तॄप्लवनसंतरणयोः। तातरीति, तातर्ति। तातीर्य्यात्। तातरीतु, तात र्तु तातीर्त्तात्। अतातरीत्, अतातः। तातरांचकार। तातीर्य्यात्। तातरिता। तात रिष्यति। अतातरीष्यत्। अतातारीत्। अतातारिष्टाम्। ऋ गतौ भौवादिकजौहोत्यादिकयोर्ग्रहणं। अस्मात् सूचिसूत्रिमूत्रीति यङ् द्वित्वं च। केचित्तु यङीति पूर्वस्य गुणमाहुः। अन्ये तु रइति पूर्वस्यात्वमित्याहुः। फले तु न विशेषः। ऋदंतानामिति पूर्वस्य ऋगूरिग् रीगागमाः। अरर्त्ति। रिग्रीकोस्तु तुल्यं रूपं। असवर्णे स्वरे पूर्वस्येतीय्। अरियर्ति। ईट् पक्षे अररीति, अरीयरीति। तसि अर्ऋतः अरियृतः। द्वेरित्यंतोत् ऋरमिति रः। रलोपो दीर्घश्चेति रलोप पूर्वदीर्घौ। आरति परत्वात्पूर्वमियू ततो रत्वं अरियूरति। मध्यम पुरुषे तु अरियर्षि, ईट् पक्षे अररीषि, अरियरीषि। रिग्रीकोस्तुल्यं रूपं। अर्ऋथः, अरियृथः। उत्तम पुरुषे तु अरार्मि, अरियर्मि। ईट् पक्षे अररीमि अरियरीमि। अर्ऋवः, अरियृवः। लिङि अर्ऋयात्, आरियृयात। लोटि अरर्तु, अरियर्तु। ईट् पक्षे अररीतु, अरीयरीतु, अर्ऋतात्, आरियृतात्। अर्ऋताम्, अरियृताम्,। आरतु, अरियूरतु। अर्ऋहि. अरियृहि। उत्तमेतु अरराणि, अरियराणि। अरराव, अरियराव। लङि दिस्योर्हसादिति दिप्सिपोर्लोपः। आरः, आरियः। पक्षे आररीः, आरीयरीः। उत्तमे तु आररम्, आरियरम्। आर्ऋव, आरियृव। लिटि अररांचकार, अरियरांचकार। आशिषिलिङि शितपानिर्दिष्टत्वाद्गुणोर्तिसंयोगाद्योरिति गुणोन। यादादौ ये इति रिङ् रिलोपो दीर्घश्चेति रलोपपूर्वदीर्घौ। आरियात, आरिरियात्, अरीरियात्। लुटि अररिता, अरियरिता, लृटि अरारिष्याति अरियरिष्याति। लङि आररिष्यत्। आरियरिष्यत् णित्वात् धातोर्नामिन इति वृद्धिः। आरारीत्, आरियारित्। गृहू ग्रहणे। द्वेःस्वरेपीति गुणः निषेधे ऋदंतानामृदुपधानांचेति रुग्रिग्रीकः। ईटपक्षे जर्गृहीति। ईडभावे होढ इति ढत्वं तथोर्ध इति धत्वं ष्टुत्वं ढिढोलोप इति ढलोप इति ढलोपेः जर्गढि। जर्गृढ इत्यत्र ढिढ इतिढलोपे पूर्वस्य दीर्घोन। अनृत इत्युक्तत्वात्। जर्घक्षि। उत्तमे। जर्गृहीमि,। जर्गृह्मि। जर्गृह्यात्। जर्गृहीतु, जर्गर्ढु, जर्गृढात्। जर्गृढां। जर्गृहतु। झसाद्धिर्हिरितिधिः। जर्गृढि। उत्तमे तु द्वेः स्वरेपीति गुणो न। जर्गृहाणि। लङि। अजर्गृहीत्। ईडभावे आदिजबानामिति घः। अजर्घट्। अजर्गृढां। अजर्गृहुः। अजर्गृहीः अजर्घट्। अजर्गृहम्। अजर्गृढ। द्वेः स्वरेपीति न गुणः। अजर्गृहम्। अजर्गृह्व।

अजर्गृह्म । जर्गर्हांचकार । जर्गृह्यात् । लुटि अनुबंधनिर्दिष्टत्वाद् ऊदितो वेतीड् विकल्पो न । जर्गर्हिता । जर्गर्हिष्यति अजर्गर्हिष्यत् । अजर्गर्हीत् । अजर्गर्हिष्टाम् । ग्रह उपादाने । यङो लुका लुप्तत्वात्तन्निमित्तग्रहां क्ङितिचेति संप्रसारणमिह न भवति । आत इति पूर्वस्यात्वं । जाग्रहीति । ईडभावे होढ इति ढत्वं । तथोर्द्ध इति धत्वं ष्टुत्वं च । ढिढोलोपोदीर्घश्चेति ढलोपपूर्वदीर्घौ जाग्राढि । तसादौ प्रत्यये ङित्वात् ग्रहांक्ङितिचेति संप्रसारणम् । तस्य संप्रसारणस्याऽसिद्धंबहिरंगमंतरंगे इत्यसिद्धत्वात् रुग्रिग्रीमागमा न भवंति । जागृढः । सिपि जाग्रहीषि । ईडभावे होढ इति ढत्वं । षढोः कः से इति कत्वं । आदिजबानामिति घः जाघ्रक्षि । जाग्रह्यात् । जागृहीतु, जाग्राढु, जागृढात् । अजाग्रहीत्, अजाघट् । जाग्रहांचकार । जागृह्यात् । लुटि ईटोग्रहामितिसूत्रे एकस्वरस्य ग्रहेरित्युक्तत्वात् यङ्लुकि दीर्घोन । माधवस्तु दीर्घमाह तद्भाष्यविरुद्धम् । जाग्रहिता । जाग्रहिष्यति । अजाग्रहिष्यत् । अजाग्रहीत् ह्ययंतेति न वृद्धिः । गृधु अभिकांक्षायाम् । द्वेः स्वेरपीति गुणनिषेधः । ऋदंताना मृदुपधानांचेति रुग्रिग्रीगागमाः । जर्गृधीति । ईडभावेतथोर्ध इतिधः । झबेजबा इति दः । जर्घर्त्सि । जर्गृध्यात् जर्गृधीतु जर्गर्द्धु, जर्गृद्धात् । अजर्गृधीत् । ईडभावे उपधायालघोरिति गुणः । दिस्योरिति दिप्सिपोर्लोपः । आदिजबानामिति घः । अजर्घर्त् । अजर्गृद्धां । अजर्गृधुः । सिपि दःस इति सः । दोषामिति सस्य रः । रिलोपोदोर्घश्चेति रलोपपूर्वदीर्घौ । अजर्घाः अजर्घर्त् । जर्गर्द्धांचकार । जर्गृध्यात् । जर्घिता । जर्गर्धिष्यति अजर्गर्धिष्यत् । अजर्गर्धीत् जर्गर्द्धांचकार । जर्गृध्यात् । जर्गर्धिता । जर्गर्धिष्यति । अजर्गर्धीत् । प्रच्छ ज्ञीप्सायाम् । आत इति पूर्वस्यात्वं । पाप्रच्छीति । ईडभावे छशषेति षत्वं ष्टुत्वं प्राप्रष्टि । तसादौ प्रत्यये ग्रहांक्ङितिचेति संप्रसारणं न शितपानिर्दिष्टत्वात् ॥

(तत्वदीपिका—) श्तिप्मइत्यत्रापि ङितकारको निर्देशः । एको दकारजः । यङ्लुगन्तात्पमिति । अत्र दीक्षिताः प्रत्ययलक्षणेन ङित्वमाश्रित्यात्मनेपदं त्वस्य न ङित्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः यत्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत्॥ इत्याहुः । तन्नेति पण्डिताः । तथाहि तेतिक्ते इति किं । निपात्यत इति अर्थयङ्लुगन्तस्यात्मनेपदं निपात्यते नैतदस्ति प्रयोजनं । ङिद्मात्रात्मनेपदमनुदात्तङित आत्मनेपदीमात । नियमार्थं तर्हि भविष्यति । अत्रैवयङ्लुगन्तस्यात्मनेपदं भवति । नान्यत्रेति । तथा च वामनोपि अर्थयङ् लुगन्तस्यात्मनेपदं निपात्यते । यङो ङित्वात्प्रत्ययलक्षणेन यङ्लुगन्तस्यात्मनेपदमन्यत्र न भवतीत्येतदेव ज्ञापकमिति । भाष्यकारादिमतोल्लावेनेन तदाकरविरुद्धमित्युक्तवंतः । अदादित्वादिति प्राञ्चस्तु । ह्लादित्वमत्वाद्दित्वमाहुस्तदपाणिनीयमित्युपेक्षितं द्वे स्वेरपि । अपिशब्दाद्धात्वंतलोपे गुणवृद्धी न तेनबेभिदिता मरीमृजितेत्यादिसिद्धं । अपास्या इतिद इति रत्वे रिलोप इति दीर्घः । ऋदन्तानामित्यादि रुगादीनां त्रयाणामपि कित्वात्त्रयोप्यागमाः पर्यायेण भवन्ति । रुक् उकारउच्चारणार्थः । चर्करीति ॥ ईकारे रूपत्रयं तदभावे च त्रय-

मिति षट् तिपि जगन्त इतिलोपस्त्वनुदात्ततनामिति मलोपः जगन्मीति। म्वोश्चेति मस्य नः जंवनीति पूर्ववत् हन्तेरिति घत्वम्। आशिषि वध्यादिति द्विरुक्तस्य वधादेशाद्द्वित्वन्न। एकस्यां व्यक्तावेकलक्षणं सकृदेव प्रवर्तत इत्युक्तेः। चंचूर्तीति। चरगतिभक्षणयोः। चरफलोरतउदिति उत्वे र्वोर्विहस इति दीर्घः। चंखात इति। जनसनेत्यात्वं। योयोति। अद्विरुक्तस्येत्यनुवृत्तेरोराविन्यौत्वंन। दांतइति। दादेरित्याकारलोपः। देहीति। दांहावित्येत्वलोपौ। चाकर्तीति। ऋदन्तानामित्यत्र तपरकरणान्न रुगादयः। अरर्तीति। गुणोऽद्वितीयस्य। अरियर्ति। पक्षद्वयेपि इयादेशे तु समं। जाग्रहीति। ईकाराभावे ढत्वधत्वष्टुत्वढलोपदीर्घत्वानि। कैश्चिदत्र संप्रसारणे जर्गृहीतीत्यादिरूपमुक्तं तदनाकरमित्युपेक्षितं। बहिरङ्गत्वे इति। प्रत्ययाश्रितं बहिरङ्गमित्युक्तेः। अजर्घा इति दइति रत्वे रिलोप इति दीर्घः। तसादौ न संप्रसारणमेतद्बीजं तु श्तिपानिर्देशः। उक्तं च। श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च। यत्रैकाच्ग्रहणं चैव पञ्चैतानि न यङ्लुकीति।

मू०-- क्ङितिझसेक्कौञमेचच्छस्यशोवस्यऊः॥ पाप्रष्टः। पाप्रच्छति। पाप्राश्मि। पाप्रच्छ्वः। पाप्रश्मः। हय् गतौ। जाहयीति। यवयोर्वसेहकारे च लोपः। जाहति। जाहतः। जाहयति। जाहयीषि जाहसि। जाहामि। जाहावः। जाहामः। अजाहयीत् अजाहत्। जाहय्यात्। हर्य गतिकान्त्योः। जाहर्यीति जाहर्ति। जाहर्तः। जाहर्यति। जाहर्हि। अजाहर्यीत् अजाहः। अजाहर्ताम्। अजाहर्युः।

(सुबोधिनी--) क्ङितिझसेक्कौञमेचच्छस्यशोवस्यऊः। धातोः छस्य शकारः स्यात् वकारस्य ऊश्च किति ङिति झसे परे क्विपि ञमे च परे। भाष्ये उक्तं च्छ्वोरित्यनेन ऊभाविनां यकारवकारान्तानां धातूनां। लुग् यङो न भवतीति। मव्य बंधने यांतः। तेवृ देवृ देवने इत्यादि वांतश्च ऊभावी ज्वरत्वरेति। ऊभाविनोः स्त्रिविमव्योस्तु। यङ्लुग् अस्त्येवेति छस्य शः। छशषेति षः पाप्रष्टः। पाप्रच्छति। पाप्रच्छीषि। ईडभावे छशषेतिषः। षढोःकःसे इति कः। पाप्राक्षि उत्तमे तु पाप्रश्मि। पाप्रच्छयात्। पाप्रच्छीतु, पाप्रष्टु, पाप्रष्टात्। हौ झसाद्धेर्हेरिति धिः। क्ङिति झसे इति छस्य षः। छशषेति षः। झभे इति षस्य डः ष्टुत्वं च पाप्रड्ढि। अपाप्रच्छीत् ईडभावे दिस्योरिति दिप्सिपोर्लोपः। छशषेति षः। षोड इति डः। अपाप्रट्। अपाप्रष्टाम्। अपाप्रच्छुः। अपाप्रच्छीः। अपाप्रट्। अपाप्रष्टं। अपाप्रष्ट। अपाप्रच्छं। अपाप्रच्छ्व। अपाप्रश्म। पाप्रच्छांचकार। पाप्रच्छयात्। पाप्रच्छिता। पाप्रच्छिष्यति। अपाप्रच्छिष्यत्। अपाप्रच्छीत्। हय गतौ। जाहयीति। ईडभावे यवयोर्वसे इति यलोपः। जाहति। उत्तमे तु। जाहयीमि। यवयोरिति यलोपे म्वोरिसात्वं। जाहामि। जाहय्यात्। जाहयीतु, जाहतु। जाहतात्। जाहतां। जाहयतु। जाहाहि।

जाहतात्। उत्तमेतु। जाहयानि। लङि। अजाहयीत्। अजाहत्। जाहयांचकार। जाहय्यात्। जाहयिता जाहयिष्यति। अजाहयिष्यत्। ह्मयंतेति न वृद्धिः। अजाहयीत्। हर्य गतिकान्त्योः। आत इत्यात्वं। जाहर्यीति। ईडभावे यवयोर्वसे इति यलोपः। जाहर्त्ति। जाहर्य्यात्। जाहर्यीतु। जाहर्त्तु, जाहर्तात्। अजाहर्य्यीत्। अजाहः। जाहर्य्याचकार। जाहर्य्यात्। जाहर्य्यिता। जाहर्य्यिष्यति। अजाहर्य्यिष्यत् अजाहर्यीत्॥

(तत्त्वदीपिका-) जहातीति। यवयोरिति यलोपः।

मू०- ज्वरत्वरस्रिव्यविमवामुपधावकारयोरूः॥ क्वौ झसादौ-ऽमादौ हकारे च प्रत्यये परे। जाज्वरीति, जाजूर्ति। जाजूर्तः। जाज्वरति। जाजूर्वः। जाजूर्मः। अजाज्वरीत्। अजाजूः। तात्वरीति, तातूर्ति। अतात्वरीत्, अतातूः। सेस्रिवीति। सेस्रोति। सेस्रीव्यात्। असेस्रिवीत्। असेस्रोत्। मव बन्धने। मामवीति। मामोति। मामूतः। मामवति। मामावः। मामूमः। मामूहि। मामवानि। अमामवीत्। अमामोत्। सिपि अमामवीः अमामोः। अमामवम्। अमामाव। अमामूम। तुर्वी थुर्वी दुर्वी धुर्वी-हिंसायाम्। तोतुर्वीति।

(सुबोधिनी-) ज्वरत्वरस्रिव्यविमवामुपधावकारयोरूः। क्वौ झसादावमादौ हकारे च प्रत्यये। ज्वर रोगे। ञित्वरा संभ्रमे। स्रिवु गतिशोषणयोः। अव पालने। मव बंधने। ज्वरादेरुदाहरणं क्विपि जूः। जूरौ। जुरः। झसादौ तु जूर्तिः। जूर्णः। जूर्णवान्। तूः। तुरौ। तुरः। तूर्तिः तूर्णवान्। स्रूः। स्रुवौ। स्रुवः। स्रूतिः। ऊः। उवौ। उवः। ऊतिः। मूः। मुवौ। मुवः। मूतिः। मूतः। ज्वर आतइति पूर्वस्यात्वं। जाज्वरीति। ईडभावेउपधावकारयोरूः जाजूर्ति। जाजूर्तः। जाज्वराति। जाज्वर्यात्। जाज्वरीतु, जाजूर्तु, जाजूर्तात्। अजाज्वरीत् अजाजूः। जाज्वरांचकार। जाज्वर्य्यात्। जाज्वरिता। जाज्वरिष्यति। अजाज्वरिष्यत्। अतोहसादेरिति वा वृद्धिः। अजाज्वारीत्। अजाज्वरीत्। ञित्वरा संभ्रमे। तात्वरीति। तातूर्ति। तात्वर्य्यात्। तात्वरीतु, तातूर्तु, तातूर्त्तात्। अतात्वरीत्। अतातूः। तात्वरांचकार। तात्वर्य्यात्। तात्वरिष्यति। अतात्वरिष्यत, अतात्वरीत, अतात्वारीत। स्रिवु। सेस्रिवीति, सेस्रोति। सेस्रीव्यात सेस्रिवीतु सेस्रूतात। असेस्रिवीत् असेस्रोत्। सिपि। असेस्रोः। सेस्रिवांचकार। सेस्रीव्यात्। सेस्रिविता। सेस्रिविष्यति। असेस्रिविष्यत्। असेस्रिवीत। मव मामवीति, ईडभावे ऊत्वे कृते गुणः। मामोति। उत्तमेतु मामवीमि, मामोमि। यवयोर्वसे इति वलोपः। म्वोरित्यात्वं। मामावः मामूमः मामव्यात। मामवीतु। मामोतु। मामूतात्। हौ मामुहि। अमामवीत्। अमोमोत। उत्तमे तु अमामवं। अमामाव। अमामूम। लुङि

अमामावीत् । तुर्वीहिंसायां । य्वोर्विहसे इति दीर्घः । यङीति पूर्वस्य गुणः तोतूर्वीति ईडभावे ॥

(तत्त्वदीपिका–) उपधावकारयोरिति । उपधा वकारश्च उपधावकारौ तयोः द्वयोः स्थाने ऊरित्यर्थः। मामाव इति अत्र झसादित्वाभावेन ऊत्वाभावः। यवयोरिति वलोप दीर्घः।

मू०–रेफाच्छ्वोर्लोपः॥क्वौ झसादौञमादौ हे च प्रत्यये। तोतोर्ति। तोतूर्तः। तोतूर्वति। तोतूर्वीषि, तोतोर्षि। तोतूर्वः। तोतूर्मः। सिपि अतोतूर्वीः अतोतोः। तोथोर्ति। तोथूर्तः। दोदोर्ति। दोधोर्ति। मुर्च्छा मोहसमुच्छ्राययोः। मोमूर्च्छीति। मोमोर्ति। मोमूर्त्तः। मोमूर्च्छति। मोमूर्मः। अमोमूर्च्छीत्। इतियङ्लुगन्तप्रक्रिया।

(सुबोधिनी–)रेफाच्छ्वोर्लोपः। क्वौ झसादौ ञमादौ हकारे च प्रत्यये रकारात्परयोर्द्धातोः छकारवकारयोर्लोपः स्यात् क्विपि परे झसे ञमे हे च क्वावुदाहरणं। तुर्वी। तूः तूरौ तुरः। धुर्वी धूः। धूरौ। धुरः। मुर्छा मूः। मूरौ। मुरः। झसादौ तु रेफाच्छ्वोरिति वलोपः। उपधायालघोरितिगुणः तोतोर्त्ति। यद्यप्यत्र यवयोर्वसे इत्यनेन वलोपः सिध्यति तथापि तोतूर्त इत्यादौ वलोपार्थं रेफाच्छ्वोर्लोप इत्युपन्यस्तमन्यथा तत्र वयोर्वसे इति लोपं बाधित्वा वस्य क्ङिति झसे इति ऊः स्यात्। तोतूर्व्यात्। तोतुर्वीतु, तोतोर्तु, तोतुर्तात्। अतोतूर्वीत्। अतोतोः। लुङि अतोतूर्वीत्। थुर्वी धुर्वी हिंसायाम्। तोथूर्वीति तोथोर्ति। तोथुर्व्यात्। तोथूर्वीतु, तोथोर्तु, तोतूर्तात्। अतोथुर्वीत् अतोथोः। लुङि अतोथूर्वीत्। धुर्वी दोधुर्वीति, दोधोर्ति। दोधुर्व्यात्। दोधुर्वीतु, दोधोर्तु, दोधूर्तात्। अदोधूर्वीत् अदोधोः लुङि अदोधूर्वीत्। मुर्च्छामोहसमुच्छ्राययोः। मोमुर्छीति, ईडभावे रेफाच्छ्वोरिति छलोपः उपधायालघोरिति गुणः। मोमोर्ति। मोमूर्छ्यात्। मोमूर्छीतु, मोमोर्तु, मोमूर्त्तात्। अमोमूर्छीत्, अमोमोः। लुङि अमोमूर्छीत्। अज गत्यादौ। अजेरचतुर्षु वीति यङि विवक्षिते वीआदेशः। वेवीयते। अस्य यङ्लुग्नास्ति लुकापहारे विषयत्वासंभवेन वीभावस्याप्रवृत्तेः। इतियङ्लुगंतप्रक्रिया॥

कृतायामिहटीकायांलोकेशकरशर्मणा।
बाधनं दुष्टबुद्धीनामगाद्यङ्लुक्प्रसाधनं।
इतियङ्लुक्प्रक्रिया।

मू०– नाम्नोयईचाऽस्य॥ नाम्नइच्छायामर्थे य प्रत्ययो भवत्यवर्णस्यच ईकारः। आत्मनः पुत्रमिच्छति। पुत्रीयति। क्वचित्स्वरवद्यकारः। गामिच्छति गव्यति। गव्याञ्चकार। नाव्यति। नाव्याञ्चकार। त्वामिच्छति। त्वद्यति। हसाद्यस्यलोपोवाऽ-

नपिनामधातौ ॥ त्वदाञ्चकार । त्वद्यांचकार। मामिच्छति मद्यति । युष्मद्यति । अस्मद्यति ।

(सुबोधिनी-) नाम्नोयईचास्य । आद्भुवीत्यतः कर्मणीति इच्छायामात्मनइत्यतः इच्छायामिति आत्मन इति चानुवृत्तं । कर्मणि वर्तमानान्नाम्नो यप्रत्ययः स्यात् । आत्माशब्दस्तु परव्यावृत्त्यर्थः स्वशब्दपर्यायो गृह्यते । इच्छायाश्च क्रियात्वेन स्वाश्रयः कर्त्ताऽऽक्षिप्तः। स चेदिष्यमाणं वस्तु स्वसंबंधित्वेनाऽवेक्षते तदा यप्रत्ययः। आत्मनः स्वसंबंधित्वं साक्षाद्ग्राह्यं तेन यजमानस्य पुत्रमिच्छाति पुरोधा इत्यत्र न यः। महांतं पुत्रमिच्छतीत्यत्रापि न यः। सविशेषणानांवृत्तिर्न वृत्तस्य वा विशेषणयोगोनेति वचनात् य इति सप्तम्या विपरिणम्यते। अवर्णांतस्य नाम्न ईत्वं च यप्रत्ययेपरे। समासप्रत्यययोरिति विभक्तेर्लुक् । सधातुरिति धातुत्वात्तिबादिः पुत्रीयति । पुत्रीयेत् । पुत्रीयतु । अपुत्रीयत् । कासादिप्रत्ययादित्याम् यतइत्यलोपः । पुत्रीयांचकार । यत इत्यल्लोपः । पुत्रीयात् । पुत्रीयिता । पुत्रीयिष्याति । अपुत्रीयिष्यत् । अपुत्रीयीत् गामिच्छति गव्यतीत्यत्र य्वोर्लोपश् वा पदांते इति तु न भवत्यपदांतत्वात् । अनपि संनिपातपरिभाषया यप्रत्यययकारस्यानपि च हसादिति लोपो न यकारे परे वांतादेशविधानात् । वकारे यस्य लोपस्य निमित्तं न भवतीति भावः । गव्यांचकार । गव्यिता । त्वामिच्छति त्वन्मदेकत्वे इति त्वन्मदादेशौ । त्वद्यति यत इत्यल्लोपः। अनपि च हसादिति यलोपः । त्वदांचकार। मामिच्छति मद्यति । युवांयुष्मान्वेच्छति युवा वाविति सूत्रे विभक्तावित्युक्तं ततो विभक्तिपरत्वाभावान्न युवावौ एकार्थत्वाभावात् त्वन्मदावपि न । युष्मद्यति । एवमस्मद्याति ॥

(तत्त्वदीपिका-) नाम्नोय इति । अत्राद्भुवीत्यतः कर्मणीत्यनुवर्त्य कर्मणि वर्तमानान्नाम्न इति बोध्यं तेन पुत्रेणेच्छतीत्यादौ न । आत्मन इत्यनुवर्त्तते । स च न चेतनद्रव्यवाची किन्तु परव्यावृत्त्यर्थस्वशब्दपर्यायः तेन घटादेरचेतनत्वेपि घटीयतीत्यादि भवत्येव । इच्छया कर्ताक्षिप्यते चेदिष्यमाणं वस्तु स्वसंबंधित्वेनापेक्षते । तेन परस्य पुत्रमिच्छतीत्यत्र न । तच्च साक्षादेव । तेन यजमानस्य पुत्रमिच्छति पुरोधा इत्यत्र न। स्वसंबंधित्वं चेष्यमाणेनैव रूपेण विवक्षिते । तेन स्वस्य पुत्रं परस्य दासमिच्छतीत्यत्र न अत्र यदिष्यमाणं दासत्वं तच्च न स्वसंबंधि । नाम्न इति तूत्तरार्थं । धातुवारणाय तदिति चेत् धातोः सविधानेन परिशेषान्नाम्नोलाभात् । अथ सिबन्तादपि स्यात् इष्टत्वात् । न च वाच्यतीत्यादौ जबादिप्रसंगः स्यादिति वाच्यं । अप्ययोरादित्यत्र जवाकरणेन ये पदकार्याभावस्य ज्ञापितत्वात् । राजीयतीत्यादौ तज्ज्ञापकसिद्धस्यासार्वत्रिकान्नलोपः न च महान्तं पुत्रमिच्छतीत्यत्रोनकस्मान्नाम्नोयबाधनार्थं तादीषि चेन्न । पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेनेति पुत्रस्यैकदेशत्वेनान्वयाभावात् । सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति वचनाच्च । एवं च कर्मत्वद्योतकविभक्त्यभावेन कथं तद्बाध इति दूषणं परिहाराय यत्रानेककारकसंभवस्तत्र का-

रकस्य विशेषबोधार्थे विभक्त्यपेक्षणमिति। सिद्धान्तानुसारेण क्लेशोपि न कार्यः॥ आत्मनः पुत्रमिच्छतीति। पुत्रो मे स्यादितीच्छतीत्यर्थः। गव्यतीति। अवर्णाभावान्नेत्वं। त्वद्यतीति। त्वामिच्छति। युष्मद्यति। युवां युष्मान्वेच्छतीति वाक्ये त्वदादेशो न एकार्थत्वाभावात् युवावौ द्विवचनं इति स्याद्यभावान्न। समुदायोऽर्थवान्॥ समुदायस्यैकदेशोऽनर्थकः॥१...

मू०—काम्यश्च॥ पुत्रकाम्याञ्चकार।

(सुबोधिनी) काम्यश्च। नाम्न इच्छायामर्थे काम्यप्रत्ययः स्यात्। आत्मनः पुत्रमिच्छति पुत्रकाम्यति। यत इत्यलोपः। पुत्रकाम्यांचकार। पुत्रकाम्यिता। इहानापि च हसा दिति यलोपो न। अर्थवद्ग्रहणेनानर्थकस्य ग्रहणमिति परिभाषया॥

मू०—धनस्यनेकारोगार्ध्ये॥ धनायति। अन्यत्र धनीयति।

(सुबोधिनी—) धनस्यनेकारोगार्द्ध्ये। गार्द्धोऽभिलाषुकस्तस्य भावे गार्द्ध्ये यण् सत्यपि धने पुनर्धनमिच्छाति धनायति। ये इति दीर्घः। यश्च दरिद्रः सन् धनमिच्छाति तत्र धनीयति॥

(तत्त्वदी०—) गर्द्धेति। गर्द्धो लोभातिशयः धनायतीति सत्येव धने भूयो धनमिच्छतीत्यर्थः। धनीयतीति दरिद्रः सन् धनमिच्छतीत्यर्थः।

मू०—उदकस्योदन्पिपासायाम्॥ उदन्यति। अन्यत्रोदकीयती। गीर्य्यति। गिरांचकार। गीर्य्याञ्चकार। पूर्य्यति। दिवमिच्छति। दिव्यति। अमुमिच्छति। अदस्यति। ऋतोरिः। कर्त्रीयति।

(सुबोधिनी—) उदकस्योदन्पिपासायां। यश्च सद्य एव पातुमुदकमिच्छाति तत्र तु उदन्यति। यश्च कालांतरोपयोगार्थं पातुमुदकमिच्छाति तत्र उदकीयति। गिरमिच्छति गीर्य्यति। य्वोर्विहस इति दीर्घः। पुरमिच्छाति पूर्य्यति य्वोर्विहसे इति सूत्रे धातोरिकारोकारयोरित्युक्तत्वान्नेह। दिवमिच्छाति दीव्यति। दिवुधातोः क्विपि क्ङिति झसे क्वावित वस्योत्वे द्युरिति भवति। यप्रत्यये द्युयतीति। कर्तारमिच्छाति ऋतोरिरिति रिः। य इति दीर्घः। कर्त्रीयाति॥

(तत्त्व०—) अपिपासायामिति। पातुमिच्छा पिपासा सा तथा तदभावे। उदन्यतीति स्नातुमिच्छतीत्यर्थः। दिव्यतीति। धातुत्वाभावान्न दीर्घः।

मू०—हसात्तद्धितयस्यलोपोयेच्वौच॥ गार्गीयति। वाच्यति। कवीयति। समिध्यति। समिध्याञ्चकार। समिधिता।

(सुबोधिनी-) हसात्तद्धितयस्यलोपोयेच्वौच। हसादुत्तरस्य प्रत्यययकारस्य लोपो भवति यप्रत्यये च्विप्रत्यये च परे। ण्यायनणिति ण्यः। च्वौ गार्गीभवति। गार्ग्यमिच्छाति गार्गीयति। वाचमिच्छति अप्व्ययोरादित्यत्र चपाझभेजबा इत्यकरणेन क्वचित्प्रत्ययपदकार्य्यं नेति ज्ञापितं तेन पदत्वाभावात् चोःकुरिति कुत्वं न। वाच्यति। आत्मनः कविमिच्छति ये इति दीर्घः। कवीयति। समिधमिच्छति समिध्य-

ति। हसाद्यस्यलोपोवानपि। हसांतान्नाम्नो यस्य लोपो वा अनपि परे। आदेः परस्येति यलोपः। यतइत्यलोपः तस्यलोपः। तस्य स्थानिवत्त्वादुपधायालघोरिति गुणो न। समिधिता समिध्यिता॥

मू०-मान्ताव्ययाभ्यांयोन॥ किमिच्छति। इदमिच्छति। स्वरिच्छति। उच्चैरिच्छति।

(सुबोधिनी-) मांताव्ययाभ्यांयोन। मांतप्रकृतिकान्नाम्नोऽव्ययाच्च यो न। किमिच्छति स्वरिच्छति।

(तत्त्वदी०-) मांताव्ययाभ्यामिति। मान्तमिह नामैव नतु सिब्न्तम् पुत्रमिच्छतीत्यत्रापि मान्तत्वान्न स्यात्।

मू०-अश्ववृषयोर्यैसुक्मैथुनेच्छायाम्॥ अश्वस्यति वडवा। वृषस्यति गौः।

(सुबोधिनी-) अश्ववृषयोर्यैसुक्मैथुनेच्छायां। अश्वस्यति। मैथुनार्थमश्वमिच्छतीत्यर्थः। वृषमिच्छति मैथुनार्थं वृषस्यति॥

(तत्त्वदीपिका-) अश्ववृषयोरित्यादि अश्ववृषमेच्छा यदा मैथुनार्था नत्वारोहणाद्यर्था तदैव सुगित्यर्थः। अन्ये तु इति रामो वृषस्यन्तीमित्यादिप्रयोगदर्शनात्परित्यक्तप्रकृत्यर्था मैथुनेच्छैकार्थं इत्याहुः।

मू०-क्षीरलवणयोर्लालसायां॥ सुक्। क्षीरस्यति बालः। लवणस्यत्युष्ट्रः।

(सुबोधिनी-) क्षीरलवणयोर्लालसायां। उत्कटेच्छायां सुक् ये। लालसायां क्षीरमिच्छति क्षीरस्यति। लवणस्यति॥

(तत्त्वदीपिका-)लालसायामिति। तृष्णातिरेकोलालसा। क्षीरलवणविषय इच्छातिरेको यदाभ्यवहारार्थो नतु होमाद्यर्थस्तदेत्यर्थः।

मू०-नाम्नोयेलालसायांसुगसुकौ॥ दधिस्यति, दध्यति। मधुस्यति, मध्वस्यति। यशस्काम्यति।

(सुबोधिनी-) नाम्नोयेलालसायां सुगसुकावागमौ भवतः यप्रत्यये परे तृष्णातिरेको लालसा तस्यामर्थे। दधिस्यतीत्यत्र षःस इति विपरीतनिर्देशान्न षत्वं॥

(तत्त्वदीपिका-) दधिस्यतीति। षःस इति विपरीत निर्देशान्न षत्वं। दधिमधुराब्दावेवागमिनावित्येके नाम्नो विधनादन्येपीत्यन्ये।

मू०-मान्ताव्ययाभ्याङ्काम्यः॥ किंकाम्यति। स्वःकाम्यति। उच्चैःस्काम्यति।

(सुबोधिनी–) मांताव्ययाभ्यांकाम्यः । मांतप्रकृतिकान्नाम्नोऽव्ययाच्च काम्यः स्यात् इच्छायां । किमिच्छति किंकाम्यति । स्वः स्वर्गं इच्छति स्वः काम्यति ॥

(तत्त्वदीपिका–) स्वःकाम्यतीति । अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिविषये शक्तिमत्प्राधान्यात्कर्मत्वेन योगः ।

मू०–करणेचनाम्नः ॥ करणेर्थे यः । तपस्यति । तपश्चरतीत्यर्थः । नमसःपूजायाम् । नमस्यति । देवान् पूजयतीत्यर्थः । वरिवसः परिचर्यायां । वरिवस्यति गुरुं । शुश्रूषयतीत्यर्थः ।

(सुबोधिनी–) करणेचनाम्नः । करणे च य इत्यनुवृत्तं । करोत्यर्थे इत्यर्थः । नमस्करोति नमस्यति देवान् पूजयतीत्यर्थः । वरिवस्यति गुरून् शुश्रूषते इत्यर्थः ॥

(तत्त्वदीपिका–) करणेचेति । करणं कृतिः । न तु पारिभाषिकं । नमस्यति देवान् नमः करोति । जहत्स्वार्थायां वृत्तौ नमः शब्दस्यानर्थकत्वात् । अजहत्स्वार्थायान्तु प्रत्ययार्थेउपसर्जनत्वान्न तद्योगे चतुर्थी । वरिवस्यतीति वरिवः शुश्रूषां करोतीति विग्रहः ।

मू०–शब्दादिभ्योयङ् ॥ शब्दायते । वैरायते । कलहायते । आम्रायते । मेघायते ।

(सुबोधिनी–) शब्दादिभ्योयङ् । एभ्यः कर्मभ्यः करोत्यर्थे यङ् । शब्दं करोति शब्दायते । पक्षे ञिर्डित्करणे इति ञिप्रत्ययोपि भवति । शब्दयतीति न्यासकारः ॥

मू०– कष्टायक्रमणे ॥ कष्टायते ।

(सुबोधिनी–) कष्टायक्रमणे । चतुर्थ्यंतात्कष्टशब्दादुत्साहेऽर्थे यङ् । कष्टाय क्रमते इति कष्टायते । पापं कर्तुमुत्सहते इत्यर्थः ॥

मू०–ऊष्मबाष्पधूमेभ्यउद्वमने ॥ ऊष्मायते । वाष्पायते । धूमायते ।

(सुबोधिनी–) ऊष्मबाष्पधूमेभ्यउद्वमने । एभ्यः कर्मभ्यो यङ् । ऊष्माणमुद्वमति । नाम्नोनोलोपशिति नस्य लोपः ये इति दीर्घः । ऊष्मायते ॥

(तत्त्वदीपिका–) ऊष्मायत इति । ऊष्माणमुद्वमतीत्यर्थः ।

मू०–ञिर्डित्करणे ॥ नाम्नो ञिप्रत्ययः करणेऽर्थे सच डित् । घटं करोति घटयति । घटयते।अजघटत् । पटयति । पटयते । अपपटत् । अग्वृलोपिनो नाङ्कार्यम् । महान्तङ्करोति महयति । अममहत् । युवानङ्करोति युवयति । अयूयुवत् । कनयति । अचीकनत् ।

(सुबोधिनी–) ञिर्डित्करणे । तत्करोति तदाचष्टे वेत्यर्थे नाम्नो ञिः स च डित् । डिति टेरिति डित्वाट्टिलोपो भवति । घटमाचष्टे घटयति । लुङि अयवृ-

लोपित्वादजघटत्। पटुमाचष्टे पटयति। लुङि परत्वाद्वृद्धौ सत्यां टिलोपः। अपीपटत्। भाष्ये तु वृद्धेर्लोपोबलीयानित्युक्तं तेन पूर्वं लोपस्ततोऽग्लोपित्वान्नाङ्कार्य्यं। अपपटत्। महांतमाचष्टे माहयति॥

(तत्त्व०-)ञ्जिर्ङित्करणे। ङ इत् यस्य स ङित्। अतिदेशोयं नतु संज्ञा तथात्वे तु ङिति टेरित्यादावस्यैव ग्रहणं स्यान्नतु ङइत् यस्य तस्यकात्रिमाकात्रिमयोः कृत्रिमस्यैवग्रहणमित्युक्तत्वात्। अथ कथं वतिं विनातिदेशबोधनम् इति चेत् शृणु। अङितं ङिदित्याह ङिदिदिति गम्यत इतिभाष्योक्तेः।

मू०-ञाविष्ठवत्कार्य्यम्॥ स्फिरङ्करोति। स्फापयति। अपिस्फपत्। उरुम्। वरयति। अवीवरत्। बहुलम् बंहयति। अबबंहत्। वृद्धम् वर्षयति। अववर्षत्। तृप्रम् त्रपयति। अतित्रपत्। दीर्घम् द्राघयति। अदद्राघत्। वृन्दारकम् वृन्दयति। अववृन्दत्। अन्तिकम् नेदयति। अनिनेदत्। स्थूलम् स्थवयति। अतिस्थवत्। दूरम् दवयति। अदूदवत्। ह्रस्वं ह्रसयति अजिह्रसत्। क्षिप्रम् क्षेपयति। अचिक्षिपत्। क्षुद्रङ्करोति क्षोदयति। अचुक्षुदत्। प्रियंकरोति प्रापयति। अपिप्रपत्। गुरुं करोति। गरयति। अजीगरत्। स्थिरङ्करोति स्थापयति। अतिस्थपत्। ऊढिं करोति ऊढयति। ञेरङ् द्विश्च। स्वरादेः परः।

(सुबोधिनी-) ञाविष्ठवत्कार्य्यम्। इष्ठप्रसये परतो यत्कार्यं दृष्टं संभावितं च तन्नाम्नो ञावप्यतिदिश्यते। इष्ठे यथा विन् वतु मतूनां लोपो रभावो गुर्वादिगराद्यादेशटिलोपौ तद्वत् ञावपि स्युः। स्रग्विणमाचष्टे स्रजयति। अग्निमंतमाचष्टे अग्नयति। दंडवंतमाचष्टे। दंडयति। लुङि असस्रजत्। अत्र पूर्वस्य इत्वं तुन भाष्यासंमतत्वात्। अजिग्नत्। अददंडत्। अल्लोपस्य स्थानिवत्वान्न लोपो न। स्थूलं करोति। गुर्वादेरिष्ठेमेयस्सु। गरादयष्टिलोपश्चेति स्थूलस्य स्थवाष्टिलोपाभावश्च। स्थवयति। लुङि अतुस्थवत् आदेशावयवत्वान्न षः। दूरं करोति। दूरस्य दव् दवयति। लुङि अदूदवत् कथं तर्हि दूरयत्त्यवनतेविवस्वतीति। दूरंभवतीति दूरातक्विंतः। तं कुर्वतीत्यर्थः। युवानं करोति। युवन्शब्दस्य युव्। युवयति। युवाल्पयोःकन्वेति कन्। कनयति। लुङि अयूयवत्। अचीकनत्। ञ्जिर्ङिदिति सूत्रे बहुलग्रहणं कर्तव्यं। तस्मादिह सर्वत्र वृद्ध्यभावः। ह्रस्वं करोति। ह्रस्वस्य ह्रस्। संज्ञापूर्वकाविधेरानित्यत्वाद्बहुलग्रहणाद्वा न वृद्धिः। माधवेन तु विकल्पेन वृद्धिरुदाहृता। ह्रसयति। अजिह्रसत्। क्षिप्रं करोति। क्षिप्रस्य क्षेप्। क्षेपयति। अचिक्षिपत्। क्षुद्रं करोति। क्षुद्रस्य क्षोदः क्षोदयति। अचुक्षुदत्।

प्रियं करोति । प्रियस्य प्रः । धातोर्नामिन इति वृद्धौ रातोऽमाविति पुक् । प्रापयति । अपिप्रयत् । गुरुं करोति । गुरोर्गर् गरयति । अजीगरत् । स्थिरं करोति । स्थितस्य स्थः । स्थापयति । अतिस्थपत् । वहनमूढिस्तां ऊढिं करोति ऊढयति । ऊढिमाख्यत् औडिढत् ॥

(तत्त्वदीपिका–) ञाविष्टवदिति । इष्टेयत्कार्यं दृष्टं संभावितं च तन्नाम्नोञावति दिश्यते । इष्टे यथा विनमनुवतुयादेशास्तथाञावपीति बोध्यं दवयतीति दूरंकरोति इति वाक्यं संज्ञापूर्वकत्वेनानित्यत्वाद्वृद्ध्यभावः टिलोपस्यासिद्धत्वाद्दूरयत्यवनते विवस्वतीत्यत्र तु वेत्यनुवर्त्य व्यवस्थयाभावः यद्वा दूरमतति दूरात्कुर्वतीत्यर्थः। प्रापयतीति । प्रियस्य प्रादेशे वृद्धियुकौ । आदेशाभावेप्रिययतीत्यपि । अप्सरायते अप्सरस इवाचरतीत्यर्थः ।

मू०–अडिपूर्वस्यजोवा ॥ औजिढत्, औडिढत् । ऊढं करोति । ऊढयति । औजढत्, औडढत् ।

(सुबोधिनी–) अडिपूर्वस्यजोवा । पूर्वरूपस्थस्य डकारस्य जो वा भवति अङ्प्रत्यये परे । औजिढत् । ऊढं करोति ऊढयति । लुङि ढिलोपे च सति ञिसहितस्य द्वित्वे पश्चात्पूर्वाऽकारो दुर्लभः । अतो ञिनिमित्तः स्वरादेश इत्यनेन ढस्य द्वित्वं । ऊढमाख्यत् औडढत् । जत्वे औजढत् ॥

मू०– कर्तुर्यङ् ॥ उपमानात्कर्तुराचारार्थे यङ् । श्येनइवाचरति श्येनायते काकः। पण्डितायते मूर्खः। एतायते। यङ्मानिनोः पुंवत् ।

(सुबोधिनी–) कर्तुर्यङ् । आचारेउपमानादित्यत उपमनानादित्यनुवृत्तं । आचारे इति च । उपमानात् कर्तुर्नाम्न आचारे यङ् । आदनुदात्तङित इत्यात् । श्येन इवाचरति यङमानिनोरिति पुंवत् ये इति दीर्घः । श्येनायते ॥

मू०--यङिवासलोपः । पपायते पप्रस्यते वा तक्रम् ।

(सुबोधिनी–) यङिःवासलोपः । सांतस्य कर्तुः सस्य वा लोपः ॥

मू०– अप्सरसोजस्सुमनसांनित्यम् ॥ अप्सरायते । ओजायते दुर्बलः । सुमनायते ।

(सुबोधिनी–) अप्सरसोजस्सुमनसांनित्यम् । ओजः शब्दस्तद्वति वृत्तौ । ओजस्वीवाचरतीति ओजायते ॥

(तत्त्वदीपिका–) ओजायत इति । ओजःप्रभृतयो वृत्तिविषये तद्वति वर्त्तते ।

मू०– नाम्नआचारेक्विब्वा ॥ कृष्णइवाचरति । कृष्णाति । अकृष्णत् । अइवाचरति अति । अतः । अन्ति । एत् । एताम् । एयुः

अतु, अतात्, अताम् । अन्तु, अतात् । आत् । आन् । आः । लिटि । औ । अतुः । उः । इथ । यात् । इता । आसीत् । आसिष्टाम् । मालेवाचरति । मालाति । मालायात् । मालाहि । अमालात् । मालाञ्चकार । मालिता । अमालासीत् । कविरिवाचरति । कवयति । अकवयत् ।

(सुबोधिनी-) नाम्नआचारेक्विब्वा । कर्त्तुरुपमानान्नाम्नः क्विप् वा स्यात् आचारेऽर्थे । नाम त्वसिबंतं ग्राह्यं तेन विभक्त्याश्रितं कार्य्यं । पक्षे यङ् । कृष्ण इवाचरतीति सधातुरिति धातुत्वाच्चिबादिः । अदे इत्यलोपः । कृष्णति । अः कृष्णस्तद्वदाचरति अदे इत्यलोपः । आति । लिटि तु कासादिप्रत्ययादिति सूत्रस्य वृत्तौ प्रत्ययग्रहणमपनीयानेकस्वरेत्युक्तेर्नाम् । द्वित्वे अदे इत्यलोपे प्राप्ते परत्वादाभ्वोर्णादाविति पूर्वस्यात्वं तत आतोणबडाविति डौ डित्वाट्टिलोपे औ आतोनपीत्यालोपे । अतुः । लुङि यमिरमिनमातामितीट्सकौ । आसीत् । मालेवाचरति मालाति । लिटि अनेकस्वरत्वादाम् । मालांचकार । लुङि अमालासीत् । कविरिवाचरति कवयति । कवयांचकार । आशिषि ये इति दीर्घः । कवीयात् ॥

(तत्त्वदीपिका-) नाम्न आचार इति । अत्रासिबन्तं नाम गृह्यते नतु सिबन्तं । तेन पदकार्यं न । औइति । सवर्णदीर्घेण वौ अनेकस्वरत्वाभावादाम्न । अतुसादिषु दीर्घे आतोनपीत्यालोपः । इता ॥ यतइत्यालोपः गुणस्तु प्रत्ययावयवत्वान्न । नहि निमित्तं कार्यित्वेनाश्रियते । आसीदिति । यमिरमेति सगिटौ । मालातीति । लिङ्गविशिष्टपरिभाषया ।

मू०- नामधातोर्वृद्धिर्वासौ ॥ अकवायीत्, अकवयीत् । विरिवाचरति । वयति । विवाय । विव्यतुः । अवायीत्, अवयीत् । श्रीरिवाचरति । श्रयति । शिश्राय । शिश्रियतुः । अश्रायीत्, अश्रयीत् । पितेवाचरति पितरति । पितराञ्चकार । या दादाविति रिङ् । पित्रियात् । भूरिवाचरति भवति । बुभाव । अभावीत् । द्रुरिवाचरति द्रवति । अद्रावीत् ।

(सुबोधिनी-) नामधातोर्वृद्धिर्वासौ । सिपत्यये परे लुङि कैयटमते न वृद्धिः माधवस्तु नामधातोरपि वृद्धिमिच्छति। विःपक्षी तद्वदाचरति वयति । लिटि नुधातोरिति यः । विव्यतुः । आशिषि यादादौपे इति रिङ् । पित्रियात् । दादेःपे इति सिलुक् । भुवः सिलोपे इति भुवोवुगिति च वुक् आभ्वोरित्यनेनात्वं चास्य न अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । अभावीत् । बुभाव । श्रिस्रुद्रुभ्य इति न ङो धातुपाठस्थाभावात् अद्रावीत् ॥

(तत्त्वदीपिका–) बुभावेति । आभ्वोर्णादौ भुवोवुगिति नामधातुपाठस्थस्यैव ग्रहणात् ।

मू०-- ञमान्तस्योपधायादीर्घः ॥ क्वौ झसादौ क्ङिति हे च । इदमिवाचरति इदामति । राजेवाचरति राजानति । राजायते । मन्था इवाचरति मथीनति । ऋभुक्षा इवाचरति ऋभुक्षीणाति । द्यौरिवाचरति द्यवति । दुद्याव । द्यूयात् । द्यविता । कइवाचरति कति । चकौ । चकेत्यन्ये । स्वइवाचरति स्वाति । सस्वौ । सस्व, इत्यन्ये ।

(सुबोधिनी–) ञमांतस्योपधायादीर्घः । क्वौ झसादौ हकारे च क्ङिति । झसादौकिति शांतो दांत इत्युदाहरणं । ङिति तु यङ्लुकि तस्प्रत्यये । शंशांतः । दंदांतः । पंथा इवाचराति पथीनाति । अत्रांतरंगत्वाद्दीर्घस्ततो न गुणः । द्यौरिवाचरति । क्ङिति झसे क्वाविति वस्य उत्वे गुणावादेशौ । द्यवति को ब्रह्मा तद्वदाचरति कति । लिटि धातोर्नामिन इति वृद्धौ आतोणब्डावित्यौ । चकाविति हरदत्तः माधवस्तु णपि वृद्धिं बाधित्वा यत इत्यलोपात् । चक इति रूपमाह ॥

(तत्त्व०-)द्यवतीति । क्वौ झसादाविति । वस्योत्वे गुणावादेशौ । चकाविति । आत इत्यत्र । आअत इति छित्वा अदंतादपि डौ ।

मू०— आचारउपमानात् ॥ कर्मधारयेउपमानादाचारेऽर्थे यप्रत्ययोऽस्य चेकारः । पुत्रमिवाचरति पुत्रीयति शिष्यमुपाध्यायः । प्रासादइवाचरति प्रासादीयति कुट्यां भिक्षुः ।

(सुबोधिनी–) आचारउपमानात् । नाम्नो य ई चास्येत्यनुवृत्तं । आचरणमाचारः । चरेर्भावे घञ् । ज्ञानं व्यवहारो वा । उपमीयते अनेनेत्युपमानम् । माङः करणे युट् । कर्मण उपमानादाधाराद्रुपमानाच्च नाम्नो यः स्यात् आचारार्थे तस्मिन् ये परे पूर्वस्यावर्णस्य इत्वं च । राजानमिवाचरतीत्यत्र नाम्नोन इति नलोपे कृते इत्वे । राजीयति ॥

(तत्त्वदीपिका–) आचार उपमानादिति । आचरणमाचारः चरेर्भावे घञ् । व्यवहारो ज्ञानं वा । उपमीयतेऽनेनेत्युपमानं पुत्रीयति शिष्यमुपाध्याय इति । पुत्रविषयकं यज्ज्ञानं व्यवहारो वा तत्सदृशं छिष्याभिन्नाश्रयं यज्ज्ञानं व्यवहारो वा तदनुकुलो वर्त्तमान एकगुर्वभिन्नाश्रयको व्यापारः । प्रासादाभिन्नाश्रयं यज्ज्ञानं व्यवहारो वा तत्सदृशं कुट्यभिन्नाश्रय यज्ज्ञानं व्यवहारो वा तदनुकूल एकभिन्नाश्रयो वर्त्तमानो व्यापारः ।

मू०— भृशादिभ्योऽभूततद्भावेयङ्अन्त्यहसलोपश्च ॥ अभृशो भृशो भवति भृशायते । अशश्वत् शश्वद्भवति शश्वायते ।

(सुबोधिनी-) भृशादिभ्योऽभूततद्भावेयङ्ंत्यहसलोपश्च । भृशादिभ्यो यङ् स्यात् तस्मिन् परे भृशादीनामंत्यस्य हसस्य लोपश्चाभूततद्भावेऽर्थे । ये इति दीर्घः । भृशायते ॥

मू०- क्विबपि ॥ भृशाति ।

(सुबोधिनी-) क्विबपि । भृशादिभ्यः क्विप् स्यादभूते तद्भावेऽर्थे ॥

मू०- च्विरपि ॥ भृशीभवति । भृश्यभूत् । सुमनायते । उपसर्गसमानाकारम्पूर्वपदं धातुसंज्ञाहेतौ प्रत्यये चिकीर्षिते पृथक् क्रियते। स्वमनायत । उदमनायत ।

(सुबोधिनी-) च्विरपि । भृशादिभ्यः च्विः स्यादभूततद्भावेऽर्थे कृभ्वस्तियोगे एव । उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाहेतौ प्रत्यये चिकीर्षिते पृथक् क्रियते । धातुसंज्ञाविधायके प्रत्यये कर्तुमिष्टे सति उपसर्गतुल्यं पूर्वपदं भिन्नं कर्त्तव्यमित्यर्थः । चुरादौ संग्रामङ् युद्धे इति सविशिष्टपाठोस्य ज्ञापकः । तेन मनसशब्दात्प्राग् अट् भवति । स्वमनायत ॥

(तत्त्वदीपिका-)उपसर्गसमानाकारमित्यादि । अत्र ज्ञापकन्तु चुरादिषु संग्राम युद्ध इति विशिष्टपदं । अन्यथा ग्रामयुद्ध इत्येवापठिष्यत् ।

मू०- सुखादिभ्योयङ् ॥ कर्तुरनुभवे । सुखंवेदयते । सुखायते । दुःखायते ।

(सुबोधिनी-) सुखादिभ्योयङ् कर्तुरनुभवे सुखादिभ्यः कर्म्मभ्योऽनुभवकर्तुरेव चेत्सुखादीनि स्युः अनुभव शब्दो ज्ञानवाची तदपेक्षमेव कर्तृत्वं कर्ता चेत्सुखादिभिरन्वेति सुखं वेदयते । ये इति दीर्घः । सुखायते । कर्तुरिति किं । सुखं वेदयते परस्य । इह यन्निष्ठं सुखं तद्भिन्नोऽनुभवः ॥

(तत्त्वदीपिका-) सुखंवेदयत इति । स्वगतं सुखमनुभवतीत्यर्थः ।

मू०- पुच्छादुदसनेव्यसनेपर्य्यसनेचञिङ् ॥ उत्पुच्छयते । उदपुच्छत । विपुच्छयते । परिपुच्छयते ।

(सुबोधिनी-) पुच्छादुदसनेव्यसनेपर्यसनेचाञिङ् । पुच्छान्नाम्नो ञिङ् स्यात् ऊत् ऊर्द्धमसनं क्षेपणं उदसनं । विविधं विरुद्धं वाऽसनं व्यसनं । परि समंतादसनं पर्यसनं । तास्मिन्नर्थे । ङित्वादात । पुच्छमुदस्यति उत्पुच्छयते । उदपुपुच्छत ॥

(तत्त्व०-) पुच्छादुदसन इत्यादि ॥ उदसनमुत्क्षेपणं । विविधं विरुद्धं वा क्षेपणं व्यसनं । परितः पर्यसनम् ।

मू०-भाण्डात्समाचयने ॥ सम्भाण्डयते ।

(सुबोधिनी-) भांडात्समाचयने । भांडात् णिङ् स्यात् राशीकरणेऽर्थे संभांडयते। लुङि समबभांडत ॥

(तत्त्वदीपिका-) समाचयनं राशीकरणं।

मू०-चीवरादर्ज्जनेपरिधानेच ॥ चीवराणि अर्जयति परिधत्तेवा संचीवरयते भिक्षुः। नाम्नोणिराचष्टे ।

(सुबोधिनी-) चीवरादर्जनेपरिधानेच । णिङ् । चीवराण्यर्जयति परिधत्ते वा संचीवरयते। लुङि । समचिचीवरत ॥

(तत्त्वदीपिका-)। संचीवरयते इति । अर्ज्जयति परिधत्ते वेत्यर्थः ।

मू०-अर्थवेदसत्यानामापुग्णौ ॥ अर्थापयति । आर्तीथपत् । वेदापयति । सत्यापयति । असससत्यपत् । एतयते ऐतत् । पृथुम् प्रथयति । वृद्धौ सत्यां पूर्व वा टिलोपः। अपप्रथत्, अपिप्रथत् । मृदुम् म्रदयति। अमम्रदत्, अमिम्रदत् । भृशं भ्रशयति । अबभ्रशत् । कृशं क्रशयति । अचक्रशत् । दृढम् द्रढयति। अदद्रढत् । परिव्रढयति । पर्य्यवव्रढत्। त्वादयति । अतित्वदत् । मादयति। अमीमदत् । युष्मयति । अयुयुष्मत् । अस्मयति । आसिस्मत् । विद्वांसं विद्वयति। अविविद्वत् । विदावयति इत्यपरे। अविविदावत् । विदयति इत्यन्ये। अविविदत्। एवं श्वानमाचष्टे श्वयति । अशिश्वत् । शावयत्यपरे। अशुशावत् । शुनयतीत्यन्ये । अशुशुनत् । उदञ्चम् उदीचयति । उदैचिचत् । प्रत्यञ्चम् प्रतीचयति प्रत्यचिचत्। सम्यञ्चम् समीचयति । सम्यचिचत् । तिर्य्यञ्चम्। तिरायति । अतितिरायत् । सध्र्यञ्चं सध्रायति । असस्रध्रायत् । अन्तिकम् नेदयति । अनिनेदत् । बाढम् साधयति । वृद्धम् ज्यापयति। अजिज्यपत् । वृद्धम् वर्षयति । स्फिरम् स्फापयति । अपिस्फापत् । उरुं वरयति । बहुलम् बंहयति । तृप्रम् त्रपयति । दीर्घम् द्राघयति । अदद्राघत् । वृंदारकम् वृन्दयति । अववृन्दत् । इतिनामधातुप्रक्रिया।

(सुबोधिनी-) अर्थवेदसत्यानामापुग्णौ । एषामापुगागमः स्यात् णिप्रत्यये परे। अर्थमाचष्टे करोति वा अर्थापयति । एनीमाचष्टे णिप्रत्यये टिलोपः। ततो नि-

मित्ताभावे नैमित्तिकस्याप्यभाव इतीपोऽभावे पस्याप्यभावः । एतयति । पृथुमाचष्टे ऋरमनीति रभावे टिलोपे च प्रथयति । लुङि वृद्धौ सत्यां टिलोपः । अग्वृलोपित्वाभावादङि लघाविति पूर्वस्येत्वं । अपिप्रथत् । वृद्धेः पूर्वं टिलोपे त्वग्वृलोपित्वादित्वं न । अपप्रथत् । मृदुं आचष्टे आविष्ठवद्भावात् ऋरमनीति रभावे टिलोपे च म्रदयति । एवं भृशकृशदृढादयः । त्वां मांवाऽऽचष्टे टिलोपे त्वन्मदेकत्वे इति त्वन्मदादेशे च कृते अतउपधाया इति वृद्धौ त्वादयति मादयति । युवामावां युष्मानस्मान् वाचष्टे विभाक्तिपरत्वाभावान्न युवावौ । टिलोपे सति युष्मयति । अस्मयति श्वानमाचष्टे आविष्ठवद्भावात् शुनो वस्य उर्वा च दीर्घ इत्युत्वे टिलोपाभावे च शुनयतीति रूपं केचिदाहुः । टिलोपे उत्वे च वृद्धौ सत्यां शावयति । लुङि अग्वृलोपित्वान्न ह्रस्वः । अशुशावत् । विद्वांसमाचष्टे टिलोपे विद्वयति । टिलोपे कृते वसोर्वउरित्युत्वे वृद्धावायादेशे च विदायतीत्यन्ये । नित्यत्वात्पूर्वमुत्वं पश्चाट्टिलोपः । विदयतीत्यपरे । उदंचमाचष्टे । आविष्ठवद्भावात् तिरश्चादय इत्युदीच् । उदीचयतीत्यत्रोपसर्गं पृथक्कृत्य अचशब्दादेव ञिः । बहुलग्रहणाट्टिलोपो नं । लुङि उपसर्गसमानाकारमितीकारात्पूर्वमाटि चिशब्दस्य द्वित्वे पश्चात् ञेरिति ञिलोपः । उदैचिचत् । प्रत्यंचमाचष्टे अंचेर्दीर्घश्चेत्यलोपपूर्वदीर्घौ । प्रतीचयति । लुङि चिशब्दात्प्रागटि कृते पूर्वस्य यत्वं प्रत्यचिचत् । ऋणामसवर्णेस्वर इति प्रकृतिभावपक्षे तु प्रतिअचिचत् । सम्यंचमाचष्टे अचेर्दीर्घश्चेत्यलोपपूर्वदीर्घौ । समीचयति । लुङि सम्यचिचत् । प्रकृतिभावपक्षे समिअचिचत् । तिर्श्चमाचष्टे अंचेष्टिलोपेनापहारेपि तस्य बहिरंगत्वेनासिद्धत्वात्तिरीत्यस्य सद्भावः । वृद्धौ सत्यां तिरायति । उपसर्गसमानाकारत्वाभावादिह तिरसः पृथक्करणं नास्ति । अतितिरायत् । आङि लघाविति ह्रस्वस्तु नाग्वृलोपित्वात् । सध्र्यञ्चमाचष्टे टिलोपेनांचेरपहारे वृद्धौ सत्यां सधायति । अंतिकमाचष्टे गुर्वादेरित्यंतिकस्य नेदष्टिलोपश्च । यस्येत्यलोपः । नेदयति । लुङि अनिनेदत् । बाढमाचष्टे बाढस्य साधः । साधयति । अससाधत् । वृद्धमाचष्टे वृद्धस्य ज्यादेशः । रातोञ्ञाविति पुक् । ज्यापयति अजिज्यपत् । वृद्धस्य वर्षोपि । वर्षयति । अववर्षत् । स्फिरमाचष्टे स्फिरस्य स्फः वृद्धौ सत्यां रातोञ्ञाविति पुक् । स्फापयति । अपिस्फपत् । उरुमाचष्टे उरुशब्दस्य वर् संज्ञापूर्वकविधेरनित्यत्वाद्बाहुलकाद्वा माधवेन विकल्पेन वृद्धिरुदाहृता । वरयति । अवीवरत् । बहुलमाचष्टे बहुलस्य बंहः । बंहयति । नोलोप इति नलोपो न । अग्वृलोपित्वात् । न इत्वदीर्घौ । अबबंहत् । तृप्रमाचष्टे तृप्रस्य त्रप् । त्रपयति । अतित्रपत् । दीर्घमाचष्टे दीर्घस्य द्राघः । द्राघयति । अदद्राघत् । वृंदारकमाचष्टे वृन्दारकस्य वृन्द वृंदयति । अवृन्दत् ॥

॥ इतिनामधातुप्रक्रिया ॥

(तत्त्वदी०-) अर्थवेदेत्यादि । अत्र करणं इत्यनुवृत्तं क्रियाविशेषोपलक्षणं तेनार्थमाचष्ट इत्यादिविग्रहः आत्वेनैव सिद्धं आपुक्करणमन्यतोपि विधानार्थं । तेन लिखापयतीत्यादि-

सिद्धं । अपिप्रथदिति । वृद्धौ ओकारे कृते ततः लोपः अग्लोपित्वाभावादङ्कार्यं । त्वादयति मादयतीति । नो वेत्यत्र वा इत्यस्य व्यवस्थितत्वात्क्वचिन्न टिलोपः । विद्वयतीति आदौ टिलोपः पुनरङ्गवृत्तपरिभाषया संप्रसारणं न । विदयतीति । संप्रसारणे कृते टिलोप इति पक्षे विदावयति टिलोपे कृते संप्रसारणे वृद्धचावादेशौ सकृत्प्रवृत्तत्वात्पुनष्टिलोपाप्रसंगः । ऊदीचयतीति । टिलोपो न व्यवस्थितत्वात् । तिरायतीति । आदौ टिलोपस्ततस्तिर्यादेशस्ततो वृद्धचायादेशौ पुनष्टिलोपस्त्वसकृत्प्रवृत्तत्वान्न । अतितिरायदिति । अग्लोपित्वादुपधाह्रस्वोपि न ।

कृतायामिहटीकायांलोकेशकरशर्मणा ।
समासेनेदमभवन्नामधातुसमापनम् ।
इति नामधातुप्रक्रिया ।

सू०— कण्ड्वादिभ्योधातुभ्योयक्स्वार्थे ॥ कण्डूञ् गात्रविघर्षणे । कण्डूयति । कण्डूयते । मन्तु अपराधे रोषेच मन्तूयति । ञिदित्येके । मन्तूयते । वल्गु पूजामाधुर्य्ययोः । वल्गूयति । असु- असु असूञ् उपतापे । अस्यति । अनपिचहसात् । असाञ्चकार । असूयाति । असूयते । लेलादीप्तौ । लेलायति मेधा आशुग्रहणे । मेधायाति । सुख दुःख तत्क्रियायाम् । सुख्यति । दुःख्यति । सपर् पूजायाम् सपर्य्यति । सपराञ्चकार । भिषज् चिकित्सायाम् । भिषज्यति । इषुध् शरधारणे । इषुध्यति । ऐषुधीत् । गद्गद्वाक्-स्खलने । गद्गद्यति । एला खेला विलासे । एलायति । खेलायति । हृणीङ् रोषणे लज्जायाञ्च । हृणीयते । महीङ् पूजायाम् महीयते। अगद नीरोगत्वे । अगद्यति । आगदीत् । इतिकण्ड्वादयः ॥

(सुबोधिनी—) कंड्वादिभ्योधातुभ्योयक्स्वार्थे । एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे । कंड्वादयो द्विधा । धातवः प्रातिपदिकानि च नाम्नां तु विग्रह एव । सपर् पूजायां । यगंतात् षिद्भिदामङ् इत्यनेनाङ् प्रत्यये आप् । सपर्या । महीङ् पूजायां । महीयते । पूजां लभते इत्यर्थः । आकृतिगणोयं ॥ इति कंड्वादयः ॥

(तत्त्वदीपिका—) कंड्वादिभ्योयगिति । कंड्वादयो हि द्विविधाः । धातवो नामानि च । तत्र धातुभ्यो नित्यं यक् । नाम्ना तु कंडूं करोतीति विग्रह एव ।

कृतायामिहटीकायांलोकेशकरशर्मणा ।
बाधनं दुष्टबुद्धीनामगात्कंड्वादिसाधनं ।
इति कंड्वादिप्रक्रिया ।

कंडूयतेः सप्रत्यये द्विश्चेति प्रथमस्य द्वित्वे प्राप्ते कंड्वादेस्तृतीयस्य द्वित्वं। कंडूयियिषति।यप्रत्ययान्तात् सप्रत्यये तु यथेष्टं नामधातुषु द्वित्वमिसाद्यानां त्रयाणामन्यतमस्य द्वित्वं भवति। स्वरादेस्त्वाद्येतरस्य द्वित्वं । पुत्रीयितुमिच्छति पुपुत्रीयिषति । पुतित्रीयिषति पुत्रीयियिषति । अशिश्वीयिषति। अश्वीयियिषति। आत्मन इंद्रमिच्छति इन्द्रीयति।इन्द्रीयतेः सप्रत्यये द्रीशब्दयीशब्दयोरन्यतरस्य द्वित्वं । इंदिद्रीयिषति । इन्द्रीयियिषति ण्यंतात्सप्रत्यये तु प्रियशब्दात् णाविष्ठवद्भावेन प्रियशब्दस्य प्रादेशस्ततोद्वित्वादि । प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति पिप्रापयिषति प्रापिपयिषति प्रापयियिषति। यङसण्यंतात्सप्रत्ययेतु बोभूयिषयिषति । यङ्ञिसांतात् ञिप्रत्यये तु । बोभूययिषति ॥ इतिप्रत्ययमाला ॥

मू०— निविशादेः ॥ न्यादिपूर्वाद्विशादेर्धातोरात्। निविशते।

(सुबोधिनी—) निविशादेः निपूर्वोविशः नेः परो विश इति वा निविश आदिर्यस्य स निविशादिस्तस्मादात्स्यात्। आदिशब्दः प्रकारे। विश इत्यत्र अकार उच्चारणार्थः। " निविशते यदि शूकशिखापद " इति श्रीहर्षः। निर्विं। प्रविशति। अर्थवद्ग्रहणलक्षणप्रतिपदोक्तपरिभाषाभ्यां नेरुपसर्गस्य ग्रहणं। तेनेह न । मधुनि विशंति भ्रमराः ॥

(तत्त्वदीपिका—) निविशादेः निपूर्वो विशः नेः परोविश इति वा विशोऽकार उच्चारणार्थः असंदेहार्थं वा। पदकार्यवारणं अन्यथा निविडादेरित्युक्ते विश वा विड भेदने वेति संदेहः स्यात् निविश आदिर्यस्येति स तथा तस्मात् अत्रादिशब्दः प्रकारे तेन निविशसदृशादिति बोध्यं सादृश्यं चोपसर्गपूर्वत्वं । निविशादिगणाभावाद्वावस्थावाचिन आदिशब्दस्य ग्रहणं तेन नद्यतीति कुलं विशतीत्यत्र न भवति। एवं वेति विजयतीत्यत्र(?) न। परा जयति दुरात्मानोत्तमाः पराः ॥

मू० —परिव्यवेभ्यः क्रियः ॥ परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

(सुबोधिनी—) परिव्यवेभ्यःक्रियः। परगामिफलार्थमिदमात्मनेपदं ॥

मू०— विपराभ्यांजेः ॥ विजयते । व्यजेष्ट । पराजयते ।

(सुबोधिनी—) विपराभ्यांजेः। आभ्यां परो जयतिरात्वान् ॥

मू०-- आङोदाञोनतुविकसने ॥ विद्यामादत्ते। आदित । विकसनेतु । व्याददाति मुखं कृष्णः। पराङ्गकर्म्मकान्नवत्येव। व्याददते पिपीलिकाः पतंगस्य मुखम् ।

(सुबोधिनी—) आङोदाञोनतुविकसने। परगामिफलार्थमिदं । आङ्पूर्वाद्ददातेर्मुखविकसनादन्यत्रार्थे वर्त्तमानादात्मनेपदं स्यात्। विद्यामादत्ते ॥

मू०— क्रीडआङनुसम्परिभ्यः ॥ आक्रीडते । अनुक्रीडते । परिक्रीडते ।

(सुबोधिनी—) क्रीड आङनुसंपरिभ्यः । तृतीयार्थस्यानोर्योगे नात्मनेपदं । माणवकमनुक्रीडति । तेन सहेत्यर्थः ॥

मू०— समोऽकूजने ॥ संक्रीडते । कूजने तु । संक्रीडति रथचक्रम् ।

(सुबोधिनी—) समोऽकूजने । समः परः क्रीडतिरात्वात् । अकूजनेर्थे ॥

मू०— आगमेःक्षमायाम् ॥ आगमयस्व तावत् ।

(सुबोधिनी—) आगमेःक्षमायां । आङ्पूर्वात् ण्यंताद्गमेरात्स्यात् । क्षमायामर्थे । आगमयस्व तावत् । मा त्वरिष्ठा इत्यर्थः ॥

(तत्त्वदीपिका—) आगमेः क्षमायां । गमेरिति ण्यंतस्य ग्रहणं । क्षमा प्रतीक्षा । आगमयस्वेति मात्वरिष्ठा इत्यर्थः ।

मू०— शिक्षेर्जिज्ञासायाम् ॥ धनुषि शिक्षते ।

(सुबोधिनी—) शिक्षेर्जिज्ञासायाम् । शिक्ष विद्योपादाने इत्यस्य नेह ग्रहणं । अनुदात्तत्वादेवात्मनेपदसिद्धेः । किंतु शकेः सांतस्येह ग्रहणं । धनुषिशिक्षते । धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः ॥ विद्योपादाने

(तत्त्वदी०—) धनुषि शिक्षत इति । धनुर्विषये ज्ञानेशक्तो भवितुमिच्छतीत्यर्थः ।

मू०— हरतेर्गतताच्छील्ये ॥ पैतृकमश्वा अनुहरन्ते मातृकङ्गावः ।

(सुबोधिनी—) हरतेर्गतताच्छील्ये । गतं प्रकारः सादृश्यमिति यावत् । पैतृकमश्वा अनुहरंते मातृकं गावः । पितुर्मातुश्च सादृश्यं सततं परिशीलयंतीत्यर्थः । ताच्छील्ये किं।मातुरनुहरति।इह सादृश्यमात्रं विवक्षितं । नतु प्रकारताच्छील्यम् ॥

(तत्त्वदी०—) गतताच्छील्य इति । गतं प्रकारः । पैतृकमश्वा अनुहरन्त इति । पितुः प्रकारं सततं परिशीलयन्तीत्यर्थः गतं गमनं तस्य । ताच्छील्य इति व्याख्याने तु अयकः संबन्धो यदनुहरते तस्य कुमुदमित्यादावव्याप्तिः स्यात् ।

किरतेर्हर्षजीविकाकुलायकरणेषु ॥

(सुबोधिनी—) किरतेर्हर्षजीविकाकुलायकरणेषु । किरतेरात्स्यात एषु वाच्येषु । हर्षादयो विषयाः तत्र हर्षो विक्षेपस्य कारणमितरे फले ॥

(तत्त्वदीपिका—) किरतेरिति । कृविक्षेपे । हर्षादयोविषयत्वेनोपादीयंते । तत्र हर्षो-विक्षेपकारणं । इतरे फलं ।

मू०— अपात्किरतेस्सुट्चतुष्पाच्छकुनिकर्तृकेआलेखने ॥ अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी । श्वाऽऽश्रयार्थी च । हर्षादिष्विति किम् । अपकिरति । कुसुमं वायुः ।

(सुबोधिनी-) अपात्किरतेःसुट्चतुष्पाच्छकुनिकर्तृकेआलेखने । अपात्किरतेः सुट् स्यात् हर्षादिष्वेव चतुष्पाच्छकुनिकर्तृके आलेखने सति । अपस्किरते वृषो हृष्टः । हर्षेण भूमिं विलिखतीत्यर्थः हर्षादिष्विति किम् । अपकिरति कुसुमं । इहात्सुटौ न । हर्षादिमात्रविवक्षायां यद्यप्यात्मनेपदं प्राप्तं तथापि सुडभावे नेष्यत इत्याहुः गजोऽपकिरति । अत्र हर्षे सत्यप्यालेखनाभावात् सुटोऽप्राप्तिः ॥

(तत्त्वदीपिका-) अपस्किरतेवृषो हृष्टइति । हर्षेण भूमिं विलिखतीत्यर्थः ।

मू०-आङ्नुप्रच्छोः ॥ आनुते। आपृच्छते ।

(सुबोधिनी-)आङ्नुप्रच्छोः।आङः परावेतावात्वंतौ भवतः। णु स्तुतौ।अदादिः। प्रच्छ ज्ञीप्सायां । तुदादिः ॥

(तत्त्वदीपिका-) आङ्इति । णुस्तुतौ अदादिः । प्रच्छ ज्ञीप्सायां तुदादिः । आनुत इति उत्कण्ठापूर्वं शब्दं करोतीत्यर्थः ।

मू०-शपउपालम्भे ॥ विप्राय शपते ।

(सुबोधिनी-) शप उपालंभे । आक्रोशार्थे स्वरितेतः शपः परगामिफले शपथरूपेऽर्थे आत्मनेपदं भवति । कृष्णाय शपते । श्लाघन्हुङिति संप्रदानसंज्ञा ॥

(तत्त्वदीपिका-) उपालम्भ इति । शपथ इत्यर्थः स च वाचा शरीरस्पर्शनरूपः विप्राय शपत इति त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येव शपथेन विप्रस्य स्वाभिप्रायं प्रकाशयतीत्यर्थः ॥ सख्यः शपामि यदि किंचिदिह स्मरामीत्यत्रतु स्वाशयप्रकाशनमात्रं विवक्षितं नतु शपथरूपमपीत्यदोषः ।

मू०-समवप्रविभ्यःस्थः। संतिष्ठते। समस्थित। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते।

(सुबोधिनी-) समवप्रविभ्यःस्थः । लुङि । अपिद्दाधास्यामिदित्तीत्वं । समस्थिषातां ॥

मू०-आङःप्रतिज्ञायाम् ॥ शब्दं नित्यमातिष्ठते ।

(सुबोधिनी-) आङःप्रतिज्ञायां । शब्दं नित्यमातिष्ठते । नित्यत्वेन प्रतिजानीते इत्यर्थः ॥

मू०- स्वाभिप्रायाविष्करणेनिर्णेत्राख्यायाश्च ॥ गोपी कृष्णायतिष्ठते । अस्थित । संशय्य कर्णादिषु तिष्ठते यः ।

(सुबोधिनी-) स्वाभिप्रायाऽऽविष्करणेनिर्णेत्राऽऽख्यायांच । स्वाशयस्य प्रकाशने विवादस्य निराकरणकर्त्ता निर्णेता तस्मिन्नर्थे च तिष्ठतेरात्स्यात् । गोपी कृष्णाय तिष्ठते । स्थित्या नेत्रादिविकाराद्वा स्वाभिप्रायं ज्ञापयति । संशय्य कर्णादिषु तिष्ठते यः । संशयं विधाय निर्णेतृत्वेन कर्णादीनाश्रयते इत्यर्थः ॥

(तत्त्वदीपिका-) निर्णेत्राख्यायामिति। निर्णेता विवादस्य निराकरणकर्त्ता लोके प्रसिद्धः। कृष्णाय तिष्ठते इति। स्वस्थित्या नेत्रादिविकारद्वारा स्वाभिप्रायविशेषं ज्ञापयतीत्यर्थः। संशय्यकर्णादिष्विति। संशयं निर्णेतुं कर्णादिषु तिष्ठतीत्यर्थः। अन्ये तु संशयस्य कर्णादय एव निर्णेतार इत्येवार्थइति।

मू०- उदोऽनूर्ध्वकर्म्मणीहायाम्॥ मुक्तावुत्तिष्ठते। उदस्थास्तम्भोस्सलोपः। उत्थासीष्ठ। उत्थासीयास्तां। उदस्थास्यत। उदस्थित। अनूर्ध्वकर्म्मणि किम्। पीठादुत्तिष्ठति। ईहायाङ्किम्। ग्रामाच्छतमुत्तिष्ठति।

(सुबोधिनी-) उदोऽनूर्ध्वकर्मणीहायां। इच्छापूर्विका चेष्टा ईहा तस्यामेव नेह ग्रामाच्छतमुत्तिष्ठति। उत्पद्यते इत्यर्थः॥

(तत्त्वदी०-) उदइति। कर्मक्रियाईहा परिस्पंदः। मुक्तावुत्तिष्ठत इति। मुक्त्यर्थं यतत इत्यर्थः। ईहायां किं ग्रामाच्छतमुत्तिष्ठति। उत्पद्यत इत्यर्थः। उत्पत्तिः क्रिया नतु परिस्पंदात्मिकेत्यादभावः

मू०- उपान्मंत्रकरणदेवपूजासङ्गतिकरणमित्रकरणपथिषु॥ आग्नेय्याऽऽग्नीध्रमुपतिष्ठते। मंत्रकरणे किम्। भर्तारमुपतिष्ठति यौवनेन। आदित्यमुपतिष्ठते। गंगा यमुनामुपतिष्ठते। रथिकानुपतिष्ठते। सुघ्नमुपतिष्ठते पन्थाः।

(सुबोधिनी-)उपान्मंत्रकरणदेवपूजासंगतिकरणमित्रकरणपथिषु। एष्वर्थेषु उपात्तिष्ठतेरात्स्यात्। मंत्रः करणं यत्र तत् मंत्रकरणं स्तुतिः। आग्नेय्याऽऽग्नीध्रमुपतिष्ठते। अग्निदेवताकया ऋचाऽऽग्नीध्रमग्निविशेषं स्तोतुं तत्समीपे तिष्ठतीत्यर्थः। अग्निमिंधे इति अग्नीत् क्विबंतः। अग्नीधः स्थानमग्नीध्रं। तत्स्थोपाग्नाधः निपातनात्तद्धितो रण्प्रत्ययः मंत्रकरणे किं भर्त्तारमुपतिष्ठति यौवनन। आदित्यमुपतिष्ठते आदित्यं स्तोतुं तदभिमुखतया तिष्ठतीत्यर्थः। गंगायमुनामुपातिष्ठते। उपश्लिष्यतीत्यर्थः। रथिकानुपतिष्ठते। मैत्रीकरोतीत्यर्थः। पंथाः स्रुघ्नो देशस्तमुपतिष्ठते प्राप्नोतीत्यर्थः॥

(तत्त्वदीपिका-)उपान् मंत्रकरणं कारकं देवानां पूजा संगतिः संश्लेषः मित्रस्य करणं पंथा मार्गः स च कर्तृत्वेन संबध्यते। आदित्यमुपतिष्ठत इति। पूजयतीत्यर्थः। यमुनेति। उपश्लिष्यतीत्यर्थः रथिकानिति। मित्रीकरोतीत्यर्थः। पंथा इति प्राप्नोतीत्यर्थः।

मू०- वा लिप्सायाम्। भिक्षुः प्रभुमुपतिष्ठते, उपतिष्ठति वा।

(सुबोधिनी-) वालिप्सायां। प्रभुमुपतिष्ठते। लिप्सयोपगच्छतीत्यर्थः॥

(तत्त्वदीपिका-) वालिप्सायामिति। लब्धुमिच्छा लिप्सा तस्यां गम्यमानायामित्यर्थः।

मू०-अकर्मकाच्च॥ ज्ञानमुपतिष्ठते।

(सुबोधिनी-) अकर्मकाच्च । उपातिष्ठतेरकर्मकादात्मनेपदं स्यात् । भोजनकाले उपतिष्ठते सन्निहितो भवतीत्यर्थः ॥

(तत्त्वदी०-)अकर्मकर्मकारकं न तु क्रियाज्ञानम् । उपतिष्ठत इति । सन्निधत्त इत्यर्थः

मू०-उद्विभ्यान्तपोऽकर्मकात्स्वाङ्गकर्मकाच्च ॥ उत्तपते । वितपते पाणिं । शिरोवा । स्वांगकर्मकात्किम् । सुवर्णमुत्तपति ।

(सुबोधिनी-) उद्विभ्यांतपोऽकर्मकात्स्वांगकर्मकाच्च । स्वमंगं स्वांगं न त्वद्रवमिति परिभाषितं । उत्तपते । वितपते । दीप्यते इत्यर्थः । नेह सुवर्णमुत्तपति । संतापयति विलापयति वेत्यर्थः । चैत्रो मैत्रस्य पाणिमुत्तपति । संतापयति वेत्यर्थः ।

(तत्त्वदीपिका-) उत्तपतइति दीप्यत इत्यर्थः ।

मू०-आङोयमहनिभ्यामकर्मकाभ्यांस्वाङ्गकर्मकाभ्याञ्च॥ आयच्छते । आहते । पाणिं शिरो वा । आघ्नाते । आहसे । अन्यत्र । शत्रुमायच्छति । आहन्ति वा ।

(सुबोधिनी-) आङोयमहनिभ्यामकर्मकाभ्यांस्वाङ्गकर्मकाभ्यांच । यमहनिभ्यामात् । नेह परस्य शिर आहंति । कथं तर्हि "आजघ्ने विषमविलोचनस्य वक्षः" इति भारविः । आहध्वं मा रघूत्तममितिभट्टिश्च । प्रमाद एवायमिति । समीपमेत्येत्यध्याहारो वा बोध्यः विषमविलोचनस्य समीपमेत्य वक्ष आजघ्ने । स्वकीयमेव वक्षो मल्ल इव संतोषातिशयादास्फोटनं चक्रे इत्यर्थः ॥

(तत्त्वदीपिका-) आङ इति । अकर्मकस्वांगकर्मकयोरनुवृत्तिरत्रापि ॥ आयच्छत इति । दीर्घो भवतीत्यर्थः । आहत इति नलोपः । आघ्न ते । आजघ्ने विषमलोचनस्य वक्ष इत्यादौ तु प्राप्येत्यध्याहारो बोध्यः ।

मू०-हनस्सिःकित् ॥ वधोवाति । आवधिष्ट । आवधिषाताम्, आहसाताम् ।

(सुबोधिनी-) हनःसिःकित् । हंतेः परः सिः प्रत्ययो वा कित् स्यात् । हनोलुङ्लिङोरिति वधादेशः । आवधिष्ट ।,आवधिषातां । पक्षे कित्वात् लोपस्त्वनुदात्ततनामिति नलोपः। लोपोऽन्हस्वादिति सिलोपः। आहत। आहसातां। आहसत॥

मू०-यमस्सूचनेसिःकित् ॥ उदायत उदायसाताम् । उदायसत ।

(सुबोधिनी-) यमः सूचनेसिःकित् । सूचनं परदोषाऽविष्करणं। कित्वाल्लोपस्त्वनुदात्ततनामिति मलोपः । लोपोऽन्हस्वादिति सिलोपः । उदायत । सूचने किं । उदायंस्त पादः माकृष्टवानित्यर्थः ॥

(तत्त्वदीपिका-) सूचन इति । परेणाच्छाद्यमानस्याविःकरण इत्यर्थः। उदायते इति परावद्यं प्रकाशयतिस्मेत्यर्थः

प्रच्छि

मू०–समोगमृच्छिस्वरत्यर्तिश्रुविदिदृशिभ्यः ॥ अकर्मकेभ्यः। सङ्गच्छते।

(सुबोधिनी–)समोगमृच्छिप्रच्छिस्वरत्यार्तिश्रुविदिदृशिभ्यः। समुपसर्गादकर्मकेभ्योगमृच्छचार्तिश्रुदृशिभ्यः। प्रच्छिस्वरतिविदिभ्यः सकर्मकेभ्यश्चात्स्यात्। संगच्छते। संगतं भवतीत्यर्थः॥

(तत्त्वदीपिका–)समोगमृच्छतीति। ऋच्छ गत्यादौ आदेशस्तुन। अर्त्ते पृथग्ग्रहणात् वित्तेरेव ग्रहणं। गम्यादिपरस्मैपदिसाहचर्यात् संगच्छत इति युज्यत इत्यर्थः। अकर्मकादित्येव। रक्षांसीति पुरापि संशृणुमहे इति। मुरारिप्रयोगस्तु इतिकथयद्भ्य इत्याध्याहारेण समाधेयः। अर्थान्तरे वृत्तेरकर्मकत्वं सकर्मकाणामपि।

मू०–गमेस्सिस्यौकितौवा ॥ सङ्गसीष्ट, संगंसीष्टासमगत, समगंस्त। समृच्छिष्यते। समानृच्छे। समार्च्छिष्ट। संस्वरते। संसस्वरे। संस्वरिषीष्ट, संस्वृषीष्ट, समस्वरिष्ट, समस्वृत। सम्पृच्छते। समप्रष्ट। समप्रक्षाताम्। संशृणुते। संश्रोता। समश्रोष्ट। संवित्ते। संविदाते।

(सुबो०-)गमेःसिस्यौकितौवा। गमेरनिटौ सिस्यौ वा कितौ स्तः। आशिषि लिङि कित्वाल्लोपस्त्वनुदात्ततनामिति मलोपः संगसीष्ट। लुङि पक्षे संगंसीष्ट कित्वान्म लोपे लोपो ऱ्हस्वादिति सिलोपः। समगत। समगसातां। समगसत। कित्वाभावे। समगंस्त समगंसातां समगंसत। तौदादिकस्य ऋच्छेरत्र ग्रहणं नतुऋच्छादेशस्येति ध्वननार्थं लृटः प्रयोगः। समृच्छिष्यते। ग्रहामिति संप्रसारणं संपृच्छते।स्वृ शब्दोपतापयोः। संस्वरते। अर्त्तीति भौवादिकजौहोत्यादिकयोर्ग्रहणं। तत्र भ्वादेः समृच्छते लिठि समाराते। समारिरे। लिङि उरिति न गुणः। समृषीष्ट। समर्त्ता। हनृत इतीट् समरिष्यते। समारिष्यत। लुङि मेट इत्यटोऽभावः। उरिति न गुणः लोपो ऱ्हस्वादिति सिलोपे। मासमृत। मासमृषातां। मासमृषत। माङभावे समार्त्त। समार्षातां। समार्षत।इयर्त्तेस्तु ऋप्रोरिःपूर्वस्येति पूर्वस्येत्वे असवर्णे स्वरे पूर्वस्येतीयू। समियृते। लुङि। सर्तिशास्त्यर्तिभ्य इति ङः। ऋवर्णदृशोरिति गुणः मेट इत्यडभावः। मासमरत। मासमरेतां। मासमरंत। माङभावे समारत। समारेतां। समारंत। श्रुवःशृआदेश इति शुर्नुप्रत्ययश्च। संशृणुते। परस्मैपदसाहचर्याद्विदज्ञाने इत्यस्यैव ग्रहणं न तु स्वरितेतो विद्लृ लाभे इत्यस्य सत्ताविचारणार्थस्य। विदेस्त्वनुदात्तत्वादात्मनेपदं सिद्धमेव॥

मू०–वेत्तेरान्तोवारुट् ॥ संविदते, संविद्रते। सम्पश्यते। समदृष्ट। समियृते। समारे। समियूरते। ऋप्रोरिः पूर्वस्य। समियूरीत। समि

यूरीयाताम् । स्वरादेः । अइए एऐऐ । समैयृत । समैयूराताम् । अ-
कर्मकात्किं ग्रामं सङ्गच्छति॥

(सुबोधिनी-) वेत्तेरान्तोवारुट् । विदः परस्यात्प्रत्ययस्य रुड् वा स्यात् । दृशा-
देरिति पश्यः । संपश्यते । कथं तर्हि सकर्मकस्य रक्षांसीति पुरापि संशृणुमहे इति
मुरारिप्रयोगः । ग्रामादिकोयमिति कथयद्भ्य इत्यध्याहारो वा । अथास्मिन्नकर्म-
काधिकारे इनिगम्यादीनां कथमकर्मकतेति चेच्छृणु । धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसं-
ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेत्युक्तत्वादकर्मकत्वं बोध्यम् ॥

मू०-उपसर्गादस्यत्यूहोर्वा ॥ निरस्यते, निरस्यति । निरास्यत् ।
समूहति समूहते । समुह्यात् ।

(सुबोधिनी-) उपसर्गादस्यत्यूहोर्वा । अकर्मकादितिनिवृत्तं असु क्षेपणे । ऊह
वितर्के । बंधं निरस्यति । दिवादित्वादः (उपसर्गादूहतेर्ह्रस्वोयादौकिङति) ब्र-
ह्म समुह्यात् । अग्निं समुह्यति ॥

मू०-निसमुपविभ्योह्वः ॥ निह्वयते ।

(सुबोधिनी-) निसमुपविभ्योह्वः । एभ्यः परस्मात् ह्वेञ आत् स्यात् ॥

मू०-स्पर्द्धायामाङः ॥ कृष्णश्चाणूरमाह्वयते ।

(सुबोधिनि-) स्पर्द्धायामाङः । आङः परात् ह्वेञ आत् स्यात् । पराभिभवे-
च्छा स्पर्द्धा तस्यामर्थे ॥

(तत्त्वदीपिका-) स्पर्द्धायामिति । पराभिभवेच्छास्पर्द्धा कृष्ण इति । स्पर्द्धतया
तस्याह्वानं करोतीत्यर्थः ।

मू०-अप्रतिबन्धोत्साहस्फीततासुक्रमः ॥ ऋचि क्रमते बुद्धिः ।
अध्ययनाय क्रमते । क्रमन्तेऽस्मिन्शास्त्राणि ।

(सुबोधिनी-) अप्रतिबन्धोत्साहस्फीततासुक्रमः । ऋचि क्रमते बुद्धिर्न प्रति-
हन्यत इत्यर्थः । अध्यनाय क्रमते । उत्सहत इत्यर्थः । क्रमंतेऽस्मिन् शास्त्राणि । स्फी-
तानि प्रवृद्धानि भवंतित्यर्थः ॥

(तत्त्वदीपिका-) ऋचिक्रमत इति न प्रतिहन्यत इत्यर्थः । अध्यनाय क्रमतइति
उत्सहत इत्यर्थः । क्रमन्तइति । स्फीतानि भवन्तीत्यर्थः

मू०--उपपराभ्याम् ॥ उपक्रमते । पराक्रमते ।

(सुबोधिनी-) उपपराभ्यां । अप्रतिबंधादिषु वाच्येष्वाभ्यां क्रम आत् स्यात् ।
नेह । संक्रामति ॥

मू०-आङोज्योतिरुद्गमने ॥ आक्रमते, आक्रम्यते सूर्यः ।

(सुबोधिनी--) आङोज्योतिरुद्गमने। आक्रमते सूर्य्यः उदयते इत्यर्थः। नेह। आक्रामति धूमो हर्म्यस्थलात् ॥

(तत्त्वदी०-) ज्योतिरुद्गमन इति। ज्योतिर्नक्षऽत्रादिः। आक्रमते सूर्यइति। उदयत इत्यर्थः। नभः समाक्रामति चंद्रमाः क्रमादित्यत्र तु प्राप्नोतीत्येवार्थो नतूद्गमनं।

मू०--वेःपादविहरणे ॥ साधुविक्रमते वाजी

(सुबोधिनी-) वेःऽपादविहरणे। क्रमेः पादविक्षेप एवार्थस्तथापि धातूनामनेकार्थत्वादेवमुक्तं। पादविहरणे किम्। विक्रामति संधिर्द्विधा भवति स्फुटतीत्यर्थः ॥

(तत्त्वदीपिका-) वेः। विहरणं विक्षेपणं। यद्यपि धातुरयमस्मिन्नेवार्थे प्रसिद्धस्तथापि धातूनामनेकार्थत्वाद्विशेषणं। नेह विक्रामति संधिः द्विधाभवतीत्यर्थः।

मू--०प्रोपाभ्याम्प्रारम्भार्थाभ्याम् ॥ प्रक्रमते। उपक्रतते। प्रक्रम

(सुबोधिनी-) प्रोपाभ्यांप्रारंमार्थाम्यां। प्रक्रमते। आरंभंकरोतीत्यर्थः। प्रारंभार्थाभ्यां किम्। प्रक्रामति। गच्छतीत्यर्थः। उपक्रामत्यागच्छतीत्यर्थः। उपपराभ्यामिति नात्रात्मनेपदं शंक्यं। अप्रतिबंधादिष्वेवेत्युक्तत्वात् ॥ प्रक्रमोगति नद

मू०--अनुपसर्गाद्वा ॥ क्रमते, क्रम्यते। क्राम्यति, क्रामति।

(सुबोधिनी-) अनुपसर्गाद्वा। अप्राप्तविभाषेयमप्रतिबंधादिषु तु नित्यमेव ॥

मू०--अपन्हवेज्ञः ॥शतमपजानीते।

(सुबोधिनी-) अपन्हवेज्ञः। अपनयनेऽर्थे ज्ञ आत ॥

(तत्त्वदीपिका-) शतमपजानीत इति। अपलपतीत्यर्थः।

मू०-अकर्म्मकाच्च ॥ सर्पिषो जानीते।

(सुबोधिनी-) अकर्मकाच्च। सर्पिषो जानीते। सर्पिषोपायेन प्रवर्तते इत्यर्थः ॥

(तत्त्वदीपिका-) सर्पिष इति। सर्पिष उपायेन प्रवर्त्तते इत्यर्थः

नु मू०-अनुपसर्गाज्ज्ञः ॥ गांजानीते।

(सुबोधिनी-(अनुपसर्गाज्ज्ञः) अकर्मकाच्चेत्येवासिद्धे सकर्मकार्थमारंभः। अनुपसर्गात्किम्। स्वर्गलोकं न प्रतिजानाति। कथं तर्हि इत्थं नृपः पूर्वमवालुलोचे ततोनुजज्ञे गमनं सुतस्येति भट्टिः। कर्मणि लिट्। नृपेणेति विपरिणामः ॥

मू०--सम्प्रतिभ्यामनाध्याने ॥ शतं सञ्जानीते। शतंप्रतिजानीते। अनाध्यानेकिम्। मातरं सञ्जानाति।

(सुबोधिनी-) संप्रतिभ्यामनाध्याने। उत्कंठापूर्वकं स्मरणमाध्यानं। शतं संजानिते। अवेक्षते इत्यर्थः। शतं प्रतिजानीते। अंगीकरोतीत्यर्थः ॥

तत्त्वदीपिका) शतं संजानीते॥ अवेक्षत इत्यर्थः। प्रतिजानीते अंगीकरोतीत्यर्थः॥

मू०--अनुपसर्गाद्वा ॥ गांजानाति जानीते वा।

(सुबोधिनी-) अनुपसर्गाद्वा । अनुपसर्गात् परस्य ज्ञो वात् स्यात् ॥

मू०--वेःशब्दकर्मणः ॥ कृञः

(सुबोधिनी-) वेःशब्दकर्मणः कृञः । शब्दं विकुरुते । उच्चारयतीत्यर्थः । शब्दकर्मणः किम् । चित्तं विकारोति कामः ॥

मू०--अकर्मकाच्च ॥

(सुबोधिनी-) अकर्मकाच्च । वेरकर्मकात् कृञ आत् स्यात् । विकुर्वते सैंधवाः वाजिनो विकारं लभंते इत्यर्थः ॥

मू०--भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषुवदः ॥ शास्त्रे वदते । भृत्यानुपवदते । शास्त्रेवदते । क्षेत्रेवदते । गृहेवदते । उपवदते ब्राह्मणः परदारान् ।

(सुबोधिनी-) भासनोऽपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषुवदः । वदतेरात्स्यादेष्वर्थेषु । शास्त्रे वदते । भासमानो ब्रवीतीत्यर्थः । उपसंभाषोपसांत्वनं । भृत्यानुपवदते । सांत्वयतीत्यर्थः । शास्त्रे वदते । ज्ञानं वदतीत्यर्थः । क्षेत्रे वदते । क्षेत्रप्रयत्नं वदतीत्यर्थः । गृहेवदते विवादं विवदंतीत्यर्थः । उपवदते प्रार्थयते । उपमंत्रणमुपच्छंदनं । एषु किं । किंचिद्वदति ॥

(तत्त्वदीपिका-) भासमानेत्यादि भासनं दीप्तिः । उपसंभाषा सांत्वनं । शास्त्रे वदत इति । भासमानोब्रवीतीत्यर्थः। भृत्यादीति । सांत्वयतीत्यर्थः। शास्त्रे वदत इति । वदितुं सम्यगवबुध्यत इत्यर्थः क्षेत्रेवदत इति क्षेत्रेविषयकमुत्साहमाविःकरोतीत्यर्थः । गेहे विवदन्त इति । विविधंभाषन्ति इत्यर्थः। परदारानुपवदते इति । भद्रे भजस्व मामिदं ते दास्यामीत्येवं रहसि प्रचोद्य स्वाभिलषिते प्रवर्त्तयतीत्यर्थः ।

मू०--मनुष्यादीनांसंभूयोच्चारणे ॥ सम्प्रवदन्ते ब्राह्मणाः ।

(सुबोधिनी--) मनुष्यादीनांसंभूयोच्चारणे । वदतेरात्स्यात् मनुष्यादीनां समूहोच्चारणेऽर्थे ॥

(तत्त्वदीपिका-)। संभूयोच्चारणे। सहोच्चारणइत्यर्थः ।

मू०--व्यक्तवाग्विषयादनुपूर्वादकर्मकात्॥अनुवदते कठः कलापस्य ।

(सुबोधिनी-)व्यक्तवाग्विषयादनुपूर्वादकर्मकात् । एतादृशाद्वदतेरात्स्यात् । व्यक्तः वाग्विषयो यस्य स व्यक्तवाग्विषयस्तस्मात् । अनुवदते कठः कलापस्य वेदशाखावाचकावपि पठकलापशब्दावत्र तदध्येतारि वर्तेते । अनु सादृश्यं । कलापस्येति संबंधे षष्ठी । अकर्मकात् किम् । उक्तमनुवदति । व्यक्तवागिति किं । अनुवदति वीणा ॥

(तत्त्वदीपिका—)व्यक्तेति। व्यक्ता परिस्फुटा वाणी अर्थावगतिहेतुश्च वाग्येषां ते व्यक्तवाचस्ते च यद्यपि शुकादपि मनुष्या एवात्र बोध्याः प्रसिद्धतरत्वात्। अतएव ह्येतदुपात्तं। अन्यथा वदेः स्वभावादिवत्तदर्थकत्वात्कृतमनेन अनुवदतइत्यादि शाखावचनावापि कठकलापशब्दौ तदध्येतरि वर्त्तेते कलापेन सदृशं कठोधीयानो वदतीत्यर्थः। अकर्मकात्किं। उक्तमनुवदाति। व्यक्तवाचांकिं। अनुवदति वीणा।

मू०--वाविरुद्धोक्तौ ॥ विप्रवदन्ति विप्रवदन्ते वा वैद्याः।

(सुबोधिनी—) वाविरुद्धोक्तौ। विरुद्धोक्तिरूपे व्यक्तवाचां समुचारणेर्थे वदेर्वात्। अप्राप्तविभाषेयं ॥

(तत्त्वदीपिका—) विप्रवदन्तीत्यादि। युगपत्परस्परं विरुद्धं वदन्तीत्यर्थः।

मू०—अवाद्गिरतेः ॥ अवगिरते।

(सुबोधिनी--) अवाद्गिरतेः। गिरतेरिति तौदादिकस्यैव ग्रहणं। गृणातेरवपूर्वस्य प्रयोगो नास्तीति भाष्योक्तेः ॥

(तत्त्वदी०—)अवादिति। गिरतेरिति निर्द्देशात्तौदादिकस्यैव ग्रहणं। गृणातेस्त्ववपूर्वस्य प्रयोगो नास्तीति भाष्योक्तेः क्रैयादिकस्याग्रहः। अतो गिर इत्युक्तावप्यदोषः।

मू०--समःप्रतिज्ञाने ॥ शब्दं नित्यं सङ्गिरते।

(सुबोधिनी—) समःप्रतिज्ञाने। समोगिरतेरात्स्यात् प्रतिज्ञानेर्थे। संगिरते। प्रतिजानीत इत्यर्थः। प्रतिज्ञाने किं। संगिरति ग्रासं ॥

(तत्वदीपिका—) संगिरत इति प्रजानीत इत्यर्थः।

मू०--उदश्चरस्सकर्मकात् ॥ धर्ममुच्चरते।

(सुबोधिनी—) उदश्चरःसकर्मकात्। धर्ममुच्चरते। उल्लंघ्य गच्छतीत्यर्थः। सकर्मकात्किं। बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः ॥

(तत्त्वदीपिका—)धर्ममुच्चरत इति। उल्लंघ्य गच्छतीत्यर्थः।

मू०--समस्तृतीयायुक्तात् ॥ रथेन सञ्चरते।

(सुबो०—) समस्तृतीयायुक्तात्। तृतीयांतयुक्तात् समश्चरेरात्स्यात्। रथेन संचरते। व्यवधानेपि। रथेन समुच्चरते ॥

मू०--दाणश्चसाचेच्चतुर्थ्यर्थे ॥ दास्या संयच्छते कामुकः।

(सुबोधिनी—) दाणश्चसाचेच्चतुर्थ्यर्थे। तृतीयांतयुक्तात् समो यच्छतेरात्स्यात् सा तृतीया चेच्चतुर्थ्यर्थे भवति। दास्या संयच्छते। दास्यै धनं ददातीत्यर्थः। दास्येति संप्रदाने तृतीया ॥

(तत्त्वदी०—) दास्येत्यादि। कामितया दास्यैददातीत्यर्थः।

मू०--उपाद्यमस्स्वीकारे ॥ भार्यामुपयच्छते।

(सुबोधिनी–)उपाद्यमःस्वीकारे । उपाद्यमेरात्स्यात् स्वीकारो विवाहस्तस्मिन्नर्थे॥
(तत्त्वदीपिका–) स्वीकारइति । स्वीकारोविवाहः अंगीकारमात्रमिति तु भाष्यं ।

मू०--यमस्सिःकिद्वाविवाहे ॥ रामस्सीतामुपायत, उपायंस्त वा।

(सुबोधिनी–) यमःसिःकिद्वाविवाहे । यमेः परः सिप्रत्ययो वा कित् स्यात् विवाहेऽर्थे । लोप स्त्वनुदात्ततनामिति मलोपः । उदायत । पक्षे उदायंस्त ॥

मू०--ज्ञाश्रुस्मृदृशांसान्तानामात्॥ जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ।

(सुबोधिनी--) ज्ञाश्रुस्मृदृशांसांतानामात् । सप्रत्ययांन्तेभ्य एभ्य आत् स्यात्। अपन्हवेज्ञ इत्यादिना ज्ञाधातोः समोगमृच्छीत्यनेन श्रुदृशिभ्यां चात्मनेपदे कृते ततः सप्रत्यये सांतात् पूर्ववदादित्यनेन तदात्मनेपदं सिद्धमेव पुनर्ग्रहणं विषयांतरेप्यात्मनेपदार्थम् ॥

मू०--अनोर्ज्ञानातेर्न ॥ अनुजिज्ञासति पुत्रम् ।

(सुबोधिनी--) अनोर्ज्ञानातेर्न । अनोः सांताज्ज्ञानातेर्नात् स्यात् ॥

मू०--प्रत्याङ्भ्यांश्रुवः॥प्रतिशुश्रूषति । आशुश्रूषति ।

(सुबोधिनी--) प्रत्याङ्भ्यांश्रुवः । आभ्यां सांताच्छृणोतेर्नात् ॥

मू०-स्वराद्यन्तोपसर्गाद्युजेरयज्ञे ॥ प्रयुङ्क्ते । उद्युंक्ते । अयज्ञे किम् । पात्राणि । प्रयुनक्ति ।

(सुबोधिनी--) स्वराद्यंतोपसर्गाद्युजेरयज्ञे । स्वरादेः स्वरांताच्चोपसर्गाद्युजेरात् न तु यज्ञपात्रेर्थे ॥

(तत्वदीपिका--) स्वराद्यंतोपसर्गादिति स्वरआदिरंतोवयवो यस्य स तथा तेन समादयो व्यावृत्ताः ।

मू०-समःक्ष्णुवः ॥ संक्ष्णुते शस्त्रम् ।

(सुबोधिनी--) समःक्ष्णुवः । समःक्ष्णोतेरात्स्यात् ॥

(तत्त्व०-) संक्ष्णुते शास्त्रमिति । समोगम्रित्यादौ न पठितः । अस्यात्र सकर्मकस्य ग्रहणात् ।

मू०--भुजोऽपालने ॥ ओदनम्भुङ्क्ते पालने तु महीम्भुनक्ति ।

(सुबोधिनी--) भुजोऽपालने । अभ्यवहारे इति वक्तव्ये अपालन इति पर्युदासग्रहणं प्रयोजनद्वयार्थं । संयोगवद्विप्रयोगस्यापि विशेषावधारणहेतुत्वात् रोधादिकस्यैव भुजेर्ग्रहणमित्येके । अभ्यवहारादर्थांतरे उपभोगादावप्यात्मनेपदं भवतीति । द्वितीये निषेधस्य निषेधः । पर्य्युदासः भुजेरान्नस्यात् पालनेऽपालनत्वात् । उपभोगार्थे तु वृद्धो जनो दुःखशतानि भुंक्ते इतीह भुजेरुपभोगोऽर्थः । उपभोग इत्युप-

लक्षणं। तेन बुभुजे पृथिवीपालः पृथिवीमेवकेवलामित्यत्रात्मसात्करणमर्थः। पृथिवीं बुभुजे। स्वाधीनां चकारेत्यर्थः। भुजोकौटिल्ये इति तुदादेस्तु पमेव। पाणिं विभुजति। अपालने किं। महीं भुनक्ति ॥

(तत्त्व०-) भुजो इति। रुधादेरेव ग्रहणं तौदादिकस्य अनवन इति प्रतिषेधात्। तेन विभुजति पाणिमित्यादावदोषः। बुभुजे पृथिवीपाल इत्यादौ तु भुजेरुपभोगार्थः। अन्यथा भुजोभक्षण इत्येवाकरिष्यत्।

मू०-गृधिवंचिभ्यांण्यन्ताभ्याम्प्रतारणे ॥ माणवकंवञ्चयते। गर्द्धयते।

(सुबोधिनी-) गृधिवंचिभ्याण्यंताभ्यांप्रतारणे। परगामिफलार्थमिदमात्मने पदम् प्रतारणेकिं श्वानं गर्द्धयति। अस्याभिकांक्षामुत्पादयति अहिं वंचयति। वर्जयतीत्यर्थः ॥

मू०-अपाद्वदः ॥ न्यायमपवदते। समुदाङ्भ्योयमोग्रन्थे ॥ व्रीहीन् संयच्छते। धान्यान् स्वीकरोतीत्यर्थः। भारमुद्यच्छते। भारं वहतीत्यर्थः। वस्त्रमायँते। वस्त्रमादधातीत्यर्थः। अग्रन्थेकिम्। वेदमुद्यच्छति। अधिगन्तुमुद्यमं करोतीत्यर्थः।

(सुबोधिनी-) अपाद्वदः। अपाद्वदतेरात्स्यात्। अनुपसर्गाज्ज्ञः पूर्वं व्याख्यातं ॥

मू०-कर्मव्यतिहारेधातोरात् ॥ व्यतिभवते। व्यतिराते।

(सुबोधिनी-) कर्मव्यतिहारेधातोरात्। क्रियाविनिमयेऽर्थेधातोः कर्तर्यात्मनेपदं स्यात्। व्यतिभवते। अन्यस्य योग्यं भवनमन्यतरः तंकरोतीत्यर्थः रा दाने। व्यतिराते ॥

(तत्त्व०-) कर्मव्यतिहारेधातोरिति। कर्म क्रिया तस्य व्यतिहारो विनिमयो व्यत्यासस्तस्मिन्नर्थे वर्त्तमानाद्धातोरादित्यर्थः। व्यतिभवत इति। अन्यस्य योग्यं भवनमन्यतरः करोतीत्यर्थः। परस्परकरणमपि कर्मव्यतिहारः। संप्रहरंते राजान इति यथा। अत्र च यदानेकस्य कर्तृत्वे सहविवक्षा तदा द्विवचनं च भवति सहविवक्षाभावे त्वेकवचनमपि तेन कर्मव्यातिहारस्यानेककर्तृकत्वादेकवचनं न संभवतीति न शंकनीयं।

मू०-नगतिहिंसार्थपठजल्पहसात् ॥ व्यतिगच्छन्ति। व्यतिपठन्ति। व्यतिघ्नन्ति। व्यतिजल्पन्ति। व्यतिहसन्ति।

मू०-इतरेतरान्योऽन्यपरस्परोपपदाच्च ॥ इतरेतरस्य अन्योऽन्यस्य परस्परस्य वा व्यतिलुनन्ति। ॥ इत्यात्मनेपदम् ॥

(सुबोधिनी-) नगतिहिंसार्थपठजल्पहसात्। इतरेतरान्योन्यपरस्परोपपदाच्च। नगतिहिंसार्थेभ्यः पठजल्पहसेभ्यः इतरेतरान्योन्यपरस्परोपपदेभ्यश्च धातुभ्यः आन्नस्यात्। ॥ इत्यात्मनेपदम् ॥

मू०--अनुपराभ्याङ्कृञः पम् ॥ अनुकरोति । पराकरोति ।

(सुबोधिनी-) अनुपराभ्यांकृञः पम् । आत्मगामिफले परस्मैपदार्थमिदम् ॥

मू०--अभिप्रत्यतिभ्यः क्षिपः ॥ पम् । अभिक्षिपन्ति । प्रतिक्षिपन्ति । अतिक्षिपन्ति ।

(सुबोधिनी-) अभिप्रत्यतिभ्यः क्षिपः । क्षिपप्रेरणे स्वरितेत् तस्यात्मगामिफलेऽपि परस्मैपदार्थमिदम् ॥

मू०- प्राद्वहः ॥ प्रवहन्ति ।

(सुबोधिनी-) प्राद्वहः । प्राद्वहतेः पंस्यात् ॥

मू०--परेर्मृषश्च ॥ परिमृष्यति । परिवहति ॥ इतिपदव्यवस्था ॥

(सुबोधिनी-) परेर्मृषश्च । परेर्मृषेः पं स्यात् । स्वरितेत्वात् परेर्मृषेः पदद्वये प्राप्ते आरम्भः । मृष आमर्षणे । दिवादिः । परिमृष्यति । ञेरभावे परिमर्षति । चकाराद्वहरपिपं भवति । परिवहति । व्याङ् पर्युपेभ्योरमः । भ्वादौ व्याख्यातमिदम् । अकर्मकाद्वा । अकर्मकाद्रमतेर्वा पं स्यात् । उपादित्येव उपरमति । उपरमते वा । निवर्त्तते इत्यर्थः । बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योण्यंतेभ्यः । पं । इङ्क्रीजीनामित्यात्वे । अध्यापयति । प्रावयति । प्रापयतीत्यर्थः । द्रावयति विलापयतीत्यर्थः । स्रावयति स्पंदयतीत्यर्थः ॥ ॥ इति पदव्यवस्था ॥

कृतायामिहटीकायांलोकेशकरशर्मणा ।
पदव्यवस्थेयमगात्समाप्तिं शुभलक्षणम् ।
इति पदव्यवस्था ।

मू०--यक्चतुर्षु ॥ धातोर्भावे कर्मणि च यक् प्रत्ययस्तिबादिषु चतुर्षु परतः ।

(सुबोधिनी-) अथ भावकर्मणोर्लडादयः ॥ यक्चतुर्षु । भुविकर्म्मणीति चाद्वीत्यतोऽनुवृत्तं अव्यवहितमपि कर्त्तरीति नानुवर्त्तते उत्तरसूत्रे कर्त्तृग्रहणात् । आख्यातप्रकरणादादितश्चतुर्विधेष्वाख्यातेषु चतुरशब्दोस्ति तेन भावार्थकेषु कर्मार्थकेषु च चतुर्षु परतो धातोर्यक् स्यात् ॥

(तत्त्व०-) यक्चतुर्षु ॥

मू०--आद्भुविकर्मणि ॥ अकर्मकाद्भावे सकर्मकाच्च कर्मण्याद्भवति । भावस्यैकत्वादेकवचनमेव । युष्मदस्मदोस्सामानाधिकरण्याभावात्प्रथमः । नामाद्यविषयत्वेऽपि प्रथमातिक्रमे करणाभावात्प्रथमः भूयते । भूयेत । भूयतां । अभूयत । बभूवे ॥

(सुबोधिनी-)आद्भुविकर्म्मणि । भवनं भूः संपदादित्वाद्भावेक्विप् । तस्यां भुविशुद्धे धात्वर्थे साध्यरूपे स्वार्थे इति फलितं । घञर्थो भावस्तु सिद्धरूपः । उक्तं च "क्रियायाः सिद्धतावस्था साध्यावस्था च कीर्त्तिता । सिद्धता द्रव्यमिच्छंति तत्रैवेच्छंति घञ्विधिं ॥ १ ॥" भावो भावना उत्पादना क्रिया सा च धातुत्वेन सकलधातुषु वाच्या वर्त्तते । उक्तं च व्यापारो भावना सैवोत्पादना सैव च क्रियेति-उत्पत्त्यनुकूलो व्यापार इत्यर्थः । तत्र सिद्धरूपो भावो घञादिवाच्यः तस्य तु सत्त्वरूपत्वमिष्टमेवेति । उक्तं च भाष्यकृता "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति । द्रव्यधर्मान् लिंगसंख्याकारकादीन् गृह्णातीत्यर्थः । लिंगसंख्याकारकान्वितं द्रव्यमित्युक्तेस्तेन पाकं पाकेनेत्यादौ द्वितीयादयः प्रवर्त्तन्ते । साध्यरूपो भावस्त्वाख्यातवाच्यस्तस्यासत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि । भाष्ये तु आस्यंते शय्यंते इत्यत्र भावेपि बहुवचनं कृतं न च कर्मण्येवाख्यातप्रत्ययोस्त्विति शंक्यं धातुद्वयस्याप्यकर्मकत्वात् । आस्यंते इत्यासिकाः । शय्यंते इति शायिका इत्यत्र धात्वर्थनिर्देशे वुण्प्रत्ययः । उष्ट्रासिका आस्यंते हतशायिकाः शय्यंत इत्यत्र उष्ट्राणां यादृशान्यासनासि हतानां यादृशानि शयनानि तादृशानि देवदत्तादि कर्तृकान्यासनादीनीत्यर्थः। फलाश्रयं कर्म फलं च धातुनैवोक्तमित्याश्रयमात्रमाख्यातार्थः । अनन्यलभ्यत्वात् । अकर्मकेभ्यो धातुभ्यो भावे आत् । सकर्मकेभ्यस्तु कर्मण्यात् स्यात् । साध्यरूपसभावस्योत्सर्गत एवं संख्यानपेक्षत्वेन स्वस्यैकत्वादेकवचनमेव भवति तत्तु प्रथमस्यैव न मध्यमोत्तमयोः । युष्मदस्मदोराख्यातवाच्यकारकवाचित्वाभावात् । नाम्नोप्याख्यातवाच्यकारकवाचित्वाभावस्तथापि प्रथमो भवति तस्यानिष्पादने वचनाभावात् तत्रैकवचनस्वीकारः। प्रथमपुरुषमंतरा कथं संभवेदित्यर्थः । भावे यथा भूयत इत्यादि ॥

(तत्त्व०—) आद्भुविकर्मणि भवनं भूः तस्यां भुवि शुद्धे धात्वर्थे साध्यरूपभावे घञर्थस्तु सिद्धरूपो भाव इति भेदः तत्र सिद्धरूपो भावो द्रव्यवत्प्रकाशते लिंगसंख्यादीन्गृह्णातीत्यर्थः । अतो द्विवचनादिसाध्यरूपस्य त्वसत्वरूपत्वान्न संख्याद्यन्वयः उक्तं च क्रियायाः सिद्धतावस्था साध्यावस्था च किर्त्तिता । सिद्धतां द्रव्यमिच्छंति तत्रैवेच्छंति घञविधिमिति । कर्म तु पारिभाषिकमेव पुनर्भावग्रहणात् । फलाश्रयः कर्म । फलस्य च धातुवाच्यत्वादाश्रयमात्रं आख्यातार्थः । अथ सकर्मकादपि भावे स्यादिति चेन्न । द्विश्चेत्यतश्चोनुवर्त्तते स चावधारणार्थः । सकर्मकात्कर्मण्येव न भावे कर्त्तरिर्य्यपि न स्यादिति चेत् शृणु मध्येपवादन्यायेन भावस्यैव बाधनात् । एकवचनमिति । एकवचनमुत्सर्गतः करिष्यत इति वचनादिति भावः । तत्किं मध्यमोत्तमयोरपि न चेत्याशंकायामाह युष्मदस्मदोरिति ।

मू०—स्वरान्तानांहनग्रहदृशाश्चभावकर्मणोस्सितासीस्यपा

मिङ्वासइण्वच्च ॥ भाविषीष्ट, भविषीष्ट । भाविता, भविता । भाविष्यते, भविष्यते । अभाविष्यत्, अभविष्यत् ।

(सुबोधिनी-) स्वरांतानांहनग्रहदृशांचभावकर्मणोःसितासीस्यपामिङ्वासइण्वच्च । स्वरांतेभ्यो हनिग्रहिदृशिभ्यश्च परेषां भावे कर्मणि चार्थे स्थितानां सितासीस्यपां प्रत्ययानामिडागमो वाभवति स इट् इणीवेतीण्वत् सप्तम्यंताद्वत् । कार्यातिदेशोयं । इणि परे यद्वृद्ध्यादिकार्यं भवति तादिण्वदिटि परेपीत्यर्थः । यथा भाविता । भाविष्यते । इत्यादौ वृद्धिः । दायिता । दायिष्यते । इत्यादौ युक् । घानिता घानिष्यते । इत्यादौ घत्वं । प्रयोजकण्यंतात् शमःकर्मण्याख्याते कृते शामिता शमिता । शामिष्यते, शमिष्यते । इत्यादौ मितां ण्यंतानामित्यनेन मितामुपधाया वा दीर्घ इत्यादि ॥

मू०-इणृतन्यकर्तरि ॥ धातोस्तनि परे भावे कर्मणि च इण्प्रत्ययस्सेरपवादः । लुक् । अभावि । अकर्मकोऽप्युपसर्गवशात्सकर्मको भवति । सुखमनुभूयते स्वामिना । लज्जा सत्ता स्थिति जागरणं वृद्धि क्षयभयजीवितमरणम् । शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः । १ । फलव्यापारयोरेकनिष्ठतायामकर्मकः धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः । २ । धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिकाक्रिया । ३ ।

(सुबोधिनी-) इणृतन्यकर्त्तरि । कर्तुरन्योऽकर्ता तस्मिन्नकर्तरि भावे कर्मणिचार्थे तन्प्रत्यये परे धातोरिण् स्यात् । अकर्तरीतिकिम् । अकृत घटं कुलालः । लुगिति तनो लुक् । अभावि । अकर्मकोपि धातुः कुत्रचिदर्थांतरे सकर्मको भवति धातूनामनेकार्थत्वेनार्थान्तरस्योपसर्गेण द्योतनाद्धेतोः । यथा । कर्मण्यात् स्वामिना सुखमनुभूयते । आत्मसात् क्रियते इत्यर्थः । लज्जासत्तास्थितिजागरणंवृद्धिक्षयभयजीवितमरणं । शयनक्रीडारुचिदीप्त्यर्थधातुगणं तमकर्मकमाहुः । ' । अकर्मकधातुलक्षणमाह । आचार्यास्तं धातुगणमकर्मकमाहुर्ब्रुवंति । तं कं लज्जासत्तास्थितिजागरणान्यर्थाःसंति यस्य स लज्जासत्तास्थितिजागरणस्तं पुनःवृद्धिक्षयभयजीवितमरणान्यर्थाः संति यस्य स वृद्धिक्षयभयजीवितमरणस्तं पुनः शयनक्रीडारुचिदीप्तयोऽर्था यस्य स शयनक्रीडारुचिदीप्त्यर्थस्तं । फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुस्तयोर्द्धर्मिभेदेसकर्मक उदाहृतः । सकर्मकाकर्मकधातुलक्षणमाह । आचार्यैरकर्मको धातुरुदाहृतः । क सत्यां उत्पत्त्यनुकूलोव्यापारो धात्वर्थः । तत्रोत्पादनव्यापारः उत्पत्तिः फलं । यथा पचेः फूत्करणैधोदकोपस्करणादिलक्षणो व्यापारः विक्लित्यादि फलं तयोः फलव्यापारयोरेकनिष्ठतायां एकस्मिन् धर्मिण्याश्रये स्थितौ सत्यामित्यर्थः । धातुः सकर्मकउदा-

ह्रतः । क्वसति तयोः फलव्यापारयोर्धर्मिभेदे आश्रयभेदेसति एकस्मिन् धर्मिणि फलमन्यस्मिन्धर्मिणि व्यापार इत्यर्थः । धातोरर्थांतरेवृत्तेर्द्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोकर्मिका क्रिया । कुत्रचित्सकर्मकस्यापि धातोः क्रिया धात्वर्थोऽकर्मिका कर्मरहिता भवतीत्यर्थः । कुतः अन्योर्थ इत्यर्थांतरं तस्मिन्नर्थांतरे वृत्ते वर्त्तनाद्धेतोः । यथा नदी वहति स्यंदते इत्यर्थः । पुनर्द्धात्वर्थेन कर्मण उपसंगृहाद्धेतोः । जीवति । प्राणान् बिभर्तीत्यर्थः पुनः कर्मणः प्रसिद्धेर्हेतोः । मेघो वर्षति । जलमिति कर्म प्रसिद्धमेव । पुनः कर्मणोऽविवक्षातो वक्तुरिच्छाया अभावाद्धेतोः । यथा । हितान्नयः संशृणुते स किंप्रभुः । कुत्सितप्रभुरित्यर्थः । वचनमिति कर्मविवक्षितमत्र ॥

(तत्त्वदीपिका–) अकर्मकोपि इति । यो यदाऽकर्मीक्रियावाच्यप्यनेकार्थत्वात्सकर्मकक्रियामुत्थापयति तदा तदर्थपरत्वे सकर्मको भवति तत्परत्वं च तस्योपसर्गेण द्योत्यते इत्यनुपसर्गवशादित्युक्तं नतु सोपसर्ग एव सकर्मकः उपसर्गस्तु द्योतक एव । अनुभूय इति । उपालंभेऽयं सकर्मकः सुखे कर्मण्यात् । फलव्यापारयोरित्यादि । फलं विक्लित्यादि । व्यापारः फूत्कारादिलक्षणः । एकनिष्ठतायां । एकस्मिन् धर्मिणि स्थितौ तयोः फलव्यापारयोः धर्म्मिभेदे एकस्मिन् धर्मिणि फलमन्यस्मिन् व्यापार इति भेदे धातुः सकर्मको बोध्यः । धातोरर्थांतरे वृत्तेरित्यादि । अन्योऽर्थोऽर्थान्तरं तस्मिन् वृत्तेर्वर्त्तमानात् । उदाहरणानि यथा । नदी वहति । स्यन्दन्तं इत्यर्थः नृत्यति चैत्रः गात्रविक्षेपं करोतीत्यर्थः मेघो वर्षति । जलमित्यर्थः । गच्छती ग्राममिति शेषः ।

मू०–शीङोऽयङ्येङ्क्ति ॥ शय्यते । शिश्ये । शायिषीष्ट । शयिषीष्ट । अशायि । अयकि ऋतोरिङभवत्यकारप्रत्यये यकि च । घटः क्रियते । त्वंदुःखीक्रियसे । रागैर्विरागैस्सुख्यहंक्रिये । चक्रे । भाव्यते । भावयाञ्चक्रे । भावयामासे । भावयांबभूवे ।

(सुबोधिनी–) शीङोयङ्येङ्क्ति । शेतेरयङादेशः स्यात् किति ङिति च यप्रत्यये परे । ङित्त्वादंतादेशः । यत इत्यलोपः । शय्यते । नुधातोरिति यः । शिश्ये । इण्वद्भावाद्वृद्धिः । शायिषीष्ट, । शयिषीष्ट । करोतेः कर्म्मण्यात् । उरिति न गुणः कृषीष्ट । चौरादिकात् ण्यंताद्भावयतेः कर्मण्यात् ञेरिति ञिलोपः । भाव्यते ।

मू०–इण्वदिटिञेर्लोपः॥ भाविता, भावयिता । भाविष्यते, भावयिष्यते । अभावि । अभाविषाताम्, अभावयिषाम् । सान्तात्तु, बुभूष्यते । बुभूषाञ्चक्रे । अबुभूषि । यङन्तात्तु । बोभूय्यते । बोभूयाञ्चक्रे । यङ्लुगन्तात्तु बोभूयते । बोभवाञ्चक्रे । बोभाविषीष्ट, बोभविषीष्ट । स्तूयते विष्णुः अस्तावि । अस्ताविषाताम् । अ-

स्तोषाताम् । अर्यते । आरे । आरिषीष्ट, ऋषीष्ट, । आरिषाताम्, आर्षाताम् । स्मर्यते । स्मरिता । स्मर्ता । इज्यते । ईजे । यक्षीष्ट । यष्टा ।

(सुबोधिनी—) इणवदिटिञ्जेर्लोपः । ञिलोपो वा स्यात् इणवदिटि परे । ञिलोपे भाविता । पक्षे सिसतेतीटि भावयिता । सप्रत्ययांताद्बुभूषतेर्भावे आत् । यत इत्यलोपः । बुभूष्यते । यङ्प्रत्ययांतात्तुयत इत्यलोपे बोभूयते । यङ्लुगंताद्भावे आत् । बोभूयते । स्तौतेः कर्मण्यात् । ये इति दीर्घः । स्तूयते । ऋ गतौ । कर्मण्यात् गुणोर्तीती गुणः । अर्य्यते । इणवदिटि तु धातोर्नामिन इति वृद्धिः । आरिता । स्मृ चितायाम् । गुणोर्तीति गुणः । स्मर्य्यते यजतेः कर्मण्यात् । यजामिति संप्रसारणम् इज्यते । लिटि ईजे । आशिषि लिङि । यक्षीष्ट ॥

मू०—तनोतेर्वा आत्वं यकि ॥तायते, तन्यते । तनिषीष्ट । अतानि । जायते, जन्यते ।

(सुबोधिनी—) तनोतेर्वा यकि । तनेराकारांताऽऽदेशो वा स्यात् यक् प्रत्यये परे । जनेर्वायकि जनेराकारांतादेशो वा स्यात् यकि परे ॥

मू०—तपोनेणकर्मकर्तर्यनुतापेच ॥ अन्वतप्त देवदत्तः पापेन । दादेरिः । दीयते । ददे ।

(सुबोधिनी—) तपोनेणकर्मकर्त्तर्यनुतापेच । तपेरिण् प्रत्ययो न स्यात् अनुतापेऽर्थे कर्मकर्त्तर्यर्थे च अन्वतप्त देवदत्तः । पापेन कर्त्राऽभ्याहत इत्यर्थः । भावेपीदं बोध्यम् । पापेन पापवता पुंसाऽविचार्य्य कृत्वा पश्चादशोचीत्यर्थः । कर्मकर्तरि तु अतप्त तपस्तापस इत्यत्र तपस्तपःकर्मकस्येत्यनेन कर्तुः कर्मवद्भावः । डुदाञ् दाने । दादेरित्वं ये इति दीर्घः । दीयते । आतोनपीत्यालोपो ददे ॥

(तत्त्वदीपिका—) तपोनेणकर्मकर्त्तरि अनुतापेच । तपसंतापे इत्यस्मादिण् न । तपोनेति । पूर्वं कृतं यत्पापं कर्म तेनाभ्याहतो देवदत्त इत्यर्थः । पापेनेति । कर्त्तरितृतीया यदा तु कर्म न विवक्ष्यते शोकार्थोवापिस्तदाभावे लः । पापेनेति । कर्त्तरि तृतीयाकरणे पुरुषधर्मयोरनभिधानात् । अभ्याहननार्थस्य तु कर्मकर्तृविवक्षायां हेतौ तृतीयेतिबोध्यं ।

मू०—आतोयुक् ॥ इणि ञ्णिति कृति च । दायिषीष्ट, दासीष्ट । अदायि अदायिषाताम्, अदिषाताम् । धीयते । स्थयिते । अग्लायि । हन्यते । हनोघ्नि । घानिषीष्ट, वधिषीष्ट । घानिता, हन्ता । अघानि । अघानिषाताम्, आहसाताम् । अवधि । अवधिषाताम् ।

(सुबोधिनी-) आतोयुक् । आदंतस्य धातोर्युक् स्यात् इणि प्रत्यये परे ञिति णिति कृत्प्रययेे च परे । घञि दायः । वुणि । दायकः । इण्वदिटि दायिषीष्ट । इण्वदिटोऽभावे दासीष्ट । लुङि । अदायि । इण्वदिटि अदायिषातां । तदभावे अपिद्दाधास्थामितीत्वम् । अदिषातां । एवं धास्थाधातू । ग्लै हर्षक्षये । इण्वदिटि युक् अग्लायिषातां । हंतेः कर्मण्यात् । हन्यते । पूर्वार्द्धेतेरिति घः । जघ्ने । हनो लुङ्लिङोरिति वधः । यत इत्यल्लोपः । वधिषीष्ट, पक्षे हनोघ्नत इति घः । अतउपधाया इति वृद्धिः । घानिषीष्ट । इण्वद्भावो वधादेशस्य बाधको ज्ञेयः । अत्र हनोघदित्यनेन धदादेशो न । इण्वर्जिते इत्युक्तत्वात् लृटि इण्वदिटि घानिष्यते । पक्षे हनृत इतीट् हनिष्यते । लुङि इण्वदिडभावे हनःसिः किदिति कित्वात् लोपस्त्वनुदात्ततनामिति नलोपः । अहसातां । गृह्णातेः कर्मण्यात् । ग्रहामिति संप्रसारणं गृह्यते ।

(तत्त्वदीपिका-) वधिषीष्टेति । इण्वदभावे वधादेशो बोध्यः । वध हिंसायामिति । प्रकृत्यन्तरं । अवधीदिति । जानिवध्योरिति वृद्धिनिषेधः । हनादेशस्य त्वदन्तत्वान्न वृद्धिः । तथा च प्रयोगः'भक्षकश्चेन्न विद्येत वधकोपि न विद्यत' इति ।

सू०- इण्वदिटोनदीर्घः ॥ ग्राहिता, ग्रहिता । दर्शिषीष्ट, दृक्षीष्ट । दर्शिता, द्रष्टा । अदर्शि । अदर्शिषाताम्, अदृक्षाताम् । शम्यते मुनिना ।

(सुबोधिनी-) इण्वदिटो न दीर्घः । इटो ग्रहामिति सूत्रेण सिसतेत्यादिलक्षणेन विधीयमानस्यैवेटो दीर्घो भवति नेण्वदिट इत्यर्थः । दृशेः कर्मण्यात् । लुङि इण्वदिटि परे उपधायालघोरिति गुणः । अदर्शिषातां । पक्षे छशषेति षत्वं षढोःरिति कः । हशषांतादिति सक् तु न । नतुदृशेरित्युक्तत्वात् । सिस्योरिति न गुणः । अदृक्षातां । शमेर्भावे आदकर्मकत्वात् ॥

सू०- मान्तस्यसेटोनवृद्धिरिणिञ्णितिकृतिचनत्वाचमिकमिवमीनाम् ॥ अशमि । अदमि । आचामि । अकामि । अवामि । ञ्यन्तात्तु शम्यते मोहो मुनिना । शमयाञ्चक्रे ।

(सुबोधिनी-) मांतस्यसेटोनवृद्धिरिणिञ्णितिकृतिचनत्वाचामिकमिवमीनां । सेटो मांतस्य धातोर्वृद्धिर्न स्यात् इणि ञिति णिति कृत्प्रत्यये च परे । आचमिकमिवमीनां तु वृद्धिर्भवतीत्यर्थः । घञि शमः । दमः । वुणि शमकः दमकः । कथं तर्हि हरेर्यदक्रामि पदैकेन खमिति श्रीहर्षप्रयोग इति चेदुच्यते । निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजिष्यते इति प्राकृते ञिस्तत इण् बोध्यः । सेटः किम् । अगामि । कमुकांतौ । कमेः स्वार्थे ञिङिति ञिङ् वा ञेरिति ञिलोपः । काम्यते । लुङि ञिङभावे । अकामि । ञिञिङोरप्येवं । ञ्यंतात् शमेः कर्मण्यात् । ञेरिति ञिलोपः शम्यते । कासादिप्रत्ययादित्याम् । शमयांचक्रे ॥

मू०— मितांण्यन्तानामिणिणमिचवादीर्घः ॥ शामिता । शमिता । शमायिता अशामि । अशामिषाताम् । अशमायिषाताम् । वधहिंसायाम् । वध्यते । जनिवध्योर्न वृद्धिः । अवधि ।

(सुबोधिनी--) मितांण्यंतानामिणिणमिचवादीर्घः । मित्संज्ञकानां ण्यंतानां धातूनां वा वृद्धिर्भवति इण्प्रत्यये णम्प्रत्यये च परे । इण्वदिटि णेरिति णिलोप वृद्धिश्च वा । शामिता । पक्षे शमिता । पक्षे सिसेतताटि गुणः । शमायिता । यङंतप्रकृतिकणिप्रत्ययान्तात् शंशमेः कर्मण्यात् णौ परतोऽनपिचहसादिति यलोपः यत इत्यल्लोपः ततो यकि णेरिति णिलोपः शंशम्यते । लुटि शंशामिता, शंशमिता शंशमयिता । लुङि अशंशामि, अशंशमि । णम् प्रत्यये तु शंशामं, शंशमम् । वध हिंसायां । हसांतः ॥

मू०— भञ्जेरिणिनलोपोवा ॥ अभाजि, अभञ्जि ।

(सुबोधिनी—) भञ्जेरिणि नलोपो वा । भञ्जो आमर्द्दने इत्यस्य नस्य लोपो वा स्यादिणि प्रत्यये परे ॥

लभेरिण्णमोर्नुम्वा ॥ अलम्भि, अलाभि । गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ॥ बुद्धिभक्षार्थयोश्शब्दकर्मकाणां निजेच्छया ॥ १ ॥ प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥ गौर्दुह्यते पयः । धुक्षीष्ट । अजा ग्रामं नीयते । ह्रियते । कृष्यते । उह्यते । बोध्यते माणवकं धर्म्मः माणवको धर्ममिति वा । भोज्यते माणकमोदनः ओदनंमाणवको वा । पाठ्यते । माणवकं वेदः माणवको वेदमिति वा । देवदत्तो ग्रामङ्गम्यते ।

(सुबोधिनी—) लभेरिण्णमोर्नुम्वा । डुलभष् प्राप्तावित्यस्य नुमागमो वा स्यात् इणि प्रत्यये णमि प्रत्यये च परे। प्रादेर्नित्यं नुम् । प्रपूर्वस्य लभेर्नित्यं नुम् स्यात् णमि प्रत्यये । प्रलंभं ॥ अथ ये द्विकर्मकधातवस्तेभ्य आत् कृत्यक्तखलर्थप्रत्ययाः किं मुख्ये कर्मणि उत गौणे। किंचोभयोरिति संदेहे व्यवस्थामाह । " गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहां ॥ बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया ॥ १ ॥ प्रयोज्यकर्मण्यन्येषां ण्यंतानां लादयो मताः " दुह्याचिति कारके उक्तं दुह्यादेर्द्वादशसंख्यस्य धातोर्गौणे कर्मणि लादयः प्रत्यया मताः । नीप्रभृतीनां चतुर्णां प्रधाने कर्म्मणि लादयो मताः । बुद्धिभक्षार्थयोर्ण्यंतयोः शब्दकर्मकण्यंतानां च प्रयोज्यप्रधानयोरन्यतरकर्मणि निजेच्छया लादयो मताः । अन्येषां ण्यन्तानां तु प्रयोज्यकर्मणि लादयो मताः । कारके गतिबुद्धीत्यनेन कर्त्तुर्यत्कर्मकारकं कृतं तत्

"अकथितञ्च" अणयनादि बिशेषैरन,क्तद्वारकद्वर्मी सञ्ज्ञं स्यात

योज्यं कर्म ज्ञातव्यं । लादय इत्यत्रादिशब्देन कृत्यक्तखलार्थाः प्रत्यया ग्राह्याः । दुह्यादेर्गौणे कर्मण्यात् । उदाहरणमाह । गौर्दुह्यते पय इत्यत्र गौरिति गौणं कर्म तत्राख्यातेनोक्तत्वादन्योक्ते इत्यनेन प्रथमा । पय इति तु मुख्यं कर्म तत्र कर्मणि द्वितीया । कर्त्तरि इत्यनुक्तत्वात्तृतीया देवदत्तेनेति । न्यादीनां प्रधानकर्मण्यात् । उदाहरणमाह । अजा ग्रामं नीयते इत्यत्राजेति मुख्यं कर्म । तत्रोक्तत्वात्प्रथमा ग्राममिति गौणं कर्म । कर्त्ता तु तृतीयांतोऽध्याहार्य्यः । बुद्धिभक्षार्थयोः शब्दकर्मकाणां च ण्यंतानां प्रयोज्ये मुख्ये च कर्मण्यात् । उदाहरणमाह । बोध्यते माणवकं धर्म इत्यत्र धर्म इति मुख्यं कर्म माणवकमिति प्रयोज्यं कर्म । तत्र निजेच्छयाऽऽख्यातादिः कर्तव्यः । भोज्यते माणवकमोदन इत्यत्रौदन इति मुख्यं कर्म माणवकमिति प्रयोज्यं कर्म तत्र निजेच्छयाऽऽख्यातादिः । पाठ्यते माणवकं वेद इत्यत्र वेद इति मुख्यं कर्म माणवकमिति प्रयोज्यं कर्म तत्र निजेच्छयाऽऽख्यातादिः । तृतीयांतः कर्ताध्याहार्य्यः । ण्यंतस्य प्रयोज्यकर्मण्यात् । उदाहरणमाह । देवदत्तो ग्रामं गम्यते इत्यत्र ग्राममिति मुख्यं कर्म देवदत्त इति प्रयोज्यं कर्म तत्राख्यातादिः । कर्मण उक्तत्वात् प्रथमा । कर्त्ता तु तृतीयांतोऽध्याहार्यः ॥

(तत्त्व–)द्विकर्मकाणांतु । गौणे कर्मणीत्यादि । गौर्दुह्यतइति । गौरिति गौणं कर्म अजेत्यादि । अजात्र प्रधानं । निजेच्छयेति । गौणप्रधानयोरात्मेच्छयेत्यर्थः । अन्येषामिति । पूर्वोक्तव्यतिरिक्तानामित्यर्थः ।

मू०– अकर्मकाणाङ्कालादिकर्मकाणाम्भावेकर्मणिचलकारः ॥

मासं, मासो वास्यते देवदत्तेन । क्रोशः क्रोशं वास्यते । कुरवः, कुरून् वास्यते । गोदोहङ्गोदोहो वास्यते । ण्यन्तात्तु प्रयोज्ये प्रत्ययः मासमास्यते माणवकः । ॥ इति भावकर्मप्रक्रिया ॥

(सुबोधिनी–) अकर्मकाणां कालादिककर्मकाणांभावेकर्माणिचलकारः । कालादिकर्मकाद्धातोर्भावकर्मणोरर्थयोराख्यातो भवति । कारके । अकर्मकधातुभिर्योगे इति सूत्रेण कर्मसंज्ञा येषां धातूनां कृता ते कालादिकर्मकाः । कालादिकर्मकस्य कर्मण्यात् । उदाहरणमाह । मास आस्यते इत्यत्रकालवाचिकर्मण आख्यातेनोक्तत्वात् प्रथमा । कर्त्ता तु तृतीयांतोऽध्याहार्यः । भावे तु मासमास्यते देवदत्तेनेत्यत्र कर्मणोऽनुक्तत्वान्मासमिति द्वितीया । कर्तुरनुक्तत्वाद्देवदत्तेनेति कर्त्तरि तृतीया । ण्यंतात् कालादिकर्मकाद्धातोस्तु प्रयोज्यकर्मण्येवाख्यातादिः । मासमास्यते माणवक इत्यत्र कालवाचि कर्मणोऽनुक्तत्वान्मासमिति द्वितीया । माणवक इति प्रयोज्यं कर्म । तत्राख्यातेनोक्तत्वात् । प्रथमा । कर्तरि त्वनुक्तत्वात् तृतीया देवदत्तेनेति ।

॥ इति भावकर्मप्रक्रिया ॥

मू०–यदासौकर्य्यातिशयन्द्योतयितुंकर्तृव्यापारो न विवक्ष्यते । तदा-

कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते । साध्वसिश्छिनत्ति । काष्ठानि पचन्ति । स्थाली पचति । पच्यते ओदनेन । अपाचि । भिद्यते काष्ठेन । अभेदि । लेनोक्ते कर्मकर्तरि यगादिणिण्वदिटःपच्यते ओदनः । अपाचि । भिद्यते काष्ठम् । अभेदि ।

(सुबोधिनी-) सकलकारकाणामवांतरव्यापारो वर्त्तते सकलकारकाणामवांतरव्यापारहीनस्याकारकत्वात् तत्र स्वव्यापारे स्वातंत्र्यं च व्यापारभेदाऽऽकांक्षायां करणादिसंभवः । तत्र यदा कारकांतराणां सौकर्य्यातिशयं द्योतयितुं प्रतिपादयितुं कर्तृव्यापारो वक्तुं नेष्यते तदा कारकांतराण्यपि कर्तृसंज्ञां प्राप्नुवन्ति । स्वव्यापारे स्वतंत्रत्वात् सुष्ठुकरोतीति सुकरस्तस्य भावःसौकर्यं। कारकांतराणां पूर्वं करणत्वादिसत्त्वेपि कर्तृसंज्ञाकरणात् कर्त्तर्याख्यातो भवति । साध्वसिश्छिनत्तीत्यत्र करणस्य कर्तृसंज्ञा। आख्यातेन कर्तुरुक्तत्वादसिरित्यत्र प्रथमा । काष्ठानि पचंतीत्यत्रापि करणस्य कर्तृसंज्ञा कर्तुराख्यातेनोक्तत्वात् काष्ठानीति प्रथमा । स्थाली पचति इत्यत्राधारस्य कर्तृसंज्ञा कर्तुराख्यातेनोक्तत्वात् स्थालीति प्रथमा । " कर्मणस्तु कर्तृत्वविवक्षायां प्राक् सकर्मका अपि प्रायेणाऽकर्मकाः "। कर्मणः सौकर्यातिशयं द्योतयितुं यदा कर्तृविवक्षा ततः प्राक् सकर्मका आपि धातवोऽकर्मकाः प्रायेण भवंति प्रायेणेत्युक्तत्वादेककर्मकाः छिदि भिदि प्रभृतय एवाकर्मका भवंति नतु द्विकर्मकाः। अकर्मकस्य फलमाह। "तेभ्यो भावे कर्त्तरि च लकारः"। कर्मकर्तुरकर्मकाद्धातोर्भावे कर्त्तरि चार्थे आख्यातप्रत्ययो भवति भावे । आख्यातस्योदाहरणमाह । पच्यते ओदनं भिद्यते काष्ठेनेत्यत्र कर्मणः कर्तृसंज्ञा । आख्यातस्तु भावे कर्तुरनुक्तत्वात् ओदनेनेत्यादौ तृतीया । कर्मकर्त्तर्याख्यातस्योदाहरणमाह । तेनोक्ते इत्यादि कर्मवत् कर्मणा तुल्यक्रियः। कर्मस्थया क्रियया तुल्याक्रियः कर्त्ता कर्मवद्भवति कार्यातिदेशोयं । कर्मणो यत्कार्यं भवाति तत्कर्मकर्तुरपीत्यर्थस्तेन यक्चतुर्ष्वाति यक् आद्धवीत्यात् इणूतनीतीण् स्वरांतानामितीण्वदिट इत्यादि कार्याणि कर्मकर्तरि भवंति । काष्ठं भिनत्तीत्यत्र काष्ठस्था या विदारणाश्रयत्वरूपा क्रिया सैव काष्ठं भिद्यते स्वयमेवेत्यत्र तस्मिन्कर्तृभूतेपि भवति । अयं कार्यातिदेशः कर्मस्थभावकानां कर्मस्थक्रियाणां च धातूनां भवति नतु कर्तृस्थभावकानां कर्तृस्थक्रियाणां च धातूनां भवति यत्र कर्म्मणि दृष्टे क्रियानुमातुं शक्यते ते कर्मस्थक्रियास्ततोऽन्ये कर्तृस्थक्रियाः । पक्वेषु तण्डुलेषु भिन्नेषु च काष्ठेषु दृष्टेष्वदृष्टः कर्तृव्यापारोऽनुमीयते । तदुक्तं च ।" कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया॥ आशासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया॥ १॥ यद्व्याधारभावयोरित्यत्र भावशब्देन क्रियापि गृह्यते तथाप्यत्र। भेदो विवक्षितः पृथगुपादानात् परिस्यंदरूपो धात्वर्थःछिदादिः क्रिया अपरिस्यंदरूपो विक्लित्यादिर्भावः। पचत्योदनं भिनत्ति काष्ठं च देवदत्तः । पच्यते ओदनः भिद्यते काष्ठं स्वयमेवेत्यत्राख्यातेन कर्तुरुक्तत्वात् प्रथमा । कर्तृस्थक्रियाया उदाहरणमाह । आशास्ते घटं

देवदत्तः। आशास्ते घटः स्वयमेव। गच्छति ग्रामं देवदत्तः। गच्छति ग्रामः स्वयमेवेत्यत्र घटग्रामयोर्दृष्टयोर्नहि देवदत्तस्य व्यापारोऽनुमातुं शक्यते इति कर्तृस्थत्वं क्रियायाः ॥

(तत्वदीपिका-) यदा सौकर्यातिशयमित्यादि। अयमर्थः। सकलकारकाणामवान्तरव्यापारोस्ति व्यापारहीनस्य कारकत्वाभावात् स्वव्यापारे स्वतंत्रत्वं सर्वत्रैव कारकेऽस्ति व्यापारभेदाकांक्षायां कारकत्वादिसंभवः तत्र यदा कर्मणः सौकर्यातिशयप्रतिपादनाय कर्तृव्यापारो न विवक्षितस्तदा भिदादिकर्मव्यापारिकारकमात्रे प्रवर्तते। व्यापारमात्रं प्रति च कर्त्तृत्वमेव काष्ठादीनां तदाकरणत्वादिलेशोपि न। तदा सकर्मकाणामप्यकर्मत्वमेव। तत्र भावे कर्त्तरि च लकाराः कर्त्तरि तु लिनोक्त इत्यादि कर्मग्रहणात्साध्वसिरित्यादौ न यद्यपि काष्ठादेरचेतनतया कुठारोद्यमननिपातनादिकरणसंभवेन भेदनादिकर्त्तृत्वमनुपपन्नं तथापि स्वधर्मः प्रधिथिलावयवसंयोगविस्मरणादिभिः कर्मकर्त्तृत्वमिति ध्येयम्।

मू०-द्विकर्मकाणान्न॥ अजा ग्रामं नयति।

(सु०-) द्विकर्मकाणांन।द्विकर्मकधातूनां कर्म कर्त्ता कर्मवन्न भवति। अजा ग्रामं नयतीत्यत्र प्रधानकर्मणः कर्तृसंज्ञा। प्रधाने नीहृकृष्वहामित्युक्तत्वात्। आख्यातेनोक्तत्वात्तत्र प्रथमा। इह प्रतिषेधाभावे यक् स्यात्। क्रिया लस्याकर्तृगामित्वेप्यात्मनेपदं स्यादित्यर्थः ॥

मू०-दुहिपच्योस्सकर्मयोर्वा ॥

(सुबोधिनी-) दुहिपच्योः सकर्मकयोर्वा। अनयोः कर्मकर्त्ता कर्मवद्वा भवति॥

मू०-दुहस्नुनमांकर्मकर्तरियगिणौन॥ गौः पयो दुग्धे। दोग्धि वा।

(सुबोधिनी-) दुहस्नुनमांकर्मकर्त्तरियगिणौन। एभ्यो यगिणौ प्रत्ययौ न भवतः कर्मकर्त्तर्यर्थे। दुहेरनेन यक् निषिध्यते। इण् तु विकल्पेन वक्ष्यते। गौः पयो दुग्धे इत्यत्र गौण कर्मणः कर्तृत्वविवक्षा। गौणे कर्मणि दुह्यादेरित्युक्तत्वात ॥

मू०- स्वरांतानांकर्मकर्तरीण्वातनि॥ अकारि, अकारिष्ट, अकृत कटस्स्वयमेव।

(सुबोधिनी-) स्वरांतानांकर्मकर्त्तरीण्वातनि। स्वरांतेभ्यो धातुभ्य इण् प्रत्ययो वा भवति कर्मकर्तर्यर्थे तनिपरे। स्वरान्तानां किं। अभेदि काष्ठं। कर्मकर्त्तरि किं अकारि घटः कुलालेन। कर्मकर्त्तरि लुङ् यथा। अकारि घटः स्वयमेव। पक्षे लोपोऽन्हस्वादिति सिलोपः। अकृत ॥

मू०- दुहश्च ॥ अदोहि, अधुक्षत, अदुग्ध। उदुम्बरः फलम्पच्यते। पचति वा। प्रस्नुते गौः। स्नुक्रमोरातिनेट्। प्रास्नाविष्ट, प्रास्नोष्ट। नमते दण्डः। अनंस्त।

(सुबोधिनी–) दुहश्च। दुहेरिणू प्रत्ययो वा भवति कर्मकर्त्तर्यर्थे तानि परे। कर्मकर्त्तरि किम्। अदोहि गौर्देवदत्तेन। कर्मकर्त्तरि लुङः यथा इणप्रत्यये अदोहि। पक्षे हशषांतादिति सक्,दुहदिहलिहगुहूभ्य इति सको वा लुक्। अधुक्षत। पक्षे अदुग्ध। फलं पच्यते उदुंबर इत्यत्र गौणकर्मण उदुंबरस्य कर्तृसंज्ञा। गौणे कर्मणि दुह्यादेरित्युक्तत्वात्। तत्र कर्मवद्भावस्तेन यगादिणिणूवदिटो भवति। ष्णु प्रस्रवणे। प्रश्रवणमुत्कंठा। वत्सो गां प्रस्नौति। उत्कंठयतीत्यर्थः। गोः कर्मणः कर्तृत्वविवक्षायां प्रस्नुते गौः लुङि स्वरांतानांहनग्रहेतीणूवादिट्। प्रास्नाविष्ट। पक्षे स्नुक्रमोरिति नेट्। प्रास्नोष्ट। नमते दण्ड इत्यत्र कर्मणः कर्तृसंज्ञा। आख्यातेनोक्तत्वात्तत्र प्रथमा। लुङि अनंस्त। अत्र कर्मकर्तर्यात्मनेपदमेव जातं। अत्र च अन्तर्भाविण्यर्थो बोध्यः॥

सू०–सृजेश्श्रद्धोपपन्नेकर्तरिवा॥ सृज्यते, स्रजं भक्तः असर्जि।

(सुबोधिनी–) सृजेःश्रद्धोपपन्नेकर्तरिवा। सकर्मकस्य सृजेः कर्त्ता कर्मवद्वा भवति श्रद्धायुक्ते कर्त्तर्यर्थे सृज्यते स्रजं भक्त इत्यत्र कर्तरि आख्यातादिः। कर्तुः कर्मवद्भावात् आद्यागिणो भवंति। श्रद्धयानिष्पादयतीत्यर्थः॥

सू०–युजेर्वा॥ युज्यते ब्रह्मचारी योगं। युनक्ति वा।

(सुबोधिनी–) युजेर्वा। सकर्मकस्य युजेः कर्त्ता कर्मवद्वा भवति। युज्यते योगं ब्रह्मचारीत्यत्र कर्त्तरि आख्यातः। कर्त्तुः कर्मवद्भावादाद्यागिणौ। तपस्तपःकर्मकस्य। तपःकर्मकस्य तपेः कर्ता कर्मवद्भवति। तप्यते तपस्तापस इत्यत्र कर्तर्याख्यातः। कर्तुः कर्मवद्भावादात्मनेपदादिः। अर्जयतीत्यर्थः। लुङि तपोनेणित्यनेनेण् न अतप्त॥

सू०–भूषावाचिनाङ्किरादीनांसान्तानाञ्चयगिणिणूवदिटोन॥ अलंकुरुते कन्या। अलमकृत। अवकिरते हस्ती। अवाकरीष्ट, अवाकरिष्ट, अवाकीर्ष्ट। अवगिरते पुष्पम्। अवागीर्ष्ट। आद्रियते दानम्। आदृत। ध्रियते। अधृत। पृच्छते। अप्रष्ट। चिकीर्षतेकटः। चिकीर्षांचक्रे। चिकीर्षांबभूवे। अचिकीर्षिष्ट।

(सुबो०–)भूषावाचिनांकिरादीनांसांतानांचयगिणिणवदिटोन। भूषार्थेभ्यःकिरादिभ्यः सप्रत्ययांतेभ्यश्च धातुभ्यः कर्मकर्तरियगिणिणवदिटो न भवंति। आत्मनेपदमेव भवतीत्यर्थः। तुदाद्यंतर्गणः किरादिः। कॄ विक्षेपे। गॄ निगरणे। दृङ् आदरे, धृङ् अवस्थाने। प्रच्छ ज्ञीप्सायामिति पंचकः। अलंकुरुते कन्येत्यत्र कर्मणः कर्तृसंज्ञा। आख्यातेनोक्तत्वादत्र प्रथमा। एवमग्रेपि ज्ञेयं। तुदादेरित्यः। ऋत इतीर्। अवकिरते। लुङि वृङ्वृञ्ऋदंतात् सिस्योरिति वेट्। अवाकरिष्ट दृङ्वृञ्ऋदंतानामिति वा दीर्घः। अवाकरीष्ट। इडभावे उरिति गुणो न ऋत इतीर्। पुनः सिस्योरिति गुणो न। अवाकीर्ष्ट। एवं गॄ। तुदादेरित्यप्रत्यये अयकीति रिङ् ततो तु-

धातोरितीय्। आद्रियते। लुङि उरिति गुणो न। लोपोऽह्रस्वादिति सिलोपः। आदृत। एवं धृङ्। तुदादेरित्यभत्यये ग्रहामिति संप्रसारणं पृच्छते लुङि छशषेति षत्वं झसादिति सिलोपः। अप्रष्ट। चिकीर्षते कट इत्यत्र कर्मणः कर्तृसंज्ञा। आख्यातेनोक्तत्वात्तत्र प्रथमा। लुङि सिसतेतीट्। यत इत्यल्लोपः। अचिकीर्षिष्ट॥

मू०—ञिश्रिब्रूञ्ग्रन्थिग्रंथ्यादकर्मकाणांयगिणौन॥ कारयते कटः स्वयमेव। कारिषीष्ट। अचीकरत। उच्छ्रयते दण्डः। उदशिश्रियत। ब्रूते कथा। अवोचत। ग्रन्थते ग्रन्थः। अग्रन्थिष्ट। विकुर्वते सैन्धवाः। व्यकारिष्ट। व्यकृत।

(सुबोधिनी—) ञिश्रिब्रूञ्ग्रंथिग्रंथ्यादकर्मकाणांयगिणौन। ञिप्रत्ययांतेभ्यः श्रिब्रूञ्ग्रंथिग्रंथिभ्य आत्मनेपदविधावकर्मकेभ्यश्च धातुभ्यो यगिणौ न भवतः कर्मकर्त्तर्यर्थे। आदिण्वदिटौ भवत इत्यर्थः। कारयते घट इत्यत्र ण्यंतात् कर्मकर्त्तर्याख्यातः। तत्रोक्तत्वात्प्रथमा। लुङि ञेरङ्ङित्यङ्। द्वित्वे अङि लघावित्युपधाह्रस्वः पूर्वस्येकारश्च लघोरिति पूर्वदीर्घः ञेरिति ञिलोपः। अचीकरत। उच्छ्रयते दण्ड इत्यत्र कर्मकर्त्तर्याख्यातः। अप्कर्त्तरीत्यप्। लुङि श्रिस्रुद्रुभ्य इति ङद्वित्वे नुधातोरितीय् उदशिश्रियत। ब्रूते कथेत्यत्र कर्मणः कर्तृसंज्ञा। आख्यातेनोक्तत्वात्तत्र प्रथमा। लुङि ब्रुवोऽनपीति वच्। अस्यतिवक्तीतिङः। ङेवचेरित्युमागमः। अवोचत। श्रंथिग्रंथ्योश्चौरादिकयोर्ञेरभावपक्षे श्रंथते। ग्रंथते। ग्रंथ इत्यत्र कर्मणः कर्तृत्वविवक्षा। तत्राख्यातेनोक्तत्वात्प्रथमा। लुङि अश्रंथिष्ट। अग्रंथिष्ट। क्रैयादिकयोस्तु श्रथ्नीते। ग्रथ्नीते च मेखला स्वयमेव। आत्मनेपदविधौ योऽकर्मकस्तमुदाहरति। विकुर्वते सैंधवा इत्यत्राकर्मकाच्चेत्यनेनाऽऽद्विधानं। आख्यातेनोक्तत्वात् कर्मकर्तरि प्रथमा भवतीत्यर्थः लुङि इण्वदिटि व्यकारिष्ट। व्यकारिषातां। व्यकारिषत। इण्वदिडभावे लोपो ह्रस्वादिति सिलोपः। व्यकृत। व्यकृषातां। व्यकृषत।

(तत्त्व०—)ञित्यादिः श्रंथिग्रंथ्योर्ञेरभावे ग्रहणं आदिति आत्मनेपदिनो ग्रहणं न त्वदंतस्य। आत्मनेपदविधौ योऽकर्मकस्तमुदाहरति विकुर्वते सैंधवा इति।

मू०—कुषिरञ्जोःकर्मकर्तरिवादबादौ॥कुष्यति, कुष्यते वा पादः। अकोषि। रज्यति, रज्यते वा वस्त्रम्। अरञ्जि।

॥ इतिकर्मकर्तृप्रक्रिया ॥

(सुबोधिनी—) कुषिरंजोः कर्मकर्त्तरि वादबादौ। कुषिरंजिभ्यामुभयपदं भवति कर्मकर्त्तर्यर्थे तिबादिचतुष्टये परतः अनपित्वादात्मनेपदमेव भवति। कुष निष्कर्षे। क्रैयादिकः। रंज रागे। दैवादिकः। कुष्यति कुष्यते वा पाद इत्यत्र कर्मणः कर्तृत्व

विवक्षायामाख्यातः कर्तुः कर्मवद्भावादात्मनेपदादिः । लुङि इण्तनीतीण् अकोषि । रज्यति, रज्यते वा वस्त्रमित्यत्रापि कर्मकर्त्तर्याख्यातः । तत्राख्यातेनोक्तत्वात् प्रथमा लुङि अरंजि । अरंक्षातां । अरंक्षत । इह कर्मकर्तृप्रकरणे भिद्यते काष्ठं स्वयमेवेत्यादौ सर्वत्र स्वयं शब्दः करणार्थको ज्ञेयः । आत्मना करणेनेत्यर्थः । कर्त्रर्थे तु कर्मण्याख्यातः स्यादित्यर्थः ॥ ॥ इति कर्मकर्तृप्रक्रिया ॥

कृतायामिह टीकायां लोकेशकरशर्मणा ।
बाधनं दुष्टबुद्धीनामगाङ्गावादि साधनम् ।
इति भावकर्मकर्मकर्तृप्रक्रिया ।

मू०—स्मृतिवाचिन्युपपदेभूतानद्यतनेधातोर्लृट् ॥ लङोऽपवादः । स्मरसि कृष्ण गोकुले वत्स्यामः ।

(सुबोधिनी—) स्मृतिवाचिन्युपपदेभूतानद्यतनेधातोर्लृट् । धातोर्लृड्भवति । स्मृतिवाचकशब्दे उपपदे सति न तु लङ् । वयं वत्स्यामः । अवसाम इत्यर्थः । एवं बुध्यसे । चेतयसे । इत्यादियोगेपि ॥

(तत्त्व०) स्मृतिवाचिनीत्यादि । स्मृतिवाचिनीत्युक्तेर्बुध्यसे चेतयसे इत्यादियोगेपि भवति एषामपि प्रकारणादिना स्मृतिवाचित्वात् । स्मरसीत्यादि । अत्र पश्य मृगो धावतीतिवद्वाक्यार्थस्य कर्मता बोध्या ।

मू०—यद्योगेउक्तंन ॥ अभिजानासि कृष्ण यद्वनेऽभुञ्ज्महि ।

(सुबोधिनी—) यद्योगेउक्तंन । स्मृतिवाचकशब्दे उपपदे सत्यपि यच्छब्दयोगे भूतानद्यतने लृट् न भवति किंतु लङेव ॥

(तत्त्वदीपिका—) अभीत्यादि । अत्र लङेव न तु लृट् ।

मू०—उत्तमपुरुषेचित्तविक्षेपादिनापारोक्ष्यम् ॥ सुप्तोहंकिलविललाप ॥

(सुबोधिनी—) उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं । मदस्वप्नादिभिः कश्चित् स्वांतगतमेव न वेत्ति पश्चादन्येभ्यः श्रुत्वा प्रयुंक्ते किलशब्दोऽज्ञानसूचकः । सुप्तः सन् अहं विललापेति ॥

(तत्त्वदीपिका—) उत्तमपुरुषेत्यादि । अत्र यद्यपि बुद्धींद्रियशरीरादिसंघातरूपस्य कर्त्तुरात्मनः प्रत्यक्षतैव तथापि मदस्वप्नादिभिश्च विक्षिप्ते कश्चित्स्वगतमेव न वेत्ति पश्चादन्येभ्यः श्रुत्वा प्रयुंक्ते । सुप्तोहमित्यादि । किलेत्यज्ञानं सूचयति ।

मू०—अत्यन्ताऽपह्नवेलिट् ॥ कलिङ्गेष्ववात्सीः। नाहंकलिङ्गाञ्जगाम ।

(सुबोधिनी—) अत्यंतापन्हवेलिट् । अत्यंतापलापेऽर्थे लिट् भवति कलिंगोनाम निषिद्धो देशः । उक्तंच । " अङ्गवंगकलिंगेषु सौराष्ट्रमगधेषु च ॥ तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हतीति " केन चित्कचित्पृष्टः त्वं कलिंगेषु अवात्सी-

तत्र गत्वा त्वया चिरस्थितमित्यर्थः। स आह नाहं कलिंगान् जगामेति। केवलमवस्थानमेव न निषिध्यते किंतु तद्धेतुभूतं गमनमपीत्यत्यंतापन्हवो भवति॥

(तत्वदीपिका-) अत्यंतापह्नव इति। अपह्नवोऽपलापः। नाहमित्यादि। कलिंगस्य तु जुगुप्सितत्वेन तत्र त्वया चिरं स्थितमित्युक्तः कश्चिद्गमनमेव निषेधतीत्यत्रास्यात्यंतापह्नवः। यदा तु गमनमेवाभियुक्तस्तदेवापलपति तदा लङेवात्यंतापह्नवाभावात्।

मू०-हशश्वतोर्लिङ्विषयेलङ्लिटौ॥इति हाकरोत्। चकार वा। शश्वदकरोत्। चकार वा।

(सुबोधिनी-) हशश्वतोर्लिङ्विषयेलङ्लिटौ। ह शश्वत् निपातयोर्योगे लिङर्थे लङ्लिटौ भवतः॥

मू०-आसन्नकालेपृच्छ्यमानेऽर्थेलङ्लिटौ॥ अगच्छत् किम्। जगाम किम्। अनासन्ने तु कंसञ्जघान किम्।

(सुबोधिनी-) आसन्नकालेपृच्छ्यमानेऽर्थेलङ्लिटौ। आसन्नकालिकेभूतानद्यतनपरोक्षवृत्तिधात्वर्थे प्रष्टव्ये लङ्लिटौ भवतः। पञ्चवर्षाभ्यंतर आसन्नकालः। पंचवर्षातीतो विप्रकृष्टकालः। पृच्छ्यमाने किं। जगदैवं। लिङेव। आनासन्नेतु लिङेव। कंसं जघान किम्॥

(तत्त्व०-) आसन्नेत्यादि। पञ्चवर्षाभ्यन्तरमासन्नकालं पञ्चवर्षातीतं विप्रकृष्टकालं वर्णयन्ति।

मू०-स्मेलट्॥ लिटोपवादः। यजति स्म युधिष्ठिरः। भूतानद्यतने लट् स्म योगे। एवं स्म पिता ब्रवीति।

(सुबोधिनी-) स्मेलट्। स्मयोगे लट् भवति न तु लिट् स्मेत्यव्ययं भूतकालद्योतकं भूतानद्यतने लट् स्मयोगे लङोपवादः। ब्रवीतिस्माऽब्रवीदित्यर्थः॥

मू०-ननौपृष्टप्रतिवचने॥ भूते लट्। अकार्षीः किम्। ननु करोमि भोः।

(सुबोधिनी-) ननौपृष्टप्रतिवचने। भूते लट् पृच्छ्यते इति पृष्टः कर्मणि क्तः पृष्टस्य प्रतिवचनं पृष्टप्रतिवचनमिति षष्ठीसमासः भावे क्तप्रत्यये तु पृष्टं प्रश्नः पृष्टपूर्वं च तत् प्रतिवचनं च पृष्टप्रतिवचनमिति मध्यमपदलोपी समासः ननु करोमि। अकार्षमित्यर्थः॥

(तत्त्वदीपिका—) ननाविति। पृष्टेति कर्मणिक्तः। पृष्टस्य प्रतिवचनं पृष्टप्रतिवचनमिति षष्ठीसमासः भावे तु पृष्टं प्रश्नस्तत्पूर्वं प्रतिवचनमित्युत्तरपदलोपी समासः।

मू०-नन्वोर्वा॥अकार्षीः किम्। नकरोमि। नाकार्षम्। अहं नु करोमि। अहं न्वकार्षम्।

(सुबोधिनी-) नन्वोर्वा । ननु निपातयोर्योगे पृष्टप्रतिवचने भूते वा लट् भवति पक्षे लुङ् लिटौ ॥

मू०-- पुराशब्दयोगेभूताऽनद्यतनेवालुङ्लटौनतुस्मयोगे ॥ वसन्तीह पुरा छात्राः । अवात्सुः । अवसन् । ऊषुर्वा । यजति स्म-पुरा युधिष्ठिरः ।

(सुबोधिनी—) पुराशब्दयोगेभूतानद्यतनेवालुङ्लटौ । न तु स्मयोगे पक्षे लङ् लिटौ । स्म इति किम् । यजतिस्मपुरा युधिष्ठिरः ।

मू०--यावत्पुरानिपातयोर्भविष्यतिलट् ॥ यावद्भुंक्ते । पुरा भुंक्ते। भोक्ष्यसे । भोक्ता वा ॥ **कदाकर्ह्योर्वा ॥** भविष्यति लट् । कदा कर्हि वा भुंक्ते भोक्ष्यसे । भोक्ता वा ।

(सुबोधिनी-) यावत्पुरानिपातयोर्भविष्यतिलट् । यावद्भुंक्ते । निश्चितं भोक्ष्यते इत्यर्थः । निपातावेतौ निश्चयंद्योतयतः । निपातयोः किम् । यावद्दास्यते । तावद्भोक्ष्यते । करणभूतया पुरा यास्यति ।

मू०-वर्तमानसामीप्येभूतेभविष्यतिचवर्तमानवद्वा ॥ कदाऽऽगतोसि । अयमागच्छामि । अयमागमम् । कदा गमिष्यासि। एष गच्छामि, गमिष्यामि वा ।

(सुबोधिनी-) वर्त्तमानसामीप्येभूतेभविष्यतिचवर्त्तमानद्वा । कदागतोसीति भूतकालेन प्रश्नवाक्यं।अयमागच्छामीत्युत्तरं। भूतकालाभिव्यक्तयेऽयमिति प्रयोगस्त्विदानीमेवाऽऽगतमिति वर्त्तमानसमीपभूतकालद्योतनाय । तेन ह्यागमनं विना भूतरूपं धूलीधूसरताप्रस्वेदादियुक्तं तत्प्रति निर्दिश्यते।एवं कदा गमिष्यसीति भविष्यत्कालेन प्रश्नवाक्यम् एषगच्छामीत्युत्तरं भविष्यत्कालाभिव्यक्तये । एष इति प्रयोगस्तु इदानीमेव गमिष्यामीति वर्त्तमानसमीपभविष्यत्कालद्योतनाय । तेन हि गमनेन विना भूतं यत् परिकरबंधादियुक्तं तत्प्रतिनिर्दिश्यते तत्र कदेति प्रश्ने उत्तरवाक्ययोः कालानुपादानात् अयमेषशब्दाभ्यामिदानीमिति कालावगमः ॥

(तत्वदी०--)अयमागच्छामीत्यादि । अयमेषपदाभ्यामागमनादिना भूतं यद्रूपं प्रस्वेदादियुक्तं तत्प्रतिनिर्दिश्यते । इदानीमागममित्यर्थः ॥

मू०--क्षिप्रवचनेऌट् ॥वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा यास्यति तदा शीघ्रं वप्स्यामः ।

(सुबोधिनी-) क्षिप्रवचनेऌट् । वचनग्रहणं स्वरूपग्रहणनिरासार्थं क्षिप्रपर्यायउपपदे ऌट् ॥

(तत्त्वदीपिका-) क्षिप्रेति क्षिप्रपर्यायस्यापि ग्रहणं । न तु स्वरूपस्यैव ।

मू०--गर्हायांलडपिजात्वोः ॥ कालत्रये । अपि जायान्त्यजसि । जातु गणिकामाधत्से वा ।

(सुबोधिनी--) गर्हायांलडपिजात्वोः । कालत्रये आभ्यां योगे लट् स्यात् गर्हायां । कालत्रये परत्वात् लुङादीनयं बाधते । अपिजायां त्यजसि । त्यक्ष्यसि । अत्याक्षीः । इत्यादि विषये त्यजसीत्यादि लडेव प्रयुज्यते इति भावः । एवं यो जायां अत्यजत् । तत्याज । त्यक्ष्यति अत्याक्षीत् । इत्यादि विषये यो जायामपि त्यजतीति जातु गणिकामाधत्से गर्हितमेतत् वा ।

(तत्त्वदी०--) जातुगणिकामिति । गर्हितमेतत् ।

मू०--कथमिलिङ्लटौ॥गर्हायांकालत्रये । कथं धर्मन्त्यजेस्त्यजसि वा ।

(सुबोधिनी--) कथमिलिङ्लटौ । गर्हायां कालत्रये । पक्षे लङ् लिट् लुट् लृट लृङ् लुङः । भूतानद्यतने लङ् । कथं धर्ममत्यजः । परोक्षाऽनद्यतने भूते लिट् । कथं धर्मं तत्यक्थ । भविष्यत्यनद्यतने लुट् । कथं धर्मं त्यक्तासि । भविष्यत्सामान्ये लृट् । कथं धर्मं त्यक्ष्यसि । क्रियातिक्रमे लृङ् । कथं धर्ममत्यक्षत् । भूतसामान्ये लुङ् कथं धर्ममत्याक्षीः ॥

मू०--जातुयद्यदायदियोगेलिङ् ॥ लृटोपवादः । जातु यद् यदा यदि वा त्वादृशो हरिं निंदेत् नावकल्पयामि । न मर्षयामि ।

(सुबोधिनी--) जातुयद्यदायदियोगेलिङ् । अनुवक्लृप्त्यमर्षयोर्लिङ् स्यादेषां योगे । अनवक्लृप्तिरसंभावना । अमर्षोऽक्षमा । लृटोपवादः । लृङ तु क्रियाऽनिष्पत्तौ भूते वा भविष्यति तु नित्यमित्यर्थः । जातु भवान् हरिमनिंदिष्यदित्याद्युदाहर्तव्यं । अगर्हायामिदं । गर्हायान्तु जातु योगे लडुक्तः ॥

(तत्त्वदीपिका--) नावकल्पयामीत्यादि अनवक्लृप्तिरसंभावना । अमर्षो क्षमा ।

मू०--उताप्योर्बाढार्थयोर्लिङ्॥समर्थयोरनयोर्लिङ् कालत्रये। उत अपि वा हन्यादघं हरिः।उत दण्डः पतिष्यति अपिधास्यति द्वारम् ।

(सुबोधिनी--) उताप्योर्बाढार्थयोर्लिङ् । समर्थयोरनयोर्योगे लिङ् । बाढार्थयोः किं । उत दण्डः पतिष्यति । अपिधास्यति द्वारमत्र प्रश्नः आच्छादनं च गम्यते ।

(तत्त्वदी०)समर्थयोरिति । समानोऽर्थो ययोस्तौ तयोः हलादित्वाट्टिलोपः समशब्द एव वा तुल्यार्थः । बाढमित्यर्थेऽनयोस्तुल्यार्थता । उतदण्ड इत्यादि । प्रश्नःआच्छादनं चार्थः ॥

मू०--स्वाभिप्रायाविष्करणेगम्येलिङ् ॥ कालत्रये न तु कचि-

ति । कामो मे भुञ्जीत भवानिति । कच्चिदिति किम् । कच्चिज्जीवति मे माता ।

(सुबोधिनी-) स्वाभिप्रायाविष्करणेगम्येलिङ् । न तु कच्चिति कालत्रये सर्वलकारापवादः । न तु कच्चितीति किं । कामो मे कच्चिज्जीवति । वर्तमानसमीपे इति लट् ॥

मू०--हेतुहेतुमतोर्भविष्यतिलिङ्वा ॥ कृष्णं नमेच्चेत्सुखं यायात् । कृष्णं नमस्यति चेत्सुखं यास्यति ।

(सुबोधिनी--) हेतुहेतुमतोर्भविष्यतिलिङ्वा । हेतुः कारणं हेतुमत्फलम् । पक्षे लृट् । कृष्णं नमेच्चेत्सुखं यायात् । कृष्णनतिः सुखप्राप्तेर्हेतुः । भविष्यत्येवेष्यते । नेह हंतीति पलायते ॥

(तत्त्व०—) हेतुहेतुमतोरिति । हेतुः कारणं हेतुमत्फलं । कृष्णमित्यादि नमनमात्रं हेतुः सुखप्राप्तिफलम् ।

मू०—इच्छार्थेषुलिङ्लोटौकामप्रवेदने ॥ इच्छामि भुञ्जीत । भुंक्तां वा भवान् ।

(सुबोधिनी--) इच्छार्थेषुलिङ्लोटौकामप्रवेदने । काम इच्छा तस्य प्रवेदनं प्रकाशनं तस्मिन्नर्थे ॥

(तत्त्वदीपिका-) कामप्रवेदन इति । काम इच्छा प्रवेदनं प्रकाशनं । इच्छार्थेभ्य इति इच्छा अर्थो येषांते इच्छार्थाः ग्राह्याः ।

मू०—इच्छार्थेभ्योलिङ्लटौ ॥वर्तमानाऽर्थे । कामयेत ।कामयते ।

(सुबोधिनी-) इच्छार्थेभ्योलिङ्लटौ । वर्त्तमाने इति शेषः इच्छार्थो येषां ते इच्छार्थास्तेभ्यः तेन वशकांताविव्यादयोपीच्छार्था ग्राह्याः ॥

मू०--पौनःपुन्येभृशार्थेचधातोर्लोट्सर्वलकारविषयेतस्यहिस्वौ सर्वतुबादिविषयेतध्वमोर्विषयेवा ॥ क्रियासमभिहारेद्वित्वन्तस्येव धातोरनुप्रयोगश्च ।

(सुबोधिनी--) पौनःपुन्येभृशार्थेचधातोर्लोट्सर्वलकारविषयेतस्यहिस्वौसर्वतुबादिविषयेतध्वमोर्विषयेवा । पौनःपुन्यं भृशार्थश्च धातोरेवार्थः । लोट् द्योतक इति भावः । किंच तुबादीनामादे शत्वेपि तेषां स्थाने विहितस्य हेः स्थानिवद्भावेन पित्वात् ङिच्च पिन्न पिच्च ङिन्नेति भाष्योक्तत्वात् ङित्वाभावे लुनीहीत्यत्र ईहसे इतीत्वं न स्यात् । तृण्ढि इत्यत्र तु तृहोनमिकते इमागमः । पितीति इमागमे तृणेढि इति च स्यात् । अतो लोटोहिस्वावित्युक्तम् । सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्त्तरि । आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु । क्रियासममभिहारे द्वे इति द्वित्वं । य-

स्माधातोर्लोट्विहितस्तस्यैव धातोरनुप्रयोगश्च कर्त्तव्यः । अनुप्रयोगाद्यथायथं लडादयस्तिबादयश्च कर्त्तव्याः । ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिर्भवति । अत्र लोडंतविषये सङ्ख्याकारकादीनां हिस्वांतादप्रतीतिस्तद्बोधनायानुप्रयोगो न्यायत एव । याहि याहीति याति । यातः । यांति । यासि । पुनः पुनरतिशयेन वा यानं ह्रिप्रसयान्तस्यार्थः । एककर्तृकं वर्तमानं यानं याति इत्यस्याऽर्थः । इतिशब्दस्तत्त्वभेदान्वये तात्पर्यं ग्राहयति मध्यमपुरुषबहुवचने तशब्दे तु यातयातेति यूयं याथ। पक्षे याहि याहीति यूयं याथ । एवं भूतभविष्यतोरप्युदाहरणं याहि याहीति यास्यति । याहि याहीति अयासीत् मध्यमपुरुषबहुवचने ध्वंशब्दे तु अधीध्वमधीध्वमिति । यूयमधीध्वे । पक्षे अधीष्वाधीष्वेत्यधीष्व । भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते । पच्यस्व पच्यस्वेति पच्यते । गद्यस्व गद्यस्वेति गद्यते । भज्यस्व भज्यस्वेति भज्यते । इत्यादि ज्ञेयम् ॥

(तत्त्वदीपिका-) पौनःपुन्ये भृशार्थे चेति पुनःपुनर्भावः पौनः पुन्यं । भृशार्थोऽतिशयार्थः । एतद्विशिष्टक्रियावचनाद्धातोरित्यर्थः । क्रियासमभिहारे द्वित्वमिति । पौनःपुन्ये भृशार्थे चेत्यर्थः । परस्मैपदिभ्योहिःकर्तरि । आत्मनपदिभ्यः स्वः भावकर्मकर्तृषु सकलपुरुषवचनविषये याहि याहीतियातीति । पुनःपुनरतिशयेनवासने लोडन्तस्यार्थः । एककर्तृकं वर्तमानं यानं तिबन्तस्य कालपुरुषविशेषाभिव्यक्तिः सर्वत्र तु प्रयोगादेव बोध्या। इति शब्दोऽभेदान्वयद्योतकः भविष्यतद्भूतयोरप्युदाहरति यास्यतीत्यादि । स्वमुदाहरति । अधीष्वेत्यादि । सक्तून् पिबेत्यादि । सक्तुपानादिकं करोतीत्यर्थः । एवं पुरीमवस्कंद लुनीहि नंदनमित्यादि व्याख्येयं । अवचस्कंद लुलावेत्यादि यत्तु वासुदेवादिभिरतिशयेन पुनःपुनर्वाऽवचस्कंदेत्यादिव्याख्यातं । तदसत् । अनेकक्रियासमुच्चये क्रियासमभिहारस्यानुक्तेः । लोडन्तद्वित्वापतेश्च ।

मू०-अनेकक्रियासमुच्चयेवालोट्तस्यहिस्वौतध्वमोर्विषयेवा॥ हिस्वौ समानार्थस्य धातोरनुप्रयोगात्तिबादयः। याहि याहीति । याति । एवं यातः। यान्ति । यासि । याथः । याथ । यात यातेति यूयं याथ । यामि । यावः । यामः । याहि याहीति यास्यति । अयासीत् । अधीष्वाधीष्वेत्यधीते । एवमन्यत्रापि । ध्वंविषयेप्राग्वत् । पक्षे अधीध्वमधीध्वमिति। यूयमधीध्वे । सक्तून् पिब धानाः खादेत्यभ्यवहरति । पिबत खादतेत्यभ्यवहरथ । अन्नंभुंक्ष्व । दाधिकमास्वादस्वेत्यभ्यवहरते । भुंग्ध्वमास्वादध्वमित्यभ्यवहरध्वे ।

॥ इत्याख्यातप्रक्रिया ॥

(सुबोधिनी-) अनेकक्रियासमुच्चयेतुवालोट्तस्यहिस्वौतध्वमोर्विषयेवा । सामा-

न्यार्थस्य धातोरनुप्रयोगात्तिबादयः। चिनोतेर्भावे स्वरादय इत्यप्रत्यये कृते समुच्चीयते इति समुच्चयः। अस्मिन् सूत्रे पौनःपुन्ये भृशार्थेचेत्यनुवर्त्तनात् द्वित्वमकृत्वैवोदाहरति सक्तूनिपिबेत्यादि। तध्वमोस्तु पिबत खादतेति। यूयं अभ्यवहरथ। पक्षेपिब खादेति। यूयं अभ्यवहरथ। भुङ्ग्ध्वमास्वादध्वामिति यूयं अभ्यवहरध्वं। पक्षे भुङ्क्ष्व आस्वादस्वेति यूयं अभ्यवहरध्वं। लोडभावपक्षे सक्तून् पिबति धानाः खादति। अन्नम्भुङ्क्ते। दाधिकमास्वादते। "धानाभ्रष्टयवे स्त्रियां" इत्यमरः। दध्ना संस्कृतं दाधिकं व्यंजनादि। एतेन "पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामराङ्गनाः॥ विगृह्य चक्रे नमुचिर्द्विषा बली य इत्यमस्वास्थ्यमहर्निशं दिवः॥ १॥" इति व्याख्यातं अवस्कंदनलवनादिरूपा भूताऽनद्यतनपरोक्षा एककर्तृका अस्वास्थ्याक्रियेत्यर्थात्। इह पुनःपुनश्चस्कंदेत्यादिरर्थ इति तु व्याख्यानम्भ्रममूलमेव। द्वितीयसूत्रे क्रियासमभिहारे इत्यस्यानुवृत्तेः। लोडंतस्य द्वित्वापत्तेश्च। पुरीमवस्कंदेत्यादि मध्यमपुरुषैकवचनमित्यपि केषां चिद्भ्रम एव। पुरुषवचनसंज्ञे इह नेत्युक्तत्वात्॥

बुद्धिमांद्यवशात् किंचिद् यदशुद्धमलेखि तत्॥
द्वेषभावं समुत्सृज्य शोधनीयं मनीषिभिः॥

इतिश्रीसिद्धान्तचन्द्रिकाव्याख्यायां सदानन्द्याख्यायामाख्यातकांडसमाप्तम्॥ श्रीरस्तु॥ शुभमस्तु॥

(तत्त्वदीपिका–) कृतायामिहटीकायां लोकेशकरशर्मणा।
अगादगाधबुद्धीनां कृतमाख्यातसाधनम्॥

इति श्रीलोकेशकरविरचितायां सिद्धांतचंद्रिकाव्याख्यायां तत्त्वदीपिकायामाख्यातप्रक्रियासंपूर्णा। श्रीरस्तु।

इति तिङन्तप्रकरणं समाप्तम्।

वृद्धकुमारीन्यायेन ।। सूत्रशा

श्रीः । एकन्यायेन वा

सिद्धान्तचन्द्रिकोत्तरार्धे-

कृदन्त प्रकरणम् ।

मू०--कृत्कर्तरि ॥ वक्ष्यमाणाऽप्रत्ययाः कृत्संज्ञकास्ते च कर्तरि भवंति ।

(सुबोधिनी-) प्रतोष्टूय्य जगन्नाथं सदानंदेन सन्मुदा ॥
सिद्धांतचंद्रिकावृत्तिः क्रियते कृत्प्रकाशिका॥ १॥
कृत्कर्त्तरि ॥ उत्सर्गतः कर्त्तरीति बोध्यम् ॥

(तत्त्वदीपिका—) ते च कर्त्तरीति । उत्सर्गतः कर्त्तरीति बोध्यम् ।

मू०—तृवुणौ ॥ धातोः । पक्ता ।

(सुबोधिनी-) तृवुणौ । धातोरेतौ स्तः । कर्त्तरि तृप्रत्ययमाह । पचतीतिविग्रहे चोःकुरिति कः । कृत्तद्धितेति नामसंज्ञायां स्यादिर्विभक्तिः । सेरा इति सेरात्वं टिलोपश्च । पक्ता । पाकानुकूलकृतिमान् देवदत्त इत्यर्थः ॥

(तत्त्वदीपिका–) धातोरिति अधिकारादिदं लब्धमित्याशयः पक्तेति । पचतीति वाक्यं चोःकुरिति कुत्वम् ॥

मू०—कृतः॥ वसादेः कृत इट् । कुटिता । एधते इति एधिता । गोपायिता, गोपिता, गोप्ता । सहिता सोढा । एषिता, एष्टा ।

(सुबोधिनी-) कृतः । धातोः परस्य वसादेः कृत्प्रत्ययस्येट् वसोत्र प्रत्याहारः । भवतीति भविता । कुट कौटिल्ये । तुदादिः कुटादेर्ङिणद्वर्जत् इति प्रत्ययस्य ङित्त्वान्न गुणः । कुटतीति कुटिता । एधते इति एधिता । गुपू रक्षणे । आयादयोऽनपीति वाऽऽयः । इति आयपक्षे कृत इति नित्यमिट् । अन्यत्र ऊदितोवेति वेट् । गोपायतीति गोपायिता, गोपिता, गोप्ता । षह मर्षणे । इषुसहेति वेट् । सहते इति सहिता । इडभावे होढ इति हस्य ढः । तथोर्द्ध इति तस्य धः । ष्टुत्वं ढिढ इति ढलोपपूर्वदीर्घौ । सहिवहोरित्योत्वं । सोढा । इषु इच्छायाम् । इषु सहेति वेट् । इच्छतीति एषिता । इडभावे ष्टुत्वं । एष्टा वुण् प्रत्ययमाह । णकारो वृद्धयर्थः ॥

(तत्त्व०–)कृत इति । वसादेरिति । वस प्रत्याहार आदिर्यस्य स तथा तस्य । कुटितेति ङित्वान्न गुणः । सोढेति इषुसहेत्यादिनावेट् ढत्वष्टुत्वढलोपाः । सहिवहोरित्योत्वम् ।

मू०--युवोरनाकौ ॥ पाचकः । भावकः । आतोयुक् । दायकः । घातकः । जनकः । घटकः । दरिद्रायकः । कोटकः । शमकः । नियामकः ।

(सुबोधिनी–) युवोरनाकौ । युश्च वुश्च युवू तयोर्युवोः । वक्तीति वाचकः पचति पाचयतीतिवा पाचकः । भवति भावयतीति वा भावकः । यदि ण्यन्ताद्गुणविधिः तदा णेरिति णिलोपः । ददातीति आतोयुगिति युक् दायकः हन्तीति हनो घदिति घत् । घातकः । जनी प्रादुर्भावे । दैवादिकः । जन जनने । जुहोत्यादिः । जनयतीति जनवध्योरिति न वृद्धिः । णेरिति णिलोपः जनकः । घटयतीति मितां ह्रस्व इति ह्रस्वः । णेरिति णिलोपः । घटकः । दरिद्रातीति युक् दरिद्रायकः । तृप्रत्यये तु कृत इतीट् दरिद्रातेरनपीत्यालोपः । दरिद्रिता । कुट कौटिल्ये । कुटादेर्ङिणद्वर्ज इति वुणोऽङित्त्वादुपधाया लघोरिति गुणः । कुटतीति कोटकः । शमु उपशमे । मांतस्य सेटो नेति न वृद्धिः । शाम्यतीति शमकः यम उपरमे । नियच्छतीति मांतस्य सेट इति वृद्धिनिषेधस्तु न प्रवर्त्तते । अस्यानिट्त्वात् । नियामकः ॥

(तत्त्व०–) युवोः । युश्चवुश्चेति समाहारः । नुसत्त्वनित्यत्वात् दायक इति । आतोयुगितियुक् । जनक इति । जनिवध्योरिति नवृद्धिः । कोटक इति । ञ्णिद्वर्ज्जइति ङित्वाभावाद्गुणः ।

मू०—क्रमेःकर्तर्याद्विषयात्क्तइण्न ॥ प्रक्रन्ता ।

(सुबोधिनी–) क्रमेः कर्तर्याऽद्विषयात्कृतइण्न । आत्मनेपदविषयात् क्रमेःपरस्य कर्त्तरि कृत्प्रत्ययस्येण् नभवति । प्रोपाभ्यां प्रारंभार्थाभ्यामिति क्रमेरात्मनेपदविषयता । प्रक्रमते इति प्रक्रंता । तृप्रत्ययः । कर्त्तरि किम् । प्रक्रम्यते इति प्रक्रमितव्यम् । आत्मनेपद इति किम् । संक्रामतीति संक्रमिता ॥

(तत्त्व०–) प्रक्रन्तेति ।प्रोपाभ्यामित्याद्विषयता ।

मू०—नाम्युपधात्कः ॥ क्षिपः । बुधः । वृतः ।

(सुबोधिनी–) नाम्युपधात्कः । कप्रत्ययमाह- । प्रत्ययाद्या लशकवर्गा इत्संज्ञका भवंति तद्धितवर्ज्जं । कित्त्वाद्गुणो न । बोधतीति बुधः । क्षिप प्रेरणे । क्षिपतीति क्षिपः । तृप्रत्यये तु क्षेप्ता । वुणि तु क्षेपकः । वर्त्तते इति वृतः ॥

(तत्त्व०–) नाम्युपधादिति । नामी अवर्णवर्ज्जः उपधा यस्य स तस्मात् क्षिप इति क्षिपतीति विग्रहः ।

मू०—प्रीकृज्ञाभ्यश्च॥ नुधातोः । प्रियः । किरः । ज्ञः ।

(सुबोधिनी–) प्रीकृज्ञाभ्यश्च । एभ्योपि कः । प्रीञ् तर्पणे । प्रीणातीति नुधातोरितीय् । प्रियः । कॄ विक्षेपे । किरतीति ऋतइरितीर् । किरः । जानातीति आतोनपीत्यालोपः । ज्ञः ॥

(तत्त्वदीपिका–) प्रिय इति । प्रीञ् तर्पणे । इय् । किर इति । कॄ विक्षेपे ऋत इर् इति । अतोऽनपीत्यालोपः

मू०—उपसर्गेआदन्तात् ॥ प्रदः । सुग्लः ।

(सुबोधिनी--) उपसर्गे आदंतात्। उपसर्गे पूर्वपदे आदंताद्धातोः कः। प्रददातीति। आतोनपीत्यालोपः। प्रदः। सुष्ठु जानातीति सुज्ञः। ग्लै हर्षक्षये। सुष्ठु ग्लायतीति सुग्लः॥

मू०--पचिनन्दिग्रहादेरयुणिनि॥ पचादेरः। नन्द्यादेर्युः। ग्रहादेर्णिनिः। पचः। वदः। चलः। पतः। चरः।

(सुबोधिनी-) पचिनंदिग्रहादेरयुणिनि। द्वंद्वांते श्रूयमाणः शब्दः प्रत्येकं संबद्ध्यत इत्यादिशब्दः प्रत्येकं योज्यः पचादेर्द्धातोरप्रत्ययः। नंद्यातेर्द्धातोर्युप्रत्ययः। ग्रहादेर्द्धातोर्णिनिप्रत्ययः। अप्रत्ययमाह। पचतीति पचः। वदतीति वदः। चल संचलने। चलतीति चलः। पत्लृ पतने। पततीति पतः। चरतीति चरः॥

(तत्त्वदीपिका-)पचिनंदिग्रहादेरित्यादि। द्वंद्वांते श्रूयमाणतदादिशब्दस्य प्रत्येकंयोगः। अश्च युश्च णिनिश्चेति समाहारद्वंद्वः एते च गणा न धातुपाठे पठचन्ते किन्तु नंदनरमण इत्येवमादिषु नामगणेषु वोद्धृत्य प्रकृतयो निर्द्दिश्यंते इति। पच इति। पचतीतिवाक्यं। पचादिराकृतिगणः।

मू०-चरिचलिपतिवदीनांवाद्वित्वंपूर्वस्याकुअप्रत्यये॥ चराचरः। चलाचलः। पतापतः। वदावदः।

(सुबोधिनी-) चरिचलिपतिवदीनांवाद्वित्वंपूर्वस्याऽऽकुअप्रत्यये। अत्र ह्रस्व इति ह्रस्वः। पूर्वस्य हसादिशेष इत्यादिशेषश्च न भवति। आगमस्य दीर्घत्वसामर्थ्यात्। चराचर इत्यादि॥

(तत्त्वदीपिका--) चरिचलीत्यादि। चराचर इत्यादि। आगागमविधानसामर्थ्याद्धसादिः शेष इति न। तथाहि सति तस्मिन् आगमादेशयोर्विशेषो न स्यात्। दीर्घत्वविधेः। ह्रस्वोपि न।

मू०--हन्तेर्हस्य घत्वञ्च॥ घनाघनः।

(सुबोधिनी-) हन्तेर्हस्यघत्वंच। हंतेर्द्वित्वं पूर्वस्य हस्य घत्वं चाऽप्रत्यये चकारात् पूर्वस्याक् उत्तरहस्य तु पूर्वाद्धंतेरिति घः। घनाघनः॥

(तत्त्वदीपिका-)हन्तेः पूर्वस्यैव उत्तरस्य तु पूर्वादित्यनैवेति सिद्धं चकारात्पूर्वोक्तमपि।

मू०--पाटेर्णिलुकूचोकूचदीर्घश्चपूर्वस्य॥ पाटूपटः। हनः। पाटः। नन्दनः। वामनः। क्रमणः। दूषणः। साधनः। वर्द्धनः। शोभनः। रोचनः। रावणः। सहनः। तपनः। दमनः। जल्पनम्। लवणम्। णत्वं निपात्यम्। कोचनः। कुच शब्दे चुरादिः। म्लेच्छ अव्यक्ते शब्दे म्लेच्छनः। ग्राही। उत्साही। उद्भासी। स्थायी। मायी। मंत्री। अयाची। अवाची। अपराधी।

(सुबोधिनी-) पाटेर्णिलुक्चोकुचदीर्घश्चपूर्वस्य। यद्यपि णेरित्यनेनैव णिलोपः सिद्धः तथापि प्रत्यय लक्षणेनोपधाया वृद्धिर्मा भूदित्येवमर्थं लुक्करणं। पूर्वं णिलुक्। ततो द्वित्वं। तत ऊगागमपूर्वदीर्घौ स्तः। पाटयतीति पाटूपटः। इहापि ह्रस्व-हसादिशेषयोरभावः। पक्षे हंतीति हनः। णेरिति णिलोपः। पाटः। युप्रत्ययमाह। युवोरित्यनादेशः। टुणादि समृद्धौ। नंदयतीति णेरिति णिलोपः। नंदनः। टुवम् उद्गिरणे। ग्लास्नावनुवमांचेति वैकल्पिक मित्त्वाभावे वामयतीति वामनः। दुष वैकृत्ये। दुषेर्णाविति दीर्घः। णेरिति णिलोपः। दूषयतीति दूषणः। साध संसिद्धौ। साध्यति साधयतीति वा साधनः। वृधु वृद्धौ। वर्धते इति वर्धनः। शोभते इति शोभनः। रोचते इति रोचनः। रु शब्दे। रावयतीति णेरिति णिलोपः रावणः। सह मर्षणे। सहते इति सहनः। तप ऐश्वर्ये। दैवादिकः। तप्यते इति तपनः। दाम्यतीति दमनः। जल्पतीति जल्पनः। कुचशब्दे कोचनः। म्लेच्छ अव्यक्ते शब्दे। म्लेच्छतीति म्लेच्छनः। लुनातीति लवणं। नंद्यादिगणे निपातनाण्णत्वं। णिनिप्रत्ययमाह। प्रत्ययाद्यौ चवर्गटवर्गावितौ स्त इति णित्वादतउपधाया इति वृद्धिः। गृह्णातीति इनामिति सौ दीर्घः नाम्नो न इति नलोपः। ग्राही। षह मर्षणे उत्सहते इति उत्साही। उद्भासते इति उद्भासी। तिष्ठतीति आतोयुगिति युक्। स्थायी। छो छेदने। छ्यतीति छायी। पिबतीति पायी। मत्रि गुप्तपरिभाषणे। चुरादिः। मंत्रयतीति। णेरिति णिलोपः। मंत्री। टुयाचृ याच्ञायाम्। न याचते इति नञोऽदादेशः। अयाची। न वदतीति अवादी। राध संसिद्धौ अपराध्यतीति अपराधी॥

(तत्त्वदीपिका--)पाटेरिति। यद्यपि णेरित्यनेनैव णिलोपस्सिद्धस्तथापि प्रत्ययलक्षणे नोपधावृद्धिर्मा भूदित्येवमर्थं लुक्करणं। पाटूपट इति। पूर्ववद्धसादिशेषह्रस्वयोरभावः। नंदन इति। नंदयतीति विग्रहः। टुनदिसमृद्धे। युवोरित्यनः। दूषयतीति वाक्यं। दुषवैकृत्येदु षेर्णाविति दीर्घः।

सू०-दृशादेश्शः॥ दृशूपाघ्राध्माधेट्भ्यः शः।

(सुबोधिनी-) दृशादेः शः। दृशूपाघ्राध्माधेड्भ्यः शप्रत्ययो भवति। शप्रत्ययमाह शस्येत्संज्ञा॥

(तत्त्वदीपिका-) दृशादेः। आदिपदग्राह्यानाह। दृश पाघ्रेत्यादि।

सू०-शितिचतुर्वत्॥ चतुर्षु तिवादिषु यत्कार्य्यमुक्तन्तच्छिति परे भवति। पश्यः। धयः। धमः। जिघ्रः। पिबः। घ्रस्संज्ञायां न। व्याघ्रः।

(सुबोधिनी-) शितिचतुर्वत्। चतुर्ष्विवेति चतुर्वत्। पश्यतीति दृशादेरिति पश्यादेशः। अपकर्त्तरीति अप्। अदे इत्यलोपः। पश्यः। पा पाने। पा रक्षणे इत्ययं तु न गृ-

द्यते । लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति न्यायात् । पिबतीति पिबः । घ्रा गंधोपादाने । जिघ्रतीति जिघ्रः । ध्मा शब्दाग्निसंयोगयोः । धमतीति धमः । धेट् पाने । धयतीति धयः । घ्रः संज्ञायां न संज्ञायां वाच्यायामस्माच्छो न । विशेषेण जिघ्रतीति ऊपसर्गे आदंतादिति कः । आतोनपीत्यालोपे व्याघ्रः ॥

(तत्त्वदीपिका-) पश्य इति । पश्यतीति विग्रहः चतुर्वत्करणादपपश्यादेशौ । एवमन्यत्रापि । अत्र केचिदुपसर्गमनुवर्तयन्ति बहवः । श्रीहर्षोपि । फलानि धूमस्यधयानित्युदाहृतवान् । व्याघ्र इति । विशेषणजिघ्रतीति व्याघ्रः । उपसर्गे आदन्तादिति कः ।

मू०-अनुपसर्गेभ्योलिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्शः ॥ लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखे । सातयः । साहयः ।

(सुबो०-) अनुपसर्गेभ्योलिंपविंदधारिपारिवेद्युदेजिंचेतिसातिसाहिभ्यःशः । लिप उपदेहे विद्लृ लाभे । तौदादिकाविमौ । भाविना मुमा निर्दिष्टौ । तेन लाभार्थस्यैव विदेर्ग्रहणं न तु सत्ताद्यर्थकस्य । लिंपतीति विंदतीति । तुदादेरित्यः । अदेरित्यलोपः।लिंपः।विंदः।मुचादेरिति मुम् । धृञ् धारणे। धृङ् अवस्थाने । ण्यंतयोर्द्वयोरपि ग्रहणं।धारयतीति धारयः । पार कर्मसमाप्तौ।चुरादिः।पॄ पालनादौ इति ण्यंतो वा पारयतीति पारयः। विद चेतनादिषु चुरादिः।ज्ञानाद्यर्थानामन्यतमो ण्यंतो वा। वेदयतीति वेदयः। उत्पूर्वः एजृकंपने ण्यंतः। उदेजयतीति उदेजयः। चित संचेतने। चुरादिः । चेतयतीति चेतयः। सातिः सुखे सौत्रः। सातयतीति सातयः। क्विप् प्रत्यये तु सातपरमात्मा । सात् विद्यते येषां ते सात्वंतो भक्ताः। षह मर्षणे चुरादिः । प्रयोजकण्यंतो वा । साहयतीति साहयः। अनुपसर्गेभ्य इति किम् । प्रम्लिपः । नाम्युपधादितिकः ॥

(तत्त्वदीपिका--) अनुपसर्गेभ्यः। लिप उपदेहे । विद्लृलाभे समुमूनिर्देशाल्लाभार्थादन्येषामग्रहणं । धृञ् धारणे । धृङ् अवस्थाने । द्वयोरपि ण्यंतयोर्ग्रहणं । पारकर्मसमाप्तौ पृपालनपूरणयोरितिवाण्यन्तः । विदचेतनाख्याननिवासेषुचुरादिण्यन्तः ज्ञानाद्यर्थानामन्यतमो वा प्रेरणण्यन्तः। उत्पूर्व एजृ कंपने । षह मर्षणे चुरादिः।प्रेरणार्थण्यंतो वा। लिंपविंदोस्तुदादित्वादः । मुचादित्वान्मुम् । धारयादिष्वपू गणाःयादृशाः ।

मू०- नौलिम्पेः ॥ निलिम्पाः देवाः ।

(सुबोधिनी-) नौलिंपेः । नौ पूर्वपदे शः । निलिंपतीति निलिंपा देवाः ॥

मू०-- गवादिषुविन्देस्संज्ञायाम् ॥ गोविन्दः । अरविन्दं ।

(सुबोधिनी-) गवादिषुर्विंदेःसंज्ञायाम् । कार्येऽणू इत्यस्यापवादोयम् । गां विंदतीति गोविंदः । चक्रस्य नाभिनेम्योरंतराले स्थितानि काष्ठान्यरा उच्यंते अराकाराणि दलानि तत्सादृश्यादरास्तान् विंदते लभते इत्यरविंदं ॥

(तत्त्व०-) अरविंदमिति । चक्रनाभिनेम्यन्तरालस्थितकाष्ठानि अरास्तदाकाराणि दलानि विंदति प्राप्नोतीति ।

मू०--दाञ्धाञोर्वा ॥ ददः । दधः ।

(सुबो०-) दाञ्धाञोर्वा । अनुपसर्गाभ्यामाभ्यां वा शः । ददातीति दधातीति ह्वादेरिति द्वित्वं शस्य ङित्वादादेरित्यलोपः । ददः दधः । पक्षे ज्वलादेरिति णः। आतोयुगिति युक् । दायः धायः । उपसर्गे किम् । प्रदः । प्रधः । उपसर्गे इति कः दद दाने । दध धारणे । एतयोरपि ददः । दध इति ॥

(तत्त्व०-) दाञ्धाञोरिति यद्यपि दद दाने दध धारणे एतयोरपि ददः दधइति सिद्धं दाञ् धाञोश्च णे दायो धाय इति तथापि आद्युदात्तस्वरार्थमिति पाणिनीयानुसारिणः । इह त्विदं चिंत्यप्रयोजनम् ।

मू०--ज्वलोदर्णः॥ज्वालः । तापः । **श्यादेश्च॥**अवश्यायः। दायः। धायः ।

(सुबोधिनी-) ज्वलादेर्णः । अनुपसर्गात् ज्वलादेर्वा णः । णप्रत्ययमाह णकारो वृद्ध्यर्थः । ज्वलतीति ज्वालः । चलतीति चालः । तप संतापे । तपतीति तापः । पक्षे पचादेरित्यः । ज्वलः । चलः । तपः । उपसर्गे किम् । उज्ज्वलः ॥

(तत्त्व०-) ज्वलादेरिति ॥ पांथः इत्यादौ ज्वलादिपाठसामर्थ्याद्वृद्धौ सत्यां मुम् । अणप्यत्रेति केचित् । प्रियांगपांथो कुचयोर्निपत्येति श्रीहर्षोपि ।

मू०--कार्य्येऽण् ॥ कर्मण्युपपदे । धातोरण् कुम्भकारः ।

(सुबोधिनी-) कार्य्येऽण् । अण्प्रत्ययमाह । णकारो वृद्ध्यर्थः । कुंभंकरोतीत्यत्राणि कृते कर्तृकार्ययोरिति षष्ठ्यंतस्य कुंभशब्दस्य नाम्नश्च कृतेति कारशब्देन समासः । कुंभस्य कारः । कुंभकारः । कथं तर्हि गंगाधरभूधरादय इति । पदसंस्कारपक्षे धरतीति धरः गंगाया धरः गंगाधरः । इति शेषे कृति वेति कर्मणि या षष्ठी तदंतेन समासः ॥

(तत्त्व०-) कुंभकार इति कुंभं करोतीति नित्यसमासार्थमस्वपदविग्रहः । इहाणि कृते- कर्तृकार्ययोरिति षष्ठ्यंतेन कुंभशब्देन कारकशब्दस्य समासः । गंगाधर इत्यादौ अपि गंगायाः धर इति विग्रहो बोध्यः ।

मू०--ह्वावामाभ्यश्च ॥ स्वर्गह्वायः । तंतुवायः । धान्यमायः ।

(सुबोधिनी-) ह्वावामाभ्यश्च । कर्मण्युपपदे एभ्योप्यण् आतोड इत्यस्यापवादः । स्वर्गं ह्वयतीति संध्यक्षराणामित्यात्वे आतोयुक् स्वर्गह्वायः वेञ् तंतुसंताने । तंतुं वयतीति तंतुवायः । माङ् माने । मेङ् प्राणिदाने । अनयोरिह ग्रहणं । न तु मा माने इत्यस्याकर्मकत्वात् धान्यं मिमीते इति धान्यमायः ।

मू०--शीलिकामिभक्ष्याचरिक्षमीक्षिभ्योणः॥मांसशीला। मांसकामा। मांसभक्षा। कल्याणाचारा। सुखप्रतीक्षा। बहुक्षमा।

(सुबोधिनी-) शीलिकामिभक्ष्याचरिक्षमीक्षिभ्योणः। णप्रत्ययमाह। णोवृद्ध्यर्थः। शील समाधौ मांसं शीलतीति आबतःस्त्रियामित्याप्। मांसशीला। मांसं कामयते इति कमेर्ञिङिति ञिङ्। ञेरिति ञिलोपः। मांसकामा। भक्ष अदने। चुरादिः। मांसं भक्षयतीति मांसभक्षा। कल्याणमाचरतीति कल्याणाचारा। ईक्ष दर्शनादौ। सुखं प्रतीक्षते इति सुखप्रतीक्षा। क्षमूष् सहने। बहून् क्षमते इति बहुक्षमा॥

मू०-आतोडः॥ कर्मण्युपपदे आदन्ताड्डः। गोदः।धनदः।पार्ष्णित्रः।

(सुबोधिनी-) आतोडः। अनुपसर्गादित्येव। डप्रत्ययमाह। अणोऽपवादः। डित्वाट्टिलोपः गां ददातीति गोदः। धनं ददातीति धनदः। पार्ष्णि पश्चात्पदं त्रायते इति पार्ष्णित्रः। अनुपसर्गे किं। गोसंदायः। अण् युक् च॥

(तत्त्वदीपिका-) आतोडः। यद्यपि अप्रत्ययेनैवातोनपीत्यालोपे रूपसिद्धिस्तथाप्युत्तरार्थंडित्वं। तथा च द्विज इत्यादि सिद्धिफलं।

मू०- नाम्निच॥ नाम्युपपदे धातोर्डः। द्विजः। द्विपः। गृहस्थः। गिरिशः। पादपः।

(सुबोधिनी-) नाम्निच। नाममात्र इत्यर्थः। आदंतादित्येव। द्वाभ्यां मुखशुंडाभ्यां पिबतीति द्विपः। गृहे तिष्ठतीति गृहस्थः। गिरावुपपदे डः छंदस्येव नान्यत्र। भाष्याद्यनुक्तत्वात्। गिरौ शेत इति गिरिशः। पादैः पिबतीति पादपः। कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सुकेशोति। गिरिरस्यास्तीति गिरिशः। लोमादित्वाच्छः॥

(तत्त्वदीपिका-) नाम्नि चेति। नाममात्रे इत्यर्थः। द्विप इति। द्वाभ्यां शुण्डादण्डमुखाभ्यां पिबतीति द्विपः। द्विर्जायते इति द्विजः। मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबंधनादित्युक्तेः।

मू०- शुचश्शूद्रे॥ शुचन्द्रवतीति शूद्रः।

(सुबोधिनी-) शुचः शूद्रे। शुचः शब्दस्य शूरादेशो द्रे परे चात्र द्रु धातोर्डप्रत्ययः। द्रु गतौ। शुचं द्रवतीति शूद्रः॥

(तत्त्व०-) शुचः शूद्र इति। शुचशब्द इत्ययमादेशः द्रेपर इत्यर्थः। शुचं द्विजसेवारूपं शोकं द्रवाति प्राप्नोतीति शूद्रः।

मू०- उरसोलोपोमुम्वाडान्तेगमौ॥ उरगः, उरंगः।

(सुबोधिनी-) उरसःसलोपोमुम्वाडांतेगमौ। उरस्शब्दस्य सस्य लोपः गमेर्डश्च वा मुमागमः। उरसा गच्छतीति उरगः॥

(तत्त्व०—) उरसो लोप इति । सस्येत्यर्थः । उरसागच्छतीति विग्रहः ।

मू०— विहायसोविहोमुम्वाडान्तेगमौ ॥ विहगः । विहङ्गः ।

(सुबोधिनी—) विहायसोविहोमुम्वाडांतेगमौ । विहायस्शब्दस्य विह आदेशः गमेर्डश्च वा मुम् । विहायसा आकाशेन गच्छतीति विहगः, विहंगः ॥

मू०— भुजतुरयोर्मुम्वा ॥ डान्तेगमौ । भुजगः, भुजङ्गः । तुरगः, तुरङ्गः ।

(सुबोधिनी—) भुजतुरयोर्मुम् वा । अनयोरुपपदयोर्गमेर्डः अनयोर्मुम् च वा । भुजेन कौटिल्येन गच्छतीति भुजगः, भुजंगः । तुरेण वेगेन गच्छतीति तुरगः, तुरंगः ॥

(तत्त्व०—) भुजग इति । भुजेन कौटिल्येन गच्छतीति विग्रहः ।

मू०— सम्प्रसारणिभ्योडः ॥ कापवादः । प्रज्यः । आव्हः । प्रव्हः ।

(सुबोधिनी—) संप्रसारणिभ्योडः । उपसर्गे आदंतादित्यस्यापवादः । संप्रसारणं येषां धातूनामस्ति ते संप्रसारणिनस्तेभ्यो डः । ज्या वयोहानौ । प्रजिनातीति प्रज्यः । व्हेञ् स्पर्द्धायाम् । आह्वयतीति आह्वः । प्रह्वः ॥

(तत्त्व०—)संप्रसारिणिभ्य इति । कापवाद इति । केचित्तु संप्रसारणं स्यादिति भावः । प्रज्य इति । प्रतिजानातीति विग्रहः ।

मू०— तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः कः ॥ तुन्दपरिमृजोऽलसः । शोकापनुदः सुखस्याहर्ता ।

(सुबोधिनी—) तुंदशोकयोःपरिमृजापनुदोरालस्यसुखाहरणयोःकः । तुंदशोककयोः कर्मणोरुपपदयोराभ्यांकः आलस्यसुखाहरणयोरर्थयोः । नुदोरिति पंचम्यर्थे षष्ठी । पुनः कप्रत्ययमाह । कित्त्वान्न गुणः । मृजूष् शुद्धौ । तुंदं परिमार्ष्टीति तुंदपरिमृजोऽलसः । अत्र मृजेर्वृद्धिरिति वैकल्पिकी वृद्धिर्नेत्येके । स्यादेवेत्यन्ये । नुद प्रेरणे । शोकमपनुदतीति शोकापनुदः । सुखस्याहर्ता । सुखाभिलाषी । अलसादन्यत्र तुंदपरिमार्जः । यश्च संसारासारत्वोपदेशेनशोकमपनुदति स शोकापनोदः । अणेव ॥

(तत्त्व०—) तुंदशोकयोरिति । तुंदशोकयोरुपपदयोःपरिपूर्वोमृजूषशुद्धौ अपपूर्वो नुदप्रेरणे । पंचम्यर्थे षष्ठी । आलस्यसुखाहरणयोरर्थयोः । तुंदपरिमृजोलस इति । य आलस्यात्तुंदं परिमार्ष्टि एवमुच्यते । मृजेर्वावृद्धिरिति तु व्यवस्थितविभाषया न । अलसादन्यत्र तुंदपरिमार्ग एव । शोकापनुद इति । यस्तु संसारानित्यताद्युपदेशेन शोकमेवावापनुदति स शोकापनोद एव ।

मू०— मूलविभुजादेःकः ॥ मूलानि विभुजतीति मूलविभुजोरथः । कुध्रः । महीध्रः । गिरः । गिलः ।

(सुबोधिनी–) मूलविभुजादेःकः । मूलानि विभुजतीति भुजो कौटिल्ये मूलविभुजः । धृञ् धारणे । महीं धरतीति महीध्रः पर्वतः । कुं धरतीति कुध्रः । गॄ निगरणे । गिलतीति ऋतइरितीरू । गिरतेः स्वरे इति वा लः । गिलः ॥

(तत्त्व०–)मूलविभुजादिरिति । मूलविभुज इत्यादे रूपस्यसिद्ध्ये को वक्तव्येति व्याख्येयं ।

मू० – गष्टक् ॥ सामगः । सामगी स्त्री ।

(सुबोधिनी–) गष्टक् । कर्मण्युपपदे अनुपसर्गाद्गायतेष्टक् । टक्प्रत्ययमाह । टः ङित्रत इति ईबर्थः । गैशब्देनतु गाङ् गतौ गास्तुतावित्यनयोर्ग्रहणमनभिधानात् साम गायतीति आतोनपीत्यालोपः । सामगः । स्त्री सामगी । उपसर्गे । किं । सामसंगायः । अण् युक् च ॥

(तत्त्व०–) गष्टगिति । गैशब्दे इत्यस्यैव ग्रहणं न तु गाङ्गतौ । गास्तुतावित्यनयोः। अनभिधानात् । सामगीति ङित्रत इतीप् ।

मू० – पिबतेस्सुराशीध्वोः ॥सुरापी । शीधुपी ।

(सुबोधिनी–) पिबतेः सुराशीध्वोः । सुराशीध्वोरुपपदयोः पिबतेष्टक् । सुरां पिबतीति सुरापी । शीधु मद्यं पिबतीति शीधुपी । अन्यत्र ड एव । क्षीरपा ब्राह्मणी ।

(तत्त्व०–) सुरापीती सुरांपिबतीति विग्रहः । अन्यत्र सुरां पातीति सुरापा क्षीरपा ।

मू० – अटौनाम्निकार्येच ॥ अकारटकारौ प्रत्ययौ । अस्थिहरः श्वा । कवचहरः कुमारः । धनुर्धरो युवा । कुरुचरः । पुरस्सरः । अग्रेसरः । पार्श्वशयः । पृष्ठशयः । शक्तिग्रहः । पूजार्हा । स्तम्बेरमो हस्ती । कर्णेजपः सूचकः । यशस्करी विद्या । श्राद्धकरः । वचनकरः । कर्म्मकरः । दिवाकरः । निशाकरः ।

(सुबोधिनी–) अटौनाम्निकार्येच । अप्रत्ययमाह । अस्थि हरतीति अस्थिहरः कवचं हरतीति कवचहरः । धनुर्धरतीति धनुर्धर । पार्श्वाभ्यां शेते इति पार्श्वशयः । पृष्ठेन शेते इति पृष्ठशयः । शक्तिं गृह्णातीति शक्तिग्रहः । अर्ह पूजायां । पूजामर्हतीति पूजार्हा ब्राह्मणी । स्तंबे रमते इति सप्तम्या अलुक् स्तंबेरमः । कर्णे जपतीति सप्तम्या अलुक् । कर्णे जपः सूचकः पिशुनः । टप्रत्ययमाह । ट ईबर्थः । कुरुषु देशेषु चरतीति कुरुचरः । स्त्री कुरुचरी । पुरः सरतीति पुरःसरः । अग्रे सरतीति एदंतत्वं निपात्यते । अग्रेसरः । हेतुताच्छील्यानुलोम्येषु कृञष्टः । हेतौ । यशः करोतीति यशस्करी । सहादित्वात्सः । ताच्छील्ये । श्राद्धं करोतीति श्राद्धकरः आनुलोम्ये । वचनं करोतीति वचनकरः । एषु किं । कुंभकारः । अणेव । कर्म्मशब्दपूर्वात्कृञोवेतनेटः । कर्मकरोतीति कर्मकरो भृतकः । अन्यः कर्मकारः । अणेव दिवा ऽव्ययं दिवसवाची । दिवा करोतीति दिवाकरः ॥

(तत्त्व०-) अटौ । अश्वटश्च अटौ । कर्मत्वविशेषाविवक्षायामपि यथा स्यादित्येवमर्थं कार्यस्यानुवर्त्तनमन्यथाकार्ये अणेव स्यात् । अस्थिहर इति । अस्थि हरतीति विग्रहः कुरुषु चरतीति टित्वादीप् ।

मू०--इखखि ॥ नाम्नि कार्ये च । शकृत्करिः । स्तम्बकरिः । फलानि गृण्हाति फलेग्रहिः । फलस्यैदन्तत्वं निपातनात् । दृतिहरिः नाथहरिः । देवापिः । वातापिः ।

(सुबोधिनी-) इखखि । स्तंब शकृत् पूर्वात् कृञ इर्व्रीहिवत्सयोरर्थयोः । इप्रत्ययमाह । स्तंबं करोतीति स्तंबकरिर्व्रीहिः । शकृत्पुरीषं करोतीति शकृत्करिर्वत्सः । अनयोः किं । स्तंबकारः । शकृत्कारः । अणेव । फलानि गृह्णातीति एदंतत्वं निपात्यते । फलेग्रहिः । दृतिनाथपूर्वाद्धरतेरिः पशौ कर्तरि । दृतिश्चर्ममयी खल्ला इति ख्याता तां दृतिं हरतीइ दृतिहरिः पशुः । नाथं नासारज्जुं हरतीति नाथहरिः । पशौ किं । दृतिहारः । नाथहारोऽणेव । आप्लृ व्याप्तौ । देवान् आप्नोतीति देवापिः । वातान् आप्नोतीति वातापिः ॥

(तत्त्व०-) इखखि । इश्च खश्च खिश्च एतेषां समाहारः ।

मू०--खितिपदस्य ॥ खिति परे अनव्यय पूर्वपदस्य मुम् । सर्वकषः । कूलंकषः । करीषंकषः ।

(सुबोधिनी-) खितिपदस्य । खिदंते परे अनव्ययस्य पूर्वपदस्य मुम् । खप्रत्ययमाह । खित्त्वान्मुम् । सर्वकूलाभ्रकरीषपूर्वात्कषः खः । कष हिंसायां । सर्वं कषतीति सर्वंकषः खलः । कूलंकषतीति कूलंकषा नदी । अभ्रं । कषतीति अभ्रंकषो वायुः । "करीषं गोमयं शुष्कमित्यमरः" । करीषं कषतीति करीषंकषा वात्या ॥

(तत्त्वदीपिका-) इखखि खितीति । खइद्यस्य खित् तस्मिन् ।

मू०--वाचंयमाद्योनिपात्याः ॥ वाचंयमः । पुरन्दरः । द्विषन्तपः । परन्तपः । कुक्षिम्भरिः । उदरम्भरिः । आत्मम्भरिः ।

(सुबोधिनी-) वाचंयमाद्योनिपात्याः । वाच्पूर्वाद्यमः खो व्रतेर्थे । यमु उपरमे। वाचं यच्छतीति वाचपुरोरदंतत्वं निपात्यते । वाचंयमो मौनव्रती । व्रते किं । अशक्त्यादिना वाचं यच्छतीति वाग्यामः । अणेव । दॄ विदारणे । पुरं दृणातीति पुरंदरः । दॄ भये । दृङ् आदरे । एतयोर्ग्रहणं न । संप्रदायात् । द्विषत्परपूर्वात्तापेः खः । द्विषंतं परं वा तापयतीति ञेरिति ञिलोपः । उपधान्ह्रस्वत्वं निपात्यते । मुमि कृते संयोगांतस्येति नलोपः । द्विषंतपः । परंतपः । खिप्रत्ययमाह । आत्मोदरकुक्षिपूर्वाद्भृञः खिः । आत्मानं बिभर्तीति मुमि कृते संयोगांतस्येति नलोपः ।

आत्मंभरिः । कुक्षिमुदरं वा बिभर्तीति कुक्षिंभरिः । उदरंभरिः । पुनः खप्रत्ययमाह॥

मू०-- आशितेभुवोभावकरणयोः । खः । आशितेन भूयते आशितम्भवः । आशितो भवत्यनेनेति वा ।

(सुबोधिनी-) आशितेभुवोभावकरणयोः । खः । आशितशब्दे उपपदे भवतेः खः भावे करणे च । यावतौदनेनातिथ्यादिर्भोजितो भवति स ओदन आशितंभव उच्यते ॥

(तत्त्व०-) आशितंभव इति यावता ओदनेनातिथ्यादिर्भोजितोभवत्याशितंभवः स एवमुच्यते ।

मू०-- एजांखश् ॥ जनानेजयतीति जनमेजयः । आत्मानम्पण्डितम्मन्यते इति पण्डितम्मन्यः। मुंजं धयतीति मुंजन्धयः। कूलन्धयः ।

(सुबोधिनी-) एजांखश् । एजादिभ्यः खश् । खश्प्रत्ययमाह । खित्त्वान्मुम् शित्वाच्चतुर्वत्कार्य्यम् । एजृ कंपने । जनमेजयतीति अप्कर्तरीत्यप् । अद इत्यलोपो जनमेजयः । पंडितमात्मानं मन्यते इति दिवादेरिति यः पंडितंमन्यः । णिनि प्रत्यये पंडितमानी मुंजं धयतीति अयादेशे न धेटो धय् । मुंजंधयः ॥

(तत्त्व०--) एजामिति । बहुवचनमाद्यर्थं ।

मू०--खशन्तेपूर्वपदस्यानव्ययस्यन्हस्वः ॥ मुष्टीं धमतीति मुष्टिंधमः नाडिन्धमः । नासिकंधयः । अनव्ययस्य किम् । दिवामन्या-रात्रिः । दोषामन्यमहः । कूलमुद्रुजः । कूलमुद्वहः । अरुन्तुदः ।

(सुबोधिनी-) खशंतेपूर्वपदस्यानव्ययस्यन्हस्वः । मुष्टीं धयतीति मुष्टिंधयः मुष्टीं धमतीति मुष्टिंधमः । नाडीं धमतीति नाडिंधमः । नासिकां धयतीति नासिकंधयः । नाडीमुष्टीनासिकानां न्हस्वः । दृशादेरिति ध्माधातोर्धम् धेटोऽयादेशः अनव्यस्य किं । दिवामन्या रात्रिः। दोषामन्यमहः । रुज भंगे । कूलमुद्रुजतीति कूलमुद्रुजः । तुदादेरित्यः कूलमुद्वहतीति कूलमुद्वहः । अरुस्तुदतीति अरुंतुदः । मुमि कृते संयोगांतस्येति सलोपः । व्रणोस्त्रियामीर्ममरुरिति । " अरुंतुदस्तुमर्मस्पृगिति चामरः " ॥

(तत्त्वदीपिका) अरुंतुद इति । व्रणोस्त्रियामीर्ममरुः । अरुः तुदतीति विग्रहः । उकारादग्रे । मुमिकृते संयोगांतस्येति सलोपः ।

मू०-- दारावाहनोऽणन्तस्यचटःसंज्ञायाम् ॥ हनोघत् उवम् । दारुआहन्तीति दार्वाघाटः ।

(सुबोधिनी-)दारावाहनोऽणंतस्यचटःसंज्ञायाम् । दारुशब्दे उपपदे आङ्पूर्वाद्धंतेरण् अंतस्य तस्य टश्च स्यात् । पुनरण्प्रत्ययमाह । णित्त्वाद्वृद्धिः । दारु आहं-

तीति हनोघदिति घत् । उवमिति वः। दार्वाघाटः । सूत्रे शब्दापेक्षया दारातिति पुंस्त्वं । "काष्ठंदार्विन्धनंत्वेध" इत्यमरः । टकारविधानार्थमिदं सूत्रम् । अण् तु कार्येऽणित्यनेनैव सिद्धः । अंतग्रहणं स्पष्टार्थम् ॥

सू०--चारौवा ॥ चार्वाघाटः, चार्वाघातः ।

(सुबोधिनी-) चारौवा । चारुशब्दे उपपदे आङ्पूर्वाद्धंतेरण् वा टः । चारु आहंतीति चार्वाघाटः, चार्वाघातः ।

सू०--कर्मणि सम्पूर्वाच्च ॥ वर्णान् संहन्तीति वर्णसंघाटः, वर्णसंघातः । पदं संहन्तीति पदसंघाटः, पदसंघातः ।

(सुबोधिनी-) कर्मणिसंपूर्वाच्च । कर्मण्युपपदे संपूर्वाद्धंतेरण् वा टः । वर्णान् संहंतीति वर्णसंघाटः, वर्णसंघातः 'एवं पदानि संहंतीति पदसंघाटः पदसंघातः॥

सू०--जायापत्योष्टक्लक्षणवतिकर्तरि ॥ गमांस्वरे । हनोघ्ने । जायां हन्तीति जायाघ्नो ना । पतिघ्नी स्त्री ।

(सुबोधिनी-) जायापत्योष्टक्लक्षणवतिकर्त्तरि । हंतेष्टक् टक्प्रत्ययमाह । टित्वात् ङ्विति इतीप् । मरणसूचकं पाणिरेखादिकं लक्षणम् यस्यास्ति स लक्षणवान् तस्मिन् कर्त्तरि सति । जायांहतीति गमांस्वरे इत्युपधालोपः हनोघ्ने हति घः जायाघ्नो ना । पतिघ्नी स्त्री ॥

(तत्त्व०-) जायापत्योरिति । कथं प्रलंबघ्नः कृतघ्नः शत्रुघ्न इत्यादि मूलविभुजादित्यादित्वात् को बोध्यः ।

सू०-- अमनुष्यकर्तृकेच॥ पतिघ्नी पाणिरेखा । जायाघ्नस्तिलकालकः।

(सुबोधिनी-) अमनुष्यकर्तृकेच । कर्मण्युपपदे हंतेष्टक् मनुष्यभिन्ने कर्तरि सति जायाघ्नस्तिलकालकः । पित्तघ्नं घृतम् । अमनुष्येति किम् । आखुघातः, शूद्रोऽणेव । कथं तर्हि बलभद्रः प्रलंबघ्न इति शत्रुघ्नः कृतघ्नः इति । मूलविभुजादित्वात्कः ॥

सू०-- पाणिघताडघौशिल्पिनिनिपात्यौ ॥ पाणिघः । ताडघः । शिल्पिनि किम् । पाणिघातः । ताडघातः ।

(सुबोधिनी-) पाणिघताडघौशिल्पिनिनिपात्यौ । पाणिताडयोरुपपदयोर्हन्तेष्टक् । टिलोपघत्वे निपात्येते इति । पाणिं हन्तीति पाणिघः । ताडं हंतीति ताडघः क्रियासु कौशल्यं शिल्पं तदस्यास्तीति शिल्पी । शिल्पिनि किम् । पाणिघातस्ताडघातः । कार्येणित्यण् ॥

(तत्त्व०-) शिल्पनीति । क्रियासु कौशलं शिल्पं तदस्यास्तीति शिल्पी तस्मिन् ।

सू०-राजघश्च ॥ राजानं हन्तीति राजघः ।

(सुबोधिनी-) राजघश्च । राज्ञि हंतेष्टक् टिलोपघत्वे च । राजानं हंतीति राजघः॥

मू०--भजांविण्॥ वेः वेर्लोपः। अर्द्धभाक्। सुखभाक्। तुराषाट्। भारवाट्

(सुबोधिनी-) भजांविण्। नाम्न्युपपदे भजादेर्विण्। विण् प्रत्ययमाह। णित्वाद्वृद्धिः। वेरिति विलोपः। अर्द्धं भजतीति अर्द्धभाक्। चोःकुरिति कः। सुखं भजतीति सुखभाक्। षहमर्षणे तुरां सहते इति सहेः साढिति षत्वम्। तुराषाट्। केचित्तुरशब्दमदंतमाहुः। तन्मतेऽन्येषामपीति पूर्वपदस्य दीर्घः॥

(तत्त्वदीपिका-) भजामिति। बहुवचनमाद्यर्थं। तुराषाडिति। तुरं वेगं सहते इति विग्रहः। अन्येषामपीति अन्त्यस्वरस्य दीर्घः। सहादित्वाद्वा। तुरं न सहत इति कश्चित्। तद्बहूनामसंमतम्।

मू०--अभूततद्भावेकृभ्वस्तियोगेनाम्नश्विः॥च्वौदीर्घईचास्य। च्वौपरे ऽवर्णस्य ई। इदुतोर्दीर्घः। मिथुनीकरणम्। शुक्लीभावः। शुचीभवति। सहायीस्यात्। हेतूकृतम्।

(सुबोधिनी) अभूततद्भावेकृभ्वस्तियोगेनाम्नश्विः। नाम्नश्विप्रत्ययः न प्राग्भूतमभूतम्। अभूतस्य भवनमभूततद्भावस्तस्मिन्नर्थे कृ भू अस् एषां धातूनामन्वये सति च्विप्रत्ययमाह। च्वौ दीर्घईचास्य। च्वौपरे अवर्णस्य ईकारः इदुतोश्च दीर्घः। च्वौइति विशेषणार्थं। वेरिति विलोपः। क्त्वाद्यंतं चेति च्व्यंतस्याव्ययत्वाद्विभक्तेर्लुक्। अमिथुनं मिथुनं क्रियत इति मिथुनीकरणम्। अशुक्लस्य शुक्लेन स्वभवनमिति शुक्लीभावः। असहायःसहायः स्यादिति सहायीस्यात्। अहेतुना हेतुना कृतमिति हेतूकृतम्। कृभ्वस्तियोगे इति किम्। अशुक्लः शुक्लो जायते॥

मू०-च्वौसलोपः॥ सुमनीभावः। अरूकरोति। चक्षूकरोति। सुचेतीभावः। रहीभवति। विरजीकरोति।

(सुबोधिनी-)च्वौसलोपः। अरुर्मनश्चक्षुश्चेतोरहोरजसांसस्यलोपः च्विप्रत्यये। असुमनसः सुमनसा भवनमिति सुमनीभावः। अनरुररुः करोतीति अरूकरोति। अचक्षुश्चक्षुः करोतीति चक्षूकरोति असुचेताः सुचेताः भवतीति सुचेतीभवति। अरहो रहो भवतीति रहीभवति। अविरजो विरजः करोतीति विरजीकरोति॥

मू०-क्वचिड्डा॥ सुखं करोतीति सुखाकरोति। दुःखाकरोति। शंबाकरोति। द्विगुणाकरोति। बीजाकरोति।

(सुबोधिनी-। क्वचिड्डा। नाम्नो डाप्रत्ययः कृञो योगे। दुःखात् प्रातिलोम्ये डा। डाप्रत्ययमाह डित्त्वाट्टिलोपः। क्त्वाद्यंतंचेति डाप्रत्ययांतस्याव्ययत्वाद्विभक्तेर्लुक्। दुःखाकरोति। स्वामिनं पीडयतीत्यर्थः। सुखप्रियाभ्यामानुलोम्ये डा। सुखाकरोति, प्रियाकरोति वा गुरुं। अनुकूलाचरणेनानंदयतीत्यर्थः। शंबद्विगुणबीजेभ्यो डा कृषिवाच्ये। शंबाकरोति। शंबशब्दः प्रतिलोमेऽर्थेऽस्ति। अनुलोमं

कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षतीत्यर्थः। क्षेत्रं द्विगुणाकरोति। क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः। बीजाकरोति। काशिकायां बीजशब्दो बीजवापनसहितविलेखने वर्त्तते। बीजवापनसहितं विलेखनं करोतीत्यर्थः॥

(तत्त्वदी०–) दुःखीकरोति पीडयतीत्यर्थः सुखी करोति। अनुकूलाचरणेनानंदयतीत्यर्थः। शंबाकरोति। अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षतीत्यर्थः। द्विगुणाकरोति। क्षेत्रं क्षेत्रकर्मकं द्विगुणं करोतीत्यर्थः। बीजाकरोति। बीजेन सह करोतीत्यर्थः।

मू०–अव्ययस्यच्वावीत्वंन॥ दोषाभूतमहः। दिवाभूता रात्रिः। हसात्परस्य। यकारस्य लोपश्च्वौ। अगार्ग्यो गार्ग्यो भवति गार्गीभवति।

(सुबोधिनी–) अव्ययस्यच्वावीत्वंन। पुनः च्विप्रत्ययमाह। अदोषाभूतमिति दोषाभूतमहो दिनं। अदिवा दिवाभूतेति दिवाभूता रात्रिः। ण्यःयनणेयणीया इति ण्यः। गार्ग्यः। अगार्ग्यो गार्ग्यो भवति हसात्तद्धितस्येति यलोपे च्वावितीत्वे च गार्गीभवति॥

मू०– रीङृतः॥ मात्रीकरोति।

(सुबोधिनी–) रीङृतः। ऋकारस्य रीङ् स्यात् च्वौ। अमातरं मातरं करोतीति मात्रीकरोति॥

मू०–च्विविषयेसाद्वा॥

(सुबोधिनी–) च्विविषयेसाद्वा। नाम्नोऽभूततद्भावे एवं सात्प्रत्ययो वा स्यात् साकल्येऽर्थे। सात्प्रत्ययमाह। सात्प्रत्ययस्याव्ययत्वाद्विभक्तेर्लुक्॥

मू०–सात्पदाद्योः॥ सस्य षत्वं न। अग्निसाद्भवति। अग्नीभवति।

(सुबोधिनी–) सात्पदाद्योः। सात्प्रत्ययस्य पदादौ वर्त्तमानस्य च सस्य षत्वं न। दधि सिंचति। किलादिति षत्वे प्राप्ते निषेधः। अनग्निरग्निर्भवतीति अग्निसाद्भवति। कृत्स्नं सर्वावयवोपेतं शस्त्रमग्नीभवतीत्यर्थः। सादभावपक्षे च्विरेव। साकल्ये किम्। एकदेशेन शुक्लीभवति पटः॥

मू०–सम्पदायोगेच॥ जलसात्सम्पद्यते।

(सुबोधिनी–) संपदायोगेच। नाम्नः संपद्धातुयोगे सात्प्रत्ययो वा भवति। अजलं जलं संपद्यते इति। लवणं जलसात्संपद्यते। पक्षे संपदायोगे वाक्यमेव॥

मू०–अधीनेच॥ राजसात्सम्पद्यते।

(सुबोधिनी–) अधीनेच। नाम्नस्तदधीनेऽर्थे सात् स्यात् कृभ्वस्तिसंपद्योगे। राजाधीनं संपद्यते इति। नाम्नोनोलोपशिति नलोपः राजसात्संपद्यते। राजाधीनं करोतीति राजसात्करोति॥

मू०–देयेत्राच॥ विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रासम्पद्यते। विप्रसात्करोति।

(सुबोधिनी-) देयेत्राच । नाम्नस्तदधीने देयेऽर्थे त्रा प्रत्ययः स्यात् चात्सादपि कृभ्वस्तिसंपद्योगे। त्राप्रत्ययमाह । अव्ययत्वाद्विभक्तेर्लुक् । विप्राधीनं देयं करोतीति विप्रत्राकरोति विप्राधीनं देयं संपद्यते इति विप्रत्रा संपद्यते । देये किम् । राजसाद्भवति राष्ट्रम् ॥

मू०-देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्यन्तेभ्योवात्रा ॥ देवत्रावन्दे । देवंवन्दे ।

(सुबोधिनी-) देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्यंतेभ्योवा त्रा । द्वितीयांतेभ्यः सप्तम्यंतेभ्यश्चैभ्यस्त्रा वा स्यात् । देवान् इति देवत्रावंदे । देवेषु इति देवत्रा रमे । मनुष्यान् इति मनुष्यत्रा गच्छति । मनुष्येषु इति मनुष्यत्रा वसति । पुरुषान् इति पुरुषत्रागच्छति । पुरुषेषु इति पुरुषत्रा वसति । पुरून् इति पुरुशब्दोऽत्र बहुशब्दपर्यायः । "पुरुः परागे प्रचुरे स्वर्लोकनृपभेदयोरिति हैमः" । पुरुत्रागच्छति । पुरुषु इति पुरुत्रावसति । मर्त्यान् इति मर्त्यत्रा गच्छति । मर्त्येषु इति मर्त्यत्रावसति ॥

मू०-ख्युट्करणे आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेषूपपदेषु कृञः करणेऽर्थे ख्युट्प्रत्ययः । अनाढ्यमाढ्यं करोत्यनेनाढ्यंकरणम् । सुभगंकरणम् । स्थूलंकरणम् । दधि पलितंकरणम् । नग्नंकरणं । द्यूतम् अन्धंकरणम् । प्रियंकरणम् ।

(सुबोधिनी-) ख्युट्करणे । ख्युट्प्रत्ययमाह । खः खितिपदस्येति मुमर्थः । ट ईबर्थः। युवोरित्यनः । आढ्यंकरणं । एवं सुभगंकरणं । स्थूलंकरणं । पलितंकरणं । नग्नंकरणं । अंधंकरणं । प्रियंकरणं ॥

(तत्त्व०-)च्व्यर्थेष्विति। अभूततद्भावविषयेष्वित्यर्थः। आढ्यंकरणमिति खित्वान्मुम्।

मू०-भुवः खिष्णुखुकञौकर्तरि॥ अनाढ्य आढ्यो भवति । आढ्यम्भविष्णुः । आढ्यंभावुकः ।

(सुबोधिनी-) भुवःखिष्णुखुकञौकर्त्तरि । आढ्यादिषु च्व्यर्थेषूपपदेषु भवतेरेतौ स्तः खिष्णुप्रत्ययमाह । खित्त्वान्मुम् । आढ्यंभविष्णुः । एवं सुभगंभविष्णुः । स्थूलंभविष्णुः । पलितंभविष्णुः नग्नंभविष्णुः अंधंभविष्णुः । प्रियंभविष्णुः । खुकञ्प्रत्ययमाह । खित्त्वान्मुम् । ञित्त्वाद्वृद्धिः अनाढ्य आढ्यो भवतीति आढ्यंभावुकः । एवं सुभगंभावुकः। स्थूलंभावुकः। पलितंभावुकः। अंधंभावुकः। प्रियंभावुकः

मू०-आतोमनिप्क्वनिब्वनिपः ॥ नाम्न्युपपदे आदन्ताद्धातोरेते प्रत्ययास्स्युः।सुदामा।अश्वे तिष्ठतीति अश्वत्थामा।निपातात्सस्यतः।

(सुबोधिनी-) आतोमनिप्क्वनिब्वनिपः । प्रत्ययानाह । पित्त्वात्तुक् । कित्त्वान्नगुणः । इकार उच्चारणार्थः सुष्ठु ददातीति नोपधाया इति दीर्घः। नाम्नोनोलोपशिति न लोपः सुदामा ॥

सू०-स्थामि ॥ तादौ किति दो सो मा स्थामिर्भवति ।

(सुबोधिनी-) स्थामि । दोऽवखंडने । षोंऽतकर्म्मणि । मा माने । माङ् माने । मेङ् प्रणिदाने । इति त्रयाणां ग्रहणम् । ष्ठागतिनिवृत्तौ । एषामित्वं स्यात् तादौ किति । ईत्वदत्वयोरपवादः ॥

(तत्त्वदीपिका-) स्थामि । स्थाम् इतिछेदः इत्यभि प्रेत्याह । दोसो इत्यादि ।

सू०-शाछोर्वा ॥

(सुबोधिनी-)शाछोर्वा । शो तनूकरणे । छो छेदने । अनयोरित्वं वा तादौ किति॥

सू०-अपिद्दाधगैहाक्पिबतीनामीः ॥ किति हसे क्विपि वा । न तु क्यपि। सुपीवा । घृतपीवा । भूरिदीवा । अनादन्तादपि । अपिशब्दान्निरुपपदेभ्योऽपि । सुकर्मा । ह्रस्वस्यपितिकृतितुक् । प्रातरित्वा । वनिपि ।

(सुबोधिनी-)अपिद्दाधागैहाक्पिबतीनामीः दो अवखंडने । देङ् पालने। दाण् दाने डुदाञ् दाने । एषां चतुर्णां ग्रहणं । धेट् पाने । डुदाञ् धारणपोषणयोरित्युभयोर्ग्रहणं। गै शब्दे । ओहाक् त्यागे । पा पाने । एषामीत्वं स्यात् किति हसे। क्विपि तु ईत्वं वा क्यपि ईत्वं न। सुष्ठु पिबतीति कित्त्वान्न गुणः। सुपीवा । घृतं पिबतीति घृतपीवा । अनादंतादपि एते प्रत्ययाः स्युः शॄ हिंसायां सुष्ठु शृणातीति इवत्योरितोण् न । सुशर्मा । ह्रस्वस्यपितिकृति तुक् ह्रस्वस्य तुगागमः स्यात् पिति कृति । इण् गतौ । प्रातरेतीति प्रातरित्वा वनिपि ॥

वनिप **सू०-ञमस्यात्वम् ॥** विशेषेण जायते विजावा । ओणृ ओणती त्यवावा । पारदृश्वा । राजयुध्वा । सुत्वा । धीवा । पीवा ।

(सुबोधिनी-) ञमस्यात्वं । ञमांतस्य धातोरात्वं स्यात् वनिपि । षष्ठीनिर्दिष्टस्येत्यंतस्यादेशः । जनी प्रादुर्भावे । विजायते इति विजावा । ओणृ अपनयने ओणतीति अनुनासिकस्यात्वे अनादेशे च अवावा । कर्मण्युपपदेश दृशेः क्वनिप्। भूते इति केचित्। पारं दृष्टवान् इति पारदृश्वा । वर्त्तमानेपि स्यात् विश्वदृश्वनयनावयमित्यत्र विश्वं पश्यंतीति विश्वदृश्वानि नयनानि येषां ते विश्वदृश्वनयना इति वर्त्तमानेन विग्रहेऽपि न क्षतिः । युध संप्रहारे । राजानं युध्यते इति राजयुध्वा । षुञ् अभिषवे सुनोतीति ह्रस्वस्येति तुक् । सुत्वा । दधातीति अपिद्दाधेतित्वं धीवा । पिबतीति पीवा ॥

(तत्त्वदीपिका-) आवावेति ओणोणस्यात्वे ओतोऽवादेशे रूपं। पारदृश्वेति। पारदृष्टवान्। राजयुध्वेति। अन्तर्भावितण्यर्थो युधिः। राजानं योधितवान्।

मू०-क्विप्॥ धातोः क्विप्स्यात्। कर्मकृत्। मोनोधातोः। प्रशान्। प्रदान्। अग्निचित्। सोमसुत्। सोमपाः। सर्वदृक्। दिशू अतिसर्जने। दिक्।

(सुबोधिनी-) क्विप्। सर्वधातुभ्यः क्विप् स्यात्। क्विप्प्रत्ययमाह। कित्त्वान्न गुणः पित्त्वात्तुक् वेरिति विलोपः। कर्म करोतीति कर्मकृत्। प्रशाम्यतीति ज्मांतस्येति दीर्घः मोनोधातोरिति नत्वम्। प्रशान् सोमंसुनोतीति सोमसुत्। अग्निंचिनोतीति अग्निचित्। सोमं पिबतीति अपिद्धाघेति क्विपि वेत्वं सोमपाः। सर्वं पश्यतीति सर्वदृक्। दिशमिति कः। दिश अतिसर्जने। दिशतीति दिक्॥

मू०-क्विपिवचिप्रच्छयायतस्तुकटप्रुजुश्रीणांदीर्घोसम्प्रसारणञ्च॥वाक्। क्ङिति झसे क्वौ ञमे चेति छस्य शो वस्य ऊः। तत्त्वप्राट्। तत्त्वप्राशौ। आयतस्तूः। कटप्रूः। जु गतौ। जूः। श्रीः।

(सुबोधिनी-) क्विपिवचिप्रछ्यायतस्तुकटप्रुजुश्रीणांदीर्घोऽसंप्रसारणंच। एषां दीर्घः संप्रसारणाभावश्च स्यात्क्विपि। वच परिभाषणे। प्रच्छ ज्ञीप्सायां। आयतपूर्वः ष्टुञ् स्तुतौ। कटपूर्वः प्रुङ् गतौ। जु गतौ। श्रिञ् सेवायां। वक्तीति चोःकुरिति कः। वाक्। तत्त्वं पृच्छतीति क्ङिति झसे क्वौ ञमेचेति छस्य शः छशषेतिषः। षोड इति डः तत्त्वप्राड्। आयतं स्तौतीति आयतस्तूः। कटं प्रवते इति कटप्रूः। जवतीति जूः। हरिं श्रयतीति हरिश्रीः। वचि प्रच्छयोः संप्रसारणभावः॥

(तत्त्वदीपिका-) वागिति। वक्तीति विग्रहः। तत्त्वप्राडिति तत्वं पृच्छति। एवमदपिकर्त्तरि।

मू०-ध्यायतेःक्विपिसम्प्रसारणम्॥ सुधीः।

(सुबोधिनी-) ध्यायतेःक्विपिसंप्रसारणम्। ध्यै चिन्तायाम्। सुष्ठु ध्यायतीति सुधीः॥

मू०-गमादीनांञमस्यलोपः॥ क्विपि क्यपि वा। अङ्गगत्। परीतत्। संयत्। सुनत्।

(सुबोधिनी-) गमादीनांञमस्यलोपः क्विपि क्यपि वा। गम् तनु यम् णम् इत्यादीनामनुनासिकस्य लोपः स्यात्क्विपि तु वा। अङ्गंगच्छतीति ह्रस्वस्यपित्तीति तुक्। अंगगत्। परि तनोतीति परीतत्। नहिवृत्तिवृषिव्यधीति पूर्वस्य दीर्घः। संयच्छतीति संयत्। सुनमतीति सुनत्॥

मू०-ऊङ्च॥ अग्रेगूः। अग्रेभ्रूः।

(सुबोधिनी-) ऊङ्च। गम्यादीनामूङादेशो ञमस्य लोपश्च स्यात्क्विपि। ङित्वादंत्यस्यादेशः।अग्रे गच्छतीति अग्रेगूः अग्रे भ्रमतीति अग्रेभ्रूः। सप्तम्या अलुक्॥

(तत्त्वदीपिका--) अग्रेगूः। अग्रे गच्छतीति।

मू०--द्युतिगमिजुहोतीनांक्विपिद्वित्वम्॥ दिद्युत्। जगत्।

(सुबोधिनी-) द्युतिगमिजुहोतीनांक्विपिद्वित्वं। द्योतते इति द्युतेः पूर्वस्येति संप्रसारणं। दिद्युत्। गच्छतीति गम्यादीनामिति मलोपः ह्रस्वस्येति तुक् जगत्॥

मू०--जुहोतेर्दीर्घः॥ जुहूः।

(सुबोधिनी-) जुहोतेर्दीर्घः। अस्य दीर्घः स्यात्क्विपि। जुहोत्यनयेति जुहूः। करणस्य कर्तृत्वविवक्षायां क्विप्॥

मू०--पदान्तस्यानितेर्नस्यणत्वमुपसर्गस्थान्निमित्तात्॥ अन प्राणने। हेप्राण्। मित्राणि शास्तीति मित्रशीः।

(सुबोधिनी-) पदांतस्यानितेर्नस्यणत्वमुपसर्गस्थान्निमित्तात्। उपसर्गस्थान्निमित्तात् परस्य पदांतस्यानितेर्नस्य णत्वं स्यात्। अन प्राणने। प्रकर्षेण अनितीति संबोधने हे प्राण्। अत्रञमांतस्येतिदीर्घो नाम्नो नोलोपशिति सूत्रे अधाबित्युक्त्वा न्नलोपो न। शासु अनुशिष्टौ। क्विपो लोपे प्रत्ययलोपेप्रत्ययलक्षणमिति न्यायेन झसादिक्वित्प्रत्ययपरत्वात् शासेरिरितीकारः। घसादेरिति षः। दोषामिति रः। य्वोर्विहसे इति दीर्घे मित्रशीः॥

(तत्त्वदीपिका-) हेप्राणिनि। नाम्नो नोलोपश्धावित्यत्राधाविति निषेधाद्धावेव नलोपाभावोन्यत्र भ्यामादौ भवत्येव वेति सूचनाय संबोधनान्तमेवोदाहृतं।

मू०--आशासःक्वावुपधायाइत्वम्॥ आशीः। गीः। पूः।

(सुबोधिनी-) आशासःक्वावुपधायाइत्वम्। आङःशासु इच्छायामित्यात्मनेपदी। शासेरितिसूत्रेणेत्वेसिद्धे आशास उपधाया इत्वं क्वावेव नान्यत्रेति नियमार्थमिदं सूत्रं तेनाऽऽशास्ते इत्यत्रेत्वं न भवति। आशास्ते इति आशीः। गॄ निगरणे। गिरतीति ऋतइरितीर्य्वोर्विहसे इति दीर्घः। गीः। पॄ पालनादौ। पिपर्त्तीति पोरुरित्युर् य्वोर्विहसे इति दीर्घः॥

मू०--इस्मन्त्रन्क्विपुच्छादेर्ह्रस्वः॥ छद अपवारणे। चुरादिः। तनुं छादयतीति तनुच्छत्। अक्षद्यूः। रेफाच्छ्वोर्लोपः। क्वौ झसादौ हे च प्रत्यये। मूः मुरौ। धूः। धुरौ।

(सुबोधिनी-) इस्मन्त्रन्क्विपुछादेर्ह्रस्वः छद अपवारणे। ण्यंतस्य अस्य ह्रस्वः स्यात् एषु परेषु। इसि प्रत्यये छादिः। मन् प्रत्यये छद्म। त्र प्रत्यये छत्रम्। क्विपि तु तनुं छादयतीति ञेरिति ञिलोपः। तनुछत् दिवु क्रीडादौ। अक्षैर्दीव्य-

तीति क्विङति झसे कौ च्मेचेति वस्य ऊः । अक्षद्यूः । मुर्छा मोहसमुच्छ्राययोः । मूर्छतीति रेफाच्छ्वोरिति छलोपः । य्वोर्विहसे इति दीर्घः । मूः । धुर्वी हिंसायाम् धूर्वतीति रेफाच्छ्वोरिति वलोपः धूः ॥

(तत्त्व०-) तनुच्छदिति । तनुं च्छादयतीति विग्रहः । अक्षैर्दीव्यतीति अक्षद्यूः।मूरिति । मूर्छतीति विग्रहः ।

मू०--दुहःकोघोन्तादेशश्च ॥ कामदुघा ।

(सुबोधिनी-) दुहःकोघोन्तादेशश्च । दुहः कप्रत्ययो हस्य घश्च स्यात् । कप्रत्ययमाह । कित्त्वाद्गुणो न कामं दोग्धीति कामदुघा धेनुः ॥

मू०--दृशेष्टक्सकौचोपमानेकार्ये ॥ उपमाने कर्मण्युपपदे दृशेष्टक् सकौचात्क्विप् ।

(सुबोधिनी-) दृशेष्टक्सकौचोपमानेकार्य्ये । टक्सकौ प्रत्ययावाह । टित्त्वादीप् । कित्त्वाद्गुणो न ॥

मू०-आसर्वादेः॥ एषु परेषु सर्वादेष्टेरात्वम् । अन्यादृशः । अन्यादृक्षः । अन्यादृक् । तादृशः तादृक्षः तादृक् ।

(सुबोधिनी-) आसर्वादेः । सर्वादेष्टेरात्स्यात् । दृक् दृश् दृक्षेषु परेषु । अन्यमिव पश्यतीति अन्यादृशः । ईपि अन्यादृशी । छशषेति षत्वं षढोरिति कत्वं । अन्यादृक्षः क्विपि अन्यादृक् । तमिव पश्यतीति तादृशः । ईपि तादृशी । तादृक्षः । तादृक् ॥

(तत्त्वदीपिका-) एषु परेष्विति एवं चोपमाने कर्मोपदनिमित्तकटक्सक्क्विपि एषु परेषु सर्वादेष्टेरात्वं नान्यत्र । तेन सर्वं पश्यतीति सर्वदृगित्यत्र न उपमानाभावात् । अन्यादृश इति । अन्य इव दृश्यते इति विग्रहः। एवमन्यत्रापि । अत्राहुः कर्त्तरि कृतोविधानात् कर्मार्थताऽयुक्ता तमिव पश्यतीति चेत् न कर्मण्यणबाधात् । अपेक्षितार्थानुपस्थितेश्च । अत्र भाष्यं स इव भवति तादृशेति । कर्मकर्त्तरि व्युत्पत्तिः बाहुलकात्कर्मण्यपीति तु बहवः॥

मू०--किमिदमःकीश् ॥ कीदृशः कीदृक्षः कीदृक् । ईदृक्षः ईदृशः । ईदृक् । भवादृशः । भवादृक्षः भवादृक् । यादृक् । अदसोऽमूस्स्यादृक्दृशदृक्षेषु । अमूदृक्षः । अमूदृशः । अमूदृक् । मादृशः । मादृक्षः । मादृक् । त्वादृशः। त्वादृक्षः। त्वादृक् । युष्मादृशः। युष्मादृक्षः। युष्मादृक् । अस्मादृशः समानस्यसः । सदृशः । सदृक्षः । सदृक् ।

(सुबोधिनी-) किमिदमःकीश् । किमशब्दस्य इदम् शब्दस्य च की ईश् आदेशौ स्तः। कमिव पश्यतीति कीदृशः । ईपि कीदृशी । कीदृक्षः । कीदृक् । इदमिव पश्यतीति ईदृशः । ईपि ईदृशी । ईदृक्षः ईदृक् । भवंतमिव पश्यतीति भवादृशः । ईपि

भवादृशी । भवादृक्षः । भवादृक् । यमिव पश्यतीति यादृशः । ईपि यादृशी । यादृक्षः । यादृक् । अमुमिव पश्यतीति अदसष्टेरात्वे कृते दस्यम इति मः मादू इत्यूत्वं । अमूदृशः ईपि अमूदृशी । अमूदृक्षः । अमूदृक् । मामिव त्वामिव च पश्यतीति त्वन्मदेकत्वे इति त्वन्मदो टेरात्वे च । मादृशः । ईपि मादृशी । मादृक्षः । मादृक् । त्वादृशः ईपि त्वादृशी । त्वादृक्षः । त्वादृक् । अस्मानिव युष्मानिव च पश्यतीति अस्मादृशः । ईपि अस्मादृशी । अस्मादृक्षः । अस्मादृक् युष्मादृशः। ईपि युष्मादृशी । युष्मादृक्षः । युष्मादृक् ॥

मू०-- णिनिरतीते ॥ धातोरतीते काले शीले च णिनिः । अग्निष्टोमेनायाक्षीत् । यजनशीलो वा । अग्निष्टोमयाजी । पितृव्यघाती । उष्णभोजी ।

(सुबोधिनी-) णिनिरतीते । नाम्न्युपसर्गे चोपपदे धातोरतीते काले ताच्छील्ये णिनिः स्यात् कर्त्तरि । णिनिप्रत्ययमाह । णित्त्वाद्वृद्धिः । इकार उच्चारणार्थः । यजदेवपूजादौ । अग्निष्टोमेनेष्टवान् इति इनामिति दीर्घः । अग्निष्टोमयाजी । स्तोत्रेण समाप्यमानो यो यागः सोऽग्निष्टोमः पितृव्यं हतवानिति हनो घत् इति घत् । पितृव्यघाती । शीले तु उष्णं भोक्तुं शीलमस्येति उष्णभोजी । शीले किम् उष्णं भुङ्क्ते कदाचित् ॥

(तत्त्वदीपिका-) णिनिरतीते । शीले तृन्नित्यतः शीलेत्यनुवर्त्तते । अग्निष्टोमेनायाक्षीदिति नन्वग्निष्टोमस्य कर्मणा मध्ये यत्वेनाभेदात्कथं करणत्वमस्येति चेत्सत्यं भ्यामोपि फलोत्पादनायां करणं संभवतीत्याकरे सवाहित्वात् । अग्निष्टोमः फलभावनायां करणं भवत्येव । उष्णभोजीति । उष्णं भोक्तुं शीलमस्येति विग्रहः ।

मू०-- व्रतेच ॥ स्थण्डिलशायी ।

(सुबोधिनी-) व्रतेच । व्रतेऽर्थे णिनिः स्यात् । स्थंडिले शेते व्रतार्थमिति स्थंडिलशायी । बहुलमाभीक्ष्ण्ये । णिनिः । आभीक्ष्ण्यं पौनःपुन्यं क्षीरपायिन उशीनराः । एतत्सर्वमनुक्तसमुच्चयार्थ कचशब्दानुवृत्तेर्लभ्यते ॥

मू०- क्विब्वनिब्डाः॥ धातोरतीते शीले चैते । ब्रह्महा । भ्रूणहा । वृत्रहा । सुकृत् । धर्मकृत् । पापकृत् । अग्निचित् । सोमसुत् । यज्वा । सरसिजम् । सरोजम् । संस्कारजः । प्रजा । अजः । द्विजः । परितः खाता परिखा ।

(सुबोधिनी-) क्विब्वनिब्डाः । पुनः क्विब्वनिब्डप्रत्ययानाह क्त्वाद्गुणो न पित्वातुक् डित्वाट्टिलोपः इकार उच्चारणार्थो वेरिति विलोपः । ब्रह्मभ्रूणवृत्रेषु कर्मसूपपदेषु हंतेः क्विप् नान्यत्र । ब्रह्माणं हतवानिति इनामिति दीर्घः । ब्रह्महा ।

भ्रूणं गर्भं हतवानिति भ्रूणहा । वृत्रं दैत्यं हतवानिति वृत्रहा इन्द्रः । कर्मकृतवानिति कर्मकृत् । पापं कृतवानिति पापकृत् । अग्निं चितवानिति अग्निचित् । षुञ् अभिषवे । सोमं सुतवानिति सोमसुत् । वनिपि तु यज देवपूजादौ । इष्टवानिति नोपधाया इति दीर्घः यज्वा । डप्रत्यये तु जनी प्रादुर्भावे सरसि जातमिति सरसिजं । सरोजं । सप्तम्या अलुग् वा संस्काराज्जात इति संस्कारजः । प्रकर्षेण जातेति प्रजा । आबत इत्याप् " प्रजा स्यात् संततौ जने" इत्यमरः । न जात इति अजः नाऽत्यदादेशः । द्वाभ्यां जन्यसंस्काराभ्यां जात इति द्विजः । खन् खनने । परितः खातेति आबत इत्याप् परिखा ॥

(तत्त्वदीपिका—) क्विब्वनिब्डाः क्विपः सिद्धावपि पुनरुपादानं नियमार्थं । तेन हन्तेर्भूते ब्रह्मभ्रूणवृत्रेष्वेवेति । वनिपोऽपि पूर्वं वर्त्तमानार्थतत्वात्पुनर्ग्रहणं भूतेपि यथास्यादित्येवमर्थं । यज्वेति । इष्टवानिति वाक्यं । प्रजा प्राणिजातस्य संज्ञैषा । द्विजइतिमातुर्यदग्रेजायेत इति स्मृतेः । निष्ठान्त ॥ भावेप्यनिष्ठातदन्तं क्लीबमेकवचनं च

सू०— क्तक्तवतू ॥ धातोरतीते काले क्तक्तवतू एतौ स्तो भावकर्मणोः क्तः । स्नातम् कृतः कटः । विष्णुर्विश्वं कृतवान् ।

(सुबोधिनी—) क्तक्तवतू । कित्त्वाद्गुणो न । उकारो वृतोनुमिति नुमर्थः क्तप्रत्ययो भावकर्मकर्तृषु भवति । क्तवतुः कर्त्तर्येव । ष्णा शौचे । त्वया ऽस्नायि इति स्नातं । अकारीति कृतः कटस्त्वया । अकार्षीदिति कृतवान् । अत्व सोःसाविति दीर्घः

(तत्त्व०—)क्तक्तवतू । भावकर्मणोरिति । मंडूकप्लुत्येहभावकर्मेसनुवृत्तं क्तवतुः कर्तरि पारेशेषात् । स्नातमिति अस्नायीति विग्रहः । कृञ् इति अकारीति । कृतवानिति अकार्षीदिति । एवमन्यो विग्रहो यथावदवगन्तव्यः । अधिपूर्वेणास्मशीङ्स्थ्यासाधारक सू ॥ १ ॥

सू० -गत्यर्थाकर्मकाच्च कर्तरि क्तः ॥ भावकर्मणोरपि । गङ्गां गतः । स्थितः । अमान्तस्योपधायादीर्घः किङतिझलकौच । शान्तः । दान्तः ।

(सुबोधिनी—) गत्यर्थादकर्मकाच्चकर्त्तरि क्तः । गत्यर्थादकर्मकाच्च धातोः क्तः स्यात् भावकर्मकर्तृषु । अगमदिति गतो गंगा सः । लोपस्त्वनुदात्ततनामिति मलोपः अस्थादिति स्थितः सः । स्थामीतीत्वं । शमुदमु उपशमे । अशमददमदिति अमान्तस्योपधाया इति दीर्घः । शान्तः । दान्तः ॥ स्यान्यधाङ्पूर्वस्यवाक

(तत्त्वदीपिका—) गतइति । अगमदिति । मसंज्ञा ॥ १ ॥

सू०— श्लिषशीङ्स्थाआसवसजनरुहजीर्यतिभ्यश्च ॥ रामः सीतामाश्लिष्टः । शेषमधिशयितः । स्वर्गमधिष्ठितः । हरिमुपासितः । हरिदिनमुपोषितः । तमनुजातः । वृषमारूढः । जगदनुजीर्णः ।

(सुबोधिनी—) श्लिषशीङ्स्थाआसवसजनरुहजीर्यतिभ्यश्च । एभ्यः कर्त्तरि क्तः

भावकर्मणोश्च। श्लिष आलिंगने। शीङ् स्वप्ने। ष्ठा गतिनिवृत्तौ। आस उपवेशने। वस निवासे। जनी प्रादुर्भावे। रुह बीजजन्मनि प्रादुर्भावे च। जॄ वयोहानौ। अधिपूर्वाणां शीङ्स्थासामित्याधारस्य कर्मसंज्ञा। उपान्वध्याङ्पूर्वस्येति वस आधारस्य कर्मसंज्ञा। आश्लिक्षदिति आश्लिष्टो रामः सीतां। अध्यशायिष्टेति अधिशयितो हरिः शेषं। अध्यष्ठादिति अधिष्ठितः स स्वर्गम्। स्थामीतीत्वम्। उपासिष्टेति उपासितः सः हरिं। उपावात्सीदिति वसिक्षुधोरितीट् यजामिति संप्रसारणम् घसादेरिति षः उपोषितः स हरिदिनं। अन्वजनिष्टेति जनसनखनामित्यात्वं अनुजातः सः रामम् आरुक्षदिति होढ इति ढत्वम्। तथोर्द्ध इति तस्य धत्वम् ष्टुत्वं च ढिढोलोप इतिढलोप पूर्वदीर्घौ। आरुढः स वृषम्। अन्वजारीदिति ऋतइरितीर् य्वोर्विहसे इति दीर्घः र इति तस्य नत्वम्। अनुजीर्णः स विश्वं। कर्म्मणि तु गता प्राप्ता गंगा। तेन आश्लिष्टा सीता रामेण। अधिशयितः शेषो हरिणा। अधिष्ठितः स्वर्गस्तेन। उपासितो हरिस्तेन। उपोषितं हरिदिनं तेन। अनुजातो रामस्तेन। आरुढो वृषस्तेन। अनुजीर्णो विश्वस्तेन॥

(तत्त्वदीपिका-) श्लिषः सकर्मकत्वादप्राप्तौ वचनं। अधिशयित इति। अध्याशायिष्ट इति।

मू०-क्त्वोवासेट्॥ उदुपधात्सेट् क्तो वा कित्। द्युतितम्, द्योतितम्। प्रमुदितः, प्रमोदितः साधुः।

(सुबोधिनी -) क्त्वोवासेट्। उदुपधादब्विकरणादिट्भावकर्मणोः सेट् क्तो वा कित्संज्ञः स्यात्। कित्त्वाभावे गुणः। द्युत दीप्तौ। अद्योति इति द्युतितं, द्योतितम् तेन। मुदहर्षे। प्रामोदि इति प्रमुदितः साधुस्तेन। उदुपधात्किम्। विदितं। भावकर्म्मणोः किम्। रुचितं वनम्। गत्यर्थादकर्मकादिति कर्त्तरि क्तः। सेटि किम्। कुष्टम् कुष निष्कर्षे। आब्विकरणात्किम्। गुध्यतेर्गुधितम्॥

मू०-- शीङ्स्विदिमिदिक्ष्विदिधृषमृषपूङस्सेटौक्तक्तवतूाकितौन॥ शयितः। शयितवान्। प्रस्वेदितः। प्रस्वेदितवान्। क्ष्वेदितः। क्ष्वेदितवान्। धर्षितः। धर्षितवान्।

(सुबोधिनी-)शीङ्स्विदिमिदिक्ष्विदिधृषमृषपूङःसेटौक्तक्तवतूकितौन। अकित्त्वाद्गुणः। अशयिष्टेति शयितः। शयितवान् सः। क्त इतीट् अनुबंधनिर्देशो यङ्लुग्निवृत्त्यर्थः। शेश्यितः। शेश्यितवान्। नुधातोरिति यः। किंच। स्विदादीनामादीदित इतीण्निषेधे प्राप्ते भावे कर्त्तरि चादित इति सेट्कत्वम्। पूङः कित इतीण्निषेधे प्राप्ते पूङो वा कित इति सेट्कत्वम्। ञिष्विदा स्नेहनमोचनयोरिति भ्वादिरत्र गृह्यते न तु ष्विदा गात्रप्रक्षरणे दिवादिः भ्वादिसाहचर्यात् प्रास्वेदिष्टेति प्रस्वेदितं तेन। प्रस्वेदितवान्। ञिधृषा प्रागल्भ्ये। प्रधर्षितः। प्रधर्षितवान्। प्रधर्षितस्तेन॥

मू०-- मृषः क्षान्तौ॥ मर्षितः। मर्षितवान्।

(सुबोधिनी—) मृषःक्षांतौ । मृषः सेटौ क्तक्तवतू कितौ न स्तः क्षमायामर्थे । मर्षितो, मर्षितवान् । क्षमायां किम् । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ॥

सू०— पूङ्गोवाकितस्तस्येट् ॥ पवितः, पूतः । पवितवान्, पूतवान् ।

(सुबोधिनी—)पूङ्गोवाकितस्तस्येट् । पूङः परस्य कितस्तस्येट् वा स्यात् । पूङ् पवने । कितः वुः से इत्यतो वुरित्यनुवृत्तं ॥

सू०— कितः ॥ उवर्णान्तादृवर्णान्तात् श्विश्रिभ्यां च परस्य कितस्तस्य इण्न । भूतः । वृतः । श्रितः । श्वयतेस्सम्प्रसारणस्य दीर्घः किति ते । शूनः । वेञो ह्रस्वः । किति ते । उतम् ।

(सुबोधिनी—) कितः । श्विश्रिऋवर्णोवर्णांतेभ्यः परस्य कितः प्रत्ययस्येण्न । अभूदिति भूतः । वृङ् संभक्तौ । वृञ् वरणे च वृतः । श्रिञ् सेवायाम् । श्रितः । टुओश्विइर् गतिवृद्ध्योः । यजामिति संप्रसारणम् । श्वयतेःसंप्रसारणस्यदीर्घः । शूनः । वेञ् ततुसंताने । यजामिति संप्रसारणे वेञो ह्रस्वः । उतं ॥

(तत्त्वदीपिका—) कित इति वुः सेरित्यतो वुरित्यस्यानुवृत्तेरुवर्णान्तादित्यादि । नैकस्वरादित्यतो नेति योगविभागात् श्विश्रिभ्यामिति च लभ्यते ।

सू०—आदीदितः ॥ आदित ईदितश्च क्तक्तवत्वोर्नेट् ।

(सुबोधिनी -) आदीदितः । आच्च ईच आदीतौ आदीतौ इतौ यस्य आदीदित् तस्मादादीदितोः धातोः क्तक्तवत्वोरिण्न स्यात् कृत इत्यस्यापवादः ॥

(तत्त्वदी०—) आदीदितइति । आच्च इच आदी तौ इतौ यस्य तथा तस्मात् । कृत इति प्राप्तस्यापवादः ।

सू०— ञीतान्तकृवर्तमानेऽपि ॥ ञीतां धातूनां मतिबुद्धिपूजार्थानाञ्च वर्तमानेऽपि तकृ । राज्ञां मतः । बुद्धः । इष्टः ।

(सुबोधिनी—) ञीतांतकृवर्त्तमानेपि । ञिरिद्येषां ते ञीतस्तेषां मतिबुद्धिपूजार्थेभ्यश्च तकृ स्यात् वर्त्तमानेऽर्थे । मतिरिहेच्छा बुद्धेः पृथग्ग्रहणात् । राज्ञां मतः । इष्टः तैरिष्यमाण इत्यर्थः । बुद्धः । विदितः । पूजितः । अर्चितः ॥

(तत्त्वदीपिका—) ञीतामिति । ञिरिद्येषांते ञीतस्तेषां ।

सू०— दस्तस्यनोदश्च ॥ दकारात्परस्य कितस्तस्य नत्वन्दकारस्यच । मेदितम् । भिन्नम् ।

(सुबोधिनी—) दस्तस्यनोदश्च । दात्परस्य कितस्तस्य नत्वं स्यात ॥

सू०— भावेकर्तरिचादितःक्तक्तवत्वोरिड्वा ॥ मेदितः । भिन्नः । प्रस्वेदितः । प्रस्विन्नः । क्ष्वेदितः । क्ष्विन्नः ।

(सुबोधिनी-) भावेकर्तरिचाऽऽदितःक्तक्तवत्वोरिड्वा। आकारेतो धातोर्भावकर्तृस्थितयोः क्तक्तवत्वोरिड्वा स्यात्। ञिमिदा स्नेहने। मिद्यते इति मिन्नं। तेन शीङ्स्विदिमिदितिक्तस्याकित्वाद्गुणः। मेदते इति मेदितः सः। ञिष्विदा स्नेहनमोचनयोः। प्रस्विद्यते इति प्रस्विन्नं तेन। प्रस्वेदते इति प्रस्वेदितः सः। ञिक्ष्विदा स्नेहनमोचनयोः। क्ष्विन्नं तेन। क्ष्वेदितः सः॥

(तत्त्वदीपिका-) आदिति॥ आत इत्यस्य स तथा।

मू०--अदोजघुः॥ किति तकारे। जग्धम्।

(सुबोधिनी-) अदोजघुः। अदो जघुरादेशः स्यात् किति तादौ प्रत्यये। उकारउच्चारणार्थः। तथोर्द्ध इति तस्य धः। झलांजश्‌झशि इति घस्य गः। जग्धम्॥

मू०--रः॥ रेफात्कितस्तस्य नत्वम्। विकीर्णम्। जीर्णम्।

(सुबोधिनी-) रः। रात्कितस्तस्य नत्वं स्यात्। कॄ विक्षेपे। जॄ वयोहानौ। ॠतइरितीर्य्वोर्विहसे इति दीर्घः। विकीर्णः। जीर्णम्॥

(तत्त्वदीपिका-) रइति। कृतस्यापत्यं कार्तिरित्यत्र वृद्धेरसिद्धत्वान्न स्वरांतो वेत्यस्यानुवृत्तेर्व्यवस्थया क्वचिन्न क्वचिद्वेति बोध्यं। तेन पूर्त इत्यादौ न। दस्तस्येति सुवचं।

मू०--ल्वाद्योदितश्च॥ ल्वादेरोदितश्च धातोः कितस्तस्य नो भवति। लूनः। लूनवान्। ज्या वयोहानौ। जीनः।

(सुबोधिनी-) ल्वाद्योदितश्च। ल्वादेरेकविंशतेर्द्धातोरोदितश्च कितस्तस्य नत्वं स्यात्। क्र्यादेरंतर्गणोल्वादिः। लुञ्।१। स्तृञ्।२। कृञ्।३। वृञ्।४। धूञ्।५। शॄञ्।६। दॄ।७। पॄ।८। भॄ।९। मॄ।१०। दॄ।११। जॄ।१२। नॄ।१३। कॄ।१४। ॠ।१५। गॄ।१६। ज्या।१७। री।१८। ली।१९। व्री।२०। प्ली।२१। इति ल्वादिः। लुञ्छेदने। लूयतेस्म इति लूनः। लुनाति स्मेति लूनवान्। ज्या वयोहानौ। ग्रहामिति संप्रसारणे जीनः॥

(तत्त्वदी०-) ल्वाद्योदित इति लू आदि र्यस्य स ल्वादिः। ओदित् यस्य स ओदित्। ल्वादिश्च ओदिच्च ल्वाद्योदित्। तस्मात्। लून इति लूयते स्म इति। लूनवानिति लुनाति स्मेति।

मू०-- प्यायः पीतिकिति॥ पीनः। भुजो कौटिल्ये भुग्नः। हीनः। स्वादयओदितः। षूङ् प्राणिप्रसवे सूनः। सूनवान्। दूङ् परितापे। दूनः। मीनः। डीङ् उड्डीनः। दीनः। लीनः। व्रीणः। रीणः धीनः।

(सुबोधिनी--) प्यायः पीतिकिति। प्यायः पी आदेशः स्यात् तादौ किति। ओप्यायी वृद्धौ। पीनः। भुजो कौटिल्ये। नत्वस्य सिद्धत्वेन झरपरत्वात् चोःकुरिति गः। भुग्नः। ओहाक् त्यागे। अपिद्धाधेतीत्वं। हीनः। षूङ् प्राणिप्रसवे। स्वाद

यओदित इत्योदित्वान्नत्वम् सूनः । सूनवान् । दिवादिरंतर्गणोय स्वादिः । षूङ् १ दूङ् २ । दीङ् । ३ । डीङ् । ४ धीङ् । ५ । मीङ् । ६ । रीङ् । ७ । लीङ् । ८ । व्रीङ् । ९ । स्वादयो नव । दूङ् परितापे । दूनः । दूनवान् । डीङ् विहायसा गतौ । ओदिन्मध्ये डीङः पाठसामर्थ्यादिण्न । उड्डीनः । दीङ् क्षये । दीनः । लीङ् श्लेषणे । लीनः । रीङ् स्रवणे रीणः । धीङ् आधारे धीनः ॥

(तत्त्वदीपिका—) उड्डीन इति । ओदिन्मध्ये पाठसामर्थ्यान्नेट् । एवमन्यत्रापि कर्त्रोद्यर्थेनैदेन वाक्यभेदः ।

सू० — दुग्वोर्दीर्घश्च ॥ दूनः । गूनः ।

(सुबोधिनी—) दुग्वोर्दीर्घश्च । दुगुभ्यां परस्य क्तिस्तस्य नत्वमनयोर्दीर्घश्च स्यात् गु पुरीषोत्सर्गे । दु गतौ । टुदु उपतापे । अयं तु न गृह्यते । सानुबंधकत्वात् । मृदुतया दुतया इति माघः । दूनः । गूनः ॥

(तत्त्वदीपिका—) दुग्वोरिति । दुगताविस्येव गृह्यते । नतु टुदु उपताप इत्यपि सानुबंधकत्वात् । मृदुतया दुतयेति माघोपि ।

सू० — क्षियोदीर्घःकर्त्तरिक्तक्तवत्वोर्नत्वञ्च ॥ क्षीणः । क्षीणवान् । कर्त्तरिकिम् । क्षितम् ।

(सुबोधिनी—) क्षियोदीर्घःकर्त्तरिक्तक्तवत्वोर्नत्वंच । क्षियः परयोः कर्त्तरि स्थितयोः क्तक्तवत्वोस्तस्यनत्वं क्षियो दीर्घश्च स्यात् । क्षि क्षये । क्षि निवासगत्योश्च । क्षयतिस्मेति क्षीणः । क्षीणवान् । कर्त्तरि किम् । क्षीयते स्मेति क्षितं कामेन

सू० — यलसंयोगादेरादन्तात्क्तिस्तस्यनत्वम् ॥ द्राणः ॥ ग्लानः । म्लानः ।

(सुबोधिनी—) यलसंयोगादेरादंतात्क्तिस्तस्यनत्वम् । यलप्रत्याहारः संयोगादेराकारांताद्धातोः परस्य क्तिस्तस्य नत्वं स्यात् । द्रा कुत्सायां । द्राणः । ग्लै म्लै हर्ष क्षये । ग्लानः । म्लानः ॥

सू० — नुदविदोन्दत्राघ्राह्रीनिर्वाभ्योवा ॥ त्राणः, त्रातः । घ्राणः घ्रातः । ह्रीणः, ह्रीतः । नुत्तः, नुन्नः । विद विचारणे । वित्तः, विन्नः । उन्दी क्लेदने । उत्तः, उन्नः । निर्वाणो मुनिवन्ह्यादौ निर्वातस्तुगते ऽनिले ।

(सुबोधिनी—) नुदविदोंदत्राघ्राह्रीनिर्वाभ्योवा । एभ्यः क्तिस्तस्य नत्वं वा स्यात । आद्यानां त्रयाणां दस्तस्येति नित्यं नत्वे प्राप्ते त्राघ्रा अनयोर्यलसंयोगादेरिति नत्वे प्राप्ते ह्री वा अनयोरप्राप्ते सति विभाषेयं । नुद प्रेरणे । नुत्तः, नुन्नः - विद विचारणे । रौधादिक एव गृह्यते । उन्दिना परेण साहचर्यात् । वित्तः, विन्न

तथा च भाष्यम्" वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ॥ विन्तेर्वित्तश्च विन्नश्च भोगे वित्तश्च विंदतेरिति"। उन्दी क्लेदने। आदीदित इतीण्न । नोलोप इति नलोपः। उन्नः, उत्तः। त्रैङ् पालने। त्राणः, त्रातः। घ्रागंधोपादाने घ्राणः, घ्रातः। ह्री लज्जायां ह्रीतः, ह्रीणः। वा गतिगंधनयोः अवाते कर्त्तरि सति नत्वं स्यात् निर्वाणोऽग्निर्मुनिर्वा। मुक्तिं गत इत्यर्थः। वाते कर्तरितु निर्वातो वातः। नितरां वातो गत इत्यर्थः। गत्यर्थादिति कर्तरि क्तः॥

मू०— दोदत्ति ॥ दाइत्यस्यदथ् कितितकारे न तु पितः। दत्तः। दत्तवान्।

(सुबोधिनी–) दोदत्ति। ददातेर्दथादेशः स्यात्किति तकारे। दाप् लवने अस्य तु न। व्याख्यानात् प्रयोगाभावाच्च। थांतोयमादेशः।किंच यदि तांत आदेशस्तदा विदत्तमित्यादौ आद्यंतवपेकस्मिन्निति न्यायेन नाम्यंतोपसर्गस्येति दीर्घः स्यात्। यदि दान्तस्तदा दस्तस्येति नत्वं स्यात्। यदि धांतस्तदा तथोर्द्ध इति क्तस्य धः स्यात्। थांते तु खसेचपा इति थस्य तः। दत्तः। दत्तवान्। पितस्तु दातः॥

मू०— स्वरांतोवा ॥ स्वरान्तादुपसर्गादुत्तरस्य दाइत्यस्य तो वाकिति तकारे न तु पितः। प्रत्तः। प्रदत्तः। अवत्तः।। अवदत्तः।

(सुबोधिनी–) स्वरान्तोवा। पक्षे दथादेशः॥

(तत्त्वदीपिका–) स्वरपदं स्वरांन्तोपसर्गोपलक्षणकमित्याह। स्वरान्तोपसर्गादिति तेन देवदत्त इत्यादौ न।

मू०— नाम्यन्तोपसर्गस्यदीर्घोदादेशेतकारे ॥ सुष्टु अदायि सूत्तम्। नीत्तम्।

(सुबोधिनी–) नाम्यंतोपसर्गस्यदीर्घोदादेशेतकारे। नाम्यंतस्योपसर्गस्य दीर्घः स्यात्। दास्थाने आदेशो यस्तकारस्तस्मिन् परे॥

मू०— धात्रोहिः कितिते ॥ निहितः।

(सुबोधिनी–) धात्रोहिः कितिते। दधातेर्हिरादेशः स्यात् किति तकारे॥

मू०— ध्याख्यापॄमूर्छिमादिभ्योननत्वम् ॥ ध्यातः। ख्यातः। पूर्तः। मूर्तः। मतः। यज इष्टम्। उप्तम्। ऊढः। व्येञ् वीतः। ह्वेञ् हूतः। उदितः।उक्तः।

(सुबोधिनी–) ध्याख्यापॄमूर्छिमादिभ्योननत्वम्। आद्ययोर्यलसंयोगादेरिति नत्वे प्राप्ते। पॄइत्यस्य तु ल्वादिषु पाठात् ल्वाद्योदित इति नत्वे प्राप्ते मूर्छतेस्तु छस्य लोपे कृते र इति नत्वे प्राप्ते माद्यतेस्तु दस्तस्येति नत्वे प्राप्ते निषेधः। ध्यै

चिंतायां। ध्यातः ख्या प्रकथने। ख्यातः। पॄ पालनादौ। पोरुरित्युर्। र्वोर्विहसे इति दीर्घः। कित इतीण्न। पूर्त्तः। मूर्छा मोहसमुच्छ्राययोः। रेफाच्छ्वोरिति छलोपः। आदीदित इतीण्न। मूर्त्तः। मदी हर्षे। आदीदित इतीण्न। मत्तः यज देव पूजादौ। छशषेति षत्वम्। ष्टुत्वं। यजादित्वात् यजामिति संप्रसारणं। इष्टं। टुवप् बीजतंतुसंताने। उप्तम्। वहप्रापणे। होढ इति हस्य ढः तथोर्ध इति तस्य धः ष्टुत्वं ढिढ इति ढलोपपूर्वदीर्घौ ऊढम्। व्येञ् संवरणे। वीतः। ह्वेञ् स्पर्द्धायाम्। हूतः। वद व्यक्तायां वाचि। कृतइतीट्। उदितः। वच परिभाषण उक्तः॥

मू०— वसतिक्षुधोरिट्क्त्वाक्तक्तवतूनाम्॥ उषितः। क्षुधितः। सुप्तः।

(सुबोधिनी-) वसतिक्षुधोरिट्क्त्वाक्तक्तवतूनां। वस निवासे। यजामिति संप्रसारणं। वसादेरिति षः। उषितः। क्षुध बुभुक्षायां। क्षुधितः ञिष्वप् शये। यजामिति संप्रसारणं सुप्तः॥

मू०-- क्वचिद्वेटःक्तक्तवत्वोर्नेट्॥ व्रश्चू वृक्णः।

(सुबोधिनी-) क्वचिद्वेटःक्तक्तवत्वोर्नेट्। यस्य धातोः कुत्राचित्स्थले विकल्पेनेड्विहितस्तस्माद्धातोः परयोः क्तक्तवत्वोरिण्न स्यात्। ओव्रश्चू छेदने। ऊदितो वेति वेट्त्वादिण्न। ग्रहामिति संप्रसारणम्। ल्वाद्योदित इति नत्वं। नत्वस्यासिद्धत्वात् झसे परतः छशषेति षत्वे प्राप्ते क्तक्तवत्वोरादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्य इति चोःकुरिति कुत्वम् स्कोरिति सलोपः। वृक्णः। वृक्णवान्॥

मू०— अञ्चेःपूजायामिट्॥ अञ्चितः। जातः।

(सुबोधिनी-) अंचेःपूजायामिट्। पूजार्थादंचतेः परयोः क्तक्तवत्वोरिट् स्यात्। उदितः क्त्वोवेडिति अंचेः क्त्वायां वेट्कृत्वात् क्वचिद्वेटइति निषेधे प्राप्ते सति विधिः। पूजार्थाचतेर्नेति नलोपो न। अंचितः। गतौ तु नोलोप इति नलोपः। चोःकुरिति कः। अक्तः। जनी प्रादुर्भावे। जनसनेत्यात्वम् जातः॥

मू०-- पचोवः॥ क्तक्तवत्वोस्तस्य। पक्वः। पक्ववान्।

(सुबोधिनी-) पचोवः। पचतेः परस्य क्तक्तवत्वोस्तस्य वः स्यात्। डुपचष् पाके। वस्यासिद्धत्वाच्चोःकुरिति कः पक्वः॥

मू०--क्षायोमः॥ क्षामः। क्षामवान्।

(सुबोधिनी--) क्षायोमः। क्षायतेः परस्य क्तक्तवत्वोस्तस्य मः स्यात्। क्षै क्षये। संध्यक्षराणामित्यात्वं। क्षामः॥

(तत्त्वदीपिका-) क्षाम इति क्षै क्षये इत्यस्यात्वे।

मू०--प्रस्त्यस्सम्प्रसारणंकितितस्यमोवा॥ प्रस्तीमः। प्रस्तीतः।

(सुबोधिनी-) प्रस्त्यः संप्रसारणं किति तस्य मो वा । प्रपूर्वस्य स्त्यायतेः संप्रसारणं स्यात् किति क्तक्तवत्वोः तस्य मश्च वा । स्त्यै शब्दसंघातयोः । प्रस्तीमः । प्रस्तीतः ॥

(तत्त्वदीपिका-) प्रस्त्य इति । प्रस्त्यः संप्रसारणं नित्यं तस्य तु मो वेत्यर्थः । प्रस्त्यायस्म प्रस्तीमः । आदौ संप्रसारणे कृते यलसंयोगादित्वाभावान्न नात्वं अनुपसर्गादिति ।

मू०-- शुषेः कः ॥ शुष्कः । शुष्कवान् ।

(सुबोधिनी-) शुषेः कः । शुषेः परस्य क्तक्तवत्वोस्तस्य कः स्यात् । शुष शोषणे । शुष्कः ॥

मू०--स्फायस्स्फीतिकिति ॥ स्फीतः । धेट् धीतम् । गीतम् । पीतम् । दो दितम् । सो सितम् । मितम् ।

(सुबोधिनी -) स्फायः स्फीतिकिति । स्फायतेः स्फीरादेशः स्यात् तादौ किति । स्फायी वृद्धौ स्फीतः । धेट् पाने । गै शब्दे । पा पाने । एषां त्रयाणामापद्धाधीत्वं । धीतं गीतं पीतं । दो अवखंडने । षोंतकर्मणि । मा माने । माङ् माने । मेङ् प्रणिदाने । एषां स्थामितीत्वं । दितं । सितं । मितम् ॥

मू०-- सेटोः क्तक्तवत्वोर्ञिलोपः चोरितः । चोरितवान् । पाचितः पाचितवान् ।

(सुबोधिनी-) सेटोः क्तक्तवत्वोर्ञिलोपः । ञिप्रत्ययस्य लोपः स्यात् सेटोः क्तक्तवत्वोः परयोः । चुर स्तेये । कृत इतीट् । ञिलोपे चोरितः । डुपचष् पाके ञ्यंतः कृत इतीट् । पाचितः ॥ ।

मू०-- ऊर्णोतेर्नेट् ॥ ऊर्णुतः ।

(सुबोधिनी-) ऊर्णोतेर्नेट् ऊर्णोतेरिण्न स्यात् तादौ किति । ऊर्णुञ् आच्छादने । ऊर्णुतः । ऊर्णुतवान् ॥

मू०-- द्रवस्यकाठिन्येस्पर्शेचार्थेश्यैङस्सम्प्रसारणङ्कितस्तस्यनत्वञ्चनतुस्पर्शे ॥ शीनं घृतम् । स्पर्शे तु शीतं जलम् ।

(सुबोधिनी-) द्रवस्यकाठिन्येस्पर्शेचार्थेश्यैङस्संप्रसारणंकितस्तस्यनत्वंचनतुस्पर्शे श्यैङः संप्रसारणं स्यात् द्रवरूपस्य द्रव्यस्य कठिनस्य भावः काठिन्यं तस्मिन् काठिन्येऽर्थे च पुनः द्रवस्यास्पर्शेऽर्थे श्यैङः परस्य कितस्तस्य नश्च स्यात् स्पर्शेऽर्थे नत्वं न । श्यैङ् गतौ शीनं घृतम् । स्पर्शे किम् । शीतं जलं । काठिन्ये स्पर्शे च किम् । संश्यानो वृश्चिकः । शीतात्संकुचित इत्यर्थः । यलसंयोगादेरिति नत्वम् ॥

मू०- अंचेः कितस्तस्यनत्वंनत्वपादाने ॥ समक्नः । अन्यत्रोद्धृतमुदकं कूपात् ।

(सुबोधिनी-) अंचेःक्तितस्तस्यनत्वंनत्वपादाने । अंचु गतिपूजनयोः । नत्वस्यासिद्धत्वात् चोःकुरिति कः। उदितः क्त्वौवेडिति क्त्वायां वेट्कत्वात् । क्वचिद्वेट इतीण्न । समक्तः अनपादाने किम् । उदक्तमुदकं कूपात् ॥

मू०--दिवोऽविजिगीषायाम् ॥ आद्यूनः। विजिगीषायां तु द्यूतम् ।

(सुबोधिनी-) दिवोऽविजिगीषायाम् । दिवः क्तक्तवत्वोस्तस्य नः स्यात् विजेतुमिच्छा विजिगीषा तस्यां वाच्यायां नत्वं न । दिवु क्रीडाविजिगीषादौ क्षितिझसे इति वस्य ऊः द्यूनः क्षीण इत्यर्थः "आद्यूनःस्यादौदरिकः" इति हैमः । विजिगीषायां तु द्यूतं । द्यूते विजिगीषयाऽक्षाः पात्यंते इति ॥

मू०-- अनुपसर्गात्फुल्लक्षीबकृशोल्लाघानिपात्यन्ते ॥ फुल्लः । फुल्लवान् । क्षीबृ मदे । क्षीबो मत्तः कृशस्तनुः । लाघ शोषणालमर्थयोः । उल्लाघो नीरोगः । उपसर्गात्तु । चरफलोरतउत्किति ॥ प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । चर चूर्णः ।

(सुबोधिनी-) अनुपसर्गात् फुल्लक्षीबकृशोल्लाघानिपात्यंते । ञिफला विशरणे । क्तक्तवत्वोस्तस्य लत्वं निपात्यते चरफलोरतउत्किति । एतयौ रस्य उत्स्यात् तादौ किति । आदीदित इतीण् न । फुल्लः । क्षीबृ मदे । कृश तनूकरणे । लाघृ शक्तौ । एषां त्रयाणां क्तस्य तलोपो निपात्यते । तलोपस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते । ननु फुल्ल विकसने लाघृ शक्तौ । आभ्यां पचादेर इत्यप्रत्यये इतराभ्यां नाम्युपधात्क इति कप्रत्यये फुल्लोल्लाघक्षीबकृशाः शब्दाः सिद्ध्यंति किमनेन । उच्यते फुल्तादिनिवृत्त्यर्थम् सूत्रम् ॥

(तत्त्व०-) फुल्ल इति । तस्य लत्वं निपात्यते । लोध्रद्रुमं सानुमतः प्रफुल्लं । प्रफुल्लराजीवांकमध्ये । इत्यादौ तु फुल्लविकसने इत्यस्मात्पचाद्ये बोध्यं । यद्वा प्रफुल्लेन समासे ।

मू०- उत्फुल्लसंफुल्लौच ॥

(सुबोधिनि-) उत्फुल्लसंफुल्लौच । उत्संपूर्वकावप्येतौ निपात्येते । कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति रघुः आह फुल्ल विकसने । अस्मात् पचादेरिअप्रत्यये प्रफुल्ल इति । यद्यपिप्रफुल्लवदुत्फुल्लसंफुल्लावपि पचादेरित्यनेन सिद्धयतस्तथापि उत्फुल्त संफुल्त इति प्रयोगनिवृत्त्यर्थंसूत्रं ॥

(तत्त्व०-) उत्फुल्लेति । यद्यपि प्रफुल्लपदे तयोरपि सिद्धिस्तथापि उत्फुल्ल इत्यादिरूपनिवृत्त्यर्थमिदं ।

मू०- वित्तोभोगप्रतीतयोः ॥ वित्तं धनम् । वित्तः पुरुषः । अन्यत्र विन्नः । भित्तं शकलम् । भिन्नमन्यत्र ।

(सुबोधिनी--) वित्तोभोगप्रतीतयोः । भुज्यते इति भोगस्तस्मिन् भोगेर्थे प्रतीतः प्रसिद्धः तस्मिन्प्रतीते ऽर्थे च । विंदतेः परस्य क्तस्य नत्वाभावो निपात्यते । दस्तस्येति नत्वेप्राप्ते निषेधः । विद्लृ लाभे । वित्तः । विद्यतेर्विन्नः । विनत्तेर्वित्तः विन्नश्च । वेत्तेर्विदितः । विद सत्तायां । विद विचारणे । दैवादिकरौधादिकावेताव-निटौ । विदज्ञाने । विद्लृलाभे आदादिकतौदादिकावेतौसेटौ । विद्लृ लाभे अस्य-तु गमहन विदेति क्वसु प्रत्यये वेट्कत्वात्क्वचिद्वेट् इतीण्न । भित्तं शकलं । भिदेः । परस्य क्तस्य नत्वाभावो निपात्यते शकलेर्थे । दस्तस्येति प्राप्ते निषेधः । भित्तं शकलखंडेवेत्यमरः । अन्यद्भिन्नम् । विदीर्णमित्यर्थः ॥

मू०- ऋणमाधमर्ण्ये ॥ऋतमन्यत्र ।

(सुबोधिनी-) ऋणमाधमर्ण्ये । ऋगतौ अस्मात् क्तस्य नत्वं निपात्यते अधमं दुःखप्रदमृणमस्य सोऽधमर्णस्तस्य भाव आधमर्ण्यं तस्मिन्नाधमर्ण्येऽर्थे अधमर्णस्तु ग्राहक इत्यमरः ॥

(तत्त्व०-)ऋणमाधमर्ण्यइति । अधमर्ण्य इति अधमस्य ऋणे अधममृणं यस्येतिवाऽधमर्ण-स्तस्यभावस्तत्ता तस्मिन् तेन वाधमर्ण्यव्यवहारो लक्ष्यते तथा चोत्तमर्णेपि प्रयोगः सिध्यति।

मू०- क्षुब्धस्वान्तध्वांतलग्नम्लिष्टविरिब्धफाण्टबाढानिमन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु ॥ क्षुब्धो मन्थः । स्वन शब्दे । स्वान्तं मनः । ध्वान्तं तमः । लगे संगे । लग्नंसक्तम् । म्लिष्टमविस्पष्टम् । रेभृ शब्दे । विरिब्धः स्वरः । फाण्टमनायाससाध्यः कषायविशेषः । बाहृ प्रयत्ने । बाढम् भृशम् । अन्यत्र तु क्षुभितम् । स्वनितम् । ध्वनितम् । लगितम् । म्लेछितम् । विरेभितम् । फणितम् । बाहितम् ।

(सुबोधिनी-) क्षुब्ध १ स्वांत २ ध्वांत ३ लग्न ४ म्लिष्ट ५ विरिब्ध ६ फांट ७ बाढानि ८ मन्थ १ मन २ स्तमः ३ सक्ता ४ विस्पष्ट ५ स्वरा ६ नयास ७ भृशेषु ८ ॥ क्षुब्धादीन्यष्टावनिट्कानि निपात्यंते मंथादिष्वर्थेषु । क्षुभ संचलने तथोर्द्ध इति तस्य धः । झबेजबा इति भस्य बः । क्षुब्धः । स्वन ध्वन शब्दे । अमांतस्येति दीर्घः । स्वान्तम् । ध्वांतम् । लगै नत्वमपि निपात्यते । लग्नम् । म्लेच्छ अव्यक्ते शब्दे । रेभृशब्दे अनयो रुपधाया इत्वमपि निपात्यते छशषेति षत्वं ष्टुत्वं । म्लिष्टं तथोर्द्ध इति धः । झबेइति भस्य बः । विरिब्धः । फण गतौ । अमांतस्येति दीर्घ ष्टुत्वम् णस्यानुस्वारो निपात्यंते फांटं । बाहप्रयत्ने । होढ इति ढः तथोर्द्ध इति तस्य धः । ष्टुत्वं ढिढ इति ढलोपे बाढं । कथं तर्हि क्षुब्धो राजेति । आगमजमानित्यमित्यागमस्यानित्यत्वादिडभावः ॥

(तत्त्व०—) क्षुब्धमित्यादि । क्षुब्धमित्यादीन्यष्टौ निपात्यंते मंथादिष्वर्थविशेषेषु वाच्येष्वित्यर्थः । मंथ इति । द्रवद्रव्यसंपृक्ताः सक्तवो मंथः मंथनदंडश्च ।

मू०— धृष्टविशस्तावविनये ॥ धृष्टः । विशस्तः । अन्यत्र धर्षितः विशसितः ।

(सुबोधिनी—) धृष्टविशस्तावविनये । अविनयेऽर्थे एतावनिटौ स्तः । ञिधृषा प्रागल्भ्ये । अस्य आदीदित इतीण्णिषेधे सिद्धे शसु हिंसायामस्य उदितः क्त्वो वेडिति क्त्वायां वेट्कत्वात्क्वचिद्वेट इतीण्णिषेधे सिद्धे अनयोरविनये एवानिट्त्वं नान्यत्रेति नियमार्थं सूत्रं । विनयेतु धर्षितः । शीङ्स्विदिमिदीति क्तस्याकित्त्वाद्गुणः ॥

(तत्त्व०--) अन्यत्रेति । अविनयादन्यत्रेत्यर्थः धृषेरादित्वं चिन्त्यमिति कश्चित् । अन्यस्तु अविनयादन्यत्र भावकर्मणोर्धृष्टं धर्षितमित्यादौ विकल्पेट्त्वार्थमाह ।

मू०— दृढः स्थूलबलयोः ॥ दृहितो दृंहितोऽन्यः । दृह दृहि वृद्धौ ।

(सुबोधिनी—) दृढः स्थूलबलयोः । स्थूलो मांसलस्तस्मिन्नर्थे । बलमस्यास्तीति बलः । अर्शआद्यच्चेत्यः तस्मिन् बलवत्यर्थे च । आभ्यां परस्य क्तप्रत्ययस्य ढत्वं धातोरिडभावहलोपौ च इदितो नलोपश्च निपात्यते । दृढः । ननु हो ढ इति ढत्वं तथोर्धे इति धत्वे ष्टुत्वे च ढिढ इति ढलोपे कृते दृढेति रूपसिद्धौ सत्यां किमर्थं ढत्वहलोपयोर्निपातनम् । उच्यते । तथाहि सति ढलोपस्यासिद्धत्वेन अलघुत्वात् द्रढिमेत्यत्र ऋरइमनीति रभावो न स्यात् । परिद्रढय्य इत इत्यत्र परिद्रढीत्यस्माद्रामधातोः क्यप्रत्यये क्यपि लघु पूर्वात्परस्य ञेरिति ञेरयादेशो न स्याच्च । अतोऽसिद्धत्वनिवृत्तये निपातनं ॥

(तत्त्व ०—)स्थूलबलयोरेति। बलमस्यास्तीति बलः अ इकावित्यः। मांसलो निर्बलो दृढः

मू०- प्रभौपरिवृढः ॥ परिवृहितः परिवृंहितोऽन्यः ।

(सुबोधिनी—) प्रभौपरिवृढः । प्रभौ वाच्ये वृह वृहि वृद्धौ आभ्यां परस्य क्तस्य ढत्वं धाधो रिडभावहलोपौ च । इदितो नलोपश्च निपात्यते। प्रभुः परिवृढोधिप इत्यमरः । अत्रापि ढत्वहलोपयोर्निपातनं । व्रढिमा परिव्रढय्येत्यादिसिद्ध्यर्थं प्राग्वदेव ॥

मू० - कृच्छ्रगहनयोःकषः ॥ कष्टम् । कष्टो मोहः । कष्टं शास्त्रम् । कषितमन्यत् ।

(सुबोधिनी--) कृच्छ्रगहनयोः कषः । एतयोरर्थयोः कषः परस्य क्तस्येण्नस्यात् स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः । अत्र कष्टशब्देन दुःखं तत्कारणं च गृह्यते । कष हिंसायां । कष्टो मोहः । दुःखहेतुरित्यर्थः। कष्टं शास्त्रं । दुरवगाहमित्यर्थः ॥

मू०- घुष्टोऽविशब्दने ॥ घुष्टा रज्जुः। अविशब्दने किम् । घुषितं वाक्यम् ।

(सुबोधिनी—) घुष्टोऽविशब्दने। विशब्दनं प्रतिज्ञानं न विशब्दनमविशब्दनं तस्मिन्नर्थे घुषेः परस्य क्तस्येण् न स्यात् । घुषिर् शब्दार्थे भ्वादिः। घुषिर् अविशब्दने चुरादिः। द्वयोरप्यत्र ग्रहणं । ननु विशब्दनेऽर्थे इण्निषेधाभावात् ञिप्रत्यये उपधागुणे कृते सेटोः क्तक्तवत्वोरिति ञिलोपे च घोषितमित्यपि स्यात् । अत्राहुः । विशब्दनेऽर्थे चुरादेर्णिरेवानित्य इति ॥

(तत्त्व०—) घुषितमिति । शब्देन प्रकटीकृताभिप्रायमित्यर्थः ।

मू०-अभ्यर्णमाविदूर्य्ये ॥ अभ्यर्दितमन्यत् ।

(सुबोधिनी—) अभ्यर्णमाविदूर्य्ये । अर्देः परस्य क्तस्येण्न स्यात् आविदूर्य्येऽर्थे । विशेषेण दूरं विदूरं न विदूरमविदूरम् अविदूरस्य भावः आविदूर्य्य । अर्दगतौ याचने च । दस्तस्येति तदयोर्नत्वं । अभ्यर्णम् । नातिदूरमासन्नं वा ॥

(तत्त्व०—) आविदूर्यइति । विशेषेण दूरं विदूरं ततोऽन्यदविदूरं नातिदूरंमासन्नं वा सामीप्य इति तत्वमेव नोक्तं संकोचात् ।

मू०— क्षीरहविषोःपाकेशृतम् ॥ अन्यत्र श्राणम् श्रपितंवा ॥

(सुबोधिनी—) क्षीरहविषोःपाकेशृतं । श्रायतेः शृ आदेशो निपात्यते । श्रा पाके अदादौ चुरादौच घटादावपि पठ्यते । श्रै पाके भ्वादौ । अस्यापिकृतात्वस्येहग्रहणं। निपातनसामर्थ्याल्लक्षणप्रतिपदोक्तयोरिति परिभाषा नाश्रीयते। शृतं क्षीरं । स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः । क्षीरहविर्भ्यामन्यत्तु श्राणं । यलसंयोगादेरिति नत्वं श्रपितं शाकादिः । मितां ह्रस्व इति ह्रस्वः ॥

(तत्त्व०—) शृतामिति । श्राश्रपत्योर्निपातनं । श्राणमिति शाकादि ।

मू०—दान्तादयोवानिपात्यन्ते ॥ दान्तः । दमितः । शान्तः । शमितः । पूर्णः । पूरितः । दसु उपक्षये । दस्तः दासितः । स्पष्टः । स्पाशितः । छन्नः । छादितः । ज्ञप्तः । ज्ञपितः । रुष्टः । रुषितः । आन्तः अमितः । तूर्णः । त्वरितः । संघुष्टः । संघुषितः । आस्वांतः। आस्वनितः । हृष् तुष्टौ । हृष्टम् । हृषितं । अपचायितः । अपचितः। ध्यानः । पीनः । ल्हादी सुखे ।

(सुबोधिनी)दान्तादयो वा निपात्यंते।दांतादयः सप्त ञिप्रत्यये कृते सति क्तप्रत्यान्ता निपात्यन्ते शमु दमु उपशमे।जनीजृषिति मित्त्वादुपधाया ह्रस्वः। एषां सप्तानां निपातनादिडभावः। ञेरिति ञिलोपश्च अमांतस्येति दीर्घः।दांतः।शांतः। पूरी आप्यायने।दिवादौ चुरादौ च । र इति तस्य नत्वं । पूर्णः । दसु उपक्षये । स्पश बाधने। छद अपवारणे । एषां त्रयाणां वृद्ध्यभावो निपात्यते । दस्तः । छशषेतिषत्वं ष्टुत्वं । स्पष्टः । दतस्येति तदयोर्नत्वं । छन्नः । ज्ञप ज्ञानज्ञापनयोश्चुरादिर्मित्त्वादुपधाया ह्रस्वः

ज्ञप्तः । पक्षे कृत इतीट्सेटोः क्तक्तवत्वोरिति ञिलोपः । शमित इत्यादि । रुषादिभ्यः पंचभ्यः क्तस्येडागमो वा निपात्यते । रुष रोषे । इषु सहेति वेट्कत्वात् क्वचिद्वेट इति निषेधे प्राप्ते विकल्पो निपात्यते । रुष्टः । रुषितः । अम गत्यादिषु । अम रोगे इति चौरादिकस्तु न गृह्यते । एकस्वरादित्यधिकारात् ञमांतस्येति दीर्घः । आंतः । अमितः । ञित्वरा संभ्रमे । आदीदित इति निषेधे प्राप्ते इड्विकल्पो निपात्यते । ज्वरत्वरेत्यूः । र इति क्तस्य नत्वम् । तूर्णः ।त्वरितः । घुषिरः अविशब्दने । घुष्टोऽविशब्दने इति विशब्दनेऽर्थे नित्यमिटि प्राप्ते विकल्पो निपात्यते संघुष्टः। संघुषितः । स्वन शब्दे । ञमांतस्येति दीर्घः । आस्वांतः । आस्वनितः । आङ्पूर्वस्य स्वनेर्मनोभिधानेप्ययं विकल्पः परत्वात् । आस्वांतं आस्वनितं वा मनः । हृषु अलीके । अस्येदित इति क्त्वायां वेट्कत्वात् क्वचिद्वेटइतीण्निषेधे प्राप्ते। हृष तुष्टौ सेट्त्वादस्य नित्यमिति प्राप्ते विकल्पो निपात्यते । उभयोरिह ग्रहणं । हृष्टं हृषितं । लोम। हृष्टो हृषितो मंत्रः । विस्मितः प्रतिहतो वेत्यर्थः । चायृ पूजानिशामनयोः । अस्य च आदेशो निपात्यते वा क्ते। अपचितः।अपचायितः । ओप्यायी वृद्धौ। अस्य पीति निपात्यते वा क्ते । आदीदित इतीण्निषेधः । यवयोर्वसे इतियत इति वा यूलोपः । ल्वाद्योदित इति नत्वं । प्यानः । पीनः स्वेदः । स्वांगनित्यं । पीनं मुखं । सोपसर्गस्य न प्प्यानः । आङ्पूर्वस्य तु स्यादेव । आपीनः कूपः । आपीनमूधः ॥

(तत्त्व०—) दान्तादय इति । ण्यंता इत्यर्थः । तूर्ण इति त्वरासंभ्रम इत्यस्य । आदित्वं अस्य मंदफलमात्मनेपदस्थादित्वेनैव सिद्धेः ।

मू०— ल्हादेर्ह्रस्वः क्तिति ॥ प्रल्हन्नः

(सुबोधिनी—) ल्हादेर्ह्रस्वः क्तिति । ल्हादी सुखे । आदीदित इतीण्न । दस्तस्येति नत्वं । प्रल्हन्नः ॥

(तत्त्व०—) प्रल्हन्न इति । ल्हादी सुखे । ईदित्वान्नेट् ।

मू०— निनदीभ्यांस्नातेस्सस्यषःकौशले ॥ निष्णातः । नदीष्णातः । अधिकरणवाचिना क्तेन सह षष्ठी न समस्यते

(सुबोधिनी—)निनदीभ्यांस्नातेः सस्यषः कौशले । आभ्यां स्नातेः सस्य षः स्यात् कौशले गम्ये । शास्त्रेषु निष्णातः कुशलः । नद्यां स्नातो नदीष्णातः नदीस्नाने कुशलः । नाम्निचेति डः ॥ वर्तमानाधारार्थ क्तस्य योगे षष्ठी ॥

(तत्त्व०—) निनदीभ्यामिति ॥ नदीष्णात इति नदीस्नानेकुशलइत्यर्थः ।

मू०— स्थैर्यगतिभक्षणार्थेभ्योऽधिकरणेऽपिक्तः ॥ तथाच मुकुंदस्यासितमिदमिदं यातं रमापतेः । भुक्तमेतदनन्तस्येत्युचुर्गोप्यो दिदृक्षवः ।

(सुबोधिनी—) स्थैर्यगतिभक्षणार्थेभ्योऽधिकरणेऽपिक्तः । एभ्य आधारेर्थे क्तः

स्यात् । अपिशब्दने यथाप्राप्ते । मुकुंदस्य। सितामिदमिदं यातं रमापतेः । भुक्तमेतदनंतस्येत्यूचुर्गोप्यो दिदृक्षवः । द्रष्टुमिच्छाति दिदृक्षाति इति दिदृक्षवो गोप्य इत्यूचुः इतीतिकिम् । मुकुंदस्य कृष्णस्येदमासितं आस्यतेऽस्मिन्नित्यासितमासनं । रमापतेर्विष्णोरिदं यातं यायतेऽस्मिन्निति यातं मार्गः। अनन्तस्य हरेरेतद्भुक्तम्। भुज्यतेऽस्मिन्निति भुक्तम् भाजनम् । मुकुन्दस्येत्यादि त्रिषु वर्त्तमानाधारार्थक्तस्य योगे इति कर्त्तरिषष्ठी । पक्षे आसेरकर्मकत्वात् कर्त्तरि भावे च क्तः । आसित आसितं तेन । गत्यर्थेभ्यः कर्तरि कर्मणि च क्तः । ग्रामं यातः सः । ग्रामो यातस्तेन । भुजः कर्मणि क्तः । तेन भुक्तमन्नम् । कथं तर्हि भुक्ता ब्राह्मणाः । पीता गाव इति उच्यते । भुक्तमस्त्येषामिति अस्त्यर्थे अः ।

(तत्त्व०--) मुकुंदस्येत्यादि । आस्यतेऽस्मिन्नित्यासितमासनमित्यर्थः पायतेस्मिन्निति-पातं । भुज्यतेऽस्मिन्नितिभुक्तं भाजनमित्यर्थः । त्रिष्वपिअधिकरणार्थक्तस्येति कर्त्तरिषष्ठी ।

मू०- जीर्यतेरतृ ॥ जरन् । जरन्तौ ।

(सुबोधिनी-) जीर्यतेरतृ । जॄष् वयोहानौ आस्माद्भूतेऽर्थे अतृ प्रत्ययः स्यात्। अतृप्रत्ययमाह । ऋदित्वात् त्रितोनुमिति नुम्। ऋतौ गुणे कृते नामत्वात्स्यादौ । संयोगांतस्येति तलोपः तलोपस्यासिद्धत्वान्नोपधाया इति दीर्घो न भवति । ना जरन् स्त्री जरती । क्तक्तवत्वोः जीर्णः जीर्णवान् ॥

मू०- क्वसुकानौणब्वेवत् ॥ धातोरतीते काले एतौ भवतः । तौ च यथाक्रमं णबेवत् । द्वित्वम् । संयोगान्तस्यलोपः । चकृवान् । वसोर्वउः । चक्रुषः । चक्रुषा । वसांरसे । चकृवद्भ्याम् । चक्राणः बभज्वान् । जजागृवान् । द्वित्वेसत्येकस्वरादादन्ताद्घसेश्व वसोरिट् नान्यस्मात् ।

(सुबोधिनी-) क्वसुकानौणब्वेवत् । भूतसामान्ये क्वसुकानौ प्रत्ययावाह ।क्वसोः ककारो गुणनिषेधार्थः उकारस्तु पुंसि त्रितोनुमिति नुमर्थः । स्त्रियां तु ह्रितः इतीवर्थः। कानप्रत्ययस्य कित्करणमस्ति । राण इत्यत्र ऋसंयोगादितिकित्त्वाद्गुणस्य निषेधार्थम् । णबादिपरे यत् कार्य्यं द्वित्वादि तत्सर्वमनयोः परयोरपि स्यात् । डुकृञ् करणे द्वित्वादि । चकृवासिति जातं । नामसंज्ञायां स्यादिः । नसम्महत इति पुंसि पंचसु दीर्घः क्लीबे तु शौ दीर्घः। संयोगांतस्येति सलोपः । चकृवान् । चकृवांसौ चकृवांसः।चकृवांसम् चकृवांसौ।शसादौ तु वसोर्वउरित्युत्वे ऋरमिलिरःचक्रुषः । चक्रुषा । वसोरसे इति सस्य दत्वं । चकृवद्भ्यां । चकृवद्भिरित्यादि । स्त्रियां तु ध्रित इतीप्। वस्सेर्वउरित्युत्वे षत्वे च चक्रुषी ।क्लीबे तुचकृवत् चकृवांसि भज सेवायां। बभज्वान् । बभंजुषी । स्त्री । जागृनिद्राक्षये । जजागृवान् । जजाग्रुषी स्त्री । द्वित्वे सत्येकस्वरादादंताद् घसेश्च वसोरिट् नान्यस्मात् । द्वित्वे कृते सति एकस्वराद्धातो

रादंताद्धातोः घसेश्च परस्य वसोरिट् स्यात् नान्येभ्यः परस्य वसोः । कृतेपि द्वित्वे एकस्वरा ये धातवोऽवशिष्यन्ते तेभ्य इत्यर्थः । इवत्योरिति निषेधं बाधित्वा क्रादेरिति नियमात्सर्वत्र प्राप्तस्येटो नियमः ।

(तत्त्व०--) णबेवादिति । यथापरस्मैपदिभ्योणप्तथा क्वसुः । यथात्मनेपदिभ्यए तथाकानः द्वित्वे सतीति । द्वित्वे कृते सति एकस्वरो यस्तस्मादित्यर्थः ।

मू०– गमहनविदविशदृशांवा ॥ बभूवान् । भुवोवुक् । बभूवुषः बभूवुषा ।अद भक्षणे । आदिवान् ऋगतौ । आरिवान् । डुदाञ्दाने । ददिवान् ददरिद्रिवान् । वस्योत्वे । इडभावः । आदुषः जज्ञिवान् । जक्षिवान् । जग्मिवान् । जगन्वान् । जग्मुषः । जघ्निवान् । जघन्वान् । जघ्नुषा । विविदिवान् । विविद्वान् । विविदुषः विविशिवान् । विविश्वान् । ददृशिवान् ददृश्वान् । ईयिवान् सेदिवान् । ऊषिवान् । शुश्रुवान् । शुश्रुवुषः ।

(सुबोधिनी–) गहमनविदविशदृशांवा । एभ्यः परस्य वसुप्रत्ययस्येड्वा स्यात् । विशिना साहचर्यात् विद्लृलाभे इत्यस्य ग्रहणं । भू सत्तायां बभूवान् बभूवांसौ । शसादौ तु वसोर्वउरित्युत्वे कृते भुवोवुगिति वुक् । बभूवुषः । बभूवुषा । बभूवद्भ्यामित्यादि । बभूवुषी स्त्री । अद भक्षणे । द्वित्वहसादिशेषपूर्वदीर्घसवर्णदीर्घेषु कृतेषु कृते द्वित्वेप्ययमेकस्वरएवेति इट् च भवति आदिवान् । वस्योत्वे कृते इडभावो भवति । निमित्ताभावे नैमित्तिकस्याप्यभाव इत्युक्तत्वात् । आदुषी स्त्री । ऋ गतौ गुणोर्तीति गुणे कृते द्वित्वादिषु कृतेषु अप्येकस्वरः । इट् च भवति । आरिवान् । आरुषी स्त्री । डुदाञ् दाने कृते द्वित्वे नायमेकस्वरः । अनेकस्वरत्वादिण्निषेधे प्राप्ते सूत्रे आदंतग्रहणादिट् भवति आतोनपीत्यालोपः । ददिवान् ददुषी स्त्री । दरिद्रा दुर्गतौ । आदंतग्रहणादिट् । आतोनपीत्यालोपः ददरिद्रिवान् । ददरिद्रुषी स्त्री । अद भक्षणे । सिसंयोगादेरदेर्घस्लृ इति । लिटि वा घस्लृ आदेशः । द्वित्वे कृते नायमेकस्वरः । सूत्रेघसेर्ग्रहणादिट् । उपधालोपात्प्रागेव द्वित्वं । पश्चाद्गमांस्वरे इत्युपधालोपः । घसादेःष इति षत्वम् खसेचपा इति घस्य कः । जक्षिवान् । जक्षुषी स्त्री । गम्लृ गतौ । गमादीनां चतुर्णामिड्वा द्वित्वादि । गमामित्युपधालोपः । जगामेति जग्मिवान् । इडभावे मोनोधातोरिति मस्यनः जगन्वान् । जग्मुषी स्त्री । "श्रेयांसि सर्वाण्यधिजग्मुषस्ते" इति रघुः । हन हिंसागत्योः द्वित्वादि गमामित्युपधालोपः । हनोघ्न इति हस्य घः । जघ्निवान् । इडभावे पूर्वाद्धंतेरिति परस्य हस्य घः । जघन्वान् । जघ्नुषी स्त्री । विद्लृलाभे । विविदिवान् । इडभावे । विविद्वान् । विविदुषी स्त्री । विश प्रवेशने । विविशिवान् विविश्वान् । विविशुषीस्त्री । इण् गतौ । द्वि-

त्वं इणः परस्य वसोरिट् निपात्यते द्वित्वे सत्येकस्वराभावाद्विधिरयम्। इणः किति णादावति पूर्वदीर्घः। सवर्णेदीर्घ इति सूत्रं बाधित्वा नित्यत्वादिणः क्ङितिस्वरे इति यः। वसोरिडागमस्य कित्स्वरस्य परत्र सत्वात् ईयिवान्। ईयुषी स्त्री। षद्लृ विशरणादौ। द्वित्वादि। लोपः पचामित्येत्वपूर्वलोपौ इट् सेदिवान्। सेदुषी स्त्री। "निषेदुषीमासनबंधधीर" इति रघुः। वस निवासे। द्वित्वादि णबादौ पूर्वस्येति पूर्वस्य संप्रसारणं। यजामिति परस्य संप्रसारणं। सवर्णे दीर्घ इति दीर्घे कृते एकस्वरत्वादिट्। घसादेरिति षः। ऊषिवान्। ऊषुषी। स्त्री। "अध्यूषुषस्तामभवज्जनस्य" इति माघः। श्रुश्रवणे। शुश्रुवान्। शुश्रुषी स्त्री॥

(तत्त्व०--) वभूवानिति। केवलस्यैकस्वरत्वे कृतद्वित्वस्य तदभावात्। एतौ छंदस्येवेति पाणिनीयानुसारिणः। भाषायामपीत्यन्ये।

मू०-शतृशानौतिप्तेवत्क्रियायाम्॥ क्रियायांगम्यमानायांधातोः शतृशानौ भवतस्तौ च तिप्तेवत्। पचन्नास्ते। पठंस्तिष्ठति गायन्नागच्छति।

(सुबोधिनी-) शतृशानौतिप्तेवत्क्रियायां। शतृशानप्रत्ययावाह। उभयोः शित्वाच्चतुर्वत्कार्य्यं। ऋदित्वात् पुंसि न्रितोनुमिति नुम्। स्त्रियां तु ञ्रित इतीप्। पचतीति अप् पचन्। विक्लित्यनुकूलवर्त्तमानव्यापाराश्रयश्चैत्रः॥

(तत्त्व०-) शतृशानाविति। परस्मैपदिभ्यः शतृआत्मनेपदिभ्यःशानउभयपादिभ्यस्तूभयं।

मू०-मुगानेतः॥ अकारस्थाने मुगागमः स्यात्। पचमानऽपठति। मन्वानः। कुर्वाणः। दादेरिः। पीयमानस्सोमो भवता। दीयमाना गौः।

(सुबोधिनी-) मुगानेतः। अदंतस्य मुगागमः स्यादाने परे। पचते इति पचमानः। मनुते इति मन्वानः। कुरुते इति कुर्वाणः। उभयत्र उप्। ङ्त्यदुरित्यत उत। पीङ् पाने। दीङ् क्षये। दैवादिकाविमौ। अथवा पा पाने। डुदाञ् दाने। आभ्यां कर्मणि शानप्रत्यये कृते यक् चतुर्ष्वेति यक्। दादेरिरितीत्वं। ये इति दीर्घः। दीयमानः पीयमानः॥

मू०-आसेरानई॥ आसेः परस्यान ईः स्यात्। आसीनः।

(सुबोधिनी-) आसेरानईः। आनस्य आतःईत्वं। आस उपवेशने। आस्ते इति आसीनः॥

(तत्त्व०-)आसेरानई: आनस्य आ तस्य। क इति वधः धातोरप्यालोपःक्वचित्।(!)

मू०-वादीपोश्शतुः॥अवर्णात्परस्य शतुर्वानुमीकारे ईपि च परे। तुदन् सः। तुदती, तुदन्ती। कुले स्त्री वा।

(सुबोधिनी-) वादीपोः शतुः । अवर्णात्परस्य शतृप्रत्ययस्य नुम् वा स्यात् ईपि ईकारे च। तुदतीति तुदन् । तुदंतौ । तुदंतः स्त्रियां तु तुदती तुदंती । क्लीबे तु तुदत् । तुदती, तुदंती । तुदंति ॥

मू०--अप्श्यनोर्नित्यम् ॥ अप्प्रत्यय श्यप्रत्ययसम्बन्धिनोऽवर्णात्परस्य शतुर्नुम्नित्यमीकारे ईपि च । भवन् सः । भवन्ती। दीव्यत्। दीव्यन्ती । दीव्यन्त्यौ । गंगायमुने । द्विरुक्तानां जक्षादीनाञ्च परस्य शतुर्नुम्न शौ वा । ददत् । दधत् ।

(सुबोधिनी-) अप्श्यनोर्नित्यम् । अप्श्यप्रत्ययाभ्यां परस्य शतुर्नित्यं नुम् स्यात् ईपि ईकारे च । भवतीति पुंसि भवन् । भवंतौ । स्त्रियां तु भवंती । क्लीबे तु भवत् । भवती । भवंति । दीव्यतीति य्वोर्विहसे इति दीर्घः ।दीव्यन् दीव्यन्तौ। स्त्रियां तु दीव्यंती ।क्लीबे तु दीव्यत् । दीव्यती। दीव्यंति । ददातीति दधातीति च ह्वादेर्द्विश्चेति द्वित्वादि । दादेरिसालोपः। ददत् सः । ददती।ददंती स्त्री । ददत्। ददती । ददति। ददंति । दधन् सः । दधती, दधंती स्त्री । दधत् दधती । दधति । दधंति ॥

मू०--विदेर्वा वसुः ॥ वेत्तेः परस्य शतुर्वा वसुरादेशः । विद्वान् ।विदन् ।

(सुबोधिनी-) विदेर्वा वसुः । वसोरुदित्करणं वसोर्वउरित्युत्वार्थम्। नुम् तु स्थानिवत्त्वेनव सिद्धः। वेत्तीति अपित्तादेर्ङिदिति वसुशत्रोर्ङित्त्वं। ङित्त्वाद्गुणो न । विद्वान् । विदन् । विदुषी स्त्री ॥

(तत्त्वदी०-)विदेर्वेति। शतृवदेव ऋदित्वेन नुमि सिद्धे वसोरुदित्करणं वसुग्रहणेन क्वसोरपि ग्रहणार्थम् ।

मू०--माङ्याक्रोशे ॥ माजीवन् ।

(सुबोधिनी-) माङ्याक्रोशे । माङि उपपदे निंदायामर्थे धातोः शतृप्रत्ययः स्यात् । माङि सिरेवेति लुङि प्राप्ते लड्विधिः । जीव प्राणधारणे । माजीवन् ॥

मू०--लक्षणहेत्वोः क्रियायाः ॥ शयाना भुञ्जते यवनाः । अर्जप्रतियत्ने चुरादिः । अर्जयन्वसति ।

(सुबोधिनी-) लक्षणहेत्वोःक्रियायाः । क्रियायाः चिंहे हेतौ चार्थे वर्त्तमानाद्धातोः शतृशानौ स्तः । अत्र हेतुशब्देन फलं कारणं चोच्यते । शेरते इति शीङो गुण इति गुणः । शयाना भुंजते यवनाः । यवनकर्तृकभोजनस्य शयनं लक्षणं अर्जप्रतियत्ने चुरादिः । अर्जयतीति अर्जयन् वसति । अर्जनार्थो वास इत्यर्थः ।

(तत्त्वदीपिका-) शयाना इति । अत्र शयनं भोजनस्य लक्षणं । अर्जयन्निति । अर्ज प्रतियत्ने चुरादिः । अर्जनार्थो वा स इत्यर्थः । लक्षणहेत्वोः किं । पचति पठति च । क्रिया-

याः किं । यः कंपते सोऽश्वत्थवत्प्लवते तल्लघुद्रव्यगुणयोर्लक्षणं माभूत् । हन्तीति पलायते । वर्षतीति धावतीत्यत्र इतिना हेतुत्वस्य द्योतितत्वान्न ।

मू०–भविष्यतिस्यपृशतृशानपरः ॥ हन्भूतस्यपः । करिष्यन् । करिष्यमाणः ।

(सुबो०–) भविष्यतिस्यपृशतृशानपरः । भविष्यत् स्यबंताद्धातोः परयोरात्पयोः स्थाने शतृशानौ वा स्तः । करिष्यतीति करिष्यन् । सिसतेतीट् करिष्यते इति करिष्यमाणः ।

मू०–ताच्छील्यवयोवचनशक्तिष्वानश् ॥ भोगंभुञ्जानः । कवचंबिभ्राणः । शत्रून्निघ्नानः ॥

(सुबोधिनी–) ताच्छील्यवयोवचनशक्तिष्वानश् । ताच्छील्यं तत्स्वभावता वयो यौवनादिः शक्तिः सामर्थ्यं । एषु द्योत्येषु धातोः कर्तरि आनश् स्यात् । आनश्प्रत्ययमाह । शित्वाचतुर्वत्कार्य्यं । परस्मैपदिभ्यो प्यानश् स्यात् । एतदर्थमिदं भुनक्तीति रुधादित्वान्नम् । नमसोऽस्येत्यलोपः । भुंजानः । बिभर्तीति बिभ्राणः । हंतीति गमामित्युपधालोपः । हनोघ्ने इति हस्य घः निघ्नानः ॥

(तत्त्वदीपिका–)ताच्छील्य इति । ताच्छील्यं तत्स्वभावता । वयो यौवनादि । शक्तिः सामर्थ्यं । पदानियमोऽत्र

मू०–इङ्धार्योरकृच्छ्रिणिकर्तरिशतृ ॥ इङ् अध्ययने । अधीयन् । धृञ् धारणे । ण्यन्तः । धारयन् । द्विष अप्रीतौ ।

(सुबोधिनी–) इङ्धार्योरकृच्छ्रिणिकर्त्तरिशतृ । अकृच्छ्रः सुखसाध्यो धात्वर्थः आभ्यां शतृप्रत्ययः स्यात् अकृच्छ्रिणि कर्त्तरि । पुनः शतृप्रत्ययमाह । इङ् आत्मनेपदित्वात् शतृप्रत्ययो न सिद्ध्यति धारयतेरपि आत्मगामिनि क्रियाफले शतृप्रत्ययो न सिध्यति तदर्थोयमारंभः । इङ् अध्ययने । अधीते इति अदादित्वादपो लुक् नुधातोरितीय् अधीयन् । धारयते इति अप् धारयन् ॥

(तत्त्वदीपिका–) इङ् । अकृच्छ्रः सुखसाध्यो धात्वर्थः सोऽस्यास्तीत्यकृच्छ्री । ण्यन्तत्वादुभयपदित्वेनोभयप्राप्तौ शत्रेव यथा स्यादित्येतदर्थमिदं ।

मू०–द्विषश्शत्रौ ॥ द्वेष्टीति द्विषन् ।

(सुबोधिनी–) द्विषःशत्रौ । द्विष् अप्रीतावस्मात् शत्रौ वाच्ये शतृप्रत्ययः स्यात् । द्वेष्टीति द्विषन् ॥

मू०–अर्हपूजायाम् ॥ अर्हन् ।

(सुबोधिनी–)अर्हपूजायां । अर्हपूजायामस्मात् शतृप्रत्ययः स्यात् पूजायामर्थे ह्यतीति अर्हन् ॥

नतोकाव्यपानिष्ठाखलर्पतृनामेषांप्रयोगेषष्ठीन

(तत्त्वदीपिका)– अर्हइति । पूजायां किं । अर्हयति चौरो वधं ।

मू०–शीले ॥ तृन् । कटंकर्ता । हृञ् हर्ता ।

(सुबोधिनी–) शीले । तृन्प्रत्ययमाह । नकारः स्वरार्थः। इतः परं वक्ष्यमाणाः प्रत्ययाः ताच्छील्यादिषु बोध्याः । करोतीत्येवंशीलः कर्त्ता कटम् ॥

मू०–इष्णुस्नुक्नुशीले॥अलंकरिष्णुः । निराकरिष्णुः। जनी । प्रजनिष्णुः ।

(सुबोधिनी–) इष्णुस्नुक्नुशीले। धातोरेते प्रत्ययाः शीलेऽर्थे। इष्णुस्नुक्नुप्रत्ययानाह । क्नुककारो गुणनिषेधार्थः । अलं करोतीत्येवं शीलोऽलंकरिष्णुः । निराकरोतीत्येवं शीलो निराकरिष्णुः । जनी प्रादुर्भावे । प्रजायते इत्येवं शीलः प्रजनिष्णुः॥

(तत्त्वदीपिका–) इष्णुस्नुक् । इष्णुश्च स्नुश्च क्नुश्च एषां समाहारः । ण्यन्तभाजभूसहनुवचरवृधक्तप्रजननश्च यत्रयं । अलंकृञ् निराकृञ् उकणच् । जल्पभिक्षुकुट्टलुंठवृङः षाकः सान्ताशंसुभिक्ष उः। लषपतपदस्थाभूवृषहनकमगमशृभ्य उकण्।

मू०–जिभुवोर्नेङ्गुणौस्नौ ॥ जि जये । जिष्णुः । भूष्णुः । ग्लास्नुः । त्रस्नुः । त्रेङ् त्रस्नुः । गृध्नुः । ञिधृषा धृष्णुः। क्षिपः क्षिप्नुः ।

(सुबोधिनी--) जिभूवोर्नेङ्गुणोस्नौ । जयतीत्येव शीलो जिष्णुः । भवतीत्येवं शीलो भूष्णुः । ग्लायतीत्येवं शीलो ग्लास्नुः त्रसीउद्वेगे । क्नुः । हवत्योरितीण त्रस्नुः। गृधु अभिकांक्षायां । गृध्नुः। ञिधृषा प्रागल्भे। धृष्णुः । क्षिप प्रेरणे । क्षिप्नुः।

मू०–षाकोकुणः ॥ शीलार्थे षाक उ उकण् प्रत्यया भवंति । जल्पाकः । भिक्षायाम् । भिक्षाकः।कुट्ट च्छेदे । कुट्टाकः दुष्टः। भिक्ष लुण्ठचौर्ये । लुण्ठाकः । वृङ् संभक्तौ । वराकः। भिक्षुः । शसि वाक्यप्रबन्धे । इदितोनुम् । आशंसुः चिकीर्षुः । लषू कान्तौ । लाषुकः । पत्लृपतने पातुकः आतोयुक् । स्थायुकः । भावुकः। वृषु सेचने । वर्षुकः। घातुकः । कामुकः ।

(सुबोधिनी--) षाकोकणः । षाक उ उकण् प्रत्ययानाह । षाकस्य षः ष्वित इतीवर्थः। उकणोणो वृद्ध्यर्थः। जल्पतीत्येवं शीलः जल्प व्यक्तायां वाचि। जल्पाकः भिक्षभिक्षायां भिक्षाकः। कुट्ट च्छेदने । लुंठ स्तेये । चौरादिकाविमौ । कुट्टाकः । लुंठाकः । वृञ् वरणे वृङ् संभक्तौ । वराकः । सांताऽऽशंसभिक्षिभ्य उः। सः ।प्रत्ययः तदंतो धातुः सांतउच्यते । आङः शंसु इच्छायामयमेव गृह्यते । न तु शंसु स्तुतौ आङा सह निर्देशात् । भिक्ष भिक्षायां । भिक्षुः । आशंसुः । कर्तुमिच्छति चिकिर्षतीति सप्रत्यये द्वित्वाद्यः से इतीत्वं सेदीर्घ इति दीर्घः ऋतइतीर् य्वोर्विहसे इति दी-

घः षत्वं चिकिर्षेति जातं । यत इत्यलोपः । चिकीर्षुः । लष कांतौ । उकञ् । लाषुकः पत्लृ पतने । पातुकः । पदगतौ पादुकः । ष्ठा गतिनिवृत्तौ । आतोयुगिति युक् । स्थायुकः । भू सत्तायां । भावुकः । वृष सेचने । उपधायालघोरिति गुणः वर्षुकः । हन हिंसागत्योः हनोघदिति घत घातुकः । कमु कांतौ । कामुकः गम्लृ गतौ । गामुकः । शॄ हिंसायां । शारुकः ॥

(तत्त्वदीपिका-) जल्पाक इति । जल्पनशीलः । एवं सर्वत्र शीलार्थप्रत्यये वाक्यं षई-बर्थः तेन वराकी ।

मू०-शॄवंद्योरारुः ॥ शॄ हिंसायाम् । शरारुः । वदि वन्दारुः ।

(सुबोधिनी-) शॄवंद्योरारुः । शॄ हिंसायां । वदि अभिवादनस्तुत्योः । आभ्यामारुः । आरुप्रत्ययमाह । शरारुः । वंदारुः । शरारुर्घातुको हिंस्रो वंदारुरभिवादक इत्यमरः ॥

मू०-स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाशीङ्भ्यआलुः ॥ स्पृहयालुः । गृहू ग्रहणे । चुरादिः । गृहयालुः । पतयालुः । दय दाने । दयालुः । द्रा कुत्सायाम् । निद्रालुः । तदोनान्तत्वम् । तन्द्रालुः । श्रद्धालुः । शीङ् । शयालुः ।

(सुबोधिनी-) स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाशीङ्भ्यआलुः । आलुप्रत्ययमाह । स्पृह ईप्सायां । गृहु ग्रहणे । पदगतौ। एते त्रयश्चुरादावदंताः । अल्लोपस्य स्थानिवत्वान्नोपधायागुणवृद्धी । णेरिति णिलोपो न । नत्विडामंतेतिनिषेधात् । णेर्गुणे कृते स्पृहयालुः । गृहयालुः । पतयालुः । दय दाने । दयालुः । द्रा कुत्सायां । निपूर्वः । आतोनपीत्यालोपः निद्रालुः । तत्पूर्वोद्रा तत शब्दस्य समाजे नत्वं निपात्यते । तंद्रालुः । श्रत वौं डुधाञ् धारणादौ । धेट्पानेऽयं तु न गृह्यते । श्रत्पूर्वस्य धेट् प्रयोगाभावात् शीङ् स्वप्ने । शयालुः । कथं तर्हि कृपालुः । स्पर्धालुरिति । कृपां स्पर्द्धां च लातीति विग्रहे मृगय्वादित्वात्कुः ॥

(तत्त्वदीपिका-) स्पृहि इति स्पृह्यादयस्त्रयोपि चुरादावदन्ताः । अल्लोपस्यस्थानित्वान्नोपधागुणवृद्धी । नत्विडामंतेत्यादिना निषेधात् णेर्लोपोन ।

मू०-शमादिभ्यो घिनुण्॥शमउपशमे शमी । तमी । दमी । भ्रमी। क्षमी । क्लमी । श्रमी । प्रमादी । चजोः कगौ घिति ॥ चकारजकारयोःककारगकारौ घिति । सम्पर्की । योगी । विवेकी । त्यागी ।असि । उसि । अने कके घिनुणि रञ्जेर्नलोपो वाच्यः । रागी । भागी। विकाषी । विलासी । प्रलापी । प्रसारी । मथ हिंसायाम् । प्रमाथी। प्रवासी ।

(सुबोधिनी—) शमादिभ्यो घिनुण्। शमु तमु दमु श्रमु भ्रमु क्षमु क्लमु मदि शमादयोऽष्टौ। घिनुण्प्रत्ययमाह। उकार उच्चारणार्थः। घित्वाच्चजोरिति कगौ। णित्वाद्वृद्धिः। शाम्यतीत्येवं शीलः। मांतस्य सेट इति न वृद्धिः। इनामिति दीर्घः। शमी। तमी। दमी। श्रमी। भ्रमी। क्षमी। क्लमी। प्रपूर्वस्य मदेर्दीर्घः प्रमादि। आदिशब्देनान्येपि ग्राह्याः। पृचि संपर्के। चजोरिति कः संपर्की। सृज विसर्गे। युज समाधौ। युजिर् योगे वा। योगी विचिर् पृथक् भावे। विवेकी। त्यजहानौ। त्यागी राजृ दीप्तौ। रागी। भज सेवायां। भागी। कष् हिंसायां। विकाषी। लस श्लेषण क्रीडनयोः विलासी। लप व्यक्तायां वाचि। प्रलापी। सृ गतौ। प्रसारी। मंथ विलोडने। प्रमाथी। वस निवासे। प्रवासी॥

(तत्त्वदीपिका—) शमादिभ्यइति। घो घित्कार्यार्थः। उकारउच्चारणार्थ इति वृत्तिः उरिदिदिति भाष्यं। तेन शमिनितराशमिनीतरेत्यत्र वृतःपरस्येति ह्रस्वो वा। शमीशमिनावित्यत्र नुमभावस्तु झसग्रहणमपकृष्य झसान्तानामेव तद्विधानात्। शमीति। शमनशील इति वाक्यं। अमंतत्वाद्ध्रस्वः।

मू०—निन्दादेर्वुञ्॥ निन्दकः। हिंसकः। परिक्षेपकः। परिवादकः।

(सुबोधिनी—) निंदादेर्वुञ्। वुण्प्रत्ययेनापिसिद्धे वुञ्वचनं ज्ञापकम्। शीलादिष्वर्थेषु त्राऽऽदयो न भवंतीति। वुञ् प्रत्ययमाह। ञित्वाद्वृद्धिः। युवोरनाकावित्यकादेशः। णिदिकुत्सायां। निंदकः। हिसि हिंसायां। हिंसकः। क्षिप प्रेरणे। क्षेपकः। वद व्यक्तायां वाचि। ण्यंतः णेरिति णिलोपः। परिवादकः॥

(तत्त्वदीपिका—) निंदादेरिति। वुणैव सिद्धे वुञ्वचनं। ताच्छीलिकेषु वासरूपविधिर्नास्ति तेनैतेषु तृन्नादयोन।

मू०—चलनशब्दार्थादकर्मकाद्युः॥ चुप मन्दायाङ्गतौ। चोपनः। चलनः। कम्पनः। शब्दनः। रवणः।

(सुबोधिनी—) चलनशब्दार्थादकर्म्मकाद्युः। चलनार्थादकर्मकात शब्दार्थाच्च युः स्यात्। युप्रत्ययमाह युवोरित्यनादेशः। चल कंपने। चलनः। चुप मंदायां गतौ। चोपनः। कपि चलने कंपनः। शब्द शब्दने। अदंतः। चुरादिः। णिरिति णिलोपः शब्दनः। रु शब्दे रवणः अकर्मकात् किम्। पठिता विद्या॥

(तत्त्वदीपिका—) चलनशब्दार्थादिति। चलनंदेशान्तरप्राप्तिहेतुः क्रियाविशेषः। शब्दः श्रोत्रग्राह्यार्थः चलकंपने। शब्दशब्दने चुरादिः॥

मू०—अनुदात्तेतोहसादेरकर्मकात्॥ वर्तनः। रमणः।

(सुबोधिनी—) अनुदात्तेतोहसादेरकर्मकात्। युः स्यात्। वृतु वर्तने। वर्तनः। अनुदात्तेतः किं। भविता। हसादेः किम् एधिता। अकर्मकात्किं। वासिता वस्त्रं॥

(तत्त्वदीपिका--) अनुदात्तेति यद्यपिसर्वोनुदात्तेद्धसान्त एवातो हसग्रहणसामर्थ्या-देव हसादिर्गृह्यते । जुगुप्सादिसान्तोनुदात्तादस्ति अवयवे कृतं लिंगमचरितार्थं समुदायस्य वि-शेषकमित्युक्तत्वात् । अतस्तद्व्यावृत्तये तदंतविधिः स्यादित्यादिग्रहणं । वर्त्तन इति । व-र्त्तते तच्छीलइति विग्रहः । अनुदात्तेतः किं भविता । हसादेः किं । एधिता । अकर्मकात्किं । वसिता वस्त्रम् ।

सू०--ज्वादेश्च ॥ जुगतौ वेगेच । जवनः । सरणः । गर्द्धनः । क्रो-धनः । रोषणः । मण्डनः । भूषणः ।

(सुबोधिनी-) ज्वादेश्च । युः स्यात् । जु गतौ वेगे च । जवनः । सृ गतौ । स-रणः । गृधु अभिकांक्षायां । गर्द्धनः । क्रुध क्रोधे । क्रोधनः । रुष रोषे रोषणः । मडि भूषायां । मंडनः । भूष अलंकारे । भूषणः ॥

सू०--ज्यादेरिनिः ॥ जयी । प्रजवी । दरी । क्षयी ।

(सुबोधिनी-) ज्यादेरिनिः । इनिप्रत्ययः स्यात् । इनिप्रत्ययमाह । इकार उ-च्चारणार्थः । जि जये । जि अभिभवे च । इनामिति दीर्घः । जयी । जु गतौ वेगे च । प्रजवी । दृङ् आदरे । दरी । क्षि क्षये । क्षि निवासगत्योश्च । क्षयी ॥

सू०--दादेरुः ॥ दारुः । धारुः । सेरुः ।

(सुबोधिनी-) दादेरुः रुप्रत्ययः स्यात् । रुप्रत्ययमाह । डुदाञ् दाने । दोऽ-वखंडने । देङ् पालने । त्रयाणामेषां ग्रहणं । दारुः न तु दाणूदापोर्ग्रहणं । डुधाञ् धारणादौ । धारुः । षिञ् बंधने । सेरुः ॥

सू०--सृघस्यदःक्मरः ॥ सृमरः । घस्मरः । अद्मरः ।

(सुबोधिनी-) सृघस्यदःक्मरः । क्मरप्रत्ययः स्यात् । क्मरप्रत्ययमाह । कि-त्त्वाद्गुणो न सृ गतौ । सृमरः । घस्लृ अदने । घस्मरः । अद भक्षणे । अद्मरः ॥

सू०--भञ्जभासमिदोघुरः ॥ भङ्गुरः । भासुरः । मेदुरः ।

(सुबोधिनी-) भंजभासमिदोघुरः । एभ्यो घुर प्रत्ययः स्यात् । घुरप्र-त्ययमाह । घित्वात् चजोरिति कगौ । भंजो आमर्दने । भंगुरः । भासृ दीप्तौ । भासुरः । ञिमिदा स्नेहने । मेदुरः ॥

(तत्त्वदीपिका--) भंजभासमंजेः कर्मकर्त्तरि । अभिधानस्वाभाव्यमत्र हेतुः ।

सू०--विदिभिदिच्छिदेःकुरः ॥ विदुरम् भिदुरम् छिदुरम् ।

(सुबोधिनी-) विदिभिदिछिदेःकुरः । कुरः प्रत्ययः स्यात् । कुरप्रत्ययमाह । कित्त्वाद्गुणो न । विद ज्ञाने । अस्यैव ग्रहणम् । न तु विद्लृ लाभे इत्यस्य संप्रदाया-त् । विदुरः । भिदिर् विदारणे भिदुरं । छिदिर द्वैधीकरणे । छिदुरं । कुरुः

कर्त्तरि भवति । तथाच माघः । प्रियतमायवपुर्गुरुमत्सराच्छिदुरयादुरयाचितमंगना इह अदुरिति छेदः ॥

(तत्त्वदीपिका--) विदिभिदीति । ज्ञानार्थविदिर्व्याख्यानात् । छिदुरमिति । कर्मकर्त्तरीति कश्चित् । भाष्ये तु न तथैवमाद्योपि प्रागुक्त एव मुख्यकर्त्तरि । गुरुमत्सरच्छिदुरया दुरयाचितमंगनाइति ।

सू०--इण्नशजिसर्तिभ्यः करप् ॥ ह्रस्वस्यपिति तुक् इत्वरः । इत्वरी । नश्वरः । जित्वरः । सृत्वरः । गमेर्लोपश्च गत्वरः ।

(सुबोधिनी-) इण्नशजिसर्तिभ्यः करप् । एभ्यः क्वरप् प्रत्ययः स्यात् । क्वरप्प्रत्ययमाह । कित्वान्न गुणः । टित्वाड्डित्वत इतीप् । पित्वात्तुक् । इण् गतौ । इत्वरः इत्वरी स्त्री । णश् अदर्शने । नश्वरः । जि जये । जित्वरः । सृ गतौ । सृत्वरः । गम्लृ गतौ । मलोपो निपात्यते । गत्वरः ॥

(तत्त्वदीपिका--) इत्वरः ह्रस्वस्येतितुक् । टईबर्थः ।

सू०- जागर्तेरूकः ॥ जागरूकः ।

(सुबोधिनी-) जागर्तेरूकः । ऊकप्रत्ययः स्यात् । ऊकप्रत्ययमाह । जागृ निद्राक्षये । जागरूकः ॥

सू०- यङऊकः ॥ यजजपदशवदिभ्यो यङन्तेभ्य ऊकश्शीले लुक् ॥ ऊकेसति यङो लुक् । यायजूकः । जञ्जपूकः । दंदशूकः । वावदूकः ।

(सुबोधिनी-) यङऊकः । यजादिभ्यो यङन्तेभ्य ऊकः स्यात् । यजेर्याङि कृते द्वित्वादि । आत इति पूर्वस्य दीर्घेऽतिशयेन यजतीति यायज्यते । २ । इतियायजूकः । जप व्यक्तायां वाचि । अतिशयेन जपतीति जपजपामिति नुक् । जंजप्यते । २ । इति जंजपूकः दंश दशने । अतिशयेन दशतीति नुक् दंदश्यते । २ । इति दंदशूकः । नोलोप इति नलोपः वद व्यक्तायां वाचि । अतिशये न वदतीति वावद्यते । १ । इति वावदूकः ॥

सू०- भियःक्रुक्लुकक्लुकाः ॥ भीरुः । भीरुकः । भीलुकः ।

(सुबोधिनी--) भियःक्रुक्लुकक्लुकाः । ञिभि भये । अस्मादेते प्रत्ययाः स्युः क्रुक्लुकक्लुकप्रत्ययानाह । कित्वान्नगुणः । भीरुभीलुकभीरुका इत्यमरः ॥

सू०- नमादेरः ॥ नम्रः स्मेरः । नञिपूर्वाज्जसेः क्रियासातत्ये । अजस्रम् । कम्रः । हिंस्रः दीप्रः ।

(सुबोधिनी-) नमादेरः । रप्रत्ययः स्यात् । रप्रत्ययमाह । णम् प्रह्वत्वे शब्दे च । नम्रः । कपिचलने कंप्रः । ष्मिङ् ईषद्धसने । स्मेरः । जसु मोक्षणे । नञ् पूर्वः ।

नाइत्यः । अजस्रं कमु कान्तौ । कम्रः । हिसि हिंसायां । हिंस्रः । दीपी दीप्तौ । दीप्रः ॥

मू०—विन्दुरिच्छुरेतौनिपात्यौ ॥ वेत्तितच्छीलोविन्दुः। इच्छतीतीच्छुः ।

(सुबोधिनी—) विंदुरिच्छुरेतौनिपात्यौ । वेत्तेर्नुम् इषेश्च्छत्वं च निपात्यते। विद ज्ञाने इत्यस्यैव ग्रहणं नेतरेषां । इषु इच्छायां इत्यस्यैवग्रहणं न तु ईषगतौ इषआभीक्ष्ण्ये इत्यनयोरनाभिधानान्निपातनाद्वा। वेत्तीत्येवं शीलो विंदुः । इच्छतीत्येवंशीलः इच्छुः । बिंदु शब्दः पवर्गीयादिस्तु बिदि अवयवे अस्मान्मृगय्वादित्वात् कुप्रत्यये बोध्यः ॥

(तत्त्वदीपिका—) विंदुःवेत्तेर्ज्ञानार्थस्य नुमागमा एवमिषेरिच्छार्थस्य छत्वमुप्रत्ययश्च।

मू०—स्वपितृषिधृषेर्नजिङ् ॥ स्वप्नक् । तृष्णक् । धृष्णक् ।

(सुबोधिनी—) स्वपितृषिधृषेर्नजिङ् । एभ्यो नजिङ् प्रत्ययः स्यात् । नजिङ्प्रत्ययमाह । ङित्वान्न गुणः । इकारउच्चारणार्थः । ञिष्वप् शये । चोःकुरिति जस्य गः स्वप्नक् । तृष पिपासायां। तृष्णक्। ञिधृषा प्रागल्भ्ये । धृष्णक् ॥

(तत्त्वदीपिका—) स्वपि । धृष्णगिति । ङित्वान्न गुणः ।

मू०- स्थादेर्वरः ॥ स्थावरः । ईश्वरः भास्वरः । पेस्वरः । कस्वरः ।

(सुबोधिनी—) स्थादेर्वरः । एभ्यो वरप्रत्ययः स्यात् । वरप्रत्ययमाह । ष्ठा गतिनिवृत्तौ । स्थावरः । ईशऐश्वर्ये । हवत्योरितीण्न । ईश्वरः भासृ दीप्तौ । भास्वरः। पिस गतौ। पेस्वरः । कस गतौ । कस्वरः ॥

(तत्त्व०—) ईश्वर इति । हवत्यो रितिनेट् ।

मू०— आदृतःकिर्द्विश्चभूते ॥ आदन्तादृदन्ताज्जनिगमिनमिभ्यो-यङन्तेभ्यस्सासहिवावहि चाचलिपापतिभ्यः किप्रत्ययो भूते शीले। धातोश्च द्वित्वम् । किर्लिड्वद्वाच्यः । रामस्सोमंपपिर्यज्ञे ददिर्गाश्चक्रिरद्भुतम् । याजकान्वव्रिराजन्हिः पौण्डरीके महाद्विजान् । १ । जज्ञिः । नेमिः । जग्मिः । सासहिः। वावहिः । चाचलिः । पापतिः ।

(सुबोधिनी—) आदृतःकिर्द्विश्चभूते । किप्रत्ययमाह कित्वान्न गुणः । किप्रत्यये द्वित्वादि । पा पाने। द्वित्वादि । आतोलपीत्यालोपः । पपिः। डुदाञ् दाने । ददिः । डुकृञ् करणे । चक्रिः हृङ् संभक्तौ । र इत्यः । दद्रिः । हृञ् हरणे । आजह्रिः। जनी प्रादुर्भावे। गमामित्युपधालोपः । जज्ञिः । णम प्रह्वत्वे शब्दे च लोपः पचामित्येत्वपूर्वलोपौ । नेमिः । गम्लृ गतौ । गमामित्युधालोपः । जग्मिः । षह मर्षणे । वह प्रापणे । चल कंपने । पत्लृ पतने । एते यङंताः अतिशयेन सहते इ-

ति आत इति पूर्वस्यात्वं सासह्यते सासहांचक्रे इति । यत इत्यलोपः । अनापि च हसादिति यलोपः सासहिः अतिशयेन वहतीति वावह्यते वावहांचक्रे इति । वावाहिः। अतिशयेन चलतीति चाचल्यते । चाचलांचक्रे इति । चाचलिः । अतिशयेन पततीति पनीपत्यते पापतांचक्रे इति । वंचुस्रंसु इति प्राप्तस्य नीकोऽभावो निपात्यते पापतिः । रामः सोमं पपिर्यज्ञे ददिर्गाश्चक्रिरद्भुतं । याजकान् वव्रिराजन्हिः पौंडरीके महाद्विजान् । १ । रामो यज्ञे सोमं पपाविति पपिः अक्तादाविति वर्जनान्न कर्मणि षष्ठी । रामो यज्ञे गाः सुरभीः ददाविति ददिः । रामो यज्ञे अद्भुतमाश्चर्यं चकारेति चक्रिः । रामो यज्ञे याजकान् यज्ञकर्तॄन् वव्रे इति वव्रिः । रामः पौण्डरीके नाम्नि यज्ञे महांतश्चते द्विजाश्च महाद्विजास्तान् आजहारेति आजन्हिः ॥ १ ॥

(तत्त्वदीपिका--) आदृतइति । आच ऋच्च तत्तस्मात् । लिङ्ङ्गावान्नेतिरित्यादौएत्व पूर्वलोपैजाग्मिरिति । गमां स्वर इत्यलोपः ।

मू०--अथोणादयः। क्रादेरुण्। कारुः। वातीतिवायुः। पायुः। जायुः। मिनोतीति मायुः । स्वद आस्वादने । स्वादुः । साधुः । आशुः । दीर्य्यते इति दारु । सानु ।

(सुबोधिनी-) अथोणादयः । क्रादेरुण् । उण् प्रत्ययः स्यात । उण् प्रत्ययमाह । णित्त्वाद्वृद्ध्यादि । डुकृञ् करणे । करोतीति कारुः। शिल्पी कारकश्च तत्राद्ये योगरूढिर्द्वितीये तु योगमात्रमिति विवेको ऽतएव योगिके तु धात्वर्थं प्रति कारकान्वयो भवत्येव । तथाच भट्टिः । राघवस्य ततः कार्यं कारुर्वानरपुंगवः । सर्ववानरसेनानामाश्वागमनमादिशदिति ॥ १ ॥ विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोरितिमेदिनी । कारुः शिल्पिनि कारके इति धरणिः । वा गति गंधनयोः । आतोयुगिति युक् । वायुः । पा पाने । पा रक्षणे च । पिबत्यनेन तैलादिकमिति पायुः । पाति रक्षतीति विग्रहे रक्षकोऽपि पायुः । जि अभिभवे । गुदं त्वपानं पायुर्नेत्यमरः । जयत्यभिभवति रोगान् इति जायुः। औषधं । भेषजौषधभैषज्यान्यगदोजायुरित्यमरः । पुल्लिंगसाहचर्याज्जायुः पुंसि । डुमिञ् प्रक्षेपणे मिनोति प्रक्षिपति देहे ऊष्माणमिति मीनोतिदीङामित्यात्वं युक् च मायुः। मायुः पित्तं कफः श्लेष्मेत्यमरः । गां वाचं विकृतां मिनोति प्रक्षिपती गोमायुः सृगालः । स्वद आस्वादने । स्वदते रोचते इति स्वादुः । साध संसिद्धौ । साध्नोति परकार्यमिति साधुः । स्वादुसाधू । विशेष्यनिघ्नौ । अशूङ् व्याप्तौ अश्नुते इत्याशुः । आशुर्व्रीहिः पाटलः स्यात । शीघ्रार्थोप्ययं। तत्र विलंबभावमात्रपरत्वे क्लीबः। तद्विशिष्टद्रव्यपरत्वे तु त्रिलिंगः। अथ शीघ्रं त्वरितमित्युक्तम् । क्लीबे शीघ्राद्यसत्त्वे स्यात त्रिष्वेषां भेद्यगामि यदित्यमरः। दृ विदारणे। दीर्यते इति दारु । काष्ठं दार्विन्धनं त्वेध इत्यमरः । षणू दाने । सानुः। स्नुः प्रस्थः सानुरस्त्रियामित्यमरः ॥

(तत्त्वदी०-) क्रादेरिति। कृ आदिर्यस्य स क्रादिस्तस्मात्। कृत्वापाजिमिस्वदिसा दय आदिशब्दग्राह्याः णो वृद्ध्यर्थः। कारुरिति। कारुः शिल्पिनि। कारके द्वितीयेर्थे योगमात्रं। रावणस्य तु तत् कार्यं कारुर्वानरपुंगवः। इति भट्टिश्चातएव। वायुरिति आतो युक्। पायुरिति। पिबत्यनेनौषधमिति पायुर्गुदं। गुदं त्वपानं पायुर्नैत्यमरः। जायुरिति। जयतिरोगानिति। जायुरौषधं। भेषजौषधिभैषज्यान्यगदो जायुरित्यमरः मिनोतीति। प्रक्षिपति देहे ऊष्माणमिति मायुः पित्तं कफः श्लेष्मेत्यमरः॥ स्वादते रोचते इति स्वादुमिष्टं। सा भ्नोति परकार्यमिति साधुः। अश्नुते इत्याशुर्व्रीहिभेदः शीघ्रार्थश्च। विलंबाभावमात्रपरत्वे क्लीबं तद्विशिष्टद्रव्यद्रव्यपरत्वे तु त्रिलिंगं। त्रिष्वेषां मेघगामि यत् इत्यमरोक्तेः।

मू०-जनेर्ञुण्॥ जानुः। चारु। चाटुः। किंशृणातीति किंशारुः। जरामेतीति जरायुः।

(सुबोधिनी-) जनेर्ञुण्। ञुण्प्रत्ययमाह। ञकाराविती। अनुबंधद्वयसामर्थ्यात् जनिवध्योर्नेति वृद्धिनिषेधो न प्रवर्त्तते। जन जनने जानु। जानुनी। चर गतौ। चारु रम्यं। चट भेदने। चाटु चटु चाटु प्रियं वाक्यमिति हेमचंद्रः। चाटुर्नरिप्रियोक्तिः स्यादिति रत्नमाला। तथा च माघः। चकर च बहु चाटु प्रौढयोषिद्वद स्येति माघे तु क्लीबेपि चाटु। चाकृत कसंभ्रममासामिति। शॄ हिंसायां। किंशारुः किंशारुर्ना सस्यशूके विशेषेकंकपक्षिणीति मेदिनी। इण् गतौ वृद्धौ कृतायामायादेशे च जरायुः। घर्माशयः॥

(तत्त्वदीपिका-) जनेर्ञुण् चार्विति। चटु चाटुप्रियवाक्यमिति हेमचन्द्रः। चटुः नरि प्रियोक्तिः स्यादिति रत्नकोशात्पुंस्त्वमपि। तथोभयत्रोदाहृतं माधवेन चाटुवाकृतसंकभ्रममासां। चकरचकिलचाटुप्रौढयोषिद्वदस्येतिच। किंशारुर्ना सस्यशूकेविशिखेकंकपक्षिणि इति।

मू०-त्रोरस्यलः॥ तरन्तिवर्णा अनेनेति तालु।

(सुबोधिनी-) त्रोरस्यलः। तृ ऋ इति प्रश्लिष्य द्वयोरपि सवर्णे दीर्घे कृते त्रौ तयोस्त्रोः। तृ प्लवनतरणयोः ऋ गतौः। अनयोरस्यलः स्यात्। उणि वृद्धौ सत्यां तालु। इयर्त्ति अर्यते वा आलुः। शाकविशेषो घटी च। कर्कर्यालुर्गलंतिका इति॥

मू०-कृकेवचःकश्च॥ कृकेन गलेन वक्तीति कृकवाकुः।

(सुबोधिनी-) कृकेवचःकश्च। कृकशब्दे उपपदे वचेः कांतादेशः स्यात् उणि। कृकवाकुः। कृकवाकुर्मयूरे च सरटे चरणायुधे इति विश्वः॥

मू०- भ्रादेरुः॥ मरुः। शयुः। तरुः। चरुः। त्सर छद्मगतौ। त्सरुः। तनुः। धनुः। मयुः। कटुः। बटुः। अणुः। शृणातीति शरुः। स्वरुः। त्रपुः। असवः। वसुः। हनुः। बन्धुः। मनुः। बिन्दुः।

(सुबोधिनी-) भ्रादेरुः। उप्रत्ययः स्यात् उप्रत्ययमाह। मृङ् प्राणत्यागे। म्रियंतेस्मिन्भूतानीति मरुः। निर्जलदेशः। भृञ् भरणे। डुभृञ् धारणादौ च। भरति

स्वामी तोन

बिभर्त्ति वा भरुः। भरुः स्वर्णे हरे पुंसीति मेदिनी। भरुर्भर्तृकनकयोरिति हैमः।शी ङ् स्वप्ने। शेते इति शयुः। अजगरे शयुर्वाहस इत्युभावित्यमरः। तॄ प्लवनसंतरणयोः। तरंति नरकमनेन रोपका इति तरुर्वृक्षः। चर गत्यादौ। चरंति भक्षयंति देवा इममिति चरुः। चरुर्भांडे च हव्यान्ने इति। घृतपक्वमन्नमित्यर्थः। त्सर छद्मगतौ। त्सरुः खड्गादिमुष्टिः। तनु विस्तारे। तनुः। तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे इति मेदिनी। स्त्रियां मूर्त्तिस्तनुस्तनूरित्यमरः। धन धान्ये। धनुः। स्यात्तनुस्तनुपा सार्धं धनुषा च धनुर्विदुरिति विश्वः। उकारांते। श्रीहर्षः शुद्धवंशजनितोपि गुणस्य स्थानतामनुभवन्नपि शक्रः क्षिप्नुरेनमृजुमाशुसपक्षं सायकं धनुरिवाजनि वक्रः।१। धनुः पुमान् प्रियालद्रौ राशिभेदे शरासने इति। सांते मेदिनी। अथास्त्रियां-धनुश्चापावित्यमरः। डुमिञ् प्रक्षेपणे। मीनातिमिनोत्यात्वं तु नेह। बाहुलकात्। मयुः। तुरंगवदनोमयुरित्यमरः। मयुस्तुरंगवदने मृगोपि मयुरिष्यते इति विश्वः। टुमस्जो शुद्धौ। मज्जति पानीये इति न्यंक्वादित्वाद्गः झबेजवा इति सस्य दः। मद्गुः पानीयकाकिकेति रभसः। अण शब्दे। अणुः। व्रीहिभेदस्त्वणुः पुमानिति लवलेशकणाणवइत्यमरः। कटे वर्षादौ। कटति रसनामिति कटुः। कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि। नपुंसकमकार्येस्यात्पुंल्लिंगोरसमात्रके। त्रिषुतद्वत्सुगंध्यश्च मत्सरेपि खरेपि चेति मेदिनी। वट वेष्टने। वटतीति वटुः। बटुर्द्विजसुतः स्मृत इति संसारावर्त्तः।शॄ हिंसायां शरुः।शरुः कोपे शरे वज्रे इतिहैमः। स्वृ शब्दोपतापयोः। स्वरुः। शतकोटिः स्वरुः शंब इत्यमरः। त्रपूष् लज्जायां। आग्निं दृष्ट्वा त्रपते लज्जते इति त्रपुः। रंगसीसकयोस्त्रपुरिति मेदिनी। असु क्षेपणे। अस्यंति क्षिपंति शरीरमिति असवः। पुंसि भूम्न्यसवः प्राणा इत्यमरः। वसनिवासे। वसुः। "वसुर्न्हदेग्नौ योक्त्रेऽशौ वसुतोये धने मणौ"। हन हिंसागत्योः। हनुः। "हनुः पुमान् परो गंडादिति वररुचिकोशः"। स्त्रीलिंगेप्ययं। "हनुर्हट्टविलासिन्यां नृत्यारंभे गदेस्त्रियां द्वयोः कपोलाऽवयवे" इति मेदिनी। मतुप्रत्यये हनुमापाक्षिको दीर्घोपि निपात्यते हनूमान्। बंध बंधने। स्नेहेन बध्नातीति बंधुः। "बंधुर्बंधूकपुष्पे स्यात् बंधुर्भ्रातरि बांधवे" इति विश्वः। मन ज्ञाने। मनुः। आदिराजा मंत्रश्च। बिदि अवयवे बिंदुः॥

(तत्त्वदीपिका—) भ्रादेरिति। मारुरिति मरुः स्वर्णहरे पुंसीति मेदिनी। मरुर्भर्तृकनकयोरिति हेमचन्द्रः। शयुरिति। अजगरे शयुः। तरुरिति। तरंति नरकमनेन रोपकाः।चरुरिति। चरुर्भांडे च हव्यान्ने इति। त्सरुः खड्गमुष्टिः। तनुः स्वल्पः मूर्त्तौ स्त्रियां। धनुः वृक्षविशेषः। धनुषा च धनुर्विदुः। मयुः किन्नरः। अणुर्लेशः बटुर्द्विजसुतः स्मृतः। स्वर्वज्रं। त्रपुरिति। त्रपतेऽग्निंदृष्ट्वारंगसीसकयोस्त्रपु। पुंसिभूम्न्यसवः प्राणाः वसु तोयेधने मणौ। हनुः पुमान् परो गंडात्। बंधुः स्नेहेन बध्नाति। मनुरादिराजो मंत्रश्च।

मू०- स्यन्देस्सम्प्रसारणंधश्च॥ सिन्धुः।

(सुबोधिनी-) स्यंदेःसंप्रसारणंधश्च ॥ स्यंदू प्रस्रवणे । अस्य यकारस्य संप्रसारणं दस्य धश्च स्यात् उप्रत्यये । सिंधुः । "देशे नदविशेषेऽब्धौ सिंधुर्ना सरिति स्त्रियामित्यमरः" ॥

(तत्त्वदीपिका-) सिंधुरिति । देशे नदविशेषेऽब्धौसिंधुर्ना सरिति स्त्रियामित्यमरः ।

मू०- उन्देरिच्चादेः ॥ उनत्तीति इन्दुः ।

(सुबोधिनी-) उन्देरिच्चादेः॥ उन्दी क्लेदने । अस्योकारस्य इः स्यादुप्रत्यये इन्दुः ।

मू०- स्कन्देस्सलोपश्च ॥ कन्दुः ।

(सुबोधिनी-) स्कंदेःसलोपश्च ॥ स्कंदिर् गतिशोषणयोः । अस्य सस्य लोपः स्यादुप्रत्यये । स्कंदति शोषयतीति कंदुः । "क्लीबेंऽबरीषं भ्राष्ट्रो ना कंदुर्वा स्वेदनी स्त्रियामित्यमरः" । स्कंदति जनता यस्मिन्निति व्युत्पत्त्या भोगस्थानं कंदुरिति केचित् ॥ भाड़ कढ़ाही

(तत्त्वदीपिका-) कंदुरिति । स्कंदत्यस्मिन् जनता इति कंदुर्भोगस्थानम् ।

मू०-सृजेरसुम्सलोपश्च ॥ रज्जुः । रस्सी

(सुबोधिनी-)सृजेरसुम्सलोपश्च ॥ सृज विसर्गे । आगमसकारस्य चुत्वेन शः झबेझबा इतिजः । सृजतीति रज्जुः । " रज्जुर्वेण्यां गुणे योषिदिति मेदिनी " ॥

(तत्त्व०--) रज्जुरितिसस्यश्चुत्वेनशस्तस्यजः ।

मू०- फलेर्गुकूच ॥ फल्गुः ।

(सुबोधिनी-) फलेर्गुकुच् ॥ फल निष्पत्तौ । फल्गुः । " फल्गुः काकोदुंबरिका भवेत् फल्गुनिरर्थकमितिहैमः " । नदी च ॥ कठूमरि

मू०- पाटेःपटिश्च ॥ पाटयतीति पटुस्समर्थः ।

(सुबोधिनी-)पाटेःपटिश्च । पटिरादेशः स्यात् । पट गतौ । ण्यतः।पाट्यतीति पटुः।

मू०- मनेर्द्धश्च ॥ मन ज्ञाने । मधुः ।

(सुबोधिनी-) मनेर्धश्च ॥ धांतादेशःस्यादुप्रत्यये । मन ज्ञाने । मन्यत इति मधुः । " मधुश्चैत्रेच दैत्येच मद्ये पुष्परसे मधु इति हेमचंद्रः । मकरंदस्य मद्यस्य माक्षिकस्यापि वाचकः । अर्द्धर्चादिगणे पाठात् पुनपुंसकयोर्मधु " इति शाश्वतः ॥

मू०- जनेस्तश्च ॥ जतुः ।

(सुबोधिनी-) जनेस्तश्च । तांतादेशः स्यात् उप्रत्यये । जनी प्रादुर्भावे । जायत इति जतु लाक्षा ॥ लाह

मू०-वलेर्गुकूच ॥ वलसंवरणे । वल्गुः ।

(सुबोधिनी-) वलेर्गुकूच ॥ गुगागमः स्यादुप्रत्यये । वल संवरणे दन्त्योष्ठ्यादिः । वल्गुः । " वल्गुः स्याच्छागले पुंसि सुंदरे चाभिधेयवदिति मेदिनी " ॥

मू०–नमेर्नाकिश्च ॥ नम्यतेऽनेनेति नाकुः ।

(सुबोधिनी–) नमेर्नाकिश्च ॥ णम प्रह्वत्वे शब्दे च नाकुः । " वामलूरश्चनाकुश्च वल्मीकं पुंनपुंसकमित्यमरः " ॥

(तत्त्वदीपिका–) नाकुर्वल्मीकं ।

मू०–श्यतेःकुस्सवच्च ॥ शिशुः ।

(सुबोधिनी–) श्यतेःकुस्सवच्च ॥ कुप्रत्ययः स्यात् । स कुः सप्रत्ययवद्भवति । तेन सप्रत्यये यत्कार्य द्वित्वादि तत्स्यात् । कुप्रत्ययमाह । कित्त्वान्न गुणः । शो तनूकरणे । कुप्रत्यये संध्यक्षराणामित्यात्वं द्वित्वं यःसे इति पूर्वस्येत्वं । आतोनपीत्यालोपः । शिशुः बालकः ॥

मू०–याभ्रोर्द्विश्च ॥ ययुः । बभ्रुः ।

(सुबोधिनी–) याभ्रोर्द्विश्च ॥ आभ्यां कुः स्यात् धातोर्द्वित्वं च । या प्रापणे । भृञ् भरणे । यातीति ययुः । भरतीति बभ्रुः । ययुरश्वोऽश्वमेधीयः । " बभ्रुर्विश्वानरे शूलपाणौ च गरुडध्वजे विशाले नकुले पुंसि पिंगले त्वभिधेयवदिति मेदिनी । बभ्रुर्मन्वंतरे विष्णौ बभ्रूनकुलपिंगलौ इति धरणिः " । चादन्यतोपि । चक्रुः कर्त्ता । जघ्नुर्हंता । पपुः पालकः ॥

मू०–व्यधेःकुः ॥ विधुः ।

(सुबोधिनी–) व्यधेःकुः । कुप्रत्ययः स्यात् । व्यध ताडने । ग्रहामिति संप्रसारणं विरहिणं विध्यतीति विधुः । "विधुः शशांके कर्पूरे हृषीकेशे च राक्षसे" इतिविश्वः ।

मू०–कृग्रोरुरङ्च ॥ करोतीति कुरुः । गॄ शब्दे । गृणातीति गुरुः

(सुबोधिनी–) कृग्रोरुरङ्च । आभ्यां कुः स्यादुरंतादेशश्च । डुकृञ् करणे । गॄ शब्दे । करोतीति कुरुः । " कुरुर्नृपांतरे भक्ते पुमान्पुंभूम्नि नो वृतीति मेदिनी " । गृणाति तत्त्वामिति गुरुः ॥

मू०–रपेरस्येच्च ॥ अनिष्टं रपतीति रिपुः

(सुबोधिनी–) रपेरस्येच्च । रपेः कुप्रत्ययः स्यात् अकारस्येच्च रपगतौ । अनिष्टं रपतीति रिपुः ॥

मू०–अर्जिदृशिकम्यमिपशिबाधामृजिपशितुकूधुकूदीर्घहकाराश्च ॥ अर्जयति गुणानिति ऋजुः । सर्वानविशेषेण पश्यतीति पशुः । कमु कान्तौ कन्तुः । अन्धुः । पांशुः । बाधते इति बाहुः ।

(सुबो०) अर्जिदृशिकम्यमिपशिबाधामृजिपशितुकूधुकूदीर्घहकाराश्च । अर्ज अर्ज्जने । अस्यऋजिरादेशः । षड्भ्यः कुप्रत्ययश्च । अर्ज्जयति गुणानिति ऋजुः । दृशिर् प्रेक्षणे ।

अस्य पाशिरादेशः। पशुः। चादिगणेपि पठितः। "पशुद्दश्यर्थमव्ययमितिधरणिः" कमुकांतौ। अस्य तुगागमः। कुंतः। "इः कंतुर्मकराकरः" इति त्रिकांडशेषः। अम रोगे। अमगत्यादौ वा अस्य धुगागमः। अंधुः कूपः पाशि नाशने। सौत्रः। अस्य दीर्घः। पांशुः पडि पासि नाशने। चुरादिर्दित्यांतो वा। "पांशुर्ना न द्वयोरजः" इत्यमरः। तालव्याअपि दंत्याश्च शंबशूकरपांशव इति। बाधृ लोडने। अस्य हांतादेशः। बाहुः। "बाहुः स्त्रीपुंसयोर्भुज" इत्यमर। अकारांतोप्ययं। "बाहौचभुजयोः पुमान्" इति दामोदरः। आबंतोपि। "बाहा भुजे पुमान् मानभेदाखवृषवायुषु" इति मेदिनी॥

मू०--प्रथिम्रदिभ्रस्जांसम्प्रसारणंसलोपश्च॥ पृथुः मृदुः।

(सुबोधिनी-) प्रथिम्रदिभ्रस्जांसंप्रसारणंसलोपश्च त्रिभ्यः कुप्रत्ययः स्यात्त्रयाणां संप्रसारणं च। भ्रस्जेः सलोपश्च। प्रथ प्रख्याने प्रथते इति पृथुः। "पृथुः स्यान्महति त्रिषु त्वक्पत्र्यां कृष्णजीरेथ पुमानग्नौ नृपांतरे" इति मेदिनी। म्रद मर्दने। म्रदितुं शक्यते अकठिनत्वादिति मृदुः कोमलः। भ्रस्ज पाके॥

मुनौ भृगो

मू०--न्यंकादेःकुः॥ न्यंकुः। भृज्जति तपसा इति। भृगुः।

(सुबोधिनी-) न्यंकादेः कुः। न्यंकादिगणे कुत्वं निपात्यते। नितरामचंतीति न्यंकुः न्यंकादित्वात् कुत्वं। भृगुः। "भृगुः शुक्रे प्रधाने च जमदग्नौ पिनाकिनीति विश्वः"॥

मू०--लघिबंह्योर्नलोपश्च॥ लघुः।

(सुबोधिनी-) लघिबंह्योर्नलोपश्च। लघि गतौ। लघुः। "पृक्कायां स्त्री लघु क्लीबं शीघ्रे कृष्णाऽगुरुण्यपीति त्रिकांडशेषः। लघुरगुणे मनोज्ञे निःसारे वान्यवत् क्लीबं। शीघ्रे कृष्णागुरुणि च पृक्कायामोषधौ स्त्रिया मिति मेदिनि"॥

मू०--वालमूललघ्वंगुलीनांवालस्यरः॥ वालः, वारः। मूलम्, मूरम्। लघुः रघुः। अंगुलिः, अंगुरिः। बहिगतौ। बहुः।

(सुबोधिनी-) वालमूललघ्वंगुलीनांवालस्यरः। एषां लो रत्नमापद्यते वा रघुर्नृपभेदः। "अवेक्ष्य धातोर्गमनार्थविच्चकार नाम्ना रघुमात्मसंभवमिति रघुः"। बहि वृद्धौ। बहुः। "बहुस्तु आदिसंख्यासु विपुले त्वभिधेयवदिति मेदिनी"॥

मू०--ऊर्णोतेर्नुलोपश्च॥ ऊरुः। जांघ

(सुबोधिनी-) ऊर्णोतेर्नुलोपश्च। ऊर्णुञ् आच्छादने। ऊर्णूयते आच्छाद्यते इत्यूरुः। कर्म्मणि कुप्रत्ययः॥

मू०--महतिन्हस्वश्च॥ उरु महत्।

(सुबोधिनी–) महतिन्ह्रस्वश्च ऊर्णोतीति कर्तरि कुप्रत्ययः । उरु महत् ॥

मू०–आङ्परयोःखनिशृभ्याण्डिच्च ॥ आखनतीत्याखुः ॥ शॄ हिंसायाम् । परान् शृणातीति परशुः ।

(सुबोधिनी–) आङ्परयोःखनिशृभ्यांडिच्च । अनयोरुपपदयोः आभ्यां कुः स्यात् स डिच्च । डित्वाट्टिलोपः खनु अवदारणे । आखुः । शॄ हिंसायां । परं शृणातीति परशुः । पृषोदरादित्वादकारस्य लोपः । पर्शुः । पर्शुः परशुना सहेति विश्वः ॥

मू०–द्रोश्च ॥ द्रवति ऊर्ध्वमिति द्रुः । शतधाद्रवतीति शतद्रुः ।

(सुबोधिनी–) द्रोश्च । द्रु गतौ । अस्मात् कुः स्यात् । स च डित् । द्रवतीति द्रुः वृक्षः । शाखा च । तद्वान् द्रुमः । शतद्रुः । "शतद्रुस्तु शुतुद्रिः स्यादि"त्यमरः ॥

मू०–मृगय्वादयोनिपात्याः ॥ मृगं यातीति मृगयुः । शंकुः नीलंगुः कृमिविशेषः । मन्व्यादेरुरः । मदि मन्दुरा । वासुरा । मंथ हिंसायाम् । मथुरा । चते याचने । चतुरः । अंकुरः ।

(सुबोधिनी–) मृगय्वादयोनिपात्याः । कुप्रत्ययान्ता निपात्यंते । या प्रापणे आतो नपीत्यालोपः मृगं यातीतिमृगयुः । "मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनी"ति मेदिनी । "मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपी"ति विश्वः शकि शंकायां शङ्कते ऽस्मादिति शंकुः । " शंकुः कीले गरे शस्त्रे संख्यापादपभेदयोः । पादभेदे च पापे च स्थाणावपि च दृश्यते" इति विश्वः । "शंकुर्ना कीलशल्ययोः" लागि गतौ । अस्मात् कुप्रत्यये दीर्घे च निपातनात् कृते नीलगुः । केचित्तु नलिशब्दे उपपदे गमेः कुप्रत्यये टिलोपः पूर्वपदस्य मुम् पाक्षिकदीर्घश्च निपात्यंते इत्याहुः " नीलंगुः क्रिमिजातौ स्यात् भ्रमरालीप्रसूतयोरि"ति विश्वः । "नीलंगुः स्यात् कृमौ पुंसि भ्रमराल्यां तु योषिती"ति मेदिनी । "नीलंगुरपि नीलगुरि"ति विश्वः । मंद्यादेरुरः । उरप्रत्ययः स्यात् । उरप्रत्ययमाह । मदि स्तुत्यादौ मंदुरा । "वाजिशाला तु मंदुरा" इत्यमरः मंथ विलोडने । मथुरा । चते याचने । चतुरः । वाशृ शब्दे । वाश्यंते अस्यामिति वाशुरा रात्रिः । गर्दभोऽपि । अकि लक्षणे । अंकुरः । "अंकुरो रुधिरे लोम्नि पानीये ऽभिनवोद्भिदि" । खर्जूरादित्वादूरप्रत्यये अंकूरोपि । अंकूरोऽकुर एव चेति विश्वप्रकाशः ॥

(तत्त्व०–) मृगयुरिति मृगयुर्व्याधः । शंकुरिति । शंकुर्ना कीलशल्ययोः । नीलंगुः क्रिमिविशेषः सृगालश्च । मंदुरेति । मंदुरा वाजिशाला स्यात् । वासुरेति । वास्यन्तेऽस्यामिति वासुरा रात्रिर्गर्दभोपि च । वासुरा वासितारात्र्योरिति मेदिनी । अंकुर इति अंकुरोरुधिरे लोम्नि पानीयेभिनवोद्भिदि । अंकूरोपि च ।

मू०–मद्गुरादयोनिपात्याः ॥ माद्यतीति मद्गुरः । कर्बुरः । बन्धुरः ।

बन्धूरः। कुक वृक आदाने। कुकुरः। कुकूरः। असुरः। असूरः। मसुरः। मसूरः।

(सुबो०—) मद्गुरादयोनिपात्याः॥ उरप्रत्ययांता निपात्यंते। मदी हर्षे। गुगागमो निपात्यते। मद्यतीति मद्गुरो मत्स्यभेदः। कबृ वरणे। रुगागमो धातोर्निपात्यते। कर्बुरः। कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः। कर्बुरा कृष्णवृंतायां शबले पुनरन्यवादिति मेदिनी। कर्बुरश्चित्ररक्षसोः बंधबंधने। बध्नातीति बंधुरः। खर्जूरादित्वादूरप्रत्ययोपि बंधूरबंधुरौ स्यातां नम्रसुंदरयोस्त्रिष्विति रंतिदेवः। कुक आदाने। कोकतेर्वा कुगागमो निपात्यते कुकुरः। कुकूरः कुकुरो मत इति हरचंद्रः। कुकुरः सारमेये ना ग्रंथिपर्णे नपुंसके इति मेदिनी। असु क्षेपणे। असुरः। अण् प्रत्यये आसुरः। मसी परिणामे। मसुरः। ऊर प्रत्यये मसूरोपि। "मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः। मसूरी पापरोगे स्यादुपधाने पुनः पुमानि"ति मेदिनी। "मसूरमसुरौ च द्वावि"ति विश्वः॥

(तत्त्व०—) मद्गुरइति। मत्स्यभेदः। कर्बुर इति। कबृवरणे। कर्बुरः सलिले हेम्नि कर्बुरःपापरक्षसोः शबलेत्रिष्वपि। बंधुर इति। बंधूरबंधुरौ स्यातां नम्रसुंदरयोस्त्रिषु। मसुर इति। मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः। मसुरा पापरोगे स्यादुपधाने पुनः पुमान्।

मू०--शावशेराप्तौ॥ शुइति आश्चर्ये। शु शीघ्रं अश्नुते प्राप्नोति कन्या यस्मात्सः श्वशुरः।

(सुबोधिनी—)शावशेराप्तौ॥ आशुशब्दस्य निपातनादाकारलोपस्तस्मिन् शुशब्दे उपपदे आप्तौ गम्यमानायां अशूङ् व्याप्तावित्यस्माद्धातोरुरप्रत्ययः स्यात् श्वशुरः। "पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पितातयोरि"त्यमरः॥

मू०--अविमह्योरिषट्॥ अविषः। महिषः। महिषी राजपत्नी।

(सुबोधिनी—) अविमह्योरिषट्॥ इषट् प्रत्ययः स्यात्। इषट्प्रत्ययमाह। टित्त्वाद्ङीप् इतीप्। अव रक्षणादौ। अविषः। आविषौ राजजलधी इत्युक्तत्वाद् विषशब्देन राजा समुद्रश्च। मह पूजायां। माहिषः। महिषी राजयोषितीति हैमः॥

(तत्त्वदीपिका-) अविषइति। अविषौ राजजलधी। महिषस्तु महान्मतः महिषी राजपत्नी स्यात्।

मू०--अमेर्दीर्घश्च॥ अम गत्याम्। आमिषम्।

(सुबोधिनी—) अमेर्दीर्घश्च॥ अस्य दीर्घः स्यादिषट् प्रत्ययश्च। अम गत्यादौ। आमिषं। 'आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि'॥

(तत्त्वदीपिका—) आमिषत्वस्त्रियां मांसे भोग्यवस्तुनि चेष्यते।

मू०--रुहेर्वृद्धिश्च॥ रौहिषः।

(सुबोधिनी-) रुहेर्वृद्धिश्च ॥ अस्य वृद्धिः स्यादिषच्प्रत्ययश्च । रुह बीजजन्मनि । रौहिषः । 'रंकु शंबररौहिषा' इत्यमरः । 'रौहिषो मृगभेदः स्यात् रौहिषं च तृणं मतमि' ति संसारावर्तः

(तत्त्वदी०-) रौहिषमिति । तृणे च मृगभेदेच ।

मू०--किलेर्बुकूच ॥ किल शौक्ल्ये । केलतीति किल्विषम् ।

(सुबोधिनी-) किलेर्बुकूच ॥ किल श्वैत्यक्रीडनयोरस्मादिषच् प्रत्ययो धातोर्बुगागमश्च स्यात् । किल्बिषं । किल्बिषं पापरोगयोरपराधेपीति मेदिनी ॥

(तत्त्वदीपिका-) किल्बिषमिति । पापरोगयोः ।

मू०--मद्यादेःकिरः ॥ मदिरा मुदिरः मंदिरम् । तिमिरम् । मिहिरः । छिदिरः । रुचिरम् । रुधिरम् । वध हिंसायाम् । बधिरः । शुषिरम् ।

(सुबो०-) मद्यादेःकिरः ॥ किरप्रत्ययः स्यात् । किरप्रत्ययमाह । कित्त्वान्नगुणः । मदी हर्षे । मादिरा सुरा । मुद हर्षे । मुदिरः । मुदिरः कार्मुकाभ्रयोरिति मेदिनी । मदि स्तुत्यादौ । मंदिरं । मंदिरं नगरेऽगारे क्लीबं नाम करालये इति मेदिनी । तिम आर्द्रीभावे । तिमिरम् । तिमिरं ध्वांते नेत्रामयेन्तके इति मेदिनी । मिह सेचने । मिहिरः । मिहिरः सूर्यबुद्धयोरिति मेदिनी । रुच दीप्तौ । रुचिरं । सुंदरं रुचिरं चारु इत्यमरः । रुधिरआवरणे । रुधिरं । रुधिरोंगारके पुंसि क्लीबं तु कुंकुमास्रजोरिति मेदिनी । बंध बंधने । नोलोप इति नलोपः । बधिरः श्रोत्रेंद्रियरहितः । शुष शोषणे । शुषिरं वंश्यादिवाद्ये विवरे च नपुंसकम् । शुषिरं विवरं बिलं छिद्रमित्यमरः ॥

(तत्त्वदीपिका-) मुदिरइति । कामुकाभ्रयोः । मंदिरमिति । नगरागारयोः क्लीबं । मिहिरः सुर्यबुद्धयोः । रुधिरमिति रुधिरोंगारकेपुंसिक्लीबं तु कुंकुमास्रजोः । शुषिरं वंश्यादि वाद्ये च नपुंसकम् ।

मू०--अजिरादयोनिपात्याः ॥ अजिरम् । शश प्लुतगतौ । शशतीति शिशिरम् । श्रथ मोचने शिथिलम् । स्थिरम् । स्फायी ॥ स्फिरम् । स्थविरः । खदिरः । शीङ् शिबिरम् । सल गतौ सलिलं । अनिलः महिला । कोकिलः । कमु कपिलः । मथ्यन्ते रिपवो अस्यामिति मिथिला ।

(सुबोधिनी-) आजिरादयोनिपात्याः । किरप्रत्ययांता निपात्यंते । अज गतौ अजेर्वीभावाभावः । अजिरं । दशपादीवृत्तौ तु नञ्पूर्वस्य जीर्यतेः ऋवर्णलोपो निपात्यते इत्युक्तं । नजीर्यतीत्याजिरः । आजिरं प्रांगणे काये विषये दर्दुरानिले इति मेदिनी । शश प्लुतगतौ शसेरुपधाया इत्वं निपात्यते । शिशिरं । शिशिरंस्याद्दतोर्भेदे तुषारे शीतले ऽन्यवदिति विश्वः । शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषि-

ति मेदिनी। श्रथ मोचने। धातोरुपधाया इत्वं रलोपः प्रत्ययरेफस्य लत्वं च निपात्यते। शिथिलं। ष्ठा गतिनिवृत्तौ। आतोनपीत्यालोपः। स्थिरं निश्चलं। तिष्ठतेर्वुक् न्हस्वत्वं च निपात्यते। स्थविरः। स्फायी वृद्धौ। यत इति यलोपः। आतोनपीत्यालोपः। स्फिरं। भूर्यदभ्रं पुरुस्फिरमिति हेमः। खद स्थैर्ये। खादिरः खादिरी शाकभेदेस्त्री ना चंद्रे दंतधावने इति मेदिनी। शीङ् स्वप्ने। शीङो बुक् न्हस्वश्च निपात्यते। शेरते ऽस्मिन् राजबलानीति शिबिरं निवेशः। निवेशः शिबिरं षंड इत्यमरः। सल गतौ। सलिलादय इलप्रत्ययांता निपात्यंते सलति गच्छति निम्नमिति सलिलम्। अन प्राणने। अनिलः। मह पूजायां। महिला। पृषोदरादित्वान्महेलापि। महेलाफलिनीस्त्रियोरिति मेदिनी। प्रियंगुः फलिनी फलीत्यमरः। दमयंतीकाव्ये प्रयोगो यथा। परमहेलारतोप्यपारदारिकः। अत्र परस्य महेला स्त्री। अथ च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः। कुक आदाने। कोकिलः। कुटकौटिल्ये। बाहुल्याद्गुणाभावः। कुटिलः। कमु कांतौ मस्य निपातनात्पः। कपिलः। कपिलो रेणुकायां च शिंशपागोविशेषयोः। पुंडरीककरिण्यां स्त्री वर्णभेदे त्रिलिंगकः। ना ऽनले वासुदेवे च मुनिभेदे च कुकुरे इति मेदिनी। मंथ विलोडने। अकारस्येत्वं निपात्यते मथ्यंते रिपवोऽत्रेति मिथिला नगरी॥

(तत्त्व०–) अजिरमिति। अजिरं प्रांगणे काये विषये दर्दुरेनिले। शिशिरं स्याहतोर्भेदे तुषारे शीतलेन्यवत्। स्फिरमिति। निश्चलं। खादिरी शाकभेदे स्त्री ना चंद्रेदन्तधावनइति। शिबिरमिति। शेरतेऽस्मिन् राजबलानि निवेशः शिबिरं। महिलेति। महिला फलिनी स्त्रियां।

मू०–कुबेरादयोऽपि॥ कुबि आच्छादने। कुबेरः। कबृवरणे। कपोतः। कबूतर

(सुबोधिनी–) कुबेरादयोऽपि। कुबिआच्छादने। अस्मादेरप्रत्ययो नलोपश्च निपात्यते। कुंबत्यन्येषामैश्वर्यमिति। कुबेरः। कुबेरस्त्र्यंबकसखइत्यमरः। कबृवरणे अस्मादोतप्रत्ययो बकारस्य पत्वं निपात्यते। कपोतः। कपोतः स्याच्चित्रकंठे पारावत विहंगयोरिति मेदिनी। कपोतः पक्षिमात्रेपीति त्रिकांडशेषः॥

मू०–भातेर्डवतुः॥ भातीति भवान्।

(सुबोधिनी–) भातेर्डवतुः। डवतुप्रत्ययमाह। डित्वाट्टिलोपः। उदित्वानुम् ईप् च भातीति भवान्। भा दीप्तौ। सर्वादिशब्दोयम्॥

मू०–किशोरादयोनिपात्यंते॥ किं शृणातीति किशोरः। कठकृच्छ्रजीवने। कठोरः। चक तृप्तौ। चकोरः। कपि। कपोलःपटोलः।

(सुबो०–) किशोरादयोनिपात्यंते। ओरवप्रत्ययांता ओलप्रत्ययातांश्च। किंपूर्वस्य शृणातेष्टिलोपश्च किमोंत्यलोपश्च निपातनात्। शॄ हिंसायां। किशोरः "किशोरोऽश्व-

स्य शावके "तैलपर्ण्यौषधौ च स्यात्तरुणावस्थसूर्य्ययोरि"ति मेदिनी। कठ कृच्छ्रजीवने। कठोरः। कठिनः पूर्णश्च। "कठोरताराधिपलांछनच्छविरिति" माघः। चक तृप्तौ। चकोरः पक्षिभेदः। कापि चलने। नलोपो निपातनात्। कपोलः। ओलप्रत्ययोप्येभ्यो निपातनात्। पटगतौ। पटोलः। 'पटोलं वस्त्रभेदेनौषध्यां ज्योत्स्न्यां तु योषिती"ति मेदिनी।

(तत्त्वदीपिका-) किशोरोऽश्वस्यशावके। तैलपर्ण्यौषधौचास्यात्तरुणावस्थसूर्ययोः।

मू०-- मीनातेरूरः॥ मयूरः।

(सुबोधिनी-) मीनातेरूरः। ऊरप्रत्ययमाह। मीञ् हिंसायां। मयूरः॥

मू०-स्यन्देःसम्प्रसारणम्॥ सिन्दूरम्।

(सुबो०-) स्यंदेः संप्रसारणं। स्यंदू प्रस्रवणे। अस्मादुरप्रत्ययः संप्रसारणं च स्यात्। सिंदूरः। 'सिंदूरस्तरुभेदे स्यात् सिंदूरं रक्तवर्णके' इति मेदिनी।

मू०- स्यादेस्तुः॥ सेतुः। तन्तुः। ओतुः। मसी परिणामे। मस्तुः धातुः। षच समवाये सचति समावेशयति चात्मनि जलमिति सक्तुः क्रोष्टा।

(सुबोधिनी-) स्यादेस्तुः। तुप्रत्ययमाह। षिञ् बंधने। सेतुः 'सेतुरालौ स्त्रियां पुमानित्यमरः'। 'सेतुर्नालौ कुमारके' इति मेदिनी। तनु विस्तारे। तंतुः। हवत्योरितीण्न। 'सूत्राणि कातितंतवः इत्यमरः। मसी परिणामे। मस्तुः। 'मंड दधिभवं मस्तु' इत्यमरः। षच सेचने सच्यते इति सक्तुः। चोः कुरिति कः। अर्द्धर्चादिः। डुधाञ् धारणपोषणयोः 'धातुर्ना इंद्रियेषु च॥ शब्दयोनिमहाभूततद्गुणेषु रसादिषु मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्तिचेति' मेदिनी 'श्लेष्मादिरसलोहादिमहाभूतानि तद्गुणाः॥ इंद्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः' इत्यमरः। क्रुश आक्रोशे। छशषेति षत्वं ष्टुत्वं तृवद्भावः क्रोष्टा। स्तुरारित्यार्। क्रोष्टारौ॥

(तत्त्वदीपिका-) स्यादेरिति। सिनोतीति इति सेतुः जलशेषः। मस्तु इति। दधिमंड धातुरिति। मनःशिलादौ धातुः स्यादिंद्रियेषु तथैव च।

मू०- अर्त्तेस्तुक्॥ ऋतुः। मन्तुः। जनी प्रादुर्भावे। जन्तुः।

(सुबोधिनी-) अर्त्तेस्तुक्। तुक्प्रत्ययमाह। कित्त्वान्न गुणः। ऋ गतौ। ऋतुः ऋतुवर्षादिषट्सु च। आर्त्तवे मासि च पुमानिति मेदिनी। ऋतुः स्त्रीकुसुमेपि चेत्यमरः। 'ऋतुः स्त्रीपुष्पकालयोरिति विश्वः'। पुनः तुप्रत्ययमाह। मन ज्ञाने मंतुः। मंतुः पुंस्यपराधेपि मनुष्येपि प्रजापतौ' इति मेदिनी। जनी प्रादुर्भावे। जंतुः प्राणी॥

(तत्त्वदीपिका-) ऋतुरिति। स्त्रीपुष्पे च ऋतुः काले। मंतुरपराधः।

मू०- चायःकिः॥ केतुः। वस्तुः।

(सुबोधिनी-) चायःकिः । चायृ पूजानिशामनयोः । अस्मात्तु प्रत्ययो धातोः कि-रादेशश्च स्यात् । केतुः । 'केतुर्ग्रहपातकयोरिति विश्वः । केतुर्ना रुकादिग्रहे स्था-नेषु गुल्मिनीति मेदिनी' । वस निवासे तुः । वस्तुः ॥

(तत्त्वदीपिका-) केतुरिति । पताका ग्रहोत्पातेषु लक्ष्मणि च ।

मू०- आगारेणित् ॥ वास्तुः ।

(सुबोधिनी-) आगारेणित् । अगारेऽर्थे वसेस्तुण् स्यात् । तुण्प्रत्ययमाह । णित्त्वाद्वृद्धिः । वास्तुः । 'वेश्मभूर्वास्तुरस्त्रियामित्यमरः' ॥

मू०- कृञः क्रतुः॥ क्रतुः ।

(सुबोधिनी--) कृञःक्रतुः । क्रतुप्रत्ययमाह । कित्वान्न गुणः । डुकृञ् करणे क्र-तुः 'क्रतुर्यज्ञे मुनौ पुंसीतिमेदिनी' ॥

(तत्त्व०--) क्रतुरिति । क्रतुर्यज्ञेमनौ पुंसि ।

मू०- जीवेरातृकोवृद्धिश्च ॥ जीवयति कुमुदानिति जैवातृकः ।

(सुबोधिनी-)जीवेरातृकोवृद्धिश्च । जीव प्राणधारणे । अस्मादातृकप्रत्ययः स्यात् धातोर्वृद्धिश्च । आतृकप्रत्ययमाह। जैवातृकः। 'जैवातृकः पुमान् सोमे कृषकायुष्मतो-स्त्रिष्विति मेदिनी । जैवातृकस्त्विवद्रुभिषगाऽऽयुष्मत्सु कृषीवले इति' । अस्मादातु-प्रत्ययोपि । 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे' ॥

(तत्त्वदीपिका--) जीवेरिति । जैवातृकः पुमान्सौमे कृषकायुष्मतोस्त्रिषु ।

मू०- कृषादेरूः ॥ कर्षूः । खर्ज व्यथने। खर्जूः ।

(सुबोधिनी-) कृषादेरूः। ऊप्रत्ययमाह । कृष विलेखने कर्षूः । 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मतेति विश्वः। कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याल्प-खातयोरिति मेदिनी' । खर्ज व्यथने । खर्जूः।'खर्जूरी कीटकं ऊषु' इति हैमःपामा च॥

(तत्त्वदीपिका-)कृषादेरिति कर्षूः ।पुंसिकरीषाग्नौ कर्षूर्नद्यास्त्रियां मता । खर्जूः कीटा-न्तरे स्मृताः ।

मू०- वहोधश्च ॥ वहति प्राप्नोति धनमिति वधूः ।

(सुबोधिनी-) वहोधश्च । वह प्रापणे अस्य धांतादेशः ऊप्रत्ययश्च स्यात् । वधूः । 'स्नुषा नवोढा स्त्री भार्या पृक्कांगनासु चेति विश्वः । वधूर्जाया स्नुषा स्त्रीषु पृक्का च महिला वधूरिति त्रिकांडशेषः' स्त्रीविशेषः ॥

(तत्त्वदीपिका-) वधूःस्नुषा नवोढा स्त्री भार्याच ।

मू०- कषेश्छश्च ॥ कच्छूः ।

(सुबोधिनी-)कषेश्छश्च । कष हिंसायामस्मादूप्रत्ययः स्यात् अंतस्य छश्चकच्छूः । कच्छ्वां तु पामपामा विचर्चिका इत्यमरः ॥

(तत्त्वदी०-)कच्छूः पामा ।

मू०- कास्वादयः ॥ कस्यते हन्यते ऽनया कासूः । पद्यते प्राप्यते नया पादूः । लबि गतौ । अलाबूः । कशेरूः । दर्द्रूः ।

(सुबोधिनी-) कास्वादयः । ऊण्प्रत्ययांता निपात्यंते । णित्त्वाद्वृद्धिः । ऊण् प्रत्ययमाह । कसगतौ । कासूः । कासूर्विकलवाचि स्यात् तथा शक्त्यायुधे स्त्रियामिति मेदिनी । कासूः शक्त्यायुधे रुजि । बुद्धौ विकलवाचि स्यादिति हैमः । पद गतौ । पादूः । चरणधारिणी । लभिस्रंसने । नञ्युपपदे लंबेर्नलोपो निपात्यते । न लंबते जले इत्यलाबूः । तुंब्यलाबूरुभे समे इत्यमरः । शॄ हिंसायां । कशब्दे उपपदे शृणातेरू प्रत्ययः ऋत एरादेशश्च निपात्यते । कशेरूः । बाहुलकादुप्रत्ययोपि कशेरुस्तृणकंदे स्त्रीति । दरिद्रा दुर्गतौ । ऊप्रत्यये इकारस्याकारस्य च लोपो निपात्यते । दर्द्रूः कुष्ठभेदः । मृगय्वादित्वात् कुप्रत्यये दर्द्रुरपि । दर्द्रुणो दद्रुरोगी स्यादित्यमरः ॥

(तत्त्वदीपिका-) कासूर्विकलवाचि स्यात्तथा शक्त्यायुधे स्त्रियामिति मेदिनी । पादूश्चरणधारिणी । तुंब्यलाबूरुभे समे । कसेरूस्तृणकंदे स्त्री ।

मू०- अन्द्वादयः ॥ अन्दूः ।

(सुबोधिनी-) अंद्वादयः । कूप्रत्ययांता निपात्यंते । अदि बंधने । अंदूः । अंदूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य चेति मेदिनी । अंदुको हस्तिनिगडे इत्यमरः।संज्ञायां कप्रत्यये पूर्वस्य ह्स्वः । केचित्तु अम गतौ । अस्य दुगागमे कुप्रत्यये च अंदुर्बुद्धिरिति व्याचख्युः ॥

(तत्त्वदीपिका-) अन्द्वादयः । अंदूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च ।

मू०- जनेर्बुक् ॥ जम्बूः । कर्कन्दधाति कर्कन्धूः । दिधिं धैर्य्यं स्यति दिधिषूः ।

(सुबोधिनी-) जनेर्बुक् जनी प्रादुर्भावे अस्य बुगागमः स्यात् कूप्रत्यये । जंबूः । जंबूः अदने अस्येत्येके बाहुलकात्कुप्रत्ययोपि जंबुः उक्तंच विक्रमादित्यकाव्ये । तस्य जंबोः फलरसो नदीभूय प्रवर्त्तते इति परिणतजंबु फलोपभोगहृष्टा इति भारविः । डुधाञ् धारणादौ आतोनपीत्यालोपे निपातनात्पूर्वपदस्य नुम् । कर्कंदधातीति कर्कंधूः । कर्कंधूर्बदरी कोलिरित्यमरः । षोऽतकर्म्मणि । दीधिं धैर्यं स्यति त्यजतीति संध्यक्षराणामित्यात्वे आतोनपीत्यालोपे च दिधिषूः । केचित्तु दधातेरित्वं द्वित्वं षुक च निपात्यते । दधात्यसावितिदिधिषुरिति व्याख्यातं पुनर्भूर्दिधिषूरूढाद्विरित्यमरः । द्विरूढा द्विवारं विवाहितेत्यर्थः ।

(तत्त्वदीपिका-) कर्कंधूर्बदरी । दिधिषूः पुनर्भूः ।

मू०- मृग्रोरुतिः ॥ मरुत् । गरुत् । गिरतेर्हिति तस्त्यमुट गमैत॥

(सुबोधिनी–) मृग्रोरुतिः । उतिप्रत्ययमाह । इकार उच्चारणार्थः । मृङ् प्राणत्यागे । मरुत् । अण् प्रत्यये मारुतः । मरुत्शब्दोऽप्यव्युत्पन्नोऽस्ति । मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुदिति विक्रमादित्यकोशः । कोयं वाति सदाक्षिणात्यमरुत इति कविराज श्लोकः । गॄ निगरणे ॥

(तत्त्वदीपिका–) मृग्रोरिति । गरुत्पक्षः गर्मुत् तृणंच ।

मू०- गिरतेरुतिस्तस्यमुट् ॥ चट भेदने ।

(सुबोधिनी–) गिरतेरुतिस्तस्यमुट् । अस्मात्परस्योत्प्रत्ययस्य मुडागमः स्यात् । गर्मुत् । गर्मुत्स्त्री स्वर्णलाभयोरिति मेदिनी ॥

मू०- चटेरुलः ॥ चटुलम् ।

(सुबोधिनी–) चटेरुलः । उलप्रत्ययमाह । चट भेदने । चटुलं शोभनम् ॥

मू०-ह्रादेरितिः ॥ हरित् । सरित् । युष सौत्रो धातुः । युष भजने । योषित् रोहित

(सुबोधिनी–) ह्रादेरितिः । इतिप्रत्ययमाह इकारउच्चारणार्थः ह्रिञ् हरणे । हरित् । हरित्ककुभि वर्णे च तृणवाजिविशेषयोरिति विश्वः हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात् तृणेपि चेति मेदिनी । रुह बीजजन्मनि रोहित् रोहिन्मृग्यां लताभेदे स्त्रीनार्के इति मेदिनी । युष इति धातुः सौत्रः । योषित् । स्त्रीयोषिदबलायोषेत्यमरः ॥

(तत्त्वदीपिका–)ह्रादेरिति।हरित्ककुभिवर्णे च तृणवाजिविशेषयोः रोहिन्मृगविशेषेस्त्री।

मू०-ताडेर्णिलुक्च ॥ तडित् ।

(सुबोधिनी–) ताडेर्णिलुक्च । इति प्रत्यये अस्य णेर्लुक् स्यात् । तड आघाते । ताडयतीति तडित् । तडित्सौदामिनी विद्युदित्यमरः ॥

शमेर्ढः ॥ शण्ढः ।

(सुबोधिनी–) शमेर्ढः । ढप्रत्ययमाह । बाहुलकात् ढस्येत्संज्ञा न । शमु उपशमे । इवत्योरितीण्न । शंढः । स्यात् पुंसि गोपतौ । आकृष्टांडे वर्षधरे तृतीयप्रकृतावपीति मेदिनी ॥

(तत्त्वदीपिका–) शमेरिति । शंढःक्लीबः

मू०- कमादेरठः ॥कमठः । जरठः । रमेर्वृद्धिश्च । रामठम् । शमेः खः । शंखः । कणेष्ठः । कण्ठः ।

(सुबोधिनी–) कमादेरठः । अठप्रत्ययाह । कमु कांतौ । कमठः । कमठः कच्छपे पुंसि भाण्डभेदे नपुंसक इति मेदिनी । जॄ वयोहानौ । जरठः । जरठः कठिने

पांडौ कर्कशे स्यादभिधेयवदिति विश्वः। जरठः काठिने जीर्णे इति वैजयंती। रमेर्वृद्धिः। रमुक्रीडायामस्य वृद्धिः स्यात्ठप्रत्यये। रामठं हिंगुः। शमेः खः। खप्रत्ययमाह शमु उपशमे शंखः। शंखो निधौ ललाटास्थ्नि कंबौ न स्त्रीत्यमरः। शंखः कंबौ न योषिति। ललाटास्थि निधौ नखे इति मेदिनी। कणेः ठः। ठप्रत्ययमाह। कण शब्दे। निपातनात् णस्यानुस्वारे कंठः। कंठो गले सन्निधाने ध्वनौ मदनपादपे इति मेदिनी।

(तत्त्वदीपिका—) कमादेरिति। रामठं हिंगुः।

मू०- वृषलादयःकलप्रत्ययान्तानिपात्याः॥ वृषलः। शप्। शबलः। पल गतौ। पललम्। सरलम्। तरलम्। कम्बलम्। मुस-खण्डने। मुसलम्।

(सुबोधिनी--) वृषलादयः कलप्रत्ययांता निपात्याः। कित्त्वान्न गुणः। वृष सेचने वृषलः। वृषलस्तु गरे शूद्रे इति हैमः। शप आक्रोशे। निपातनात्पस्य बः शबलः। पलगतौ। पललं। पललं तिलचूर्णे च पिके मांसे नपुंसकं। ना राक्षसे इति मेदिनी। सृ गतौ। बाहुलकाद्गुणः। सरलः। सरलः पूतिकाष्ठे ना ऽथोदारावक्रयोस्त्रिष्विति मेदिनी। सरला विरलायंते धनायंते कलिद्रुमाः। न शमी न च पुन्नागो ह्यस्मिन् संसारकानने इति। तृ प्लवनतरणयोः। तरलः। कमु कान्तौ। कमेर्बुगागमो निपात्यते। कंबलः। कंबलो नागराजे स्यात् सास्ना प्रावारयोरपि। क्रिमावप्युत्तरासंगे सलिले तु नपुंसकमिति मेदिनी। सास्ना तु गलकंबल इत्यमरः। मुस खंडने। मुसलं मुसलंस्यादयोऽग्रे च पुंनपुसकयोः स्त्रियां। तालमूल्यामाखुपर्णी गृहगोधिकयोरपीति मेदिनी। मुश खंडने। अस्मात्कलप्रत्यये मुशलोपि। मुशलो मूशलोपि चेति विश्वः॥

मू०- लगेर्वृद्धिश्च॥ लांगलम्। कुट्मलम्। कुड्मलम्। कश्मलम्। कोमलम्। मृजू मलम्। चुपू चपलम्। शकलम्। शमलम्। छगलः।

(सुबोधिनी--) लगेर्वृद्धिश्च। लगि गतौ। अस्य वृद्धिर्निपात्यते। लांगलं। कुट कौटिल्ये। कलप्रत्ययस्य मुडागमो निपात्यते। कुट्मलः। कुड दाहे। अस्मात्कलप्रत्यये मुडागमे च कुड्मलोपि। कश गतिशासनयोः। कलप्रत्ययस्य मुट् निपातनात्। कश्मलं। कुशब्दे। अस्मात्कलप्रत्ययस्य मुट् धातोर्गुणश्च निपात्यते कोमलं। कोमलं मृदुलम् मृदु इत्यमरः। मृजू शुद्धौ। मृजेष्टिलोपो निपात्यते कलप्रत्यये। मलः। मलोऽस्त्री पापविट् किट्टे कृपणे त्वभिधेयवदिति मेदिनी। चुप् मंदायां गतौ। धातोरुपधाया अत्वं निपात्यते कलप्रत्यये। चपलःचपलः पारदे मीने चौरके प्रस्तरांतरे चपला कमला विद्युत् पुंश्चली पिप्पलीषु च। नपुंसके तु शीघ्रे स्यात् वाच्यवत्तरले च

ले इति मेदिनी। शक्लृ शक्तौ। शकलं।शकलं त्वचि खंडे स्याद्रागवस्तुनि वल्कले इति मेदिनी। रोहितादीनां त्वचि तद्योगात् शाकली मत्स्यः। शमु उपशमे। शमलम्। छो छेदने। अस्य गुणागमो ह्रस्वश्च निपात्यते। छगलः। छगलं नीलवस्त्रे ना छागे स्त्रीवृद्धदारके इति मेदिनी॥

मू०– अमांताड्डः॥ दण्डः। रण्डा। खण्डः। मन्यते मण्डः। अण्डः। चण्डः। पण्डः।

(सुबोधिनी–) अमांताड्डः। अमप्रत्याहारांताद्धातोर्डः स्यात्। डप्रत्ययमाह। दमु उपशमे। बाहुलकात् डस्यनेत्संज्ञा। दंडः। दंडोऽस्त्री लगुडेपिस्यादित्यमरः रमु क्रीडायां रंडः रंडा मूषकपर्ण्यां च विधवायां चयोषितीति विश्वः। खनु अवदारणे खंडः। खंडोऽस्त्री शकले चेक्षुविकारमणिभेदयोरिति मेदिनी॥

मू०– कवर्गादिभ्यःकिच्च॥ गुङ् गतौ। गुडः।

(सुबोधिनी–) कवर्गादिभ्यःकिच्च। डक् स्यात्। कित्वाद्गुणो न। डक्प्रत्ययमाह गुङ् गतौ। गुङ् अव्यक्ते शब्दे। गुडो गोलेक्षुपाकयोरित्यमरः। गुडः स्याद्गोलके हास्तिसन्नाहेक्षुविकारयोः। गुडा स्नुह्यां च कथिता गुडिकायां चयोषितीति मेदिनी॥

मू०– स्थादेरालः॥ स्थालम्। स्थाली।

(सुबोधिनी–) स्थादेरालः। आलप्रत्ययमाह। ष्ठागतिनिवृत्तौ। स्थालं। भाजनभेदेपि स्थाली स्यात् पाटलौषधावपि ति मेदिनी॥

मू०--पतिचण्डिभ्यामालञ्॥ पातालम्। चडि कोपे। चांडालः।

(सुबोधिनी–) पतिचंडिभ्यामालञ्। आलञ् प्रत्ययमाह। ञित्वाद्वृद्धिः। पत्लृपतने। पतंत्यस्मिन्नधर्मिण इति पातालं। अधोभुवनपातालबलिसद्म रसातलं इत्यमरः। पाताला नागलोके स्याद्विवरे वडवानले इति मेदिनी। चडि कोपे। नुमि कृते उपधाया अभावान्नवृद्धिः। चंडालः। अण् प्रत्यये चांडालः॥

मू०– तमादिभ्यःकालः तमालः। बिड भेदने। बिडालः। मृण। मर्णयति कमलानि मृणालम्। कुल संख्याने नाशने च। कोलति नष्टां करोति मृत्तिकां कुलालः। कपालम्। पल्यते त्यज्यतेऽसौ पलालः॥

(सुबोधिनी–) तमादिभ्यःकालः। कालप्रत्ययमाह। कित्वान्न गुणः तमु कांक्षायां। तमालः। तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे इति मेदिनी। विश प्रवेशने। विशालात्विद्रवारुण्यामुज्जयिन्यां तु योषिति। नृपपक्षिभिदोः पुंसि पृथुलेप्याभिधेयवदिति मेदिनी। बिड आक्रोशे। बिडालः। बिडालो नेत्रपिंडे स्यात्

वृषदंशकके पुमानिति मेदिनी। ओतुर्बिडालो मार्जारो वृषदंशक आखभुक् इत्यमरः। मृण हिंसायां। मृणालः। मृणालं नलदे क्लीबं पुंनपुंसकयोर्बिशे इति मेदिनी। कुल संख्याने कुलालः। कुलालः ककुभे कुंभकारे स्त्रिजजनांतरे इति मेदिनी। कुलालो घूकपक्षिणि। ककुभे कुंभकारे चेति हैमः। कपि चलने। नलोपो निपात्यते। कपालः। कपालोऽस्त्री शिरोऽस्थिनि घटादेः शकले व्रजे इति मेदिनी। पल गतौ। पललं॥

मू०- पतादिभ्योंगः॥ पतंगः। तरंगः। लवंगम्।

(सुबोधिनी-) पतादिभ्योंगः। अंगप्रत्ययमाह। पत्लृ पतने। पतंगः शलभे शालिप्रभेदे पक्षिसूर्य्ययोः क्लीबं सूते इति मेदिनी सूते पारदेइत्यर्थः। तृ प्लवनतरणयोः तरंगः। तरंगस्तुरगादीनां मुत्फाले वस्त्रभंगके। कल्लोलयोरिति विश्वः। लुञ् छेदने लवंगं देवकुसुमे इत्यमरः॥

मू०- बिडादेःकित्॥ बिडङ्गः। मृद क्षोदे। मृदंगः।

(सुबोधिनी-) बिडादेःकित्। अंगक् प्रत्ययमाह। कित्वान्न गुणः बिड आक्रोशे। विडंगः। 'बिडंगः क्रिमिसंघघ्ने विडंगो नागरेन्यवदिति विश्वः'। विडंगस्त्रिष्वभिज्ञे स्यात् क्रिमिघ्ने पुंनपुंसकमिति मेदिनी'। मृद क्षोदे। मृदंगः। 'मृदंगः पटहे घोष' इति मेदिनी॥

मू०- गमादेर्गः॥ गंगा। छो छागः। खड्गः।

(सुबोधिनी-) गमादेर्गः। गप्रत्ययमाह। गम्लृ गतौ। गंगा। छो छेदने। छागः खड्ग भेदने। खड्गः। 'खड्गो गंडकशृंगे स्यान्निस्त्रिंशे गंडकेपि चेति शब्दतरंगिणी। खड्गो गंडकशृंगासिबुद्धिभेदेषु गंडके इति मेदिनी॥

मू०-भृङ्गादयः। भृञ् भङ्गः। शृङ्गम्। शार्ङ्गम्। पूगः। मोदते मुद्गः।

(सुबोधिनी-) भृंगादयः। गक्प्रत्ययांता निपात्यंते। डुभृञ् धारणपोषणयोः प्रत्ययस्य नुट् निपातनात्। भृंगः। 'भृंगा षिङ्गालिधूम्याटा' इति विश्वः। भृंगो धूम्याटविङ्गयोः। मधुव्रते भृंगराजे पुंसि भृंगं गुडत्वचीति मेदिनी' शृ हिंसायां। शृणातेर्ह्रस्वः प्रत्ययस्य नुडागमश्च निपात्यते। शृंगं। 'शृङ्गं प्रभुत्वे शिखरे चिन्हे क्रीडांबुयत्रके। विषाणोत्कर्षयोश्चाथ शृंगः स्यात्कूर्चशीर्षके। स्त्रीविषयांस्वर्णमीनभेदयोर्ऋषभौषधाविति मेदिनी। शृंगं विषाणमाख्यातं शैलाग्रे जलयंत्रके। मीनौषधिसुवर्णानां भेदे शृंगी प्रयुज्यते'। इत्युलिनी कोशे। शृणातेः शकुनौ वाच्ये गणप्रत्ययः तस्य नुट् च निपात्यते णित्त्वाद्वृद्धिः शार्ङ्गः। पक्षी। शार्ङ्ग धनुरिति तु शृंगस्य विकार इत्यर्थेऽणप्रत्यये बोध्यं। पूङ् पवने। पूयते मुखमनेनेति पूगः। 'पुगस्तु क्रमुके वृंदे इति मेदिनी। मुद हर्षे। मुद्गः। सस्यभेदः॥

मू०- शरदादयोऽदिप्रत्ययान्तानिपात्याः॥ शृ शरत्। दृणा-

तेः दरत् । दृषत् । त्यजेः त्यत् । तनेः तत् । यजेः यत् । इ-
ण् एतत् ।

(सुबोधिनी-) शरदादयोऽदिप्रत्ययांतानिपात्याः । शॄ हिंसायाम् । अदिप्रत्ययः । इकार उच्चारणार्थः । शरत् । 'शरत्स्त्री वत्सरेऽप्यृतौ' इति मेदिनी । दॄ विदारणे । दरत् । 'दरत्स्त्रियां प्रपाते च भयपर्वतयोरपीति मेदिनी' दृणातेः षुक् ह्रस्वो गुणाभावश्च निपात्यते दृषत् । 'दृषन्निष्पेषणशिला पट्टप्रस्तरयोःस्त्रियामिति मेदिनी' । त्यज वयोहानौ । निपातनाट्टिलोपः । त्यद् । तनु विस्तारे । निपातनाट्टिलोपः तद् । यज देवपूजादौ । टिलोपो निपातनात् । यद् । इण् गतौ । अस्य गुणे कृते तुगागमो निपात्यते । एतद् ॥

(तत्त्वदीपिका-) शरदादयइति शरद्धृदयकूलयोः ।

सू०- भियोऽजिःषुक्ह्रस्वश्च ॥ भिषक् ।

(सुबोधिनी-) भियोऽजिःषुक्ह्रस्वश्च । ञिभी भये । अस्मादजि प्रत्ययः स्यात् । अज्प्रत्ययमाह । इकार उच्चारणार्थः । आजिप्रत्यये भियो ह्रस्वः षुगागमश्च स्यात् ह्रस्व विधानसामर्थ्यान्न गुणः भिषक् । 'भिषक् वैद्यो चिकित्सक'इत्यमरः

सू०- युष्यसिभ्यांमदिक् ॥ युष सौत्रः । युष्मद् । अस्मद् ।

(सुबोधिनी-) युष्यसिभ्यांमदिक् । मदिक्प्रत्ययमाह । कित्त्वाद्गुणो न । इकार उच्चारणार्थः । युष् सौत्रो धातुः । युष्मद् । असु क्षेपणे । अस्मद् । त्वमहं ॥

सू०- स्त्वादेर्मः ॥ स्तोमः । सोमः । होमः । धर्मः । क्षेमं । भामः । वामः । यामः । पद्मम् । नयतीति नेमः ।

(सुबोधिनी-) स्त्वादेर्मः । मप्रत्ययमाह । ष्टुञ् स्तुतौ । स्तोमः संघातः । षुञ् अभिषवे । सोमस्तुहिनदीधितौ । वानरे च कुबेरे च पितृदेवे समीरणे । वसुप्रभेदे कर्पूरनीरे सोमलतौषधावििति मेदिनी' । हु दानादनयोः होमः । देवतोद्देशेन हविः प्रक्षेपो होमः । धृञ् धारणे । धर्मः । 'धर्मोऽस्त्री पुण्यआचारे स्वभावोयमयोर्ऋतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे' इति मेदिनी । 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोर्ऋतौ' इति विश्वः क्षि क्षेपे । क्षेमं । भा दीप्तौ भामः । 'भामः क्रोधे रुचौ दीप्तौ' इति विश्व आदित्यश्च । या प्रापणे । यामः । 'यामस्तु पुंसि प्रहरे संयमेपि प्रकीर्तितः' । इति मेदिनी । वा गतिगंधनयोः । वामः वामं धने पुंसि हरे कामदेवे पयोधरे । वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रिमामथ । वामी शृगालीवडवा सराभीकलभीषु चेति' मेदिनी । पद गतौ । पद्मं । पद्मोऽस्त्री पद्मके व्यूहनिधिसख्यांतरंबुजे । वा नागे' इति मेदिनी । णीञ् प्रापणे । नेमः । 'नेमः कीले ऽवधौ गर्त्ते प्राकारे कैतवेपि चेति मेदिनी । नेमस्त्वर्द्धे प्राकारगर्त्तयोरवधौ कैतवेपिचेति हैमः'॥

मू०- जिह्लादयो निपात्यंते ॥ जिह्लः । ग्रसु ग्लसु अदने । ग्रामः । सिमः । शुष्मम् । श्यैङ् श्यामा । धूमः । युग्मम् । रुक्मम् । तिग्मम् । हिमम् । भीमः । भीष्मः । घृ क्षरणे दीप्तौ च । जिघर्त्यनेन घर्मः । ग्रसेः ग्रीष्मः ।

(सुबोधिनी-) जिह्लादयो निपात्यते । ओहाक् त्यागे । अस्मात् मप्रत्ययः सत्प्रत्ययवद्भवति । आतो लोपश्च निपातनात् तेन द्वित्वादिः । यः से इति पूर्वस्येत्वं । जिह्लः । 'जिह्लः कुटिलमंदयोरि'त्यमरः। जिह्लस्तु कुटिले मंदे क्लीबे तगरपादपे' इति मेदिनी । ग्रसु अदने । ग्रसेष्टेरात्वं निपात्यते । ग्रामः ।'ग्रामः स्वरे संवसथे वृंदे शब्दादिपूर्वकः' इति विश्वः । शब्दादिपूर्वको ग्रामशब्दो वृंदे' शब्दग्रामो गुणग्राम इति' यथा ।' शब्दादि पूर्वो वृंदेपि ग्राम' इत्यमरः । संपूर्वः संयुगे स्मृत इति विश्वः । षिञ् बंधने । निपातनान्मक्प्रत्ययांतो वक्ष्यमाणो ज्ञेयः । सिमः सर्वादिगणे पठितः । शुष् षोषणे शुष्मं । 'शुष्ममग्निसमीरयोरिति विश्वः। शुष्मं तेजसि वायौनेति मेदिनी'। शैङ् गतौ श्यामः । 'त्रिषु श्यामौ हरित कृष्णौ श्यामा स्याच्छारिका निशेत्यमरः । श्यामो वटे प्रनागस्य वारिदे वृद्धदारुके । पिके च कृष्णहरितोः पुंसि स्यात् तद्वति त्रिषु । मरिचे सिंधुलवणे क्लीबं स्त्री शारिकौषधौ । गुदायां सोमवल्ल्यां च प्रियंगुवल्गुलीकयोः। यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधौ । नीलिकायामिति मेदिनी'। धूञ् कंपने । धूमः । युजिर् योगे । निपातनात् जस्य गः । युग्मं । रुच दीप्तौ । निपातनात् चस्य कः । रुक्मं । 'रुक्मं तु कांचने लोहे' इति विश्वः । तिज निशाने । निपातनात् जस्य गः तिग्मं । 'तिग्मं तीक्ष्णं खरं तद्वदि'त्यमरः । हन हिंसागत्योः । हंतेर्हिरादेशो निपातनात् । हिमम् । हिमं तुषारमलयभवयोः स्यान्नपुंसकं । शीतले वाच्यलिंगक इति मेदिनी ' ञिभी भये भियः षुगागमो वा निपात्यते। बिभेत्यस्मादिति भीमः।भीष्मः।भीष्मो गांगेयघोरयोरिति विश्वः। भीमो ऽम्ल वेतसे घोरे शंभौ मध्यमपांडवे इति मेदिनी । घृक्षरणदीप्त्योर्निपातनाद्गुणः । घर्मः । ' घर्मः स्यादातपग्रीष्मेप्युष्णस्वेदांभसोरपि । इति मेदिनी' । ग्रस अदने । अस्य निपातनात् ग्रीषादेशः ग्रीष्मः । ' ग्रीष्मउष्णर्तुभेदयोरिति मेदिनी'॥

मू०- प्रथेःषिवःसम्प्रसारणञ्च ॥ पृथिवी ।

(सुबोधिनी -) प्रथेःषिवःसंप्रसारणंच । षिवप्रत्ययमाह । षित्त्वादीष् । षवमत्ययइत्येके । प्रथ प्रख्याने। पृथिवी । पृथिवी पृथ्वी धरा सर्वसहा रसेति शब्दार्णवः ॥

(तत्त्वदी०-) प्रथेषिवरिति । षवन्नित्येके । पृथिवी पृथ्वी च ।

मू०- अशादेःक्वः ॥ अश्वः । खट कांक्षायाम् । खट्वा । विश्वम् । सर्वादिरयम् ।

(सुबोधिनी--) अशादेःकः । क्त्विान्न गुणः कप्रत्ययमाह । अशूङ् व्याप्तौ । अश्वः । 'अश्वः पुंजातिभेदे च तुरंगे च पुमानय'मिति मेदिनी । 'अश्वः पुंभेदवाजिनो'रिति विश्वः । खट कांक्षायां । खट्यते शयनार्थिभिः कांक्ष्यते इति खट्वा । विश प्रवेशने । विश्वः । 'विश्वा प्रतिविषायां स्त्री जगति स्यान्नपुंसकं । नना शुंठ्यां पुंसि देवभेदेष्वखिलेत्रिष्विति मेदिनी ' ॥

सू०-स्रादेर्वः ॥ सृतमनेन विश्वमिति सर्वः । शर्वः । गर्वः ।

(सुबोधिनी-) स्रादेर्वः । वप्रत्ययमाह । सृ गतौ । सृतमनेन विश्वमिति सर्वः । गॄ निगरणे । गर्वः अहंकारः । शॄ हिंसायां । शर्वो रुद्रः ॥

सू०-ग्रीवादयोवप्रत्ययांतानिपात्यंते ॥ ग्रीवा । लिहंत्यनयेतिजिव्हा ।

(सुबोधिनी--) ग्रीवादयो वप्रत्ययांतानिपात्यंते । गॄ निगरणे । ईडागमो गुणाभावश्च निपातनात् । गिरंत्यनयेति ग्रीवा । लिह आस्वादने । लस्य जो गुणाभावश्च निपातनात् । लिहंत्यनयेति जिव्हा ॥

(तत्त्वदीपिका-) ग्रीवादय इति । गिरंत्यनया ग्रीवा ।

सू०-य्वादेःकन् ॥ युवा । वृषा । तक्ष्णोति काष्ठानि तक्षा । राजा । धवि गतौ । धन्वयति शरानिति धन्वा । प्रतिदिवा ।

(सुबोधिनी-) य्वादेःकन् । कन्प्रत्ययमाह । क्त्विान्नगुणः । यु मिश्रणे । यौतीति युधातोरित्युव् । नोपधाया इति दीर्घः । नाम्नो नोलोपशिति नलोपः । युवा । 'युवास्यात्तरुणे श्रेष्ठे निसर्गबलशालिनीति मेदिनी' । वृषु सेचने । वृषा । 'वृषा कर्णे महेंद्रे चेति मेदिनी' । तक्षू तनूकरणे । तक्षा । ' तक्षातु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतदित्यमरः' । राजृ दीप्तौ राजा । 'राजा प्रभौ नृपे चंद्रे पक्षे क्षत्रियशक्रयोरित्यमरः' । धवि गतौ । धन्वा । ' समानौ मरुधन्वानौ ' इत्यमरः । अथास्त्रियां । धनुश्चापौ धन्वशरासनकोदण्ड कार्मुकमित्यमरः । धन्वा तु मरुदेशेना क्लीबे चापे शरेऽपिचोति मेदिनी ' । दिवु क्रीडादौ । प्रतिदीव्यत्यस्मिन्निति प्रतिदिवा दिवसः ॥

सू०--सप्यशूभ्यांतुट्च ॥ षप समवाये । सप्त । अष्ट ।

(सुबोधिनी-) सप्यशूभ्यान्तुट्च । आभ्यां कन् प्रत्ययः स्यात् तस्य तुडागमश्च । षप समवाये । जस्शसोरितिजसोलुक् । नाम्नोनोलोपशिति नलोपः । सप्त । अशूङ्व्याप्तौ । छशषेति षत्वं । अष्ट ॥

सू०--नञिजहातेः ॥ अहः ।

(सुबोधिनी-) नञिजहातेः । ओहाक् त्यागे । अस्मात् कन् प्रत्ययः स्यात् न जहाति प्रकाशमिति आतोनपीत्यालोपः । अन्हइति नस्य सः । अहः ॥

मू०—श्वादयः ॥ श्वा । उक्षा । पुष्णाति कमलानीति पूषा । स्निह्यत्यस्मिन् । स्नेहः । प्लेहति प्लीहा । मुह्यन्त्यस्मिन्नाहते मूर्द्धा । मज्जत्यस्थिषु मज्जा । अर्य्यपूर्वोमाङः अर्य्यमा । मातर्य्यन्तरिक्षेश्वयतीति मातरिश्वा । मह पूजायाम् । मह्यते इति मघवा । इत्युणादौ प्रथमः पादः ॥

(सुबोधिनी--) श्वादयः । कन्प्रत्ययान्ता निपात्यंते । टुओश्वि गतिवृद्ध्योः । श्वयतीति इकारलोपो निपातनात् श्वा । उक्ष सेचने । उक्षा वृषभः । पूष वृद्धौ । इनामिति दीर्घः । पूषा । पूषणौ । पूषणः । प्लिह गतौ । इकारस्य दीर्घत्वं निपात्यते। प्लीहा कुक्षिव्याधिः । मुहवैचित्ये । मुहेरुपधाया दीर्घः । धोन्तादेशो रमागमाश्च निपातनात् । मूर्द्धा । ' मूर्द्धा ना मस्तको ऽस्त्रियामित्यमरः ' । मुर्वीबंधने । अस्योकारस्य दीर्घत्वं वस्य धश्च निपात्यते इत्युज्ज्वलदत्तः । मूर्द्धा । टुमस्जो शुद्धौ । मस्जेश्चुत्वेन सस्य शः। झबेजबा इति शस्य जः। मज्जा । नकारांतोयं आबंतोप्यभ्युपगम्यते । ' ऊष्मया सार्द्धमूष्मापि मज्जोक्तौ मज्जया सह' ति द्विरूपकोशः । माङ् माने । इनामिति दीर्घः। अर्यमा। 'अर्यमा तु पुमान् सूर्ये पितृदेवांतरेपिचे'ति मेदिनी । टुओश्वि गतिवृद्ध्योः। धातोरिकारलोपः संप्रसारणाभावः सप्तम्याऽलुक् च निपात्यंते । मातरीत्यव्ययमन्तरिक्षवाचि तस्मिन् श्वयतीति मातरिश्वा। 'मातरिश्वासदागति'रित्यमरः। अथ च श्वादेरिति सूत्रेण वस्योत्वं न भवति। अभिव्यक्तिपरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य तदंतस्य च ग्रहणात् । तेन मातरिश्वनः मातरिश्वनेत्यादि । मह पूजायाम् । धातोर्हस्य घः अवुगामश्च निपात्यते मघवा । इन्द्रः । इत्युणादौ प्रथमः पादः ॥

मू०-कृहृञोरेणुः ॥ करेणुः । हरेणुः ।

(सुबोधिनी-) कृहृञोरेणुः । एणुप्रत्ययमाह । डुकृञ् करणे । करेणुः । ' करेणुरिभ्यां स्त्रीनिभे इत्यमरः। करेणुर्गजयोषायां स्त्रियां पुंसि मतंगजे ' इति मेदिनी । हृञ् हरणे । हरेणुः । ' हरेणुर्ना सती न स्त्री रेणुका कुलयोषयो'रिति मेदिनी' । हरेणुर्गंधद्रव्यं । कलापश्चेति बोध्यम्। ' कलापस्तु सतीनक ' इत्यमरः ॥

मू०— कुषादेःक्थः ॥ कुष्ठम् । रथः । काशृदीप्तौ काष्ठं । अवभृथः ।

(सुबोधिनी-) कुषादेःक्थः । क्थप्रत्ययमाह । कित्वान्न गुणः । कुष निष्कर्षे । कुष्ठम् । 'कुष्ठं रोगे पुष्करे स्त्री'ति मेदिनी । 'कुष्ठं रोगे सुगंधे चेति' विश्वः। रमु क्रीडायां । लोपस्त्वनुदात्ततनामिति मलोपः। रथः । ' रथः पुमानवयवेस्यंदनं वेतसेपि चे'ति मेदिनी । 'रथःस्यात् स्यंदने काये चरणे वेतसे ऽपिचेति विश्वः' काशृ दीप्तौ छशषेति षत्वं ष्टुत्वं काष्ठं । ' काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे

दिशि च स्त्री दारुणि स्यान्नपुंसकमि'ति मेदिनी । 'काष्ठं दार्विंधनं त्वेध' इत्यमरः । डुभृञ् धारणादौ अवभृथो यज्ञस्नानम् ॥

मू०–उषादेस्थः॥ ओष्ठः । कोष्ठम् । गाथा । अर्थः। शु गतौ । शोथः ।

(सुबोधिनी–) उषादेस्थः । थप्रत्ययमाह । उष दाहे ओष्ठः। कुष निष्कर्षे ।'कोष्ठः कुक्षौ कुसूलयोः' । गै शब्दे । गाथा । ' गाथा श्लोके संस्कृतान्यभाषार्थाशेषवृत्तयो'रिति मेदिनी । ऋ गतौ । अर्थः । ' अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ' इत्यमरः । शुगतौ । शोथः । श्वयथुः ॥

मू०- सर्त्तेर्णित् ॥ सार्थः ।

(सुबोधिनी–) सर्त्तेर्णित् । थण् प्रत्ययमाह । णित्वाद्वृद्धिः । सृ गतौ । सार्थः सार्थो वणिक्समूहे स्यादपि संघातमात्रके ' इति मेदिनी ॥

मू०– निशीथादयः ॥ निशीथः। तीर्थः । रिचिर् विरेचने । रिक्थम् । षिचिर् क्षरणे । सिक्थम् । पृषु सेचने । पृष्ठम् । गूथम् । यु मिश्रणे । यूथम् । प्रोथः ।

(सुबोधिनी–) निशीथादयः । थक् प्रत्ययान्ता निपात्यंते । शीङ् स्वप्ने । निशीथः । ' निशीथस्तु पुमानर्द्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी । तॄ प्लवनसंतरणयोः ऋतइतीर् य्वोर्विहसे इति दीर्घः । तीर्थं । ' तीर्थसाध्वक्षरक्षेत्रोपायोपाध्यायमंत्रिषु । अवतारर्षिजुष्टांभः स्त्रीरजःसु च विश्रुतमिति विश्वः' । रिचिर्विरेचने । चोःकुरितिकः। रिक्थम् 'रिक्थमृक्थं धनं वसु'इत्यमरः । षिचिर् क्षरणे । सिक्थम् ।'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकमि'ति मेदिनी। पृष सेचने पृष्ठं।'पृष्ठं तु चरमं तनो'रित्यमरः।'पृष्ठं चरममात्रेपि देहस्यायवांतरे इति मेदिनी' । स्तोत्रविशेषेपि । पृष्ठः । पृष्ठैः स्तूयते इत्यादौ तथा निर्णयात् । गु पुरीषोत्सर्गे । निपातनाद्दीर्घः । गूथं विष्ठा । यु मिश्रणे । निपातनाद्दीर्घः । यूथं 'यूथं तिर्यक् समूहोपि वृंदमात्रेपि भाषितमिति' विश्वः। यूथं तदग्रसरगर्वितकृष्णसारमिति रघुः' प्रुङ् गतौ निपातनाद्गुणः । प्रोथः । 'प्रोथो ऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिष्वि'ति मेदिनी । 'प्रोथमस्त्री तुरंगास्ये प्रोथः प्रस्थित उच्यते' ॥

(तत्त्वदीपिका-) निशीथादय इति । रात्रावर्द्धरात्रे च निशीथः । तीर्थमिति । तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु । अवतारर्षिजुष्टांभस्त्रीरजस्सु च विश्रुतमि'ति विश्वः। ऋक्थमिति । ऋक्थमृक्थं धनं वसु । गूथं विष्ठा । यूथं समूहः । प्रोथमस्त्री तुरंगास्ये प्रोथः प्रस्थित उच्यते ।

मू०–स्फायादेरक् ॥ स्फारम्। तंचू संकोचने तक्रम्। वंचु वक्रम्। शक्रः । क्षिप्रम् । क्षुद्रः । चक्रम् । चदि चन्द्रः । उन्दी उन्दः । श्वि-

ता श्वित्रम् । वृत्रः । वीरः । नीरम् । छिद्रम् । उस्रा । शुभ्रम् ।

(सुबो०-)स्फायादेरक् । रक् प्रत्ययमाह । कित्त्वाद्गुणो न । स्फायी वृद्धौ । ईवत्योरितीण्न । यवयोर्वसे इति यलोपः । स्फारः। 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी । तंचु संकोचने । न्यंक्वादित्वात्कुत्वम् ।नोलोप इति नोलोपः । तक्रम् । तक्रं त्युदश्विन्मथितं पादांब्वर्द्धाम्बुनिर्जलमित्यमरः । वंचु प्रलंभने । वक्रः 'वक्रः स्यात्कुटिले क्रूरे पुटभेदे शनैश्चरे' इति विश्वः । शक्लृ शक्तौ । शक्रः । शक्रः पुमान्देवराजे कुटजार्जुनभूरुहोरिति मेदिनी । क्षिप प्रेरणे । क्षिप्रः । क्षुदिर् संपेषणे। क्षुद्रः । क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवदिति मेदिनी । चादि आल्हादने । इदित इति नलोपाभावः । चंद्रः । पचाद्यप्रत्यये चन्दोपि । 'हिमांशुश्चंद्रमाश्चंद्रः शशी चंदो हिमद्युतिरिति शब्दार्णवः । उन्दी क्लेदने । उन्द्रः जलमार्ज्जारः । श्विता वर्णे । श्वित्रं कुष्ठं । वृतु वर्तने वृत्रः । 'वृत्रो रिपौ ध्वनौ ध्वांते शैले चक्रे च दानवे' इति विश्वः । अज गतिक्षेपणयोः । अजेर्वीरिति वीरादेशः । वीरः । णीञ् प्रापणे । नीरं। छिदिर् द्वैधीकरणे । छिद्रः । वस निवासे । यजामिति संप्रसारणं । घसादेःषः इति षत्वे प्राप्ते निषेधमाह । रपिसृपिसृजिस्पृशिस्पृहिसवनादीनां सस्य षत्वंनेति । उस्रः । उस्रो वृषे च किरणे उस्रा धेनुपवित्रयोरिति मेदिनी । माहेयी सौरभेयी गौरुस्रा माता च शृंगिणीत्यमरः । शुभ दीप्तौ शुभ्रं । 'शुभ्रं स्यादभ्रके क्लीबमुद्दीप्तशुक्लयोस्त्रिष्वि'ति मेदिनी ॥

(तत्त्वदीपिका-) स्फायादेरिति । उन्दो जलचरः। श्वित्रं कुष्ठं ।उस्रोरश्मिः उस्रागौः ।

सू०-अमितम्योर्दीर्घश्च ॥ आम्रः । ताम्रं ।

(सुबोधिनी-) अमितम्योर्दीर्घश्च ॥ आभ्यां रक् स्यादुपधायादीर्घश्च । अम गत्यादौ । आम्रः । 'आम्रश्चूतो रसालोसौ' इत्यमरः ॥तमु कांक्षायां । ताम्रम् ॥

सू०-निद्रादयः॥णिदि निद्रा । अर्द आर्द्रम्। शुच् शूद्रः। दुःखेनेयते दूरम् । कृती कृच्छ्रम् । क्रूरः।रोदयतीति रुद्रः। ज्या वयोहानौ । जीरः।

(सुबोधिनी-) निद्रादयः । रक्प्रत्ययांता निपात्यंते । णिदि कुत्सायां । नलोपो निपातनात् । निद्रा । स्यान्निद्रा शयनं स्वाप इत्यमरः । अर्द गतौ । अर्देर्दीर्घो निपातनात् । आर्द्रा । 'आर्द्रा नक्षत्रभेदे स्यात् स्त्रियां क्लिन्नेभिधेयवदिति मेदिनी । शुच शोके । चस्य दो धातोर्दीर्घश्च निपात्यते । शूद्रः । इण् गतौ । दुःपूर्वः धातोर्लोपो निपातनात् । रिलोपोदीर्घश्चेतिरलोपपूर्वदीर्घौ । दुःखेनेयते प्राप्यते इति दूरं । कृती छेदने । कृतेःकृच्छ्रक्रू इत्येतावादेशौ निपातनात् । कृच्छ्रम् । क्रूरः। कृच्छ्रमाख्यातमाभीले पापसंतापयोरपीति विश्वः। स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः क्रूरः । क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवदिति विश्वः। नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वंचक इत्यमरः। रुदिर् अश्रुविमोचने । ण्यंतः रोदयतीति णेरिति णिलोपः । रुद्रः । ज्या ग-

तौ। ईकारो निपातनात्। जीरः। ज्या वयोहानौ अस्माद्रक्प्रत्यये ग्रहामिति संप्रसारणे च कृते जीरइत्येके। 'जीरः खड्गे वणिकुद्रव्ये' इति विश्वः। जीरस्तु जरणे खड्गे इति मेदिनी॥

मू०—स्वादेःक्रः॥ सुरः। षूङ् प्राणिप्रसवे। सूरः। धीरः। गृध्रः।

(सुबोधिनी—) स्वादेःक्रः। क्रप्रत्ययमाह। किस्वान्न गुणः। षुञ् अभिषवे। सुरः 'सुरा चषकमद्ययोः। पुल्लिंगस्त्रिदिवेशे स्यादिति मेदिनी। सुरो देवे सुरा मद्ये चषकेपि सुरा क्वचिदिति विश्वः। षूङ् प्राणिगर्भविमोचने। सावयति प्रेरयति कर्मणि लोकामिति सूरः। सूरसूर्यार्यमादित्य इत्यमरः। डुधाञ् धारणादौ। अपिदाधेतीत्वं। धीरः। धीरो धैर्य्यान्विते स्वैरे बुधे क्लीबं तु कुंकुमे। स्त्रियां श्रवणशब्दकुल्यामिति मेदिनी। गृधु अभिकांक्षायां। गृध्रः। गृध्रः खगांतरे पुंसि वाच्यलिंगोथ लुब्धके' इति मेदिनी॥

मू०—शूरादयः॥ शु सौत्रः। शूरः। षिञ् सीरः। चिञ् चीरम्।

(सुबोधिनी—) शूरादयः। क्रप्रत्ययांता निपात्यंते। शु गतौ। निपातनाद्दीर्घः सर्वत्र। शूरः। 'शूरः स्यात्पादपे भटे इति मेदिनी। शूरश्चारुभटे सूर्य्ये इति विश्वहेमचंद्रौ'। षिञ् बंधने। सीरः। 'सीरोऽर्कहलयोः पुंसी मेदिनी'। चिञ् चयने। चीरम्। चीरो झिल्ल्यां नपुंसकं। गोस्तने वस्त्रभेदे च रेखालेखनयोरिति मेदिनी। चीरं तु गोस्तने वस्त्रे चूडायां सीसकेपि च। चीरा कुच्छ्राटिकाझिल्ल्योरिति विश्वः॥

मू०—वाविन्धेः॥ वीध्रम्। वृधु वर्ध्रम्। वप्रः। इन्द्रः। अगि गतौ। अग्रम्। वज्रम्। टुवप् विप्रः। उच समवाये। उग्रः। ञिभीभये। भेलः भेरी। शुच शोके। शुक्रः। शुक्लः। गुङ् गतौ। गौरः। इण् इरा। माला।

(सुबोधिनी—) वाविंधेः। ञिइंधी दीप्तौ। विपूर्वादस्मात् क्रन् स्यात्। नोलोप इति नलोपः। वीध्रं वीध्रं तु विमलार्थकमित्यमरः। वृधु वृद्धौ वर्द्धचर्म। टुवप् बीजतंतुसंताने। वप्रः प्राकारः वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति धरणिः। इदि परमैश्वर्य्ये। इंद्रः इंद्रः शचीपतौवंतरात्मन्यादित्ययोगयोरिति विश्वः। अगि गतौ नलोपो निपात्यते। अग्रम्। अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलंबने समूहे च प्रांतरे पुंनपुंसकं। अधिके च प्रधाने च प्रथमे चाभिधेयवदिति मेदिनी। वज गतौ। वज्रः। वज्रोऽस्त्री हीरके पवौ। टुवप् वीजतंतुसंताने। उपधाया इत्वंनिपातनात् विप्रः। उच समवाये चस्य गो निपातनात्। उग्रः। उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे इति मेदिनी। ञिभी भये। नंदादित्वादीप्। भेरी स्त्री दुंदुभिः पुमान् इत्यमरः। पक्षे रस्य लत्वं निपात्यते। भेलः। भेलः प्लवमणौ पुंसि भीरावज्ञे च वाच्यवदिति मेदिनी। शुच शोके। को निपातनात् शुक्रः। शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान्। रेतोऽक्षिरुग्भिदोः क्लीबमिति पक्षे लत्वं निपात्यते। शुक्लः। शुक्लो

योगांतरे सिते। नपुंसकं तु रजते इति च मेदिनी। गुङ् अव्यक्ते शब्दे । वृद्धिर्निपातनात्। गौरः। गौरः पीतेऽरुणे श्वेते विशुद्धेप्यभिधेयवत् । नाश्वेतसर्षपे चंद्रे न द्वयोः पद्मकेशरे। गौरी त्वसंजातरजःकन्याशंकरभार्य्ययोः। रोचने रजनी पिंगा प्रियंगुवसुधासु च । आपगायाविशेषेपि यादसांपतियोषितीति मेदिनी। १। गौरोऽरुणे सिते पीते इति विश्वः। इण् गतौ। इणो गुणाभावो निपातनात्। इरा। इरा मद्ये च वारिणीति विश्वः। मा माने। प्रत्यये रस्य लत्वं निपातनात्। माला। मालं क्षेत्रे स्त्रियां पृक्का स्रजो जात्यंतरे पुमानिति मेदिनी। मालं क्षेत्रे जने मालो मालापुष्पादिदामनीति विश्वः।मालमुन्नतभूतलमित्युत्पले क्षेत्रमारुह्य मालमितिमेघदूतः॥

मू०--कुशिशल्पिसंज्ञयोः॥ रजकः। चष् भक्षणे। चषकम्। कुह विस्मापने। कुहकम्। कृतकः

(सुबोधिनी-) कुशिशल्पिसंज्ञयोः॥ शिल्पिन्यभिधेयसंज्ञायां गम्यमानायां च कुः स्यात्। कुप्रत्ययमाह। कित्त्वान्न गुणः। युवोरित्यकादेशः। रंज रागे। नोलोप इति नलोपः।रजकः। रजको भावकशुकाविति हैमः। रजको धावके शुके इति विश्वः। चष भक्षणे। संज्ञायां तु चषकः। चषको स्त्री पानपात्रमित्यमरः। कुह विस्मापने। कुहकः। दांभिकः। कृती छेदने। कृतकः॥

मू०- मुषेःकिकोर्दीर्घश्च॥ मूषकः।

(सुबोधिनी-) मुषेःकिकोर्दीर्घश्च। मुष स्तेये। अस्मात्किकः। किक्प्रत्ययमाह। कित्त्वान्न गुणः। मूषकः आखुः॥

मू०- क्रियइकः॥ क्रयिकः। क्रेता

(सुबोधिनी--) क्रियइकः। इकप्रत्ययमाह। डुक्रीञ् द्रव्यविनिमये। क्रियकः।क्रेता॥

मू०- श्यास्त्याहृञादिभ्यइनः॥ श्येनः। स्त्येनः। हरिणः।

(सुबोधिनी-) श्यास्त्याहृञादिभ्यइनः। इनप्रत्ययमाह। श्यैङ् गतौ। संध्यक्षराणामित्यात्वं। श्येनः। 'श्येनः पत्रिणि पांडुरे'इति मेदिनी। स्त्यै ष्ट्यै शब्दसंघातयोः। स्त्येनः चौरः। हृञ् हरणे। हरिणः। हरिणःपुंसि सारंगे विशदे त्वाभिधेयवत्। हरिणी हारितायां च गणिकावृत्तभेदयोः। सुवर्णप्रतिमायां चेति मेदिनी। अव रक्षणादौ। अविनः। अध्वर्य्युः॥

मू०- वृजादेःकिन्॥ वृजिनम्।

(सुबोधिनी-) वृजादेःकिन्। किन्प्रत्ययमाह। कित्त्वान्न गुणः। वृजी वर्ज्जने। वृजिनं। वृजिनं कल्मषे क्लीबं केशे ना कुटिलेऽन्यवदिति मेदिनी॥

मू०- अजेर्वीन॥ अजिनम्। कठ कृच्छ्रजीवने। कठिनम्। नल गन्धे। नलिनम्। कुडि दाहे। कुण्डिनम्। दो दिनम्।

(सुबोधिनी-) अजेर्वीन । क्निन्प्रत्यये वीभावो न स्यात् । अज गत्यादौ । अजिनं चर्मकृत्तिः स्त्रीत्यमरः । कठ कृच्छ्रजीवने । कठिनः । कठिनमपि निष्ठुरे स्यात्स्तब्धे तु त्रिषु नपुंसकं स्थाल्यां । कठिनी खटिकायामपि कठिना गुडशर्करायां चेति मेदिनी । नल गंधने । नलिनं पद्मं । मल धारणे । मलिनं मलिनं दूषिते कृष्णे ऋतुमत्यां तुयोषितीति मेदिनी । कुडिदाहे । कुंडिनंनगरं कुंडिनऋषिः । दो अवखंडने । संध्यक्षराणामित्यात्वे । आतोनपीत्यालोपः । दिनं ॥

मू०—द्रुदक्षिभ्यामिनः ॥ द्रविणम् । दक्ष वृद्धौ । दक्षिणः । दक्षिणा ।

(सुबोधिनी-) द्रुदक्षिभ्यामिनः । द्रुगतौ । द्रविणः । द्रविणं नद्वयोर्वित्तेकांचने च पराक्रमे इति मेदिनी । दक्ष वृद्धौ । दक्षिणः । दक्षिणस्तु परच्छंदानुवर्तिनि । दक्षेऽपसव्ये सरले प्राचीनेप्यथ दाक्षिणा । दिक् प्रतिष्ठा यज्ञदानमिति हेमचंद्रः । दक्षिणःसरलोदारपरच्छंदानुवर्तिषु।वाच्यवद्दक्षिणावाची यज्ञदानप्रतिष्ठयोरिति विश्वः।

मू०—अर्तेः किदिर्च ॥ इरिणम् ।

(सुबोधिनी-) अर्तेःकिदिर्च । ऋ गतौ । अस्मादिनक् प्रत्ययः स्यात् धातोरिरादेशश्च । इरिणं । इरिणंशून्यमूषरमित्यमरः ॥

मू०—वेपितुह्योर्ह्रस्वश्च ॥ विपिनम् । तुहिनम् ।

(सुबोधिनी-) वेपितुह्योर्ह्रस्वश्च । आभ्यामिनप्रत्ययः स्यात् । धातोर्ह्रस्वश्च । टुवेपृ कंपने । विपिनं । अटव्यरण्यं विपिनमित्यमरः । तुहिर् अर्दने । उपधायागुणे कृते ह्रस्वः । तुहिनं । हिमम् ॥

मू०-तलिपुलिभ्याञ्च ॥ तल प्रतिष्ठायाम् । तलिनम् । पुलिनम् ।

(सुबोधिनी-) तलिपुलिभ्यांच । इन्प्रत्ययः स्यात् । तल प्रतिष्ठायां । तलिनं । तलिनं विरले स्तोके स्वच्छेपि तलिनं त्रिषु । पुल महत्त्वे पुलिनं ॥

मू०- रुहेश्च ॥ रोहिणः ।

(सुबोधिनी-) रुहेश्च।इन्प्रत्ययः स्यात्। रुह बीजजन्मनि। रोहिणः ।चंदनतरुः॥

मू०—आप्नोतेःक्विप्ह्रस्वश्च ॥ आपः । अद्भिः ।

(सुबोधिनी-) आप्नोतेःक्विप्ह्रस्वश्च । आप्लृव्याप्तौ । अस्मात्क्विप्धातोर्ह्रस्वश्च क्विप् प्रत्ययमाह । नसन्महतोधौ दीर्घः । आपः । भिदपामिति दत्वं । अद्भिः ॥

मू०— ग्लानुदिभ्यांडौः ॥ ग्लौः । नौः ।

(सुबोधिनी-) ग्लानुदिभ्यांडौः । डौप्रत्ययमाह डित्त्वाट्टिलोपः । ग्लै हर्षक्षये । ग्लौः । ग्लौर्मृगांकः कलानिरित्यमरः । नुदि प्रेरणे । नौः । स्त्रियां नौस्तरणिस्तरीत्यमरः ॥

मू०—रातेर्डैः ॥ राः । रायौ ।

(सुबोधिनी–) रातेर्डैः । डैप्रत्ययमाह । डित्त्वाट्टिलोपः । रा दाने । रैरिभइत्यात्वं । राः। रः स्मृतः पावकस्तीक्ष्णः राः पुंसि स्वर्णवित्तयोरिति मेदिनी । रस्तीक्ष्णे दहने रास्तु सुवर्णे जलदे धने इति हैमः ॥

मू०–गमेर्डोः ॥ गौः ।

(सुबोधिनी–) गमेर्डोः । डोप्रत्ययमाह । डित्त्वाट्टिलोपः गम्लृ गतौ । ओरौरित्योः । गौः । गौर्नादित्ये बलीवर्दे किरणेऋतुभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्रांबुरश्मिदृग्बाणलोमसु इतिकेशवः । गौःस्वर्गे वृषभे रश्मौ वज्रे चंद्रे पुमान् भवेत्।अर्जने नेत्रदिग्बाणभूवाग्वारिषु गौर्मता । इत्यमरः

(तत्त्वदीपिका–) गमेरिति । गौरिति । गौर्नादित्येबलीवर्देकिरणक्रतुभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्रांबुरश्मिदृग्बाणलोमसु ।

मू०–भ्रमेर्डूः ॥ भ्रूः ।

(सुबोधिनी–) भ्रमेर्डूः । डूप्रत्ययमाह । डित्त्वाट्टिलोपः । भ्रमु अनवस्थाने।भ्रूः

मू०– दमेर्डोसि ॥ दोः । दोषौ ।

(सुबोधिनी–) दमेर्डोस् । डोस्प्रत्ययमाह । डित्त्वाट्टिलोपः। दमु उपशमे ।दोषां र इति रः। दोः । दोषंतस्यतथाविधस्येति श्रीहर्षप्रयोगात् पुंस्त्वं । ककुद्दोषणी इति भाष्यप्रयोगान्नपुंसकत्वम् । दोर्दोषा च भुजोबाहुरिति धनंजयकोशात् ।स्त्रीलिंगोप्ययम्

पणेरिज्आदेर्वः ॥ वणिक् ।

(सुबोधिनी–) पणेरिज्आदेर्वः । इज् प्रत्ययमाह । पणव्यवहारे स्तुतौ च वणिक् । नैगमो वाणिजो वणिगित्यमरः ॥

मू०– आशेरशादेशोयुप्रत्ययः ॥ रशना ।

(सुबोधिनी–)आशेरशादेशोयुप्रत्ययः । युप्रत्ययमाह । युवोरिसनादेशः । अशूङ् व्याप्तौ । अश् भोजने वा । रशना । तालव्या अपि दंत्याश्च शंबसूकरशूकराः । रशनापि च जिव्हायामिति विश्वः । रस आस्वादने रस शब्दे इति धातुभ्यां युप्रत्यये दंत्यसकारवानपि । रसनस्वदने ध्वनौ । जिव्हायां तु न पुंसि स्याद्रास्नायां रसना स्त्रियामिति मेदिनी । रसनं निःस्वने स्वादे रसना कांचिजिव्हयोरिति धरणिः ॥

(तत्त्व०–) रशनेति कांचौ । जिव्हायां दन्त्यसकारवान् ।

मू०– उन्देर्नलोपश्च ॥ ओदनः ।

(सुबोधिनी–) उंदेर्नलोपश्च । युः स्यात् । उंदी क्लेदने । ओदनः । ओदनं न स्त्रियां भक्ते बलायामोदिनी स्त्रियामिति मेदिनी ॥

मू०- गमेर्गान्तादेशश्च ॥ गगनम् । अन्येभ्योऽपियुः । स्यंदनम् । रोचनः । रंजिकृभ्यांक्युः । रजनम् । कृ किरणः ।

(सुबोधिनी-) गमेर्गादेशश्च । युः स्यात् मस्य गश्च । गम्लृ गतौ । गगनम् । नभोंतरिक्षं गगनमित्यमरः। अन्येभ्योपि युः। स्यंदू प्रस्रवणे ।स्यंदनः।स्यंदनं तु स्रुतौ नीरे तिनिशेनारथे स्त्रियामित्यमरः। रुच दीप्तौ । रोचनः । रोचनं रक्तकल्हारे गोपित्तवरयोषितोः । रोचनं कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिष्विति मेदिनी । रंजिछम्भ्यां क्युः । क्युप्रत्ययमाह । किच्वान्न गुणः । रंज रागे । नोलोपः । रजनं । रजनो रागजनने रजनं रक्तचंदने इति मेदिनी । कॄ विक्षेपे ऋतइतीर् । किरणः ॥

मू०- धृषेर्धिषश्च ॥ धिषणा । धाञश्च । निधनम् । बुद्धि

(सुबोधिनी-) धृषेर्धिषश्च । धृषेर्धिष् आदेशश्च । ञिधृषा प्रागल्भ्ये । धिषणः । धिषणस्त्रिदशाचार्ये धिषणाधिपयोषितीति मेदिनी । गीष्पतिर्धिषणो गुरुरित्यमरः । डुधाञ् धारणादौ । आतोनपीत्यालोपः । निधनं । निधनं स्यात्कुले नाशे इति मेदिनी । निधनं कुलनाशयोरिति हैमः ॥

(तत्व० -) धिषणेति बुद्धौ । गुरौ तु पुंवत् ।

मू०- पृषदादयः ॥ पृषु सेचने । पृषत् । पृषन्ति । बृह उद्यमे । बृहत् । महान् । जगत् । विपूर्वोहनः ॥ वेहत् ।

(सुबोधिनी-) पृषदादयः । अतृप्रत्ययांता निपात्यंते वर्त्तमानेऽर्थे । अतृप्रत्ययमाह । ऋदित्वात् पुंसि त्रितोनुमिति नुम् । स्त्रियां तु ङ्वितइतीप् । पृषु सेचने । निपातनात् गुणाभावः । पृषत् । पृषन्ति । बिंदुवाची पृषच्छब्दो नपुंसकमिति ध्वननाय बहुवचनांतमुदाहृतं । पृषन्मृगे पुमान् बिंदौ नद्वयोः पृषतोऽपिचेति मेदिनी । बृह वृद्धौ । बृहत् । विपुलं । बृहती क्षुद्रवार्तिक्यां कंटकार्य्यां च वाचि चेति त्रिश्वः । मह पूजायां । महान् । महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्वभेदे पुमान् श्रेष्ठे वाच्यवदिति विश्वः । विश्वावसोस्तु बृहती तुंबरोश्च कलावती । महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपीति वैजयंती । अवेक्षमाणं महतीं मुहुर्मुहुरिति माघः । हन हिंसागत्योः। विपूर्वाद्धंतेरत् प्रत्ययो धातोष्टिलोपश्च निपातनात् । उपसर्गेकारस्यैत्वं च । विहंति गर्भमिति वेहत् । वेहद्गर्भोपघातिनीत्यमरः ॥

मू०- नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृभ्रातृजामातृमातृपितृदुहितृएतेनिपात्यंतेतृप्रत्ययान्ताः ॥ नपतन्त्यनेनेति नप्ता । नेष्टा । त्वेषयतीति त्वष्टा । क्षद भक्षणे । क्षत्ता । होता । पोता । प्रशास्ता । भ्राता । जायाम्मातीति जामाता । मान पूजायाम् । माता । पातीति पिता । दुहिता । कन्या

(सुबोधिनी-) नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृभ्रातृजामातृमातृपितृदुहितृएते निपात्यंतेतृप्रत्ययांताः । पत्लृपतने । तृप्रत्ययमाह । नञः प्रकृतिभावो धातोष्टेर्लो

पश्च निपातनात्। सेराइत्यात्वं। नप्ता पौत्रो दौहित्रश्च। णीञ् प्रापणे। नयतेः पुक् गुणश्च निपातनात् इत्वंनेष्टा। त्विष् दीप्तौ। धातोरितोऽत् निपातनात्। त्वष्टा त्वष्टा पुमान् देवशिल्पितक्ष्णोरादित्यवाच्यपीति मेदिनी। हु दानादनयोः। होता। पूञ् पवने। पोता। भ्राजृ दीप्तौ। भ्राजतेर्जलोपो निपातनात्। भ्राता। मा माने। जायां मातीतिजायायाजादेशो निपातनात्। जामाता। मान पूजायां नस्य लोपो निपातनात्। माता। पा रक्षणे। पातेराकारस्येत्वं च निपात्यते। पिता। दुह प्रपूरणे। दुहेस्तृप्रत्ययस्येट् गुणाभावश्च निपातनात्। दुहिता। क्षद शकलीकरणे भक्षणे च अनुदात्तेतः। क्षत्ता। क्षत्तास्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे इति विश्वः॥

मू०— सावसेर्ऋः ॥ स्वसा।

(सुबोधिनी—) सावसेर्ऋः। सु उपपदे असु क्षेपणे इत्यस्माद्दप्रत्ययः स्यात्। ऋ प्रत्ययमाह। स्वसा भगिनी ॥

मू०— यतेर्वृद्धिश्च ॥ याता।

(सुबोधिनी) यतेर्वृद्धिश्च। यतीप्रयत्ने ऽस्माद्दः स्यात् वृद्धिश्च। याता। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परमित्यमरः ॥

मू०— नञिनन्देश्च॥ ननांदतीति ननांदा ननंदेत्येके।

(सुबोधिनी—) नञिनंदेश्च। ऋः स्याद्वृद्धिश्च। टुणदि समृद्धौ। ननंदतीति कृतायामपि सेवायां रुष्यतीत्यर्थः। ननन्दा ननान्दा। वृद्धिर्वानुवर्तते इत्येके। ननान्दातु स्वसा पत्युर्ननन्दानंदनी च सेति शब्दार्णवः। उषा पूषा ननान्दाच ननन्दाच प्रकीर्तितेतिविश्वः ॥

मू०· दिवेर्ऋः ॥ देवा। देवरौ।

(सुबोधिनी—) दिवेर्ऋः। दिवु क्रीडादौ। देवा। स्वामिनौ देवृदेवरावित्यमरः ॥

मू०— नयतेर्डिच्च ॥ ना। नरौ। नरः।

(सुबोधिनी—) नयतेर्डिच्च। ऋप्रत्ययमाह। डित्त्वाट्टिलोपः। णीञ् प्रापणे। ना। स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नर इत्यमरः ॥

मू०— अर्त्यादेरनिः ॥ अरणिः। सरणिः तरणिः। धमनिः अशनिः। अवनिः। रजनिः।

(सुबोधिनी—) अर्त्यादेरनिः। अनिप्रत्ययमाह। ऋ गतौ। अरणिः। अरणिर्वन्हिमंथे ना द्वयोर्निर्मथ्यदारुणीति मेदिनी। सृ गतौ। सरणिः। सरणिः श्रेणिवर्त्मनोरिति दंत्यादौ रभसः। शृ हिंसायां। ततोऽनिः शरणिरित्येके। धृञ धारणे धरणिः भूमिः। धमिः सौत्रः। धमनिः सिरा। अश भोजने। अश्यते भुज्यते राज्यमिंद्रेणानयेति अशनिः। अशनिः स्त्रीपुंसयोः स्याच्चंचलायां पवावपीति मेदिनी।

अव रक्षणादौ । अवनिः । पृथिवी । तॄ प्लवनसंतरणयोः तरणिर्द्युमणौ पुंसि कुमारी नौकयोः स्त्रियामिति मेदिनी । कुमारी लताविशेषः । तरणी रामतरणी कर्णिका चारुकेसरा । सहाकुमारी गंधाढ्येति धन्वंतरिर्निघंटुः । रंज रागे नलोपो निपातनात् । रजनिः । कृतीकारादितीपि रजनी । रजनी हास्तिनीरात्रिहरिद्राजतुकासु चेति मेदिनी ॥

मू०— अर्च्यादेरिस् ॥ अर्चिः । अर्चिषि । रोचिः । शोचिः । छदिः । हविः । सर्पिः ।

(सुबोधिनी—) अर्च्यादेरिस् । इस्प्रत्ययमाह । अर्च पूजायां । अर्चिः । ज्वालाभासोर्नपुंस्यार्चिरिति सांतेष्वमरः । ज्यंतादर्चेरिप्रत्यये अर्चिर्हेतिः शिखास्त्रियामित्यमरः । शुच शोके । शोचिः । रोचिः । रोचिः शोचिरुभे क्लीबे इत्यमरः । हुदानादनयोः हविः । घृतं । सृप्लृ गतौ । सर्पिः । आज्यं ॥ छदिः पटलम् छ

(तत्त्व०—) अर्चादेरिति । आर्चिर्ज्वाला । इदंतोपि । शोचिर्दीप्तिः ।

मू०—द्युतेरादेर्ज्जः ॥ ज्योतिः ।

(सुबोधिनी--) द्युतेरादेर्जः । इत् स्यात् दस्य जश्च । द्युत दीप्तौ । ज्योतिः । ज्योतिरग्नौ दिवाकरे । पुमान् नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोरिति मेदिनी ॥

मू०— बृंहेर्नलोपश्च ॥ बर्हिः ।

(सुबोधिनी—) बृंहेर्नलोपश्च । बृह वृद्धौअस्मादिस्प्रत्ययः स्यान्नकारस्य लोपश्च । बर्हिः । बर्हिः स्यात्कुशशुष्मणोरित्यमरः ॥

मू०— जनादेरुस् ॥ जनुः । ॠ अरुः । चक्षेश्शित् । चक्षुः । वपू वपुः । यजू यजुः ।

(सुबोधिनी--) जनादेरुस् । उस्प्रत्ययमाह । जनी प्रादुर्भावे । जनुः । जनुर्जननजन्मानीत्यमरः । ॠ गतौ । अरुः । व्रणोस्त्रियामीर्ममरुः क्लीबे इत्यमरः । पॄ पालनपूरणयोः । परुः । ग्रंथिर्नापर्वपरुषी इत्यमरः । डुवपू बीजतंतुसंताने । वपुः । वपुः क्लीबं तनौ शस्ताकृतावपीति मेदिनी । शस्ताकृतिः । प्रशस्ताकृतिरित्यर्थः । यज देवपूजादौ । यजुर्वेदः ॥

(तत्त्व०--) जनादेरिति । जनुर्जननं परुर्ग्रंथिः । गाँठि

मू०-एतेर्णित ॥ आयुः ।

(सुबो०—) एतेर्णित । इण् गतावित्यस्मात् णुस प्रत्ययः स्यात् । णित्त्वाद्वृद्धिः । वृद्धौ कृतायामायादेशः । आयुः । आयुषी । इति उणादौ द्वितीयः पादः ॥

मू०— धीवरादयःष्वरप्रत्ययान्तानिपात्यंते ॥ धीवरः । । शर्वरी । निषद्वरः । पीवरः ।

(सुबोधिनी-) धीवरादयःष्वरप्रत्ययांता निपात्यंते । ष्वरप्रत्ययमाह । षित्वात् ङीप्रतइतीप् । डुधाञ् धारणादौ । इत्वं निपातनात् । धीवरः । कैवर्त्ते दाशधीवरावित्यमरः । शॄहिंसायां । शर्वरी । शर्वरी यामिनी स्त्रियोरिति मेदिनी । षद्लृ विशरणादौ निषद्वरः । निषद्वरः स्मरे पंके निशायां तु निषद्वरीति मेदिनी । पा पाने । ईत्वं निपात्यते । पीवरः । अन्ये तु पीव स्थौल्ये अस्मात् ष्वरप्रत्यये यवयोर्वसेहकारेचेति वलोपे पीवर इत्याहुः । पीवरः कच्छपे स्थूले इति मेदिनी ॥

(तत्त्व०-) धीवरादय इति । शर्वरीरात्री । निषिद्वरस्तु जम्बालः निषद्वरी रात्रिः ।

मू०- इणादेर्नक् ॥ इनः । जिनः।दीनः । कृष्णः ।

(सुबोधिनी-) इणादेर्नक् । नक्प्रत्ययमाह । कित्वान्न गुणः । इण् गतौ । इनः । इनः पत्यौ नृपार्कयोरिति मेदिनी । जि जये । जिनः । जिनोऽर्हति च बुद्धे च पुंसि-स्यात्त्रिषु जित्वरे इति मेदिनी । दीङ् क्षये।दीनः । दीना मूषिकयोषायां दुर्गते कातरेन्यवदिति विश्वः । कृष् विलेखने । कृष्णः । कृष्णः सत्यवतीपुत्र केशवे वायसेर्जुने । कृष्णा स्याद्द्रौपदी नीली कणाद्राक्षासु योषिति । वर्णके वाच्यलिंगः स्यात् क्लीबे मरिचलोहयोरिति मेदिनी ॥

(तत्त्वदीपिका-) इणादेरिति । इनः सूर्य्येनृपेपत्यौ ।

मू०- बंधेर्ब्रधबुधौच ॥ ब्रध्नः । बुध्नः ।

(सुबोधिनी-) बंधेर्ब्रधबुधौच । बंध बंधने । अस्मात् नक् स्यात् । धातोः स्थाने एतावादेशौ च स्यातां । बध्नः । बुध्नः । भास्कराहस्करब्रध्नप्रभाकरदिवाकराइत्यमरः । बुध्नो नामूलरुद्रयोरिति मेदिनी ॥ ब्रोह

मू०- धादेर्नः ॥ धानाः । पर्णम् । वस्नः । श्रोणः ।

(सुबोधिनी-) धादेर्नः॥ नप्रत्ययमाह । डुधाञ् धारणादौ । धाना भ्रष्टयवे स्त्रियां इत्यमरः । धाना भ्रष्टयवे शक्तौ धान्याके ऽभिनवोद्भिदीति विश्वः । पॄ पालनादौ । पर्णं । पर्णं पत्रे किंशुके नेति मेदिनी । वस निवासे । वस्नः । वस्नो मूल्ये वेतने चेति विश्वः । वस्नस्त्वविक्रये पुंसि वेतने स्यान्नपुंसकमिति मेदिनी । अविक्रये मूल्ये इत्यर्थः । श्रु श्रवणे श्रोणः । पंगुः ॥

(तत्त्व०-) धादेरिति । धानाभ्रष्टयवाः स्त्रियः । मूल्यवेतनयोर्वस्नः । श्रोणःपंगुः ।

मू०- लक्षेर्न्नस्याण्मटौ ॥ लक्षणः । लक्ष्मणः ।

(सुबोधिनी-) लक्षेर्नस्याण्मटौ । लक्ष दर्शनांकनयोः । अस्माच्चुरादिण्यंतात् न स्यात्प्रत्ययस्याइमटागमौ च स्यातां । लक्षणं लक्ष्मणः । लक्षणा हंसयोषायां सारसस्य च लक्ष्मणेति । लक्षणं नाम्नि चिन्हे स्यात् सौमित्रिरपि लक्ष्मणः । लक्ष्मणा चौषधावपि रामभ्रातरि लक्ष्मण इति विश्वः। लक्षणं नाम्नि चिन्हे स्यात् सारस्यां लक्ष-

णा क्वचित् । लक्ष्मणा त्वौषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात् सश्रीके चाभिधेयवदिति मेदिनी ॥

(तत्त्व०-) लक्षणं लक्ष्मणं नाम्नि चिह्ने च । द्वयं रामभ्रातरि च । लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा ।

मू०-- रास्नादयः ॥ रासृ शब्दे । रास्ना । सास्ना । स्थूणा । वीणा । कृती कृत्स्नम् । तिज तीक्ष्णम् । श्लिषेः श्लक्ष्णम् ।

(सुबोधिनी-) रास्नादयः । नक् प्रत्ययांता निपात्यंते । रस आस्वादने उपधाया दीर्घो निपातनात् । रास्ना । रास्ना तु स्याद्भुजंगाख्यामेलापर्ण्यामपि स्त्रियामिति मेदिनी । षसू स्वप्ने । उपधाया दीर्घो निपातनात् । सास्ना । सास्ना तु गलकंबल इति मेदिनी। ष्ठा गतिनिवृत्तौ । ऊत्वं णत्वं च निपात्यते। स्थूणा। स्थूणा स्यात् सूर्म्यां स्तंभे गृहस्य चेति मेदिनी। सूर्मी लोहप्रतिमा । वी गत्यादिषु णत्वं निपातनात् । वीणा । वीणा विद्युति वल्लक्यामिति मेदिनी। कृती छेदने । वक्ष्यमाणेभ्यः क्स्न प्रत्ययो निपातनात् । कृत्स्नं । तिज निशाने । धातोर्दीर्घो निपातनात् । चोःकुरिति गः खसेचपाझसानामिति कः । षत्वणत्वे । तीक्ष्णं।तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके।क्लीबं पवाग्रके पुंसि तिग्मात्मत्यागिनोस्त्रिष्विति मेदिनी । श्लिष आलिंगने । श्लिषेरिकारस्यात्वं निपातनात् । षढोरिति कत्वं श्लक्ष्णम् ॥

(तत्त्व०--) रास्नादयः । रास्ना गंधद्रव्यं । सास्नागोगलकम्बलः । स्थूणा गृहस्तंभः ।

मू०-- मनादेर्य्युः ॥ मन्युः । दस्युः । जन्युः ।

(सुबोधिनी-) मनादेर्युः । युप्रत्ययमाह । मन ज्ञाने । निपातनान्न युवोरित्यनादेशः । मन्युः । मन्युर्दैन्ये क्रतौ क्रुधि । दसु उपक्षये । दस्युः । दस्युश्चौरे रिपौ पुंसीति मेदिनी। जनी प्रादुर्भावे। जन्युः। अथ जन्युः स्यात्प्राण्यग्निधातृष्विति मेदिनी॥

(तत्त्व०--) मनादेरिति । मन्युर्दैन्ये क्रतौ क्रुधि । दस्युश्चोरः । जन्युर्देही ।

मू०- मृङस्त्युक् ॥ मृत्युः ।

(सुबोधिनी-) मृङस्त्युक् । त्युक् प्रत्ययमाह । कित्त्वान्न गुणः । मृङ् प्राणत्यागे मृत्युः मृत्युर्ना मरणे यमे इति मेदिनी ॥

मू०- सर्तेरय्वयू ॥ सरयुः । सरयूः ।

(सुबोधिनी-) सर्त्तेरय्वयू । अयुअयूप्रत्ययावाह । सृ गतौ सरयुसरयूः नदी ॥

मू०- पादेःपः ॥ पापम् ।

(सुबोधिनी-) पादेःपः । पप्रत्ययमाह । पा रक्षणे । पाति रक्षति धर्मादात्मानमिति पापं ॥

मू०- न्यादेःकित ॥ नीपः । सूपः । कूङ् शब्दे कूपः ।

(सुबोधिनी-) न्यादेः कित् । पक्प्रत्ययमाह । णीञ् प्रापणे । नीपः । 'नीपः कदंबबंधूकनीलाशोकद्रुमेपि चेति मेदिनी' । षुञ् अभिषवे । बाहुलकाद्दीर्घः सूपः । 'सूपो व्यञ्जनसूदयोरिति मेदिनी' । कु शब्दे बाहुलकाद्दीर्घः । कुवन्ति मंडूका अस्मिन्निति कूपः ।

मू०- शिल्पादयः ॥ शील शिल्पम् । शसु शष्पम् । बाधृ बाष्पम् । रु रूपम् । शु शूर्पं ।

(सुबोधिनी-) शिल्पादयः । यक्प्रत्ययांता निपात्यंते । शील समाधौ । ह्रस्वो निपातनात् । शिल्पं । कौशलम् । शसु हिंसायाम् निपातमात्षत्वं । शष्पः । 'शष्पं बालतृणेपि च पुंसि स्यात् प्रतिभाहीने इति मेदिनी । शष्पं बालतृणं घास इत्यमरः' । बाधृ विलोडने । धस्य षत्वं निपातनात् बाष्पः । बाष्पो नेत्रजलोष्मणोरिति विश्वः । बाष्पमूष्मणि चाश्रुणीति च रुशब्दे । दीर्घत्वं निपातनात् । रूपं । 'रूपं स्वभावे सौंदर्ये' इति विश्वः । शॄ हिंसायां निपातनादुर् । ध्वोर्विहसे इति दीर्घः । शूर्पं । 'प्रस्फोटनंशूर्पमस्त्रीत्यमरः ॥

(तत्त्व०--) शिल्पादयइति । शिल्पंकौशलं । शष्पंबालतृणं । प्रतिभाक्षयश्च । बाष्पमिति । अस्त्री नेत्रजलोष्मणोः । रूपं स्वभावे सौंदर्ये ।

मू०- स्तनादेर्ण्यन्तादित्नुः ॥ स्तनयित्नुः । गदयित्नुः ।

(सुबोधिनी-) स्तनादेर्ण्यंतादित्नुः । इत्नुप्रत्ययमाह स्तन गद देवशब्दे । चुरादी ण्यंतौ । गुणे कृते अयादेशः । स्तनयित्नुः'स्तनयित्नुः पुमान् वारिधरेपि स्तनितेपि चेति मेदिनी । स्तनयित्नुः पयोवाहे तद्वृत्तौ मृगरोगयोरिति विश्वः' । गदयित्नुः 'गदयित्नुः पुमान् कामे जल्पाके कार्मुके पिचेति विश्वः' ॥

(तत्त्व०-) स्तनादेरिति स्तनयित्नुः ञेरलोपः ।

मू०- दाभाभ्यां नुः ॥ दानुः । भानुः ।

(सुबोधिनी-) दाभाभ्यांनुः । नुप्रत्ययमाह । डुदाञ् दाने । दानुः । 'दानुर्दातरि विक्रांते' इति मेदिनी । भा दीप्तौ । भानुः । 'भानूरश्मिदिवाकरावित्यमरः' ॥

मू०- धेटइच्च ॥ धेनुः ।

(सुबोधिनी-) धेटइच्च । नुः स्यात् । धातोरित्वं च । धेट् पाने । संध्यक्षराणामित्यात्वे कृते इत्वं ततो गुणः । धेनुः । 'धेनुः स्यान्नवसूतिके'त्यमरः ॥

मू०- सुवः किच्च ॥ सूनुः ।

(सुबोधिनी-) सुवः किच्च । नुक् स्यात् । कित्वान्न गुणः । षूङ् प्राणिप्रसवे । सूनु, सूनुः पुत्रेऽनुजे रवाविति विश्वः ॥

(तत्त्व०-) सूनुरिति । पुत्रेऽनुजेरवौ ।

मू०-- अजिवृभ्यांणुः ॥ वेणुः । वर्णुः ।

(सुबोधिनी-) अजिवृभ्यांणुः । णुप्रत्ययमाह । अज गतौ । अजेर्वीति वीः । वेणुः । 'वेणुर्नृपांतरे वंशे' इति विश्वः । वृङ् संभक्तौ । वर्णुः । नददेशभेदयोः ॥

मू०--स्थारीभ्यांणुः ॥ स्थाणुः । रेणुः ।

(सुबोधिनी-) स्थारीभ्यांणुः । ष्ठा गतिनिवृत्तौ । स्थाणुः । 'स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे इति मेदिनी । स्थाणुः कीले स्थिरे इति विश्वः' । री गतिरेषणयोः रेणुः । 'रेणुः स्त्री पुंसयोर्धूलौ पुल्लिंगः पर्पटे पुनरिति मेदिनी । रेणुर्द्वयोः स्त्रियां धूलिरित्यमरः' ॥

(तत्त्व०-) स्थाणुरिति । कीलेस्थिरेहरे । रेणुर्द्वयोः स्त्रियांधूलिः ।

मू०-- विषेःकित् ॥ विष्णुः ।

(सुबोधिनी-) विषेःकित् । णुक् प्रत्ययमाह । कित्त्वान्न गुणः । विष्लृ व्याप्तौ । विष्णुर्नारायणः कृष्ण इत्यमरः' ॥

मू०-- कादेःकः ॥ कर्कः । राका । अर्कः । कल्कः । इण् एकः । भेकः । काकः । पाकः । निहाकः ।

(सुबोधिनी-) कादेःकः । कप्रत्ययमाह । बाहुलकान्न कस्येत्संज्ञा डुकृञ् करणे । कर्कः । 'कर्कः कर्के तनौ बह्नौ शुक्लाश्वे दर्पणे घटे' इति विश्वः । रा दाने । 'राका । 'राका नद्यंतरे कछ्वौ नवजातरजः स्त्रियां । संपूर्णेन्दुथाविति मेदिनी राका तु सरिदंतरे । राका नवरजःकन्या पूर्णेन्दुःपूर्णिमापिचेति विश्वः' । अर्च पूजायां । चोःकुरिति कः अर्कः । 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे बृहस्पताविति विश्वः' । कल गतौ । कल्कः । 'कल्कोऽस्त्री घनतैलादिशेषे दंभेबिभीतके । विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनरिति मेदिनी । कल्कः पापशये पापे दंभे विट्किट्टयोरपीति विश्वः' इण् गतौ । एकः । 'एकः संख्यांतरे श्रेष्ठे केवलेतरयोस्त्रिष्विति मेदिनी । एके मुख्याऽन्यकेवला इति विश्वः' । ञिभी भये । भेकः । भेको मंडूकमेषयोरिति विश्वः' । कै शब्दे काकः । 'काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि । शिरोऽवक्षालने मानप्रभेदद्वीपभेदयोः । काका स्यात्काकनासायां काकोलीकाकजंघयोः । रक्तिकायां मलय्वां च काकमाच्यां च योषिति । काकं सुरतबंधे स्यात् काकानामपि संहताविति मेदिनी' । मलयूः काकोदुंबरिका । पा पाने पाकः । पाकः परिणतौ शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेपि चेति मेदिनी' । ओहाक् त्यागे । निहाका । 'निहाका गोधिका समे इत्यमरः' ॥

(तत्त्व०-)कादेरिति । कर्कोधवलघोटकाः । राकापूर्णिमातिथिः । कल्कः पापाशये पापे दंभे विट्किट्टयोरपि । एकेमुख्यान्यकेवलाः । भेको मंडूकमेषयोः । पाकःशिशुः । निहाकागोधिकासमे ।

मू०- नौसदेर्डित् ॥ निष्कः।

(सुबोधिनी--) नौसदेर्डित् । कइ प्रत्ययमाह । डित्त्वाट्टिलोपः । षद्लृ विशरणादौ निष्कः 'निष्कोऽस्त्री हेम्नि तत्पले' इति विश्वः ॥

(तत्त्व०-) निःष्कोस्त्री हेम्नि तत्पले।

मू०- शकेरुनउन्तउन्तिउनिप्रत्ययाः ॥ शकुनः । शकुन्तः । शकुन्तिः । शकुनिः ।

(सुबोधिनी--) शकेःउनउंतउंतिउनिप्रत्ययाः । उन उंत उंति उनिप्रत्ययानाह । शक्लृ शक्तौ । शकुनः । शकुंतः । शकुंतिः । शकुनिः । 'शकुंतिपक्षिशकुनिशकुंतशकुनद्विजा इत्यमरः । शकुनस्तु पुमान् पक्षि मात्रपक्षिविशेषयोः । शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी । शकुंतः कीटभेदे स्यात् भासपक्षिविहंगयोरिति मेदिनी।

मू०- हृशाभ्यामितः ॥ हरितः । श्येतः ।

(सुबोधिनी-) हृशाभ्यामितः । इत प्रत्ययमाह । हृञ् हरणे । हरितः । 'हरिता स्त्री च दुर्वायां हरिद्वर्णयुतेन्यवदिति मेदिनी' । श्यैङ् गतौ श्येतः । 'शुक्लशुभ्रशचिश्वेतविशदश्येतपांडुरा इत्यमरः' ॥

मू०-- रुहेरस्यलोवा ॥ रोहितः । लोहितम् ।

(सुबोधिनी-) रुहेरस्यलोवा । अस्मादितः स्यात् रस्य वा लकारः । रुह बीजजन्मनि रोहितः । लोहितः । 'रोहितं कुंकुमे रक्ते ऋजुशक्रशरासने । पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे इति मेदिनी । लोहितं रक्तगोशीर्षकुंकुमाजिकुचंदने । पुमान्नदांतरे भौमे वर्णे च त्रिषु तद्वतीति मेदिनी' ॥

मू०- श्वादेराप्यः ॥ श्रवाप्यः । स्पृहयाप्यः ।

(सुबोधिनी-) श्वादेराप्यः । आप्यप्रत्ययमाह । श्रु श्रवणे । श्रवाप्यः । श्रवाप्यो यज्ञपशुः । स्पृह ईप्सायां । चुरादिरदंतः । स्पृहयाप्यः ॥

(तत्त्व०-) श्वादेरिति । श्रवाप्यो यज्ञपशुः ।

मू०- वृञएण्यः ॥ वरेण्यः ।

(सुबोधिनी-) वृञएण्यः । एण्यप्रत्ययमाह । वृञ् वरणे वरेण्यः । श्रेष्ठः ॥

मू०-- अर्तेरन्यः ॥ अरण्यम् । पृषु सेचने । पृषेश्च षस्यजः । पर्जन्यः ।

(सुबोधिनी-) अर्त्तेरन्यः । अन्यप्रत्ययमाह । ऋ गतौ । अरण्यम् 'अटव्यरण्यं विपिनमित्यमरः' । पृषु सेचने । षस्य जः अन्यश्च स्यात् पर्जन्यः । 'पर्जन्यो मेघशब्दे पि ध्वनदंबुदशक्रयोरिति मेदिनी' ॥

(तत्त्व०-) पर्जन्यइति। पर्जन्यः। शक्रमेघयोः।

सू०- वदेरान्यः॥ वदान्यः।

(सुबोधिनी-) वदेरान्यः। आन्यप्रत्ययमाह। वद व्यक्तायांवाचि। वदान्यः। वदान्यस्त्यागिवाग्मिनोरित्यजयकोशः'।

(तत्त्वदी०-) वदेरिति। वदान्यस्त्यागिवाग्मिनोः।

सू०- अमादेरत्रः॥ अमत्रम्। नक्षत्रम्। पतत्रम्। कलत्रम्। वरत्रा।

(सुबोधिनी-) अमादेरत्रः। अत्रप्रत्ययमाह। अम गत्यादौ। अमत्रं भाजनं। नक्ष गतौ। नक्षत्रं। नञः प्रकृतिभावे नक्षत्रमिति साधितं तत्तुव्युत्पत्त्यंतरं। पत्लृ पतने। पतत्रं। तनूरुहं। गड सेचने। गडेरादेश्च कः। कडत्रं। डलयोरेकत्वस्मरणात् कलत्रं। 'कलत्रं श्रोणिभार्ययोरित्यमरः'। वृञ् वरणे। वरत्रा। 'नध्री वध्री वरत्रा चेत्यमरः'। चर्ममयी रज्जुरित्यर्थः॥ पतत्री पक्षिणा

(तत्त्व०-) अमादेरिति अमत्रं भाजनं पतत्रं तनूरुहं। वरत्रा धर्ममयी रज्जुः।

सू०- भ्रादेरतः॥ भरतः। पर्व पूर्तौ। पर्वतः।

(सुबोधिनी-) भ्रादेरतः। अतप्रत्ययमाह। भृञ् भरणे भरतः 'भरतः शबरे नटे। क्षेत्रे रामानुजे शास्त्रे दौष्यंतावृषभात्मजे। तंतुवाये इति हेमचंद्रः। भरतो ना नाट्यशास्त्रे शंबरे च मुनौ नटे। रामानुजे च दौष्यंताविति मेदिनी'। पर्व पूरणे। पर्वतः। पर्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः। देवमुन्यंतरे शैले इति मेदिनी'॥

सू०- पृषिरञ्जिभ्यांकित्॥ पृषतः। रजतम्।

(सुबोधिनी-) पृषिरंजिभ्यांकित्। किप्रत्ययमाह। कित्त्वान्न गुणः। पृषु सेचने। पृषतः। पृषत्मृगे पुमान् बिंदौ न द्वयोः पृषतोपि ना। अनयोश्च त्रिषु श्वेतबिंदुयुक्तेप्युभाविमाविति मेदिनी'। रंज रागे। नोलोप इति नलोपः। रजतं। 'रजतं त्रिषु शुक्ले स्यात् क्लीबे हारे च दुर्वने' इति मेदिनी॥

(तत्त्व०-) पृषि पृषतो। बिंदुमृगयोः।

सू०-शपादेरथः॥शपथः। शमथः। दमथः।वस आवसथः। सम्वसथः।

(सुबोधिनी-) शपादेरथः। अथप्रत्ययमाह। शप आक्रोशे शपथः। शमु दमु उपशमे। शमथः दमथः शमथः शांतिर्मंत्रिणोरिति मेदिनी। दमथस्तु पुमान् दंडे दमे च परिकीर्तित इति मेदिनी। शमथस्तु शमः शांतिर्दांतिस्तु दमथो दम इत्यमरः' वस निवासे। आवसथो गृहं। संवसथो ग्रामः॥

(तत्त्व०-) शपादेरिति। शपथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः।

सू०- रभादेरसः॥ रभसः।

(सुबोधिनी-)रभादेरसः।असप्रत्ययमाह।रभ राभस्ये रभसः । 'रभसो वेगहर्षयोः॥

मू०- वेञआत्वाभावस्तुट्च ॥ वेतसः ।

(सुबोधिनी-) वेञआत्वाभावस्तुट्च । वेञ् तंतुसंताने । अस्मात्सप्रत्यये परे आत्वाभावः प्रत्ययस्य तुडागमश्च स्यात् । वेतसः ॥

मू०- दिवेः कित् ॥ दिवु दिवसः ।

(सुबो०-) दिवेः कित् । कसप्रत्ययमाह । कित्त्वान्नगुणः । दिवु क्रीडादौ । दिवसः । ' वा तु क्लीबे दिवसवासरावित्यमरः ' ॥

मू०- कादेरभः ॥ कॄ करभः । शॄ शरभः । शल गतौ । शलभः । कलगतौ । कलभः । गर्द कुत्सिते शब्दे । गर्दभः ।

(सुबोधिनी-) कादेरभः । अभप्रत्ययमाह । कॄ विक्षेपे । करभः । 'करभो मणिबंधादिकनिष्ठांतोष्ट्रतत्सुते इति मेदिनी । मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः ' शॄ हिंसायां । शरभः । ' शरभस्तु पशौ सिंहे करभे वानरे भिध्यतीति मेदिनी शल गतौ । शलभः समौ । पतंगशलभावित्यमरः । कल गतौ । कलभः । 'कलभः करिपोतके ' । गर्द शब्दे । गर्दभः । ' गर्दभः श्वेतकुमुदे गदे भोगधाभिद्यापि । रासभे गर्दभांडे च क्षुद्रजंतुरोगप्रभेदयोरिति मेदिनी ' ॥

मू०- ऋषिवृषिभ्यांकित् ॥ ऋषभः । वृषभः ।

(सुबो०-)ऋषिवृषिभ्यांकित् । कभप्रत्ययमाह । कित्त्वान्नगुणः। ऋषी गतौ ऋषभः 'ऋषभः स्यादादिजिने वृषभे भेषजे स्वरे । कर्णरंध्रे कोलपुच्छे श्रेष्ठे चाप्युत्तरेस्थितः । ऋषभी शूकशिम्ब्यां स्यात् पुरुषाकारयोषिति । विधवायां शिरालायामिति हेमचंद्रः । ऋषभस्त्वौषधांतरे । स्वरवृषभयोः कर्णरंध्रे गर्दभपुच्छयोः । उत्तरस्थः स्मृतः श्रेष्ठे स्त्रीनराकारयोषिति । शूकशिम्ब्यां शिरालायां विधवायां कचिन्मतेति मेदिनी वृषु सेचने । वृषभः । ' वृषभः श्रेष्ठवृषयोः ' ॥

मू०- रासवल्लिभ्यांच ॥ रासृ शब्दे । रासभः । वल वल्ल सम्वरणे । वल्लभः ।

(सुबोधिनी-) रासवल्लिभ्यांच । कभः स्यात् । रासृ शब्दे । रासभः । वल्ल संवरणे । वल्लभः । ' वल्लभो दयिते ऽध्यक्षे सलक्षणतुरंगमे ' इति मेदिनी ॥

मू० - विशादेरन्तः ॥ वेशन्तः । वसन्तः । जयन्तः ।

(सुबोधिनी-) विशादेरंतः । अंतप्रत्ययमाह । विश प्रवेशने । वेशंतः । ' वेशंतः पल्वलं चाल्पसर ' इत्यमरः । वस निवासे । वसंतः ऋतुः । जि जये । जयंतः । जयंतः पाकशासनिरित्यमरः ' ॥

(तत्त्व०-) विशादेरिति । वेशन्तःपल्वलं । जयन्तः शक्रपुत्रः ।

मू०— हन्तेर्हिमुट्च ॥ हेमन्तः ।

(सुबोधिनी—) हंतेर्हिमुट्च । हन हिंसागत्योः । अस्यहिरादेशोंतप्रत्ययश्च प्रत्ययस्य मुडागमश्च स्यात् । हेमंतः । बाहुलकादन्येभ्योप्यंतः । अर्ह पूजायां । अर्हंतः 'अर्हंतः क्षपणको जिन इति विक्रमादित्यकोशः'

मू०— अर्त्यादेररः ॥ अररम् । भ्रमरः । चमरः । देवरः । वासृ । शब्दे । वासरः ।

(सुबोधिनी—) अर्त्यादेररः । अरप्रत्ययमाह । ऋ गतौ । अररम् । 'अररं छदकपाटयोरिति मेदिनी । कपाटमररं तुल्ये इत्यमरः' । भ्रमुअनवस्थाने । भ्रमरः । 'भ्रमरः कामुके भृंगे' इति मेदिनी । चमु अदने । चमरः 'चमरं चामरे स्त्री तु मंजरीमृगभेदयोरिति मेदिनी' दिवु क्रीडादौ । ण्यंता । देवयतीति देवरः। पत्युः कनिष्ठभ्राता । वस निवासे । ण्यंताः । वासयतीति वासरो दिवसः ॥

(तत्त्व०—) अर्त्यादेरिति । अररंकपाटं ।

मू०— कुवःकित् ॥ कुररः । ष्टच

(सुबोधिनी—) कुवःकित् । करप्रत्ययमाह कित्त्वान्न गुणः । कु शब्दे । कुररः । 'उत्क्रोशकुररौ समावित्यमरः' ॥

मू०— अंग्यादेरारः ॥ अंगारः । मन्दारः ।

(सुबोधिनी—) अंग्यादेरारः । आरप्रत्ययमाह । अगि गतौ । अंगारः । 'अंगारमुल्मुके न स्त्री पुल्लिंगस्तु महीसुते इति मेदिनी' । मदि स्तुत्यादौ । मंदारः । बाहुलकादारुप्रत्ययोपि मंदारुः । 'पारिभद्रे तु मंदारुर्मंदारः पारिजातके इति शब्दार्णवः । मंदारुः स्यात्सुरद्रुमे । पारिभद्रे ऽर्कपर्णे चेति विश्वः' ॥

मू०— गडेःकड्च ॥ गडआसेचने । कडारः ।

(सुबोधिनी—) गडेःकड्च । गडि वदनैकदेशे गड सेचने वा । अस्य कडादेशः आरप्रत्ययश्च स्यात् । कडारः 'कडारः कपिलः पिंगइ'त्यमरः । 'कडारः कपिले दासे' इति मेदिनी ॥

मू०— शृंगारादयः ॥ शृंगारः । भृंगारः । मृजूष मार्ज्जारः । कमुकुमारः । तुषारः । कासारः ।

(सुबोधिनी—) शृंगारदयः । आरप्रत्ययांता निपात्यते । शॄ हिंसायां । नुम् गुक् ह्रस्वश्च निपात्यते । शृंगारः । 'शृंगारः सुरते नाटचरसे च गजमण्डने । नपुंसकं लवंगेपि नागसंभवचूर्णयोरिति मेदिनी' । भृञ् भरणे । नुम् गुक् ह्रस्वश्च निपात्यते । भृंगारः । 'भृंगारः कनकालुका । भृंगारी झिल्लिकायां स्यात् कनकालौ पुनः पुमान्' इति च । मृजूष् शुद्धौ । मृजेर्वृद्धिरिति वृद्धिः मार्ज्जारः । 'ओतुर्बिडालो

मार्ज्जार इत्यमरः॥ मार्ज्जारि ओतौ खट्वांगे, इति मेदिनी। कमु कांतौ उपधाया उत्वं गुणाभावश्च निपातनात्। कुमारः। 'कुमारः स्यात् शके स्कंदे युवराजेऽश्ववारके। बालके वरुणाद्रौ ना नद्वयोर्जात्यकांचने। कुमारी शैलतनया वनमाल्योर्नदीभिदि। सहाऽपराजिताकन्याजंबुद्वीपेषु च स्त्रियामिति मेदिनी' तुष् तुष्टौ। तुषारः। 'तुषारस्तुहिनं हिममित्यमरः'। कासृ शब्दकुत्सायां। कासारः। 'कासारः सरसी सर' इत्यमरः॥

(तत्त्व०-) भृंगारइति। भृंगारः कनकालुका।

मू०- सर्तेरपःषुक्च ॥ सर्षपः।

(सुबोधिनी-) सर्त्तेरपःषुक्च। सृ गतौ। अस्मादपप्रत्ययः स्यात् धातोः षुगागमश्च। अपप्रत्ययमाह। सर्षपः॥

मू०- विटपादयः॥ विट शब्दे। विटपः। विष्टपम्। कुणपम्। वलसंवरणे। उलपम्।

(सुबोधिनी-)विटपादयः। कपप्रत्ययांता निपात्यंते कित्त्वान्न गुणः। विट् शब्दे। विटपः विटपो न स्त्रियां स्तंबे शाखा विस्तारपल्लवे। विटाधिपे नेति मेदिनी'। विश प्रवेशने। विशतेः प्रत्ययस्य तुडागमो निपात्यते। छशषेति षत्वं ष्टुत्वं। विष्टपं। 'विष्टपं भुवनं जगदित्यमरः' कुण शब्दे। वस्योत्वं निपातनात्। कुणपं' कुणपः पूतिगंधे शवे ऽपि चेति मेदिनी। कुणपः शवमस्त्रियामित्यमरः'। वल संवरणे। वस्योत्वं निपाननात्। उलपं। 'उलपो न स्त्री गुल्मिन्यामुलपो ना तृणांतरे' इतिमेदिनी।

(तत्त्व०--)उलप इति कोमलं तृणम्।

मू०- वृतादेस्तिकः॥ वर्त्तिका।

(सुबोधिनी-) वृतादेस्तिकः। तिकप्रत्ययमाह। वृतु वर्तने। वर्तिका॥

मू०- कृतःकित्॥ कृत्तिका।

(सुबोधिनी-) कृतःकित्। कृती छेदने इत्यादिभ्यः तिकक् स्यात् कित्त्वान्न गुणः। कृत्तिका। भिदिर् विदारणे। भित्तिका। भित्तिः। लतु सौत्रो धातुः। लत्तिका गोधा॥

मू०- इष्यशिभ्यान्तकः॥ इष्टका। अष्टका।

(सुबोधिनी-) इष्याशिभ्यांतकः। तकप्रत्ययमाह। इषु इच्छायां। ष्टुत्वं इष्टका। अशूङ् व्याप्तौ। छशषेति षत्वं। अष्टका॥

मू०- वीपतिभ्यांतनः॥ वेतनम्। पत्तनम्।

(सुबोधिनी-) वीपातिभ्यांतनः। तन प्रत्ययमाह। वी गत्यादौ। वेतनं। पत्लृ पतने पत्तनं। 'पत्तनं पुटभेदनमित्यमरः'॥

२०

मू०- अर्त्त्यादेर्भः ॥ अर्भः । दृभये । दर्भः । गर्भः ।

(सुबोधिनी-) अर्त्यादेर्भः । भप्रत्ययमाह । ऋ गतौ । इयर्तीति अर्भः शिशुः । कप्रत्यये अर्भकः । दृ विदारणे । दर्भः । गॄ निगरणे । गर्भः । 'गर्भो भ्रूणेऽर्भके कुक्षौ संधौ पनसकंटके' इति मेदिनी ॥

मू०- इणः कित् ॥ इभः ।

(सुबोधिनी-) इणःकित् । भक् स्यात् कित्त्वान्न गुणः । इण् गतौ । इभः । 'इभः स्तंबेरमः पद्मीत्यमरः' ॥

मू०- असिसंजिभ्यांक्थिः ॥ अस्थि । सक्थि ।

(सुबोधिनी-) असिसंजिभ्यांक्थिः । क्थिप्रत्ययमाह कित्त्वान्न गुणः । असु क्षेपणे । अस्थि । 'कीकसं कुल्यमस्थि चेत्यमरः' । षंज् संगे । चोः कुरिति जस्य गः॥ खसे चपा इति कः । नलोप इति नलोपः । सक्थि । 'सक्थि क्लीबे पुमानूरुरित्यमरः'॥

मू०- शुषादेःक्सिः ॥ शुक्षिः । कुष निष्कर्षे । कुक्षिः । अशू अक्षि ।

(सुबोधिनी-) शुषादेःक्सिः । क्सिप्रत्ययमाह । कित्त्वान्न गुणः शुष् शोषणे । षढोरिति कः । षत्वं शुक्षिः वातः । कुष दाहे । कुक्षिः । अशूङ् व्याप्तौ । छशषेति षत्वे कत्वं च । अक्षि नयनं ॥

(तत्त्व०-) शुक्षिरिति । वातः शुक्षिः ।

मू०- इषःक्सुः ॥ इक्षुः ।

(सुबोधिनी-) इषःक्सुः । क्सुप्रत्ययमाह । कित्त्वान्न गुणः । इषु इच्छायां । कत्वे षत्वे इक्षुः 'रसालइक्षुरित्यमरः' ॥

मू०- अवितॄस्तृतंत्रिभ्यईः ॥ अवीः । तरीः । स्तरीर्धूमः । तंत्रीः ।

(सुबोधिनी-) अवितॄस्तृतंत्रिभ्यईः । ईप्रत्ययमाह । अव रक्षणादौ । अवीः । अवीर्नारी रजस्वला । तॄ प्लवनतरणयोः । तरीः । 'स्त्रियां नौस्तरणिस्तरिरित्यमरः॥ स्तृञ् आच्छादने । स्तरीः धूमः । तंत्रि कुटुंबधारणे । चुरादिः । तंत्रयतीति णेरिति णिलोपः । तंत्रीर्वीणा ॥

(तत्त्व०-)अवि । अवीरिति । अवतिगर्भमवीः । अवीस्त्रीगर्भिणी विदुः । तरीनौः । स्तरीः शयनं । धूमइतिच ।

मू०- लक्षेरीमुट्च ॥ लक्ष्मीः । इति तृतीयः पादः ॥

(सुबोधिनी-) लक्षेरीमुट्च । लक्ष दर्शनांकनयोः । चुरादिः । अस्मादीप्रत्ययः स्यात् । प्रत्ययस्य मुडागमश्च । णेरिति णिलोपः । लक्ष्मीः । लक्ष्मीःसंपत्तिशोभयोः॥ ऋद्ध्यौषधौ च पद्मायामिति मेदिनी' । दीर्घादपि कृदिकारादिति पाक्षिक ङीप् कैश्चादिष्यते अत एव वातप्रमी श्री लक्ष्मीत्यादिशब्दाः पक्षे ईवंता अपि । 'आशीरा-

श्यहिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिप्रिया' इति द्विरूपकोशः ॥ इति उणादौ तृतीयः पादः संपूर्णतामगमत् ॥ ३ ॥

मू०- वातप्रम्यादयः ॥ वातप्रमीः । यांत्यनेनेति ययीः । पारक्षणे । पपीः ।

(सुबोधिनी-) वातप्रम्यादयः । कीप्रत्ययांता निपात्यंते। कस्येत्संज्ञा । माङ्माने आतोनपीत्यालोपः । वातं प्रमिमीते इति वातप्रमीः ।'वातप्रमीर्वातमृग' इत्यमरः अयं स्त्रीपुंसयोः । या प्रापणे । ययीरश्वः । पा रक्षणे । पपीः । निपातनादुभयत्र द्वित्वं । 'पपीः स्यात्सोमसूर्य्ययोरिति विश्वः' ॥

(तत्त्व०-) वात-। ययीरश्वः । पपीःस्यात्सोमसूर्ययोः ।

मू०- रत्न्यादयः ॥ ऋ रत्निः । अंजु अञ्जलिः । मदी मत्स्यः । अत् अतिथिः । अगि अंगुलिः । कु कवसः । कौतेः । कवचः । यु । यवासः । कृशू कृशानुः ।

(सुबोधिनी-) रत्न्यादयः। निपात्यंते। ऋ अञ्जू मदी अत् अगि कु यु कृशिभ्योऽष्टभ्य । कत्नि आलि स्य इथि उलि अच आस आनुक् प्रत्यया यथासंख्यमष्टौ भवंति। ऋ गतौ कत्निः कित्त्वान्नगुणः । रत्वं रत्निः । 'बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृतांगुलिः'। अरत्निरत्र नञ्समासः । प्रसृतांगुलिर्यो हस्तः सोऽरत्निरित्यर्थः । अंजू व्यक्त्यादौ आलिः। अंजालिः । 'अंजलिस्तु पुमान् हस्तसंपुटे कुडवेपि चेति मेदिनी' ।मदी हर्षे । स्यः मत्स्यः । 'मत्स्यो मीनेऽथ पुंभ्म्नि देशे' इति मेदिनी । अत सातत्यगमने । इथिः अतिथिः । 'अतिथिः कुशपत्रे स्यात् पुमानागंतुके त्रिष्विति मेदिनी' । अगि गतौ उलिः अंगुलिः । 'अंगुलिः करशाखायां कार्णिकायां गजस्य चेति हैमः' । कु शब्दे । अचः कवचः । 'कवचो गर्दभांडे च सन्नाहे पर्पटेपि चेति मेदिनी' । यु मिश्रणे । आसः यवासः। 'यासो यवासो दुःस्पर्श'इत्यमरः । कृशू तनूकरणे। आनुक् कृशानुः। 'कृशानुः पावको नलइत्यमरः'

(तत्त्वदी०-) रत्न्यादयइति । ऋइत्यस्यरत्निरिति । बद्धमुष्टिकरो रत्निः सोऽरत्निः । प्रसृतांगुलिः ।

मू०- शृः करः ॥ शर्करा।

(सुबोधिनी-) शृः करः । करप्रत्ययमाह । ककारस्य नेत्वं बाहुलकात्। शॄ हिंसायां । शर्करा। 'शर्करा खंडविकृतौ उपलाकर्परांशयोः ॥ शर्करान्वितदेशे च रुग्भेदे सकलेपि चेति मेदिनी '॥

मू०-पुषः कित् ॥ पुष्करः ।

(सुबोधिनी-) पुषः कित् ।करक् प्रत्ययमाह ।पुष पुष्टौ ।पुष्करं । ' पुष्करं खें-

बुपञ्चयोः । तुर्य्यवक्त्रे खङ्गफले हस्तिहस्ताग्रकांडयोः ॥ कुष्ठौषधौ द्वीपतीर्थभेदयोश्च नपुंसकं ॥ उरंगरागविहगनृत्यभेदेषु चांबुदे ' इति मेदिनी ॥

मू०- गमेरिनिर्भविष्यति ॥ गमिष्यतीति गमी ।

(सुबोधिनी-) गमेरिनिर्भविष्यति । इकार उच्चारणार्थः । इन् प्रत्ययमाह । गम्लृ गतौ । इनामिति दीर्घः । गमी । आङ्पूर्वाद् गमेरिनिप्रत्ययस्तु णित् णित्वाद्वृद्धिः । आगमिष्यतीति आगामी।भूसत्तायामस्मादपि इनिः सच णिस्यात्। भविष्यतीतिभावी

मू०- परमेस्थःकित् ॥ परमेष्ठी ।

(सुबोधिनी-) परमेस्थःकित् । परमशब्दे उपपदे तिष्ठतेरिनिः कित् स्यात् । कित्वादातोनपीत्यालोपः । परमेष्ठी । 'परमेष्ठी पितामहः' इत्यमरः । सप्तम्या अलुक्।

मू०- मन्थइनिःकित् ॥ मन्था । मन्थानौ ।

(सुबोधिनी-) मंथइनिःकित् । मंथ विलोडने । अस्मादिनिः कित् । नोलोप इति नलोपः । इतोत्पंचसु इत्यत्वं आसौ इति टेरात्वे थोनुट् मंथाः । 'मंथा मंथनदंडे च वज्रे चापेपि च स्मृतः' ॥

मू०- पतेस्थश्च ॥ पंथाः । पंथानौ ।

(सुबोधिनी-) पतेस्थश्च । पत्लृ गतौ । अस्मादिनिः स्यात् तकारस्य यश्च । पंथाः । पथि गतावित्यस्मात्पचाद्यप्रत्यये आकारांतोप्यस्ति । वाटः पथश्च मार्गश्चेति सुभूतिचंद्रः । ऋभवो देवाः क्षपत्यऽस्मिन्निति विग्रहे बाहुलकात् डप्रत्यये ऋभुक्षः । ऋभुक्ष स्वर्गवज्रयोरिति विश्वः । ततोमत्वर्थीयेनिः । ऋभुक्षिन्निति नांतं प्रातिपदिकं अत्वे आत्वे च ऋभुक्षा इंद्रः ॥

मू०- बलाकादयः ॥ बलाका । पताका । खज मन्थे, खजाकः । पिनाकः । तड आघाते । तडाकः ।

(सुबोधिनी-) बलाकादयः ॥ आक प्रत्ययांता निपात्यंते । बल प्राणने । बलाका । बलाका बकपंक्तिः स्याद्बलाका विसकण्ठिका । बलाका कामुकी प्रोक्ता बलाकश्च बको मत इति विश्वः। पत्लृ पतने । पताका । पताका वैजयंत्यां च सौभाग्येंऽके ध्वजेपि चेति विश्वः। पताका वैजयंत्यां च सौभाग्ये नाटकांगयोरिति मेदिनी । खज मंथे खजाकः पक्षी । पा रक्षणे । पातेरित्वं नुम् च निपात्यते । पिनाकः । क्लीबपुंसोः पिनाकः स्याच्छूलशंकरधन्वनोरित्यमरः । पिनाकोस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोरिति मेदिनी । पिष्लृ संचूर्णने । षस्य णत्वं धातोर्यगागमश्च निपात्यते । पिण्याकः । पिण्याको स्त्री तिलकल्के हिंगुबाह्लीकसिह्लके इति मेदिनी । तड अघाते । तडाकः

(तत्त्व०-) पिनाकइति । क्लीबपुंसोः पिनाकः स्याच्छूलशंकरधन्वनोः ।

मू०- दूषेरीकः ॥ दूषीका ।

(सुबोधिनी–) दूषेरीकः । ईकप्रत्ययमाह । दुष वैकृत्ये । ण्यंतः दुषेर्णाविति दीर्घः । णेरिति णिलोपः । दूषीका नेत्रयोर्मलमित्यमरः । किंच अकृतेपि ईकप्रत्यये दूषयतेर्धातोरिरिर्तीप्रत्यये दूषिः । कृदिकारादिति ङीपि दूषी । उभाभ्यामपि स्वार्थे कप्रत्यये ह्रस्वो वेति पाक्षिके ह्रस्वे च कृते दूषिका दूषीका च सिद्ध्यति । पिचंडी दूषिका दूषी षिचाटचद्दशोर्मलमिति विक्रमादित्यकोशः । दूषिका तूलिकायां च मले स्याल्लोचनस्य चेति मेदिनी॥

(तत्त्व०--) दूषेरिति । दूषीकानेत्रयोर्मलं ।

सू०-- अनिहृषिभ्यांकिच्च ॥ अनीकं । हृषीकम् ।

(सुबोधिनी–) अनिहृषिभ्यांकिच्च । कीकप्रत्ययः स्यात् । कित्वान्नगुणः अन प्राणने । अनीकं । अनीको स्त्री रणे सैन्ये इति मेदिनी । हृष तुष्टौ । हृषीकं । हृषीकं विषयींद्रियमित्यमरः ॥

सू०- अलीकादयः ॥ अल भूषणादौ अलीकम् । वलीकम् । पुणकर्मणि शुभे । पुण्डरीकम् ईषिका । इषीका ।

(सुबो०–) अलीकादयः । कीकप्रत्ययांता निपात्यंते । अल भूषणादौ । अलीकं अलीकं त्वप्रियेपि स्याद्दिव्ये सत्ये नपुंसकमिति मेदिनी । अलीकमप्रिये लाभे वितथे इति हेमचंद्रः । विपूर्वात् व्यलीकं व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने । नानागरे इति मेदिनी । वल संवरणे । वलीकं । वलीकनीध्रे पटलप्रांते इत्यमरः । वलतेर्निपातनात् मुगागमे कृते वल्मीकं । वामलूरश्च नाकुश्च बल्मीकं पुंनपुंसकमित्यमरः । पुण शुभे कर्म्मणि । धातोर्नुमागमो णस्य डश्च प्रत्ययस्यारुडागमश्च निपातनात् । पुंडरीकं । पुंडरीकं सितांभोजे सितच्छत्रे च भेषजे । पुंसि व्याघ्रे च दिङ्नागे कोशकारांतरेपि चेति मेदिनी । ईष गतौ । निपातनात् ह्रस्वः । इषीका । शलाका ॥

(तत्त्व०--) अलीकादयइति । अलीकमिथ्या । वलीकं पटलप्रांते ।

सू०-- कृादेरीषः ॥ करीषम् । तॄ तरीषः ।

(सुबोधिनी–) कृादेरीषः । ईषप्रत्ययमाह । कॄ विक्षेपे । करीषः । करीषं गोमयं शुष्कमित्यमरः । तॄ प्लवनतरणयोः । तरीषः तरीषा ॥

(तत्त्व०--) कृादेरिति । करीषोऽस्त्री पशुशुष्कगोमयोः ।

सू०– शॄादेःकीषः ॥ शॄ शिरीषः । पॄ पुरीषम् ।

(सुबोधिनी–) शॄादेःकीषः । शॄ हिंसायां । ऋतइद्धातोः । शिरीषो वृक्षः । पॄपालनपूरणयोः।पोरुदोष्ठ्यात्।उर् । पुरीषं । गूथं पुरीषं वर्चस्कमस्त्री विष्ठा विशौ स्त्रियामित्यमरः

मू०– अर्जेर्ऋज ॥ ऋजीषम् । अबिशब्दे । अंबरीषोनिपात्यः । अंबरीषम् ।

(सुबोधिनी–) अजेर्ऋजः । अर्ज अर्जने । अस्मात्कीषः स्यात् धातोर्ऋजादेशश्च । ऋजीषं । ऋजीषं पिष्टपचनमित्यमरः । अबि शब्दे । निपातनात् ईषप्रत्ययः प्रत्ययस्यारुडागमश्च । अंबरीषः । अंबरीषं रणे भ्राष्ट्रे क्लीबपुंसि नृपांतरे । नरकस्य प्रभेदे च किशोरे भास्करेपि च । आम्रातके तु पाते चेति मेदिनी । अंबरीषः पुमान् भ्राष्ट्रमिति बोपालितः । क्लीबे पुंसि नृपांतरे क्लीबेऽबरीषं भ्राष्ट्रोनेत्यमरः।

(तत्त्व० -) अंबरीषइति । अंबरीषः पुमान् भ्राष्ट्रं । क्लीबेपि ।

मू०– कादेरीरः॥ करीरः । शॄ शरीरम् ।

(सुबोधिनी–) कादेरीरः । ईरप्रत्ययमाह । कॄ विक्षेपे । करीरः । वंशांकुरे करीरोऽस्त्री वृक्षभिद्घट्टयोः पुमान् । करीरा चीरिकायां च दंतमूले च दंडिनामिति मेदिनी । शॄ हिंसायां । शीर्य्यते इति शरीरम् । अर्द्धर्चादिः । शरीरं वर्ष्मविग्रहमित्यमरः ॥

(तत्त्व०--) कादेरिति । करीरो वंशांकुरः ।

मू०– गभीरादयः ॥ गम्लृ गभीरः । गम्भीरः । वश । उशीरम् । घस्लृ । क्षीरम् ।

(सुबोधिनी–) गभीरादयः । ईरप्रत्ययांता निपात्यंते । गम्लृ गतौ । मस्य भः पाक्षिको नुम्च निपातनात् । गभीरं । निम्नं गभीरं गम्भीरमित्यमरः । वश् कांतौ । निपातात्कीरप्रत्ययः । ग्रहामिति संप्रसारणं । उशीरं मूलेऽस्योशीरमस्त्रियाम् । अभयं नलदं सेव्यमित्यमरः । घस्लृ अदने । कीरप्रत्ययो निपातनात् । गमामित्युपधालोपे कत्वं षत्वं क्षीरं । क्षीरं दुग्धे च नीरे चेति विश्वः ।

मू०– शीङोधुकलक्वलवलञ्वालपालाः ॥ शीधु । शीलम् । शेवलः । शैवलः । शेवालम् । शेपालम् ।

(सुबोधिनी–) शीङोधुकलक्वलवलञ्वालपालाः । शीङ् स्वप्ने । अस्मात् षट् प्रत्यया भवंति शेरतेऽनेनेति शीधुरर्द्धर्चादिः । मैरेयमासवःशीधुरित्यमरः । लक् । शीलं । शीलं स्वभावे सद्वृत्ते इति मेदिनी । वल । शेवलं । वलञ् । शैवलं । जलनील्यां तु शैवालं । शैवल इत्यमरः । शैवलं पद्मकाष्ठे स्यात् शेवाले तु पुमानयमिति मेदिनी । वाल । शेवालं । पाल । शेपालं । शेवालं शेवलो न स्त्री शेपालो जलनीलिकेति शब्दार्णवः॥

(तत्त्वदीपिका–) शीधुइति मद्यं । शेवालं शेवलो न स्त्री शेवालो जलनीलिका ।

मू०-- उलूकादयः ॥ उलूकः । शमु शम्बूकः । शल शालूकः । मडि । भूषायाम् । मण्डूकः ।

(सुबो०-) उलूकादयः । ऊक प्रत्ययांता निपात्यंते । वल संवरणे । सम्प्रसारणं निपातनात् । उलूकः उलूकः पुंसि काकारौ इंद्रे भारतयोधिनीति मेदिनी । शम् उपशमे । धातोर्बुगागमो निपातनात् शंबूकः । शंबूको गजकुंभांते घोषे च शूद्रतापसे इति मेदिनी । बाहुलकात् डकप्रत्ययोपि । जंबूकं जंबुकं प्रोक्तं शबूकमपि शंबुकमिति द्विरूपकोशः । शंबूका जलशूक्तय इत्यमरः । शल गतौ निपातनाद्वृद्धिः । शालूकं । सौगंधिकं तु कल्हारमित्याद्युपक्रम्य शालूकमेषां कंदःस्यादित्यमरः । एषां सौगंधिकादीनां कुमुदकैरवांतानां कंदो मूलं शालूकमित्यर्थः । माडि भूषायां । मंडते वर्षासमयमिति मंडूकः । भेकः ॥

(तत्त्वदीपिका--) उलूकादयइति । उलूकाविंद्रमेचकौ । शंबूको जलशुक्तिः । शालूकं कंदविशेषः ।

मू०-- नियोमिः ॥ नेमिः ।

(सुबोधिनी-) नियोमिः ।मिप्रत्ययमाह । णीञ् प्रापणे । नयाति चक्रमिति नेमिः। नेमिर्ना तिनिशे नूपनिकाचक्रांतयोः स्त्रियामिति मेदिनी ॥

मू०--अर्तेरुच्च ॥ ऊर्मिः ।

(सुबोधिनी) अर्त्तेरुच्च । मिप्रत्ययः स्यात् धातोरुदादेशश्च । ऋगतौ ऊर्मिः । ऊर्म्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः । वस्त्रसंकोचरेखायां वेदनापीडयोरपीति मेदिनी ॥

मू०-- भुवःकिच्च ॥ भूमिः ।

(सुबोधिनी-)भुवःकिच्च । मिक् स्यात् । कित्त्वान्न गुणः। भूसत्तायां । भवंति भूतान्यस्यामिति भूमिः । भूमिर्वसुंधरायां स्यात् स्थानमात्रेपि च स्त्रियामिति मेदिनी ॥

मू०-- अश्नोतेरश्च ॥ रश्मिः ।

(सुबोधिनी-) अश्नोतेरश्च । अशूङ् व्याप्तावस्मात् मिः स्यात् । धातो रशादेशश्च । रश्मिः रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपीति मेदिनी ॥

(तत्त्वदीपिका-) रश्मिरिति । रज्जूकिरणयो रश्मिः ।

मू०-- सृवृदेर्निःकित् ॥ सृणिः । वृष्णिः ।

(सुबोधिनी-) सृवृदेर्निःकित् । सृ गतौ । सृणिः । अंकुशो ऽस्त्री सृणिः स्त्रियामित्यमरः । सृणिः स्यादंकुशः पुमानिति । वृषु सेचने । वृष्णिः । ' वृष्णिस्तु यादवे मेषे वृष्णिः पाषंडचंडयोरिति विश्वः । वृष्णिः क्षत्रियमेषयोः ' ॥

(तत्त्वदीपिका-) सृणिरिति । अंकुशः । वृष्णिरिति । क्षत्रियमेषयोः ।

मू०—अङ्गेर्नलोपश्च ॥ अग्निः ।

(सुबोधिनी—) अंगेर्नलोपश्च । अगि गतौ । निः । अग्निः।'अग्निर्वैश्वानरो वन्हिःरित्यमरः । अग्निर्वैश्वानरोपि स्यात् चित्रकाख्यौषधौ पुमानिति मेदिनी ' ॥

मू०— वहादेर्निः ॥ वन्हिः । श्रोणिः । योनिः । द्रोणिः । ग्लानिः।

(सुबोधिनी—) वहादेर्निः । निप्रत्ययमाह, वह प्रापणे । वन्हिः । ' वन्हिर्वैश्वानरोपि स्यात् चित्रकाख्यौषधौ पुमानिति मेदिनी' श्रिञ् सेवायाम् । श्रेणिः । 'श्रेणिः स्त्रीपुंसयोः पंक्तौ समाने शिल्पिसंहताविति मेदिनी । निःश्रेणिस्त्वधिरोहिणी' श्रु श्रवणे । श्रोणिः । कटिः । ' श्रोणिः ककुद्मतीत्यमरः ' । यु मिश्रणे । ' योनिः योनिः स्त्रीपुंसयोश्च स्यादाकारे स्मरमंदिरे इति मेदिनी'। द्रुगतौ ।द्रोणिः सेचिनी । ग्लै हर्षक्षये । ग्लानिः दौर्बल्यं ॥

मू०— घृण्यादयः ॥ घृणिः । स्पृश् पृश्निः । पृष् पार्ष्णिः ।

(सुबोधिनी —) घृण्यादयः। निक्प्रत्ययान्ता निपात्यंते । घृ सेचने । घृणिः ।'घृणिः पुमान् । अंशुज्वालांतरंगेष्विति हेमचंद्रः ' । स्पृश संस्पर्शने । स्पृशतेः सलोपो निपातनात् । छशषेति षत्वं ष्टुत्वं पृष्णिः । ' पृष्णि रल्पतनावित्यमरः' । पृषु सेचने । पृषेर्वृद्धिर्निपात्यते । 'पार्ष्णिः। 'पार्ष्णिः स्यादुन्मदस्त्रियां । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रंथ्यधरेपि चेति मेदिनी ' ॥

(तत्त्वदीपिका—) घृणिरिति । किरणः । पृष्णिरिति स्पृशेःसलोपे । पृषेस्तु वृद्धौ । पार्ष्णिः।

मू०— पातेर्डतिः ॥ पतिः ।

(सुबोधिनी—) पातेर्डतिः । डतिप्रत्ययमाह । डित्वाट्टिलोपः । पा रक्षणे । पतिः पतिर्धवे नात्रिष्वीशे इति मेदिनी ॥

मू०—शकेर्ऋत् ॥ शकृत् ।

(सुबोधिनी—) शकेर्ऋत् । ऋत्प्रत्ययमाह । शक्लृ शक्तौ । शकृत् । ' उच्चारावस्करौ शमलं शकृत् । गूथं पुरीषं वर्चस्कमस्त्रीविष्टाविशौस्त्रियामित्यमरः ' ॥

मू०— हन्तेरतिरंहच ॥ हन्ति दुरितमनया अंहतिः ॥

(सुबोधिनी—) हंतेरतिरंहच । हनहिंसागत्योः । अस्मादतिः स्यात् धातोरंहादेशश्च । अंहतिः । 'प्रादेशनं निर्वपणमपवर्ज्जनमंहतिरित्यमरः ' ॥

मू०— सूङादेःक्रिः ॥ सूरिः । भूरिः । अद्रिः ।

(सुबोधिनी—) सूङादेःक्रिः । क्रिप्रत्ययमाह । कित्त्वान्न गुणः । षूङ् प्राणिप्रसवे । सूरिः । ' धीमान् सूरिः कृतिः कृष्टिर्लब्धवर्णो विचक्षण इत्यमरः '। अभिधानमालायां सूरीति नांतमुदाहृतम् । भूसत्तायां । भूरिः । ' भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिंगकइति मेदिनी ' । अद भक्षणे । अद्रिः । ' अद्रयो द्रुमशैलार्का इत्यमरः' ॥

मू०– रादेस्त्रिः ॥ रात्रिः । अत्रिः ।

(सुबोधिनी–) रादेस्त्रिः । त्रिप्रत्ययमाह । रा दाने । रात्रिः । शद्ऌ शातने । शात्रिः । ‘ शत्रिर्नागेभेऽधरे विष्णाविति मेदिनी’ । अद भक्षणे । अत्रिर्मुनिभेदः ॥

मू०– पतेरत्रिः ॥ पतत्रिः ।

(सुबोधिनी–) पतेरत्रिः । अत्रिप्रत्ययमाह । पत्ऌ गतौ । पतत्रिः । पक्षी । पतत्रात् पक्षवाचकात् शब्दान्मत्वर्थे इनि तु नांतः । पतत्री । पतत्रिणौ ॥

(तत्त्वदीपिका–) पतत्रिरिति पक्षिणि ।

मू०– मृङईचिः ॥ मरीचिः ।

(सुबो०) मृङईचिः। ईचिप्रत्ययमाह । मृङ् प्राणत्यागे मरीचिः। मरीचिः कृपणे दीप्तौ ऋषिभेदे च दृश्यते इति विश्वः । मरीचिर्मुनिभेदे ना गभस्तावनपुंसकमिति मेदिनी ’॥

मू०– वेञोडिच्च ॥ वीचिः ।

(सुबोधिनी) वेञ् तंतुसंताने । अस्मादीचिर्डित् स्यात् । वीचिः । ‘वीचिः स्वल्पे तरंगे स्यादवकाशे सुखे द्वयोरिति विश्वः ’ ॥

मू०– पुरःकुषः ॥ पुर अग्रगमने । पुरुषः ।

(सुबोधिनी–) पुरः कुषः । कुषप्रत्ययमाह । कित्त्वान्न गुणः । पुर अग्रगमने । पुरुषः । बाहुलकाद्दीर्घे पूरुषः ।‘ पुरुषस्त्वात्मनि नरे पुन्नागे चेति हैमः । पुरुषाः पूरुषा नर इत्यमरः ’ ॥

मू०– पॄनहिकलिभ्यउषः ॥ परुषम् । नहुषः । कलुषम् ।

(सुबोधिनी–) पॄनहिकलिभ्यउषः । उषप्रत्ययमाह । पॄ पालनपूरणयोः । परुषं ‘परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवदिति मेदिनी ’ । णह बंधने । नहुषः । ‘नहुषो राजविशेषे नागभिद्यपीति हैमः ’ । कल शब्दसंख्यानयोः ।‘ कलुषं । कलुषं त्वाविलैनसोरिति विश्वः , ॥

मू०– पीयेरूषः ॥ पीय पाने । सौत्रः । पीयूषम् । पेयूषम् ।

(सुबोधिनी–) पीयेरूषः । ऊषप्रत्ययमाह । पीय पाने । सौत्रोधातुः । पीयूषम् । बाहुलकाद्गुणाभावः । गुणे तु पेयूषः । ‘ पीयूषोऽभिनवं पयः इत्यमरः । पीयूषममृतं सुधेत्यमरः । पीयूषं सप्तादिवसावधिक्षीरे तथामृते इति मेदिनी । पीयूषममृते नव्यसूतधेनोः पयस्यपीति हैमः ’ ॥

मू०– मस्जेर्नुम्च ॥ मञ्जूषा ।

(सुबोधिनी–) मस्जेनुम्च । टुमस्जो शुद्धौ । अस्मादूषः स्यात् धातोर्नुमागमश्च । मित्वादंत्यात्स्वरात्परः । सस्य श्चुत्वेन शः झभेजबा इति शस्य जः हसात्परस्य झसस्येति वा जलोपः । लोपाभावपक्षे जकारद्वयं । मञ्जूषा । ‘ पिठकः पेटकः पेटा मञ्जूषेत्यमरः ’ ॥

मू०– गण्डेश्च ॥ गडि वदनैकदशे । गण्डूषः ।

(सुबोधिनी–) गंडेश्च । गडि वदनैकदेशे । अस्मादूषः स्यात् । गंडूषः 'गंडूषो मुखपूतीमपुष्करप्रसृतोन्मिते इति मेदिनी ॥

मू०– शकादेरटः ॥ शकटम् । काकि गतौ । कंकटः । कृञ् करटः ।

(सुबोधिनी–) शकादेरटः । अटप्रत्ययमाह । शाकि गतौ । शक्ल शक्तौ । शकटः । 'क्लीबेऽनः शकटोऽस्त्री स्यादित्यमरः' । ककि गतौ । कंकटः । सन्नाहः डुकृञ् करणे । कृ विक्षेपे वा । करटः । 'काकेभगंडौ करटावित्यमरः । करटो गजगंडे स्यात् कुसुंभे निंद्यजीविनि । एकादशादिश्राद्धेच दुर्दुरूढेऽपि वायसे इति मेदिनी'।

(तत्त्वदीपिका–)कंकट इति । सन्नाहे ।

मू०– कलिकर्द्योरमः ॥ कलमः । कर्दकुत्सितेशब्दे । कर्द्दमः ।

(सुबोधिनी–) कलिकर्द्योरमः । अमप्रत्ययमाह । कल संख्याने । कलमः ।' कलमः शालिचौरयोरिति हैमः । कलमः पुंसि लेखिन्यां शालौ पाटच्चरेपि चेति मेदिनी' । कर्द कुत्सिते शब्दे । कर्दमः पंकः ॥

मू०– पुल्यादेःकिन्दः ॥ पुलिन्दः ।

(सुबोधिनी–) पुल्यादेःकिंदः । किंदप्रत्ययमाह । किस्वान्न गुणः । पुल महत्वे। पुलिंदः जातिविशेषः ।

(तत्त्वदीपिका–) पुलिंद इति जातिविशेषे ।

मू०– कुपेर्वावः ॥ कुपिन्दः । कुविन्दः।

(सुबोधिनी–)कुपेर्वावः । किंदः स्यात् । कुप क्रोधे पस्य वा वकारश्च कुविंदः कुपिंदः । 'तंतुवायः कुविंदः स्यादित्यमरः' ॥

(तत्त्वदीपिका--) कुपिंदकुविंदौ तन्तुवाये ।

मू०– नौषञ्जेर्घथिः ॥ निषंगथिः ।

(सुबोधिनी–) नौषंजेर्घथिः । षंज संगे निपूर्वादस्मात् घथि प्रत्ययः स्यात् । घथिप्रत्ययमाह घित्त्वाच्चजोरिति कुत्वं प्रादेश्चेति षत्वं । निषंगथिः । आलिङ्गकः ॥ ।

(तत्त्वदीपिका–) निषंगथिरिति । आलिंगके ।

मू०– सर्त्तेर्णिच्च ॥ सारथिः ।

(सुबो०–) सर्त्तेर्णिश्च । सृ गतौ । अस्मात् घथिः स्यात् स च णित् । सारथिः । 'नियंता प्राजिता यंता सूतः क्षत्ता च सारथिरित्यमरः' ॥

मू०-खर्ज्जादेरूरः ॥ खर्ज्जूरः । कर्पूरम् । वल्लूरम् ।

(सुबोधिनी–) खर्जादेरूरः । ऊरप्रत्ययमाह । खर्ज आर्जवे । खर्जूरः । खर्जूरं रूपफलयोः खर्जूरः कीटवृक्षयोरिति मेदिनी । कृपू सामर्थ्ये । बाहुलकात् कृपोरोल

इति लत्वाभावः । कर्पूरं । ‘ अथ कर्पूरमस्त्रियां । घनसारश्चंद्रसंज्ञाः सिताभ्रो हिमवालुकेत्यमरः ’ । वल्ल संवरणे वल्लूरं । ‘ वल्लूरं शुष्कमांसं स्यात् ’ ॥

(तत्त्वदीपिका–) वल्लूरमिति । शुष्कमांसं ।

मू०– लंगेर्वृद्धिश्च ॥ लांगूलम् । कुसश्च । कुसूलम् ।

(सुबोधिनी–) लंगेर्वृद्धिश्च । लगि गतौ । अस्मादूलप्रत्ययः स्यात् । धातोर्वृद्धिश्च । लांगूलं । लांगूलं पूच्छशेफसोरिति मेदिनी । कुस संश्लेषणे । ऊलः । निपातनाद्गुणाभावः । कुसूलं कुसूलं च कुसीदं च मध्यदंतमुदाहृतं इति विश्वः ॥

मू०– कुवश्चट्दीर्घश्च ॥ कूची ।

(सुबोधिनी–) कुवश्चट्दीर्घश्च कु शब्दे अस्माच्चट् प्रत्ययः स्यात धातोः पाक्षिको दीर्घश्च । चट्प्रत्ययमाह । टिट्वादीप् कूची । ‘ कूची चित्रलेखानिका । कुच कूचौ स्तने मताविति विश्वः ’ ॥

(तत्त्वदीपिका–) कूचीति । चित्रलेखिका ।

मू०– सिवेरूच ॥ सूची ।

(सुबोधिनी–) सिवेरूच । षिवु तंतुसंताने । अस्माच्चट् स्यात धातोष्टेरूश्च । सूची दर्भांकुरः । ‘ सूची तु सीवनद्रव्येप्यांगिकाभिनयांतरे ’ इति मेदिनी ॥

(तत्त्वदीपिका–) सूचीति । सूचो दर्भांकुरः ।

मू०– शमेर्बः ॥ शमु शम्बः ।

(सुबोधिनी–) शमेर्बः । शमु उपशमे । अस्मात बःस्यात बप्रत्ययमाह । शम्बः। ‘शंबः स्यान्मुशलाग्रस्थलोहमण्डके । पवौ शुभान्विते त्रिष्विति विश्वमेदिन्यौ’ ॥

(तत्त्व०–) शम्बइति मुशले ।

मू०– उल्बादयः ॥ उच समवाये । उल्बः । शुल्बम् । स्था स्तंबः । स्तबकः ।

(सुबोधिनी–) उल्बादयः । बप्रत्ययंतानिपात्यंते । उच समवाये । सस्य लत्वं गुणाभावश्च उल्बं । ‘गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियामिति मेदिनी’ । शुच शोके । चस्य लत्वं गुणाभावश्च निपातनात् । शुल्बं । शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसंनिधाविति मेदिनी’ । ष्ठा गतिनिवृत्तौ । अस्मादंबअबकएतौ प्रत्ययौ निपातनात धातोः स्थस्य तश्च स्तंबः । स्तबकः । स्तवो गुल्मे तृणादीनामप्रकांडद्रुमेपिचेति विश्वः । स्तंबो प्रकांडद्रुमगुच्छयोरिति मेदिनी । स्याद्गुच्छकस्तु स्तबक इत्यमरः’ ॥

(तत्त्व०–)उल्बंगर्भाशयः । शुल्बं ताम्रं । स्तंबोगुच्छस्तृणादिना । स्तबकः पुष्पगुच्छः।

मू०– शाशपिभ्यांदः ॥ शादः । शब्दः ।

(सुबोधिनी--) शाशपिभ्यांदः । दप्रत्ययमाह । शो तनूकरणे । शादः । शादो जंबालशष्पयोरित्यमरः । शादः स्यात्कर्दमे शष्पे इति मेदिनी । शष्पं बालतृणं घास इत्यमरः । शप् आक्रोशे । शब्दो निनादः ॥

(तत्त्व०--) शादइति जम्बालशष्पयोः ।

मू०- अब्दादयः ॥ अबतीत्यब्दः । कुन्दः ।

(सुबोधिनी-) अब्दादयः । दप्रत्ययांता निपात्यंते । अव रक्षणे । वस्य बः अब्दः । 'अब्दः संवत्सरे वारिवासमुस्तकयोः पुमानिति मेदिनी' । कु शब्दे । निपातनान्नुम् । कुंदः । 'कुंदो माघ्येऽस्त्री मुकुंदभ्रमिनिध्यंतरेषु नेति मेदिनी' ॥

मू०- वलिमलितनिभ्यःकयः ॥ वलयम् । मलयः । तनयः ।

(सुबोधिनी-) वलिमलितनिभ्यःकयः । कयप्रत्ययमाह । कित्वाद्गुणनिषेधादि । वल संवरणे । वलयः । 'वलयः कंठरोगे ना कंकणे पुंनपुंसकमिति मेदिनी' । मल धारणे । मलयः । 'मलयः पर्वतांतरे । शैलांगे देशआरामे त्रिवृतायां तु योषितीति मेदिनी' तनु विस्तारे । तनयः । 'आत्मजस्तनयः सूनुरित्यमरः' ॥

मू०- हृञोदुकूच ॥ हरतीति हृदयम् ।

(सुबोधिनी-) हृञोदुकूच । हृञ् हरणे । अस्मात्कयः स्यात् धातोर्दुगागमश्च । ह्रियते विषयैरिति हृदयं मनः ॥

मू०- मिनोतेरुः ॥ मेरुः ।

(सुबोधिनी-) मिनोतेरुः । रुप्रत्ययमाह डुमिञ् प्रक्षेपणे । मेरुः 'मेरुः सुमेरुर्हेमाद्रिरित्यमरः' ॥

मू०- जत्र्वादयः ॥ जत्रु । अश्रु । रुरुः । शातयतीति शत्रुः ।

(सुबोधिनी-) जत्र्वादयः । रुप्रत्ययांताः निपात्यंते । जनी प्रादुर्भावे । नस्य तो निपातनात् । जत्रु । 'संधी तस्यैव जत्रुणीत्यमरः' । तस्य स्कंधस्येत्यर्थः । अशूङ् व्याप्तौ । अश्रु नयनजलं । रुशब्दे निपातनाद्गुणाभावः । रुरुः । 'कृष्णसाररुरुन्यंकुरंकुशंबररोहिषा इत्यमरः । रुरुर्मृगे दैत्ये पिचेति मेदिनी' । शद्लृशातने ण्यंतः । शातयतीति ञेरिति ञिलोपः । निपातनाद्ध्रस्वत्वं शत्रुः ॥

(तत्त्व०--) रुरुरिति । मृगभेदे ।

मू०- कुसेरुम्भोमेदेताः ॥ कुसुम्भम् । कुसुमम् । कुसीदम् । कुसितः

(सुबोधिनी-) कुसेरुंभोमेदेताः । कुस संश्लेषणे । अस्मात् उंभ उम ईद इत एते प्रत्ययाः स्युः । उंभादिप्रत्ययानाह । कुसुंभं । 'कुसुंभं हेमनि महारत्ने नेनाकमंडलाविति मेदिनी । कुसुंभं । कुसुंभं स्त्रीनेत्ररोगयोः फलपुष्पयोरिति मेदिनी । कुसीदं । 'कुसीदं जीवने वृष्ट्यां क्लीबं त्रिषु कुसीदके' इतिमेदिनी । कुसितो जनपदः ॥

(तत्त्व०--) कुसितइति जनपदे शल्यं वा पुंसि शंकुर्ना ।

मू०-- तण्डुलादयः ॥ तड आघाते । तण्डुलः । अकि लक्षणे । अंकुशः । चष् चषालः । पल्वलम् । त्रिधृषा धिष्ण्यम् । शल्यम् ।

(सुबोधिनी--) तंडुलादयोनिपात्याः। तड आघाते उल प्रत्ययो नुमागमश्च निपात्यते । तंडुलः । 'तंडुलः स्याद्विडंगे च धान्यादिनिकरे पुमानिति मेदिनी '।अकि लक्षणे । उश प्रत्ययो निपातनात् । अकुंशः । 'अंकुशोऽस्त्री सृणिः स्त्रियामित्यमरः' चष भक्षणे । आलप्रत्ययो निपातनात् । चषालः । 'चषालो यूपकटक ' इत्यमर पापाने । वलप्रत्ययो निपात्यते लुगागमश्च धातोर्ह्रस्वत्वं च पल्वलमल्पसरः । त्रिधृषा प्रागल्भ्ये । ण्यप्रत्ययः ऋत इत्वं च निपात्यते । धिष्ण्यं । 'धिष्ण्यं स्थाने गृहे गोभावित्ययरः । धिष्ण्यं स्थानाग्निसद्मसु । ऋक्षे शक्तौ चेति मेदिनी ' शल गतौ । यप्रत्ययः । शल्यं । 'शल्यं तु न स्त्रियां शंकौ क्लीबं क्ष्वेडेषु तोमरे । मदनद्रुश्वा विधोर्नेति मेदिनी ' ॥

मू०— मूङ्शक्यम्यविभ्यःक्लः ॥ मूलम् । शक्लः । अम्लः । अवि गतौ । अंम्लः ।

(सुबोधिनी--) मूङ्शक्यम्यविभ्यःक्लः । क्लप्रत्ययमाह । कित्त्वान्नगुणः । मूङ् बंधने मूलं । मूलं बुध्नोंघ्रिनामक इत्यमरः । शक्लृ शक्तौ । शक्लः। शक्लः प्रियंवदे इत्यमरः अमरोगे । चुरादिर्ण्यंतः । बाहुलकादुपधाह्रस्वः ञेरिति ञिलोपः । अम्लः । 'अम्लो रसविशेषे स्यात् क्लीबे च गैरिकौषधाविति मेदिनी' । अवि शब्दे। अंम्लोरसः

(तत्त्व०--) शुक्ल इति प्रियंवदे ।

मू०—मादेर्यः ॥ माया । छाया । सस्यं । षुञ् । सव्यम् ।

(सुबोधिनी—) मादेर्यः। यप्रत्ययमाह । मा माने। माया। माया स्याच्छांबरी बुध्न्योर्मयः पीतांबरे सुरे' इति मेदिनी। छो छेदने । छाया । छाया स्यादातपाभावे प्रतिबिंबार्कयोषितोः । पालनोत्काययोः कांतिराच्छोभापंक्तिषु स्त्रियामिति विश्वः' । वस स्वप्ने । सस्यं । 'वृक्षादीनां फलं सस्यमित्यमरः' । षुञ् अभिषवे। सव्यं। सव्यं वामे प्रतीपेचेति मेदिनी । सव्यं दक्षिणवामयोरिति विश्वः ' ॥

(तत्त्व०—) सव्यमिति । दक्षिणवामयोः ।

मू०- जनेर्यक् ॥ जाया । जन्यम् ।

(सुबोधिनी--) जनेर्यक् । जन जनने । अस्माद्यक् प्रत्ययः स्यात जनसनेति आत्वं । जन्यं । जाया । 'जन्यं हट्टे परीवादे संग्रामे च नपुंसकं । जन्या मातृवयस्यायां जन्यः स्याज्जनके पुमान् । त्रिषूत्पाद्ये नवोढायां स्निग्धे जामातृभृत्ययोरिति मेदिनी ' ॥

(तत्त्व०—) जन्यमिति युद्धे ।

मू०- अघ्न्यादयः ॥ हन् । अघ्न्या । कनी दीप्तौ । कन्या । वन्ध्या ।

(सुबोधिनी -) अघ्न्यादयः । यक् प्रत्ययांता निपात्यंते । हन् हिंसागत्योः । धातोरडागमः उपधालोपश्च निपातनात् । हनोघ्न इति घः । अघ्न्या । नञ्पूर्वाद्धंते-र्यक् उपधालोपश्चेत्यन्ये । अघ्न्यः । प्रजापतिः । 'माहेयी सौरभेयी गौरुस्रा माता च शृंगिणी । अर्जुन्यघ्न्या रोहिणी स्यादित्यमरः । कनीदीप्तौ । कन्या । 'कन्या कुमारिकानार्योरौषधीराशिभेदयोरिति विश्वः' । बंध बंधने । बवयोरैक्यात् निपा-तनान्नलोपाभावः । वन्ध्या । 'वन्ध्यस्त्वफलवृक्षादौ स्त्रियां स्यादप्रजस्त्रियामिति मे-दिनी' । संपूर्वाद्धाञो यक् । आतोलोपश्च निपातनात् । संध्या । 'सायं संध्या पितृ-प्रसूरित्यमरः' ॥

मू०-- अर्त्यदिर्वन् ॥ अर्वा । पॄ पर्वा ।

(सुबोधिनी-) अर्त्यादिर्वन् । वन् प्रत्ययमाह । अर्वा । 'अर्वा तुरगगर्दभयोरि-ति विश्वः । अर्वातुरंगमे पुंसि कुत्सिते वाच्यलिंगकः इति मेदिनी' पॄ पालनादौ । पर्व । पर्व क्लीवं महे ग्रंथौ प्रस्तावे लक्षणांतरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृति-ष्वपीति मेदिनी' ॥

मू०--ध्याप्योस्सम्प्रसारणम् ॥ प्यैङ् ध्यैङ् वृद्धौ । पीवा । धीवा ।

(सुबोधिनी-) ध्याप्योःसंप्रसारणं । ध्यै चिंतायां । प्यैङ् वृद्धौ । आभ्यां वन् प्रत्ययः स्यात् धातोः संप्रसारणं च । धीवा । कर्मकरः । पीवा । स्थूलः ॥

(तत्त्वदीपिका-) धीवेति । कर्मकरे । पीवा स्थूलः ।

मू०-- अदेर्धश्च ॥ अध्वा ।

(सुबोधिनी-) अधेर्धश्च । अद भक्षणे । अस्मात् वन् स्यात् । दस्य धश्च अध्वा मार्गः ॥

मू०-- धातोरिः ॥ यजिः । वट वेष्टने । वटिः । जनिः । बोधिः । हरिः । वर्तिः ।

(सुबोधिनी-) धातोरिः । इप्रत्ययमाह । यज देवपूजादौ । यजिः । वट वेष्टने वटिः । बुध अवगमने । बोधिः । 'बोधिः पुंसि समाधेश्चभेदे पिप्पलपादपे' इति मेदिनी । हृञ् हरिः । 'हरिर्विष्णावहाविंद्रे भेके सिंहे हये रवौ ॥ चंद्रे कीले प्लवंगे च यमे वाते प्रकीर्तितः' । वृतु वर्त्तने । वर्तिर्दीपोपकरणं ॥

(तत्त्वदी०-) हरिरिति हरिर्विष्णावहाविंद्रे भेके सिंहे हरे रवौ । चंद्रेकीलेप्लवंगेच यामे वाते च कीर्तितः ।

मू०-- नाम्युपधात्किः ॥ कृषिः । ऋषिः । शुचिः । लिपिः । तूल निष्कर्षे । तूलिः ।

(सुबोधिनी) नाम्युपधात्किः । नाम्युपधाद्धातोः किः स्यात् । किप्रत्ययमाह । कित्वान्न गुणः । कृष विलेखने । कृषिः । ऋषी गतौ । ऋषिः । ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयमिति मेदिनी ’ । शुच शोके । शुचिः शुद्धे सितेऽनले । ग्रीष्माषाढानुपहतेषूपधायुद्धमंत्रिणि । शृंगारे इति हैमः ’ लिप उपदेहे । लिपिः । बाहुलकाद्वत्वमपि । लिविः । तूलिः । कूर्चिका ॥

मू०-- क्रमितमिशतिस्तम्भामतइच्च ॥ क्रिमिः । तिमिः । शितिः । स्तिभिः ।

(सुबोधिनी-) क्रमितमिशतिस्तंभामतइच्च । एभ्यः किः स्यात् एषामत इकारादेशश्च । क्रमु पादविक्षेपे । क्रिमिः । निपातनाद्रस्य संप्रसारणमपि भवति । कृमिः ‘ कृमिर्ना कृमिवत्कीटे इति मेदिनी ’ । तमु कांक्षायां तिमिः । तिमिमित्स्यभेदः । शतिः सौत्रो धातुः । शितिः । ‘ शितिः कृष्णे सिते भूर्जे इति विश्वः । शितिर्भूर्जे नासितासितयोस्त्रिष्विति मेदिनी ’ स्तंभः सौत्रः । स्तिभिः । समुद्रः ॥

मू०-- मनेरतउच्च ॥ मुनिः ।

(सुबोधिनी-) मनेरतउच्च । मन ज्ञाने अस्मात्किः स्यात् अकारस्योकारादेशश्च । मन्यते जानातीति मुनिः । ‘मुनिःपुमान् वसिष्ठादौ वंगसेनतरौ जिने ’ इति मेदिनी ॥

मू०-- वर्णेर्बलिश्च ॥ वर्ण वर्णने । सौत्रः । बलिः ।

(सुबो०-) वर्णेर्बलिश्च । वर्णिः सौत्रो ऽस्मात्किः स्यात् धातोर्बलिरादेशश्च । ‘बलिः करोपहारयोः । पुंसि बलिः प्राण्यंगजे स्त्रियां ’ बवयोरैक्याद्वलिः ॥

(तत्त्व०--) बलिः पूजापहारयोः ।

मू०-- वपादेरिञ् ॥ वापिः । राजिः । वारिः ।

(सुबोधिनी-) वपादेरिञ् । इञ्प्रत्ययमाह । ञित्त्वाद्वृद्धिः । टुवप् बीजतंतुसंताने । वापिः । राजृ दीप्तौ । राजिः । ‘राजिः स्त्रीपंक्तिरेखयोरिति मेदिनी’ । वृञ् वरणे ण्यंतः । ञेरिति ञिलोपः । वारिः। ‘वारिः स्मृता सरस्वत्यां वारि ह्रीभेदनीरयोरिति विश्वः’ कृदिकारादीतीष् तु पाक्षिकः सर्वत्र भवति । ‘वारी तु गजबंधनीत्यमरः । वारिः पथिकसंहतौ इति च ’ ॥

(तत्त्व०--) वारिर्गजबंधनी । जले क्लीबे ।

मू०-- नहोभः ॥ नाभिः । जनिः । आजिः । आतिः ।

(सुबोधिनी-) नहोभः । णह बंधने । अस्मादिञ् स्यात् हस्य भश्च नाभिः । नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिका मदे इति मेदिनी’ । जनी प्रादुर्भावे इञ् । जनिवध्योरिति न वृद्धिः । जनिः । कृदिकारादिति पक्षे ईष् । जनी । ‘ जनी सीमंतिनी वध्वोरुत्पत्तावौषधौ तथेति

मेदिनी'। अज गतौ क्षेपणे च बाहुलकादजेर्वीभावो न। आजिः संग्रामः । अत सातत्यगमने। आतिः पक्षी ॥

(तत्त्व०--)नाभिः स्यात्क्षत्रिये पुंसि । प्राण्यंगे तु स्त्रियां ।

मू०- अशेरुट् ॥ राशिः ।

(सुबोधिनी--)अशेरुट् अशूङ् व्याप्तौ । अस्मादिञ् प्रत्ययो धातोरुडागमश्च स्यात् । राशिः। 'राशिर्मेषादिपुंजयोरिति मेदिनी' ॥

मू०- वातेर्डित् ॥ विः ।

(सुबोधिनी--) वातेर्डित् वा गतिगंधनयोरस्माड्डित् स्यात् । डित्त्वाट्टिलोपः । विः पक्षी । स्त्रियां वीत्यपि ॥

मू०-नीव्यादयः॥निपूर्वोव्येञ् नीविः।प्रहिः।समानं ख्यायतेजैनेरितिसखा।

(सुबोधिनी--) नीव्यादयः। डिप्रत्ययांता निपात्यंते निपूर्वः व्येञ् संवरणे । डित्वाट्टिलोपः । नेर्दीर्घोनिपात्यते । यत इति यलोपः । नीविः कृदिकारादितीपि । नीवी । 'स्त्रीकटौ वस्त्रबंधेपि नीवी परिपणेपि चेत्यमरः' । परिपणो मूलधनं। हृञ् हरणे । टिलोपे प्रहिः 'पुंस्येबांधुः प्रहिः कूप' इत्यमरः । ख्या प्रकथने । टिलोपे सति यलोपः सहादेरिति समानस्य-सादेशः सेर्डाधेरिति डा । सखा ॥

(तत्त्वदीपिका--) प्रहिः कूपः ।

मू०- आङ्पूर्वौश्रीहनी ॥ अश्रिः । अहिः ।

(सुबोधिनी--) आङ्पूर्वौश्रीहनी । श्रिञ् सेवायां । टिलोपे सति आङो ह्रस्वः निपातनात् । अश्रिः । 'स्त्रियः पाल्यश्रिकोटय इत्यमरः'। दंत्यसकारवांस्तुअदंतः । 'अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणित इति मेदिनी' । आङ्पूर्वो हनहिंसागात्योः । टिलोपे सति आङो ह्रस्वो निपातनात् । अहिः । अहिर्वृत्रासुरे सर्पे इति मेदिनी ॥

(तत्त्वदी०--) स्त्रियां पाल्यस्रिकोटयः। किनारा

मू०- कादेःकिः ॥ कॄ किरिः । गॄ गिरिः । पॄ पुरिः ।

(सुबोधिनी--) कादेःकिः । किप्रत्ययमाह । कित्वान्न गुणः । कॄ विक्षेपे । ऋतइरितीर् । किरिः । वराहः शूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः । तॄकृज्ञाभ्यश्चेति कप्रत्यये ऽदन्तोप्यस्ति । 'त्वचि त्वचः किरोपि स्यात् किरौ प्रोक्तः पथःपाथि इति द्विरूपकोशः । गॄ निगरणे गिरिः । गिरिर्ना नेत्ररुग्भिदि । अद्रौ गिरियके योषित् गीर्णो पूज्ये पुनस्त्रिषु' इति मेदिनी । पॄ पालनादौ । पोरुरित्युर् । पुरिर्नगरं । राजा नदी च ॥

मू०- मनुधातोः ॥ कर्म्म । चर्म्म । भस भर्त्सनदीप्त्योः । भस्म । जन्म । छद्म । सुत्रामा । कपटम

(सुबोधिनी-) मनुधातोः ॥ मनुप्रत्ययमाह । डुकृञ् करणे । क्रियते इति कर्म्म । 'कर्म व्याप्ये क्रियायां च पुंनपुंसकयोर्मतमिति रुद्रः'। चर गत्यादौ। चर्म। चर्म कृत्तौ च फलके' इति मेदिनी। भस भर्त्सनदीप्त्योः भस्म । जन जनने । जन्म । छद अपवारणे चुरादिः । इस्मनिति ह्रस्वः । ञेरिति ञिलोपः । छद्म । त्रैङ् पालने। सुष्ठु त्रायते इति सुत्रामा इन्द्रः ॥

मू०- बृंहेर्नस्यअः ॥ ब्रह्म ।

(सुबोधिनी-) बृंहेर्नस्यअः । बृहि वृद्धावस्मान्मन् स्यात् । नुमो नस्य अकारे कृते रत्वं ब्रह्म । 'ब्रह्म तत्त्वं तपो वेदो नद्वयोः पुंसि वेधसि । ऋत्विग् रागभिदोर्विप्रे इति मेदिनी । ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिरित्यमरः' ॥

(तत्त्वदीपिका-) ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः ।

मू०- नामादयः ॥ म्ना नाम । षिञ् सीमा । व्येञ् व्योम । रु रोम । पै शोषणे पाप्मा । वेमा । अतेर्मनिण् । आत्मा । साम

(सुबोधिनी-) नामादयः । मन् प्रत्ययांता निपात्यंते । म्ना अभ्यासे । म्नायतेऽनेनेति मलोपो निपातनात्।नाम।'आख्याह्वे अभिधानं च नामधेयं च नाम चेत्यमरः' षोऽन्तकर्म्मणि । साम। 'साम क्लीबमुपायस्य भेदे वेदांतरेऽपि चेति मेदिनी'। षिञ् बंधने सिनोतेर्दीर्घो निपात्यते । सीमा । 'सीमसीमे स्त्रियामुभे' इत्यमरः । व्येञ् संवरणे । अंत्यस्योत्वम् निपातनात् गुणः । व्योम । रु शब्दे । रोम । गात्रकेशः । पा पाने । पुगागमो निपात्यते । पाप्मा पापम् । वेञ् तंतुसंताने । वेमा । तंतुवायदंडः । अर्द्धर्चादिः । अतेर्मनिण् । णित्वाद्वृद्धिः । इकार उच्चारणार्थः । अत सातत्यगमने । आत्मा । 'आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपीति मेदिनी' ॥

(तत्त्व०-) वेमा तन्तुवायदंडः ।

मू०- हनिमशिभ्यांसिकः ॥ हंसिका । मश शब्दे । माक्षिका ।

(सुबोधिनी-) हनिमशिभ्यांसिकः । आभ्यां सिकप्रत्ययः स्यात् । सिकप्रत्ययमाह । हन हिंसागत्योः । हंसिका 'हंसिका हंसयोषिति'। मश शब्दे रोषकृते च। 'छशषेति' षत्वम् । षढोरिति कत्वं षत्वं च। माक्षिका । 'माक्षिका भ्रमराली-स्यादिति हारावली' ॥

मू०- कोररः ॥ कवरः ।

(सुबोधिनी-) कोररः । कु शब्दे अस्मादरः स्यात् । कवरः । पाठकः । वबयोरैक्यात् ङीपि प्रत्यये कबरी । केशविन्यासः । अन्यत्र कबरा ॥

मू०- गिरउडः ॥ गरुडः

(सुबो०-) गिरउडः। गॄ निगरणे। अस्मादुडप्रत्ययः। गरुडः॥

मू०- इन्देःकमिर्नलोपश्च॥ इदम्।

(सुबोधिनी-) इंदेःकमिर्नलोपश्च। इदि परमैश्वर्ये। अस्मात्कमिः स्यात् नलोपश्च कित्वाद्गुणो न। इकार उच्चारणार्थः। इदमिति सर्वादिगणशब्दोयं सन्निहितपरामर्शकः॥

मू०-- कायतेर्डिम्॥ किम्।

(सुबोधिनी-) कायतेर्डिम्। कै शब्दे। अस्मात् डिम् प्रत्ययः स्यात् डित्वाट्टिलोपः। किम्॥

मू०-धातोष्ट्रः॥ वस्त्रम्। अस्त्रम्। छत्रम्।

(सुबोधिनी-) धातोष्ट्रः। त्रप्रत्ययमाह वस निवासे। वस्त्रं। असु क्षेपणे। अस्त्रं 'अस्त्रं प्रहरणे चापे करवाले नपुंसकमिति मेदिनी'। छद अपवारणे। चुरादिर्ण्यंतः। इस्मनेति ह्रस्वत्वं णेरिति णिलोपः। छत्रं॥

मू०-सिविमुच्योष्टेरूः॥ षिवु सूत्रम्। मुच्लृ मूत्रम्।

(सुबोधिनी-) सिविमुच्योष्टेरूः। आभ्यां त्रप्रत्ययः स्यात्। अनयोष्टेरूकारादेशश्च कित्वान्न गुणः। षिवु तंतुसंताने। सूत्रं। 'सूत्रं तु सूचनाग्रंथे सूत्रे तंतुव्यवस्थयोरिति विश्वः'। मुच्लृ मोक्षणे। मूत्रं॥

मू०-अमादेः क्रः॥ आंत्रम्। चित्रम्। मित्रम्। वश उष्ट्रः।

(सुबोधिनी-) अमादेःक्रः। अम गतिशब्दसंभक्तिषु। अमांतस्येतिदीर्घः आंत्रं। चिञ् चयने। चित्रम्। 'आलेख्याश्चर्ययोश्चित्रमित्यमरः'। ञिमिदा स्नेहने। मित्रम्। 'मित्रं सुहृदि न द्वयोः। सूर्ये पुंसि इति मेदिनी'। उष दाहे। ष्टुत्वं। उष्ट्रः 'उष्ट्रे क्रमेलकमयमहांगा इत्यमरः'॥

मू०- पूञोह्रस्वश्च॥ पुत्रः।

(सुबोधिनी-) पूञोह्रस्वश्च। पूञ् पवने। अस्मात् क्रः स्यात् धातोर्ह्रस्वत्वं च। पुनाति स्ववंश्यानिति पुत्रः। पुत् नरकस्तस्मात् त्रायते इति आतोड इति डप्रत्यये पुत्र इति व्युत्पत्त्यंतरं॥

मू०-- स्त्यायतेर्ड्रट्॥ स्त्री।

(सुबोधिनी-) स्त्यायतेर्ड्रट्। स्त्यैष्ट्यै शब्दसंघातयोरस्मात् ड्रट्। स्यात्। टित्वादीप्। डित्वाट्टिलोपः। यवयोर्वसे इति यलोपः। स्त्री। 'स्त्रीयोषिदबला योषा नारी सीमंतिनी वधूरित्यमरः'॥

मू०- गमेरा॥ गात्रम्।

(सुबोधिनी--) गमेरा । गम्लृ गतौ । अस्य मस्यात्वं स्यात् त्रप्रत्ययश्च गात्रं । 'गात्रमंगे कलेवरे । स्तंबेरमाग्रजंघादि विभागेपि समीरितमिति विश्वः' ॥

मू०- चरादेरित्रञ् ॥ चारित्रम् । वादित्रम् ।

(सुबोधिनी--) चरादेरित्रञ् । इत्रञ्प्रत्ययमाह । ञित्वाद्वृद्धिः । चरगतौ चारित्रं । वद व्यक्तायां वाचि ञ्यंतः । वादित्रम् तूर्यादिः ॥

मू०- अशित्रादिभ्यइत्रोत्रौ ॥ अशित्रम् । वहित्रम् । धरित्री । अमित्रः । त्रैङ् त्रोत्रम् ।

(सुबोधिनी--) अशित्रादिभ्यइत्रोत्रौ । आशिश्च त्राच तौ आशित्रौ अशित्रौ आदी येषांते अशित्रादयस्तेभ्यः द्वद्वांते श्रूयमाणः शब्दः प्रत्येकं संबध्यते इत्यादिशब्दः प्रत्येकं योज्यः । अशूङ व्याप्तौ इत्यादिभ्य इत्रः प्रत्ययः स्यात् । त्रैङ् पाळने इत्यादिभ्यः उत्रप्रत्ययः स्यात् । अशूङ् । अशित्रं । वह प्रापणे । वहित्रम् । धृञ् धारणे । धरित्रं । ईपि धरित्री । अम गतौ । अमित्रः शत्रुः । मित्रं नेति विग्रहे त्वमित्रमिति नपुसकं त्रैङ आत्वे उत्रे च त्रोत्रं प्रहरणं । वृञ् वरणे । वरुत्रम् प्रावरणम् ।

(तत्त्व०-) तोत्रमिति प्ररहणे ।

मू०- चितेः कणः कश्च ॥ चिक्कणम् ।

(सुबोधिनी-) चितेः कणः कश्च । चिती संज्ञाने । अस्मात् कण प्रत्ययः स्यात् तस्य कश्च बाहुलकाद्गुणाभावः । चिक्कणं । 'चिक्कणं मसृणं स्निग्धमित्यमरः' ॥

(तत्त्व०--) चिक्कणमितिस्निग्धम् ।

मू०-- सूचेस्स्मः ॥ सूक्ष्मम् ।

(सुबोधिनी--) सूचेःस्मः ' सूच पैशून्ये । चुरादिरस्मात् स्म प्रत्ययः स्यात् । णेरिति णिलोपः । कुत्वषत्वे । सूक्ष्मं । सूक्ष्मं स्यात्कंटकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके' इति मेदिनी ।

मू०- पातेर्डुम्सुः ॥ पुमान् ।

(सुबोधिनी-) पातेर्डुम्सुः । पा रक्षणेऽस्मात् डुम्सुप्रत्ययः स्यात् डित्त्वाट्टिलोपः । उदित्त्वात् स्त्रियामीप् । सुपुंसी । पुंसोऽसुङित्यसुङ् । पुमान् ।

मू०- भुजादेःकिष्यः ॥ भुजिष्यो दासः ।

(सुबोधिनी--) भुजादेःकिष्यः । भुज पालनादौ । अस्मात् किष्यप्रत्ययः स्यात् कित्वान्न गुणः । भुजिष्यः । 'भुजिष्यस्तु स्वतंत्रे च हस्तसूत्रकयोः स्त्रियामिति मेदिनी । भुजिष्यः परिचारक इत्यमरः' ॥

मू०- वसादेस्तिः ॥ वस्तिः । शास्तिः । अगमस्यतीतिअगस्तिः ।

(सुबोधिनी-)वसादेस्तिः । तिप्रत्ययमाह । वस निवासे वस आच्छादने च वस्तिः

'वस्तिर्द्वयो र्निरूहे ना ऽभ्यधोभूमिदशासु चेति मेदिनी। बस्तिर्नाभेरधोद्वयोरित्यमरः' शासु अनुशिष्टौ शास्तिः। राजदंडः। असु क्षेपणे। विंध्याख्यमगमस्यतीति हलादेरिति ढिलोपः। अगस्तिः। 'अगस्तिः कुंभयोनौ च बंगसेनतरौ पुमानिति मेदिनी'॥

(तत्त्व०–) वस्तिरिति। वस्तिर्नामेरधो द्वयोः। दशासूत्रेपि वस्तयः। शास्तिरिति। राजदण्डे। अगमिति विंध्याख्यमित्यर्थः।

मू०– वौतसेः॥ तसु उपक्षये। वितस्तिः। पत्तिः।

(सुबोधिनी–) वौतसेः। तसु उपक्षये। अस्मात् विपूर्वात्तिः स्यात्। वितस्तिः 'अंगुष्ठे सकनिष्ठे स्यात् वितस्तिर्द्वादशांगुल'इत्यमरः।' स्त्रीपुंसयोर्वितस्तिः स्यादित्यमरमाला'। पद गतौ। पत्तिः॥

मू०– दृणातेर्ह्रस्वः॥ दृतिः।

(सुबोधिनी–) दृणातेर्ह्रस्वः। दॄ विदारणे अस्मात्तिःस्यात् धातोर्ह्रस्वत्वं च दृतिः। 'दृतिश्चर्म पुटे मत्स्ये ना' इति मेदिनी॥

मू०– कॄतॄकृपिभ्यःकीटः॥ किरीटम्। तिरीटम्। कृपीटम्।

(सुबोधिनी–) कॄतॄकृपिभ्यःकीटः। कीटप्रत्ययमाह। कित्त्वान्नगुणः। कॄ विक्षेपे। ऋतइद्धातोरितीर्। किरीटं 'किरीटं मुकुटे न स्त्रीति हेमचंद्रः'। तॄ प्लवनसंतरणयोः। ऋतइद्धातोरितीर्। तिरीटं सुवर्णं शिरोवेष्टनं च। कृपू सामर्थ्ये। कृपीटं। 'गोमीकृपीटमुदरे नीरे इति विश्वः॥

(तत्त्व०–) किरीटमिति। शिरोवेष्टने। तिरीटमिति सुवर्णे। कृपीटमिति वारिकुक्ष्योश्च

मू०– धातोरसुः॥ चेतः। सरः। पयः।

(सुबोधिनी–) धातोरसुः। असुप्रत्ययमाह। उदित्वादीप्। चित संचेतने। चिती संज्ञाने। चुरादिश्च। चेतः। 'चित्तं तु चेतो हृदयं स्वांतं हृन्मानसं मन इत्यमरः'। सृ गतौ। सरः। ईपि सरसी। 'सरसी तु महासर इति शब्दार्णवः। महांति सरांसि सरस्य इति भाष्यम्'। पय गतौ। पीङ् पाने च। पयः। 'पयः स्यात् क्षीरनीरयोरिति मेदिनी'॥

मू०– अशेर्युट्स्तुतौ॥ स्तूयते इति यशः।

(सुबोधिनी–) अशेर्युट्स्तुतौ। अशूङ् व्याप्तावस्मात् असुः स्यात् धातोर्युडागमश्च। यशः कीर्तिः॥

मू०– उब्जेर्बलेबलोपः॥ ओजः।

(सुबोधिनी–) उब्जेर्बलेबलोपः। उब्ज आर्ज्जवे। अस्मादसु स्यात् बले वाच्ये बस्य लोपश्च। ओजः। 'ओजो दीप्तावष्टंभे प्रकाशबलयोरपीति मेदिनी'॥

मू०- श्रिञःशिरःकिच्च ॥ शिरः ।

(सुबोधिनी-) श्रिञःशिरःकिच्च । श्रिञ् सेवायां । अस्मादसुः स्यात् स च कित् धातोः शिरादेशश्च । शिरः । 'उत्तमांग शिरः शीर्षमित्यमरः'। कप्रत्यये तु शिर इत्यदंतोपि शिरोवाची । 'शिरोदंतो रजोवाची रजस्तथेति कोशातरं । पिंडं दद्याद्गयाशिरे इति वायुपुराणे । कुण्डलैर्घुष्टगंडानां कुमाराणां तरस्विनां । निचकर्तशिरान् द्रौणिर्नालेभ्य इव पंकजानिति महाभारते' ॥

मू०- अर्तेरुरः ॥ उरः ।

(सुबोधिनी-) अर्त्तेरुरः । ऋगतावस्मादसुः स्यात् स च कित् धातोरुरादेशश्च । उरः । उरो वत्सं च वक्षश्चेत्यमरः' ॥

मू०- व्याधौशुट् ॥ अर्शः ।

(सुबोधिनी-) व्याधौशुट् । ऋ गतौ । अस्मादसुः स्यात् प्रत्ययस्य शुडागमश्च स्यात् व्याधौ वाच्ये । अर्शः । गुदव्याधिः ॥

(तत्त्व०--) अर्शइति गुदव्याधौ ।

मू०- उदकेनुट् ॥ अर्णः ।

(सुबोधिनी-) उदकेनुट् । अर्तेरसुः स्यात् तस्य नुट् च । अर्णः । जलम् ॥

मू०- इणआगसि ॥ एनः ।

(सुबोधिनी-) इणआगसि । इण् गतावस्मात्पापे वाच्येऽसुः स्यात् प्रत्ययस्य नुगागमश्च । एनः । पापम् ॥

मू०- स्रुरीभ्यांतुट्च ॥ स्रोतः । रेतः ।

(सुबोधिनी-) स्रुरीभ्यांतुट्च । आभ्यामसुः स्यात् प्रत्ययस्य तुडागमश्च । स्रु गतौ । स्रोतः । 'स्रोतोंबुवेगेन्द्रिययोरिति विश्वः' । रीङ् श्रवणे । रेतः । 'रेतः शुक्रे पारदे चेति मेदिनी' ॥

मू०- पातेरुदकेथुट् ॥ पाथः ।

(सुबोधिनी-) पातेरुदकेथुट् । पा रक्षणे । अस्मादसुः प्रत्ययः स्यात् प्रत्ययस्य थुडागमश्च । पाथः । 'कबंधमुदकं पाथ इत्यमरः' ॥

मू०- अदेर्भक्तेधोनुम्च ॥ अन्धः ।

(सुबोधिनी-) अदेर्भक्तेधोनुम्च । अद भक्षणे । अस्मादसुः स्यात् धातोर्दस्य धो नुम् च । अंधः । 'भिस्सा स्त्री भक्तमंधोन्नमित्यमरः' ॥

मू०- आपउदकेह्रस्वोनुम्भौ ॥ अम्भः ।

(सुबोधिनी-) आपउदकेह्रस्वोनुम्भौ । आप्नोतेरसुः स्यात् धातोर्ह्रस्वत्वं च

नुमागमो भश्चांतादेशः उदके वाच्ये। अम्भः। उदकं ॥

मू०- नहेर्दिविभः ॥ नभः।

(सुबोधिनी-) नहेर्दिविभः। णह बंधने। अस्मात् गगने वाच्ये असुः स्यात् भश्चांतादेशः। नभः। 'नभो व्योम्नि नभो मेघे श्रावणे च पतत् ग्रहे। घ्राणे मृणालसूत्रे च वर्षासु च नभः स्मृतं इति विश्वः। नभः खं श्रावणो नभा इत्यमरः। नभं तु नभसा सार्द्धमिति द्विरूपकोशः।

मू०- इणआगअपराधे ॥ आगः।

(सुबोधिनी-) इणआगअपराधे। इण् गतावस्मादसुः स्यात् अपराधे वाच्ये धातो रागादेशश्च। आगः। 'आगः पापापराधयोरिति विश्वः। आगोऽपराधो मंतुश्चेत्यमरः' ॥

(तत्त्व०-) आगः पापाराधयोः।

मू०- अमेर्हुक् ॥ अंहः।

(सुबोधिनी-) अमेर्हुक्। अमगत्यादावस्मादसुः स्यात् धातोर्हुगागमश्च। अमंति गच्छंत्यधस्तादनेनेति। अंहः। दुरितं ॥

मू०- रमेश्च ॥ रंहः। देशेहच। रमंतेऽस्मिन् रहः।

(सुबोधिनी-) रमेश्च। रमु क्रीडायामस्मादसुः स्यात् धातोर्हुगागमश्च रंहः। वेगः। देशे वाच्ये रमे रसुः स्यात् धातोर्मस्य हश्च रहः। 'रहस्तत्त्वे रते गुह्ये' इति मेदिनी ॥

मू०- रंज्यादेःकित् ॥ रजः। भुवः।

(सुबोधिनी-) रंज्यादेःकित्। असुः स्यात स च कित्। रंज रागे। किर्त्वाश्नोलोपः इति नलोपः। रजः। 'रजः क्लीबं गुणांतरे। आर्त्तवे च परागे च रेणुमात्रेऽपि दृश्यते इति मेदिनी'। कप्रत्यये अकारांतोपि। 'रजोयं रजसा सार्धं स्त्रीपुष्पगुणधूलिष्वित्यजयकोशः'। भू सत्तायां। नुधातोरित्युव्। भुवः। अंतरिक्षं। षष्ठ्यंतप्रतिरूपकमव्ययमिदं ॥

मू०- वसेर्णित् ॥ वासः।

(सुबोधिनी-) वसेर्णित्। वस निवासे। अस्मादसुः स्यात् स च णित्। णित्वाद्वृद्धिः। वासः। वस्त्रम् ॥

मू०- चंदेरादेश्चच्छः ॥ छन्दः।

(सुबोधिनी-) चंदेरादेश्चच्छः। चादि आल्हादने अस्मादसुः स्यात धातोश्चस्य छश्च। छंदः। 'छंदः पद्यप्रभेदेऽपि स्वैराचाराभिलाषयोरिति' मेदिनी। अदंतोप्ययं। छंदावभिप्रायवशाविति द्विरूपकोशः' ॥

मू०— वचादेस्सुट् ॥ वक्षः । पक्षः ।

(सुबोधिनी—) वचादेस्सुट् । वच परिभाषणे इत्यादिभ्यो ऽसुः स्यात् प्रत्ययस्य सुडागमश्च । चस्य कत्वे सस्य षत्वं । वक्षो हृदयं । डुपचष् पाके । पक्षः । पक्षसी तु स्मृतौ पक्षौ इति ।

(तत्त्व०--) पक्षइति । पक्षसी तु स्मृतौ पक्षौ ।

मू०— नञिहनएहच ॥ अनेहा । अनेहसौ ।

(सुबोधिनी—) नञिहनएहच । असिप्रत्ययमाह । नञ्युपपदे हंते रसिप्रत्ययः स्यात् धातोरेहादेशश्च । इकार उच्चारणार्थः । हन हिंसागत्योः । उशनसामिति से-ङी । अनेहा । कालः ॥

मू०— विधाञोवेधच ॥ वेधाः ।

(सुबोधिनी—) विधाञोवेधच । डुधाञ् धारणादौ । विपूर्वादस्मादसिः स्यात् सोपसर्गस्य धातोर्वेधा देशश्च । विदधातीति वेधाः । अत्वसोः साविति दीर्घः । 'वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनीति' मेदिनी ॥

मू०— चन्द्रेमाङोडित् ॥ चन्द्रमाः ।

(सुबोधिनी—) चंद्रेमाङोडित् । चंद्रोपपादान्माङो ऽसिः स्यात् स चडित् । डित्वाट्टिलोपः । माङ्माने । चंद्रं रजतममृतं च मिमीते ऽसौ चंद्रमाः । अत्वसोः सावितिदीर्घः ॥

मू०— पुरसिधाञः ॥ पुरोधाः ।

(सुबोधिनी—) पुरसिधाञः । पुरस्शब्दे उपपदे धाञो ऽसिप्रत्ययः स्यात् । डुधाञ् धारणादौ । पुरोधाः । 'पुरोधास्तु पुरोहित' इत्यमरः ॥

मू०— उषःकित् ॥ उषः ।

(सुबोधिनी—) उषःकित् । उष दाहे अस्मादसिः स्यात् सच कित् कित्वान्न गुणः । उषः प्रभातं ॥

मू०-दमेरुनसिः ॥ दमुनाः ।

(सुबोधिनी—) दमेरुनसिः । दमु उपशमे अस्मादुनसिः स्यात् । दमुनाः । 'सप्तार्चिर्दमुनाः शुक्रइत्यमरः' ॥

(तत्त्व०--) दमुना अग्निः ।

मू०— वशेःकनसिः ॥ उशना ।

(सुबोधिनी—) वशेः कनसिः । वश कांतावस्मात् कनसिः स्यात् । कित्त्वाद्ग्रहामिति संप्रसारणं । उशना । 'ऊशना भार्गवः कविरित्यमरः' ॥

मू०- अंगिरादयः ॥ अगि अङ्गिराः ।

(सुबोधिनी-) अंगिरादयः । असि प्रत्ययांता निपात्यंते । अगि गतौ । असि प्रत्ययस्य इडागमो निपातनात् । अंगिराः । ऋषिभेदः ॥

मू०- अप्पूर्वस्सर्तिः ॥ अप्सराः ।

(सुबोधिनी-) अप्पूर्वःसर्तिः । सृगतावप्पूर्वः अप्सराः । 'स्त्रियांबहुष्वप्सरसः । स्यादेकत्वेप्सरा इति शब्दार्णवः । अप्सरस्त्वप्सराः प्रोक्ताः सुमनाः सुमनःसु-चेत्ति द्विरूपकोशः ॥

(तत्त्व०-) अप्सरा इति । प्रायेण भूम्नि अप्सरसः ।

मू०- पुरुपूर्वोरौतिः ॥ पुरूरवाः । इत्युणादौ चतुर्थःपादः ॥

(सुबोधिनी-) पुरुपूर्वोरौतिः। रुशब्दे पुरुपूर्वः पुरुशब्दांतस्य दीर्घोनिपातनात् । पुरूरवाः।'पुरूरवा बुध सुतौ राजर्षिश्च पुरूरवा इत्यमरः '॥ इत्युणादिषुचतुर्थःपादः॥

मू०- अदिभुवोडुतः ॥ अद्भुतम् ।

(सुबोधिनी-) अदिभुवोडुतः । अदित्यव्ययमाकस्मिकार्थे तस्मिन्नुपपदे भूधातो-र्डुतः प्रत्ययः स्यात् । डित्वाट्टिलोपः । अद्भुतं । आश्चर्य्यम् ॥

मू०- गुधेरूमः ॥ गोधूमः ।

(सुबोधिनी-) गुधेरूमः । गुध परिवेष्टने । अस्मादूमः स्यात् । गुध्यते वेष्ट्यते प्राणिभिरिति गोधूमः । 'गोधूमो नागरंगे स्यादोषधीव्रीहिभेदयोरिति मेदिनी ' ॥

मू०- मसेरूरः ॥ मसूरः ।

(सुबोधिनी-) मसेरूरः । मसी परिणामे । अस्मात् ऊरः स्यात् । मसूरः ॥

मू०- तृहेःक्नोहलोपः ॥ तृणम् ।

(सुबोधिनी-) तृहेःक्नोहलोपः । तृहू हिंसायामस्मात् क्नः स्यात् धातोर्हस्य लो-पश्च । कित्त्वाद्गुणाभावः । तृणं ॥

मू०- दंसेष्टोनआच ॥ दासः ।

(सुबो०-) दंसेष्टोनआच । दसि दंशनदर्शनयोरस्मात्टप्रत्ययः नस्यात्वं च टि-त्वाट्टीप् दासः । दासी । दासः शूद्रे दानपात्रे भृत्यधीवरयोरपीति विश्वः॥

(तत्त्व०-) दासइति । सेवकशूद्रयोर्दासः दासोधीवरः ।

मू०- दंशेश्च ॥ दाशः ।

(सुबोधिनी--) दंशेश्च । अस्मादपि टः स्यात् नस्यात्वं च । दाशः । ' कैवर्त्ते दाशधीवरावित्यमरः ' ॥

मू०- सौरमेःक्तःसोर्दीर्घः ॥ सूरतः ।

(सुबोधिनी-) सौरमेःक्तःसोर्दीर्घः । रमु क्रीडायां । सुपूर्वादस्मात् क्तः स्यात्

पूर्वपदस्य दीर्घश्च।कित्वात्लोपस्त्वनुदात्ततनामिति मलोपः।सूरतः।उपशांतो दयालुश्च।
(तत्त्व०--) सूरत इति उपशांतदयावतोः ।

मू०-- पूञोयोणुक्-ह्रस्वश्च ॥ पुण्यम् ।

(सुबोधिनी) पूञोयोणुक्-ह्रस्वश्च । पूङ् पवने ऽस्माद्यः प्रत्ययः स्यात् धातोर्णुक् -ह्रस्वश्च । पुण्यं । 'पुण्यं मनोज्ञे ऽभिहिते तथा सुकृतधर्मयोरिति । विश्वः' ॥

मू०- स्रंसतेश्शिर्यस्यकित्त्वंकुट्च ॥ शिक्यम् ।

(सुबोधिनी-) स्रंसतेःशिर्यस्यकित्त्वंकुट्च । स्रंसु अधःपतने अस्माद् यः स्यात् स च कित् प्रत्ययस्य कुडागमश्च धातोः शिरादेशश्च । शिक्यम् ॥ सिकहर

मू०- अर्त्तेःक्युरुट्च ॥ उरणः ।

(सुबो०-) अर्त्तेःक्युरुट्च । ऋगतौ।अस्मात् क्यः प्रत्ययः स्यात् धातोरुदादेशश्च कित्वान्न गुणः। युवोरित्यनादेशः। उरणः । 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके इत्यमरः।
(तत्त्व०--) उरणमिति । मेषे ।

मू०- उदिदृणातेरउदोदलोपश्च ॥ उदरम् ।

(सुबोधिनी-) उदिदृणातेरउदोलोपश्च । दृ विदारणे । अस्मादुदूपूर्वादः स्यात् उदो दस्य लोपश्च उदरं ॥

मू०- खनेर्मुट्डप्रत्ययः ॥ मुखम् ।

(सुबो०-) खनेर्मुट्डप्रत्ययः । खनु अवदारणे अस्मात् डः प्रत्ययः स्यात् धातोर्मुडागमश्च । डित्वाट्टिलोपः । मुखं ।'मुखं निःसरणे वक्त्रे प्रारंभोपाययोरपि । संध्यंतरे नाटकादेः शब्देपि च नपुंसकमिति मेदिनी । मुखमुपाये प्रारंभे श्रेष्ठे निःसरणास्ययोरिति' हैमः ।

मू०- अमेःसः ॥ अंसः ।

(सुबोधिनी-) अमेःसः । अमगतावस्मात्सप्रत्ययः । स्यात् । अंसः । 'स्कंधो भुजशिरोंसोऽस्त्रीत्यमरः । अंसः स्कंधे विभागे चेति विश्वः' ॥

मू०-- मुहेःखोमूर्च ॥ मूर्खः ।

(सुबोधिनी-) मुहेःखोमूर्च । मुह वैचित्ये । अस्मात्खप्रत्ययः स्याद् धातोर्मूरादेश्च । मुह्यति इति मूर्खः । 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशा इत्यमरः' ॥

मू०-- नहेर्हलोपश्च ॥ नखः ।

(सुबोधिनी-) नहेर्हलोपश्च । णह बंधने अस्मात् खप्रत्ययः स्यात् हकारस्य लोपश्च । नखः । 'नखः कररुहे पंढे गंधद्रव्ये नखं नखीति विश्वः। नखी स्त्रीक्लीबयोः शुक्तौ नखरे पुंनपुंसकमितिमेदिनी' ॥

मू०- शीङो ह्रस्वश्च ॥ शिखा।

(सुबोधिनी-) शीङो ह्रस्वश्च । शीङ् स्वप्ने ऽस्मात्खः स्यात् धातोर्ह्रस्वश्च । ह्रस्वविधानसामर्थ्याद्गुणाभावश्च शिखा । 'शिखा शाखाबर्हिचूडाः लांगलिक्यग्रमात्रके । चूडामात्रेशिफायां च ज्वालायां प्रपदेपि चेति मेदिनी ' ॥

मू०- माङऊखोमयच ॥ मयूखः ।

(सुबोधिनी-)माङऊखोमयच । माङ् माने । अस्मादूखप्रत्ययः स्यात् धातोर्मयादेशश्च मयूखः । 'मयूखस्त्विट्करज्वालास्वित्यमरः ' ॥

मू०- गलेःफोगस्योच्च ॥ गुल्फः ।

(सुबोधिनी-) गलेःफोगस्योच्च । गल अदने अस्मात् फप्रत्ययः स्यात् धातोरकारस्योत्वं च । गुल्फः । 'तद्ग्रंथी घुटिके गुल्फावित्यमरः' । तयो पाद्योर्ग्रंथी इत्यर्थः

(तत्त्व०--) गुल्फइति । शरीरावयवरोगयोः ।

मू०- स्पृशेश्शुश्वणौपृच ॥ पर्शुः । पार्श्वः ।

(सुबोधिनी-) स्पृशेःशुश्वणौपृच । स्पृश स्पर्शने । अस्मात्शुश्वणौ प्रत्ययौ स्तः धातोः पृइत्यादेशश्च णित्त्वाद्वृद्धिः । पर्शुः। पार्श्वः । पर्शुरस्त्री कक्षयोरध इति । पार्श्वमंतिके । कक्षाधोऽवयवे वक्रोपायपर्शुसमूहयोरिति हैमः ' ॥

(तत्त्व०--) पार्श्वे । स्त्रिकिक्षयोरधः ।

मू०- श्मनिश्रिञोडुन् ॥ श्मन् शब्दो मुखवाची । श्मानं मुखं श्रयते श्मश्रु ।

(सुबोधिनी-) श्मनिश्रिञोडुन् ॥ श्रिञ् सेवायामस्मात् श्मन्युपपदे डुन् स्यात् । डित्त्वाट्टिलोपः । श्मन् शब्दो मुखवाची मुखमाश्रयते इति श्मश्रु । नोलोप इतिनलोपः ।'तद्वृद्धौ श्मश्रु पुम्मुखे'इत्यमरः । पुरुषमुखे तेषां रोमाणां वृद्धौ श्मश्रु शब्दो वर्तते इत्यर्थः ॥ दाढी

मू०- जनेरोजंघच ॥ जंघा ।

(सुबोधिनी-) जनेरोजंघच । जनी प्रादुर्भावे । अस्मादप्रत्ययः स्मात् धातोर्जंघादेशश्च । जंघा ॥

मू०- हन्तेःशरीरावयवेद्वेच ॥ जघनम् ।

(सुबोधिनी-) हन्तेःशरीरावयवेद्वेच । हन् हिंसागत्योरस्माद: स्यात् धातोर्द्वित्वं च । पूर्वाद् हंतेरिति हस्य घः । जघनं । 'पश्चान्नितंबः स्त्रीकव्याः क्लीबे तु जंघनं पुर इत्यमर ' ॥

(तत्त्व०-) जघनमिति । पश्चान्नितंबः स्त्रीकव्या क्लीबे तु जघनं पुरः ।

मू०-क्लिशेर्लस्यलोपश्च ॥ केशः ।

(सुबोधिनी-) क्लिशेर्लस्यलोपश्च । क्लिशु विबाधने ऽस्मादः स्यात् धातोर्लकारस्य लोपश्च । केशः । 'केशः स्यात् पुंसि वरुणे ह्रीबेरे कुंतले ऽपिचेति मेदिनी' ॥

मू०- फलेरितः फस्यपः ॥ पलितम् ।

(सुबोधिनी)फलेरितःफस्य पः।फलनिष्पत्तौ अस्मादितः प्रत्ययः स्यात् धातोरादेर्वर्णस्य पत्वंच । पलितं । 'पलितं जरसा शौक्ल्यमित्यमरः । पलितं शैलजे तापेकेशपाशे च कर्दमे इति मेदिनी' ॥

मू०- कृञादेर्वुः ॥ करकः । कटकः । कुर गतौ । कोरकः । नरकः ।

(सुबोधिनी-) कृञादेर्वुः । वुप्रत्ययमाह । युवोरित्यकादेशश्च । डुकृञ् करणे । करकः । कमंडलुः । करका वृष्टिपाषाणाः । कटे वर्षावरणयोः । कटको वलयः । नृ नये नरकः । 'स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियामित्यमरः । नरकः पुंसि निरये देवारातिप्रभेदयोरिति मेदिनी' ॥

(तत्त्व०-) नरक इति नारकोपि च । कोरकोस्त्री कोरकः पुमानिति । अस्य प्रायेण पुमानिति व्याख्यानात् ।

मू०- चीकयतेराद्यन्तविपर्ययः ॥ चीकृ शब्दे । कीचकः ।

(सुबोधिनी-) चीकयतेराद्यंतविपर्ययः । चीक आमंत्रणे । चुरादिरस्याद्यंतविपर्ययः वुश्च । कीचकः । णेरिति णिलोपः । 'कीचकोध्वनिमद्वंशे दैत्यभेदे द्रुमांतरे' इति हैमः ॥

(तत्त्व०-) कीचकइति । वायुना शब्दकारी सच्छद्रो वंशः ।

मू०- पचिमच्योरिरतः ॥ पेचकः । मेचकः । मच शब्दे ।

(सुबोधिनी-) पचिमच्योरिरतः । एतयोरुपधाया अत इः स्यात् वुप्रत्ययश्च । गुणः । डुपचष्पाके । पेचकः'उलूके करिणः पुच्छे मूलोपांते च पेचक इत्यमरः । पेचको गजलांगूलेमूलोपांते च कौशिके इति मेदिनी' । मचि कल्कने मेचकः । 'मेचकस्तु मयूरस्य चंद्रके श्यामले पुमान् । तद्युक्ते वाच्यवत् क्लीबं स्रोतोंजनांधकारयोरिति मेदिनी' ॥

मू०- जनेररष्ठच ॥ जठरम् ।

(सुबोधिनी-) जनेररष्ठच । जन जनने जनी प्रादुर्भावे च आभ्यामरप्रत्ययः स्यात् धातोर्नस्य ठश्च । जठरः 'जठरः कठिनेऽपि स्यादित्यमरः' ॥

मू०- हर्यतेःकन्योहिरूच ॥ हिरण्यम् ।

(सुबोधिनी-) हर्यतेःकन्योहिरूच । हर्य गतिकांत्योरस्मात् कन्यप्रत्ययः स्यात् धातोर्हिरादेशश्च । कित्वान्न गुणः । हिरण्यम् । सुवर्णम् ॥

मू०- कृञःपासः ॥ कर्पासः ।

(सुबोधिनी-) कृञः पासः । डुकृञ् करणे ऽस्मात्पासप्रत्ययः स्यात् । कर्पासः । अणिप्रत्यये कार्पासं वस्त्रं ॥

मू०- ऊर्णोतेर्डः ॥ ऊर्णा ।

(सुबोधिनी--) ऊर्णोतेर्डः । ऊर्णुञ् आच्छादने अस्माड्डप्रत्यय स्यात् । डित्वाट्टिलोपः । ऊर्णा 'ऊर्णा मेषादिलोम्नि स्यादावर्ते चांतराभ्रुवावित्यमरः' । भ्रुवोर्मध्ये य आवर्त्तस्तत्रेत्यर्थः। अंतरायोगे भ्रुवाविति द्वितीया ॥

मू०- दधातेर्योनुट्च ॥ धान्यम् ।

(सुबोधिनी-) दधातेर्योनुट्च । डुधाञ् धारणपोषणयोरस्माद्यप्रत्ययः स्यात् प्रत्ययस्य नुडागमश्च । धान्यं । 'धान्यं व्रीहिषु धान्याके' इति मेदिनी ॥

मू०- तनोतेर्डउःसवच्च ॥ तितउः ।

(सुबोधिनी-) तनोतेर्डउःसवच्च । तनु विस्तारे अस्मात् डउप्रत्ययः स्यात् स डउप्रत्ययः सप्रत्ययतुल्यो भवति । तेन द्वित्वादि । डित्वाट्टिलोपः । यःसे इति पूर्वस्येत्वं । तितउः । पुंसि क्लीबे च । पृथगुच्चारणसामर्थ्याद्गुणो न । चालनी तितउः पुमानित्यमरः ' ॥

(तत्त्व०-) तितउरिति । चालन्यां । भाष्ये क्लीबनिर्देशात् क्लीबता चालनी तितउः पुमानित्यमरोक्तेः पुंस्त्वमिति ।

मू०- अर्भकादयः ॥ ऋधु अर्भकः ।

(सुबोधिनी-) अर्भकादयोनिपात्यंते । ऋधु वृद्धा अस्मात्कप्रत्ययो धातोर्धकारस्य भश्च निपात्यते । अर्भकः कथितो बाले मूर्खेपि कशिपौ तथेति मेदिनी ॥

मू०- प्रथेरुकूसम्प्रसारणंच ॥ प्रथ । पृथुकः ।

(सुबोधिनी-) प्रथेरुकूसंप्रसारणंच । प्रथ प्रख्याने । अस्मादुक् प्रत्ययः स्यात्संप्रसारणं निपात्यते । 'पृथुकःपुंसि चिपिटे शिशौ स्यादभिधेयवदिति मेदिनी।

मू०- पिबतेःकः ॥ पाकः । +प्रवतेरमोधोवा+

(सुबोधिनी-) पिबतेःकः पा पानेऽस्मात्कप्रत्ययो निपानात् । पाकः । 'पाकः परिणतौ शिशौ । देशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेपि चेति मेदिनी'॥

मू०- वदेर्नञियः ॥ अवद्यम् + अव अवमः । अधमः ।

(सुबोधिनी-) वदेर्नञियः । वद व्यक्तायां वाचि । नञ्युपपदादस्माद्यप्रत्ययो निपात्यते । अवद्यं । पापं । 'कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समा इत्यमरः' । अवरक्षणादौ । अस्मादमप्रत्ययो निपात्यते धातोर्वकारस्य वा धकारश्च । अधमः । अवमः ।
'निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमा इत्यमरः' ॥

मू०- क्लिशेरः ॥ कीनाशः ।

(सुबोधिनी—) क्लिशेरः । क्लिश विबाधने । अस्मादप्रत्ययो निपात्यते उपधाया ईत्वं लस्य लोपो नायागमश्च । कीनाशः । 'कीनाशः कर्षकक्षुद्रपांसुघातिषु वाच्यवत् यमे नेति विश्वः ॥

मू०-चतेरुरः ॥ चत्वारः ।

(सुबोधिनी—) चतेरुरः । चते याचनेऽस्मादुरप्रत्ययः स्यात् । चतुरामृशौचेत्याम् । चत्वारः ॥

मू०- हन्तेर्घुरच ॥ घोरं ।

(सुबोधिनी—) हतेर्घुरच । हन हिंसागत्योरस्मादप्रत्ययः स्यात् धातोर्घुरादेशश्च । गुणः । घोरं 'घोरं भीमे हरे' इति विश्वः ॥

मू०-- क्षमेरलोपश्च ॥ क्ष्मा ।

(सुबोधिनी—) क्षमेरलोपश्च । क्षमूष् सहने । अस्मादप्रत्ययः स्यात् धातोरुपधाया लोपश्च क्ष्मा । क्ष्मावनिर्मेदिनी महीत्यमरः ॥

मू०— तरतेर्ड्रिः । त्रयः । त्रीन् ।

(सुबोधिनी—) तरतेर्ड्रिः । तॄ प्लवनसंतरणयोरस्मात् ड्रिप्रत्ययः स्यात् । डित्वाट्टिलोपः । एओजसीत्येत्वं । त्रयः ॥

मू०- । ग्रहेरनिः ॥ ग्रहणिः ।

(सुबोधिनी—) ग्रहेरनिः । ग्रह उपादनेऽस्मादनिप्रत्ययः स्यात कृदिकारादितीप् च । ग्रहणिः ग्रहणी । 'ग्रहणी रुक् प्रवाहिकेत्यमरः ' ॥

मू०— प्रथेरमः ॥ प्रथमः ।

(सुबोधिनी—) प्रथेरमः । प्रथ प्रख्याने ऽस्मादमप्रत्ययः स्यात् । प्रथमः । ' प्रथमस्तु भवेदादौ प्रधानेपि च वाच्यवदित्यमरः ' । प्रथमचरमेति वैकल्पिकं सर्वादिकार्यमस्य ॥

मू०— चरेश्च ॥ चरमः ।

(सुबोधिनी—) चरेश्च । चर गतिभक्षणयोरस्मादमप्रत्ययः स्यात् । चरमः ॥

मू०- मंगेरलः ॥ मंगलः । सदोणादयः । सर्वस्मिन्काले उणादयः । उणादयोऽपरिमिताः प्रयोगमनुसृत्य प्रयोक्तव्याः।इत्युणादौ पंचमःपादः॥

(सुबोधिनी--) मंगेरलः । मगि गतावस्मादलप्रत्ययः स्यात् । मंगलं । ' मंगलसितदुर्वायामुमायां पुंसि भूमिजे । नपुसकं तु कल्याणे सर्वार्थरक्षणेपिचेति मेदिनी ' ॥ इत्युणादौपंचमः पादः ॥

(तत्व०—) उणादयइति । तथा चोणादिपु प्रयोगं दृष्ट्वैवं प्रकृतिप्रत्ययानुबंधककल्पकार्यमित्यर्थः ।

इति उणादयः ।

अव्ययसंज्ञकप्रत्ययाःभावेएवबोध्यः

मू०- तुम्तदर्थायाम्भविष्यति ॥ धातोर्भविष्यति काले तुम्प्रत्ययस्तदर्थायां क्रियायां गम्यमानायाम्। गुडं भोक्तुं व्रजति। व्याकरणं पठितुमीष्टे।

(सुबोधिनी-) तुम्तदर्थायांभविष्यति। क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोर्भावे तुम् प्रत्ययः स्यात्। तच्छब्देन क्रियाया अर्थः प्रयोजनं यस्याः साक्रियार्था तस्यां क्त्वाद्यंतं चेत्यव्ययसंज्ञा। भुज पालनादौ। भोक्तुं व्रजति देवदत्तः। भविष्यद्रूपं यद्भोजनं तत् प्रयोजनकं देवदत्तकर्तृकं व्रजनमित्यर्थः। पठ व्यक्तायां वाचि। कृतइतीट्। पठितुमीष्टे देवदत्तः। भविष्यद्रूपं यत्पठनं तत्प्रयोजनकं देवदत्तकर्तृकं कामनमित्यर्थः ॥ भविष्यत्पदप्रयोगेनषष्ठी ॥

(तत्त्व०-) तुम्तदर्थायामिति। क्रियायामिति। विशेष्यपदमात्रानुवृत्तं। तस्यै क्रियायै इयं तदर्था तस्यां। यद्वा सा क्रिया अर्थः प्रयोजनं यस्याः सा तस्यां। तुमुन्भाव इति पंडिताः।

मू०- तुमर्थेवुण् ॥ कृष्णं दर्शको व्रजति।

(सुबोधिनी-) तुमर्थेवुण्। क्रियायां क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोः कर्त्तरि वुण् प्रत्ययः स्यात्। युवोरिसकादेशः। दृशिर् प्रेक्षणे। कृष्णं दर्शको याति। कृष्णकर्मकं भविष्यदर्शनकर्तृकं दर्शनप्रयोजनकं च यानमित्यर्थः ॥

मू०- कालसमयवेलासु ॥ अध्येतुं कालः स्तोतुं समयः। भोक्तुं वेला

(सुबोधिनी-) कालसमयवेलासु। कालादिषूपपदेषु तुम् स्यात्। पर्य्यायोपादानमर्थोपलक्षणार्थं। इङ् अध्ययने। अध्येतुं कालः ष्टुञ् स्तुतौ। स्तोतुं समयः। भुज पालनादौ भोक्तुम् वेला। एवमन्ये। इत्यादियोगेपि अनुवादेऽर्थे तुम् न भवति। सिद्धस्वरूपोच्चारणमनुवादः। भूतानि कालः पचतीति वार्त्ता इति ॥

(तत्त्व०-) कालेति प्रेरणमात्रानुवर्त्तते तेन भूतानि कालः पचतीति वार्त्तेत्यत्र न।

मू०- इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुम् ॥ भोक्तुमिच्छति वष्टि वांछति वा।

(सुबोधिनी-) इच्छार्थेष्वेककर्तृकेषूपपदेषुधातोस्तुम्। अक्रियार्थोपपदार्थमेतत् भोक्तुमिच्छति वांच्छति। वशकांतावयमपीच्छार्थकः। कांतिरिच्छा इत्युक्तत्वात्। भोक्तुमिच्छत्यत्र भोजनविषयीणीच्छा प्रतीयते नतु भोजनार्थेच्छेति। एककर्तृकेष्विति किं। पुत्रस्य पठनमिच्छति। पुत्रस्येति कर्त्तरि षष्ठी। पुत्रकर्तृकं पठनमिच्छतीत्यर्थः

(तत्त्व०-)इच्छार्थेष्विति इच्छतिभोक्तुमित्यादाविच्छायां भुजिं प्रति तादार्थ्याभावात्। प्रवृत्तिसामान्ये हेत्वस्यावधारित्वेनाप्रतिपाद्यत्वात्। यद्वास्तु तादर्थ्यं। एककर्तृत्वादिलाभार्थमेतत्।

मू०- शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु ॥ शक्नोति भोक्तुम्। धृष्णोति। जानातीत्यादि।

असत्वभूतस्तु यो भावः तिङ्पदैरभिधीयते। सत्वभूतस्तु यो भावः सघञादिनिबन्धनम्॥

(सुबोधिनी-) शकधृषज्ञाग्लाघटरभलभक्रमसहार्हाऽस्त्यर्थेषु । एषूपपदेषु धातोस्तुमुन् स्यात् । अक्रियार्थोपपदार्थमेतत् । शक्लृ शक्तौ । ञिधृषा प्रागल्भ्ये । ज्ञा अवबोधने । ग्लै हर्षक्षये । घट चेष्टायां । रभ राभस्ये । डुलभष् प्राप्तौ । क्रमु पादविक्षेपे । षह मर्षणे । अर्हपूजायां । असु भुवि । अर्थग्रहणमस्तिनैव संबध्यतेऽनंतरत्वात् । भोक्तुं शक्नोति धृष्णोति जानाति इत्यत्र भुज्यर्थो विषयतया संबध्यते । ग्लापयति भोक्तुमित्यत्र भोजनविषयिणी शक्तिर्गृह्यते । भोक्तुं महती योग्यता गम्यते । आरभते भोक्तुमित्यत्र भुजेराद्यावस्था गम्यते । लभते भोक्तुमित्यत्र प्राप्तिर्गम्यते उत्सहते भोक्तुमित्यत्र भुजेराद्यावस्था गम्यते । अर्हति भोक्तुमित्यत्रापि योग्यता । अस्ति भवति विद्यते वा भोक्तुमित्यादौ संभवमात्रं ॥

मू०– पूर्णतावाचिषुसामर्थ्यार्थेषु ॥ पर्याप्तो भोक्तुम् । प्रवीणः । कुशलः । समर्थः । पूर्णतेति किम् । अलं भुक्त्वा । सामर्थ्यार्थेषु किम् । पर्य्याप्तं भुंक्ते । पर्याप्तिवचनेष्वलमर्थेषु॥

(सुबोधिनी-) पूर्णतावाचिषुसामर्थ्यार्थेषु । पर्याप्तिवाचिषु सामर्थ्यवत्तनेषु उपपदेषु धातोस्तुमुन् स्यात् । पर्याप्तो भोक्तुं समर्थः कुशलः पटुः प्रवीण इत्यर्थः । पूर्णतावाचिष्विति किं पर्याप्तं भुंक्ते । प्रभूततेह गम्यते । न तु भोक्तुः सामर्थ्यम् ॥

मू०– घञ्भावे ॥ पाकः । त्यागः । भावः । दायः । धञन्तः पुंसि॥

(सुबोधिनी-) घञ्भावे । सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात् । क्रियांतराकांक्षोत्थापकतावच्छेदकाक्रांतत्वं सिद्धत्वं । पिबतीत्यादौ तु साध्यावस्थापन्ने धात्वर्थे भाव इति भावे इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायामुपपदे भवंतीत्यर्थः ञित्वाद्वृद्धिः । घित्वाच्चजोः कुघिण्ण्यतोरिति कः । पच्यते पचनं वा पाकः । त्यज वयोहानौ । त्यज्यते त्यजनं वा त्यागः । भू सत्तायां । भूयते भवनं वा भावः । डुदाञ् दाने । दीयते दानं । आतोयुगिति युक् दायः ॥

(तत्त्व०--) घञ्इति । भावइति । भवनं भावः क्रियासामान्यं नतु भवत्यर्थमात्रं । सिद्धताभूय एव भावे घञ् । उक्तं च । क्रियायाः साध्यतावस्था सिद्धावस्था च कीर्तिता । सिद्धतां द्रव्यमिच्छंति तत्रैवेच्छंति घञ्विधिमिति । पाकइति । ञित्वादुपधावृद्धिः घित्वात्कुत्वं ।

मू०-संज्ञायामकर्तरिच ॥ कर्तृवर्जिते कारके भावे च घञ् सञ्ज्ञायामसञ्ज्ञायाञ्च । कार्य्यम्प्रत्याह्रियते यः सः प्रत्याहारः। दीयतेऽस्मै दायः । विक्रियतेऽनेनेति विकारः । उपाध्यायः । घञर्थे कः । घञोऽपवादः । विशेषेण हन्यते कार्य्यमनेनेति विघ्नः । सुघ्नः ।

(सुबोधिनी-) संज्ञायामकर्तरिच । कर्तृभिन्ने कारकेऽर्थे धातोर्घञ् स्यात् संज्ञायामसंज्ञायां च वाच्यमानायां । हृञ् हरणे । प्रत्याह्रियते इति प्रत्याहारः डुदाञ्

दाने। दीयते अस्मै इति आतोयुगिति युक् दायः। डुकृञ् करणे। विक्रियतेऽनेनेति विकारः। इङ् अध्ययने। उपेत्याऽधीयतेऽस्मादित्युपाध्यायः स्वराद इत्यस्यापवादोऽयं घञ्॥

(तत्त्वदी०-) भावइति। बाहुलकादनुपसर्गाद्धुवोपिघञ्। उपाध्यायेति। घञन्तस्य पुंस्त्वनियमात्कथमिति चेत्सत्यं। अपादाने स्त्रियामप्यभिमानात्।

मू०-स्वरादः॥ भावादौ। घञोऽपवादः। चयनं चयः। नयनं नयः। षिञ् बन्धने। विशेषेण सीयंते बध्यंते जना अनेनेति विषयः। स्तूयते अनेनेति स्तवः। सवनं सवः। लवनं लवः। कृञ् क्रियते कार्य्यमनेनेति करः। गिरत्यनेनेति गरः। गलः। द्व्याद्युपसर्गहीनस्य छादेर्ह्रस्वो ऽप्रत्यये। परिच्छदः। छत्रम्। दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छदः। ओष्ठः। द्व्यादिकिम्। अन्ववप्रच्छादः। समवपरिच्छादः।

सुबोधिनी- स्वरादः। स्वरांताद्धातोरप्रत्ययः स्यात् भावादौ। घञोपवादः। चिञ् चयने चयः। णीञ् प्रापणे। नयः। षिञ् बंधने। विपूर्वः विषयः। ष्टुञ् स्तुतौ। स्तवः। 'स्तवः स्तोत्रं स्तुतिर्नुतिरित्यमरः'। लुञ् छेदने। लवः। 'लवलेशकणाणव इत्यमरः' क्वविक्षेपे। करः। गॄ निगरणे। गरः॥

मू०-मदामः॥ मदादीनामप्रत्ययो भावादौ। मदः। पणः। प्रमदः। संमदः। शमः। आश्रमः।

(सुबोधिनी-) मदामः। मदादिभ्योऽप्रत्ययः स्यात् भावादौ। मदी हर्षे। मदः प्रमदः संमदः। पण व्यवहारे स्तुतौ च। पणः। शमु उपशमे। श्रमू तपसि खेदे च श्रमः॥

(तत्त्वदीपिका-) मदामइति। मदइति। मद्यतेनेनेतिकरणादावपि। कथंप्रमादोनवधानतेति। बाहुलकाद्घञपि। यद्वा मद एव माद इति स्वार्थिकणान्तस्यप्रशब्देन पश्चात्समासः। सम इति। अथ कथं विश्राम इति अपाणिनीयमिति तु दीक्षितः। विश्रामं लभतामिदं च शिथिलं ज्याबद्धमस्मद्धनुरित्यादौ तु विश्रान्तिपदप्रक्षेपेणाप्युपपत्तिः विश्रामभूरिति त्वन्याय्यमेवेति वामनादयः। वस्तुतस्त्वत्रापिप्रमादशब्दवत्समाधानं।

मू०-मूर्तौघनः॥ काठिन्ये परिच्छेदे च हन्तेरप्रत्ययो घनादेशश्च। दधिघनः। सैन्धवघनः।

(सुबोधिनी-) मूर्तौघनः। मूर्तिः काठिन्यं तस्मिन्नभिधेये हंतेरः स्यात् धातोर्घनादेशश्च। कठिनं दधि इति दधिघनः। परिच्छेदे सैंधवघनः॥

(तत्त्वदीपिका-) मूर्तौघनइति। मूर्त्तिः काठिन्यं।

सू०—हनोवधोऽप्रत्ययश्च ॥ हननमिति वधः ।

(सुबोधिनी—) हनोवधोऽप्रत्ययश्च । अनुपसर्गाद्धंतेर्भावे अप्रत्ययः स्यात् धातोर्वधादेशश्च । वधः । चकारात् घञपि । हनोघदिति घदादेशः । घातः ॥

सू—ट्वितोऽथुः ॥ ट्वितोधातोरथुर्भवति भावादौ । टुवेपृ कम्पने वेपनं । वेपथुः । वमथुः । नन्दथुः । श्वयथुः ।

(सुबोधिनी—) ट्वितोथुः । अयमपि स्वभावाद्भावे एव । टुवेपृ कंपने । वेपथुः । टुणदि समृद्धौ । नंदथुः टुओश्विइर् गतिवृद्धयोः श्वयथुः ॥

(तत्त्वदीपिका--) ट्वितोथुरिति । टुरित्यस्य स ट्वित् तस्मात् ।

सू०—ड्वितस्त्रिमक्तत्कृते ॥ ड्वितो धातोस्त्रिमक् प्रत्ययो धात्वर्थेन कृतेर्थे । करणेन निर्वृतः कृत्रिमः घटः । पक्त्रिमः ।

(सुबोधिनी-)ड्वितस्त्रिमक्ततत्कृते । धात्वर्थनिर्वृतेऽर्थेऽयं स्वभावाद्भावे । किच्वात्संप्रसारणादि । डुकृञ् करणे करणेन निर्वृतः कृत्रिमः । डुपचष् पाके । पाकेन निर्वृतः पक्त्रिमः । डुवप् बीजतंतुसंताने । वापेन निर्वृतं यजामिति संप्रसारणं । उप्त्रिमं ॥

(तत्त्वदीपिका--) ड्वितइति । डुइत्यस्य स ड्वित् तस्मात् । तत्कृतेइति । तेन धात्वर्थेन कृतस्तत्कृतस्तस्मिन्नित्यर्थः । यद्यपि भावादावित्यनुवर्त्तते तथापि स्वभावात् भाव एवैतद्द्वयं नहि कृतेन निर्वृत्तमित्येवं कापि विग्रहः ।

सू०—नङ्की ॥ धातोर्नङ्की प्रत्ययो भावादौ । यज इज्यन्ते देवा अनेनेति यज्ञः । याच्ञा । यतीति यत्नः । प्रच्छविच्छोशोनेऽसम्प्रसारणं च । प्रश्नः । विश्नः।रक्ष पालने । रक्ष्णः । स्वप्नः । अन्तः धीयते यः सः अन्तर्द्धिः । आधिः । विशेषेण जनेषु पीडा आधीयते ऽनेनेति व्याधिः । प्रकर्षेण दधाति रथमार्गमनेनेति प्रधिः । वारि धीयतेऽस्मिन्निति वारिधिः । पाथः धीयतेऽस्मिन्निति पाथोधिः ।

(सुबोधिनी—) नङ्की । ङकारककाराविती एतौ भावे ऽकर्तरि कारके च भवतः । नङ्प्रत्ययमाह । क्ङितिं चेति गुणो न । यज देवपूजादौ । श्चुत्वं यज्ञः । यज्ञः सवोऽध्वरो याग इत्यमरः '। टुयाचृ याच्ञायां । याच्ञा । यती प्रयत्ने । यत्नं । क्ङिति झसेकौञमेचेत्यनेन प्रच्छविच्छोःशोने । प्रच्छ ज्ञीप्सायां । ग्रहामिति संप्रसारणं न । भाष्याऽनुक्तत्वात् । प्रश्नः । विश प्रवेशने । विश्नः । रक्ष पालने । रक्ष्णः । ञिष्वप् शये । स्वप्नः । किप्रत्ययमाह । डुधाञ् धारणादौ आतोनपीत्यालोपः । अंतर्द्धिः । प्रधिः । पयांसि धीयंते ऽस्मिन्निति पयोधिः । वारिधिः।डुदाञ् दाने अदादिः

(तत्त्वदीपिका--) नङ्कीति । नङ् च किश्च नङ्की । यज्ञ इति यजनं यज्ञः । यज्ञा-

२२

र्थात्कर्मणोऽन्यत्र लोकोयं कर्मबंधन इत्यत्र तु। इज्यतइति यज्ञो विष्णुरिति कर्मणि व्याख्यानम्। याच्ञेति। यद्यपि नङन्ताः पुंस्येव तथाप्ययं स्त्रीलिंगः स्वभावात्। प्रश्न इति। संज्ञापूर्वकत्वेनानित्यत्वान्नसंप्रसारणं। अंतर्द्धिरिति कित्वादातो लोप इत्यालोपः आधिरिति। आदानमादीयत इति वा। वारिधिरिति। वारीणि धीयन्तेऽस्मिन्निति वारिधिः।

सू०--युट्भावेच ॥ ज्ञानम्। करणम्। कारणम्।

(सुबोधिनी-) युट्भावेच। धातोर्भावे युट्स्याच्चकारात्। युण् च। युवोरित्यनादेशः। टित्वादीप्। ञित्वाद्वृद्धिः। ज्ञा अवबोधने। ज्ञानम्। डुकृञ् करणे। युण् प्रत्ययः। कारणम्॥

सू०—साधनाधारयोश्च ॥ पच्यतेऽनेनेति पचनोऽग्निः। पच्यतेऽस्यां पचनी। स्थाली।

(सुबोधिनी-) साधनाधारयोश्च। साधने ऽधिकरणे चाऽर्थे धातोर्युट् प्रत्ययः स्यात्। डुपचष् पाके। पच्यतेऽनेनेति पचनः। अत्र करणे युट्। षित्वत इतीप् पच्यतेऽस्यामित्यधिकरणे युट्। पचनी॥

सू०--ईषद्दुःसुषुखल्यू॥ईषदादिषु प्रयुज्यमानेषु खल्यू एतौ भावादौ। ईषद्भवः दुर्भवः। सुकरः। दुःखेन युध्यतेऽस्मादिति दुर्योधनः। दुःखेन शिष्यते इति दुश्शासनः।कर्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपपदेषु भूकृञोः खल्। अदुराढ्येन दुराढ्येन भूयते दुराढ्यंभवं भवता। अस्वाढ्यः स्वाढ्यः क्रियते स्वाढ्यंकरः।

(सुबोधिनी-) ईषद्दुःसुषुखल्यू। एषुपपदेषु धातोः खल् यू प्रत्ययौ स्तः भावे कर्मणि च खल्प्रत्ययमाह। खित्त्वात् खितिपदस्येति मुम्। भू सत्तायां। ईषद्भवः। दुर्भवः। डुकृञ् करणे। सुकरः। युप्रत्ययमाह। युध संप्रहारे। दुःखेन युध्यते इति दुर्योधनः। दुःखेन शिष्यते इति शासु अनुशिष्टौ। दुःशासनः। दुरिति कृच्छ्रार्थे वर्त्तते इतरौ त्वकृच्छ्रार्थे वर्तेते कर्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपपदेषु भूकृञोः खल्। कर्तृकर्मवाचकौ शब्दौ धातोरव्यवधाने तु प्राक् प्रयुज्येते। ईषदादयस्तु ताभ्यां प्राक् प्रयोज्याः दुःखेनाढ्येन भूयते इति दुराढ्यंभवं भवता। अक्तादाविति निषेधात् कर्तरितृतीया सुखेनानाढ्यः क्रियते स्वाढ्यंकरः सः।

(तत्त्व०-) ईषदुःसुषु खल्यू। खल्यू लकार इखखीत्यत्रोक्तात्खप्रत्ययाद्भेदज्ञापनार्थः खकारो मुमागमार्थः ईषद्भवइति। ईषद्भवनं। (प्राथकस्य प्रत्ययः।)

सू०—तव्यानीयौ ॥ भावकार्ययोः। एधितव्यं। एधनीयं। आसितव्यं। आसनीयं। पातव्यम्। पानीयम्।

(सुबोधिनी–) कृत्यसंज्ञकान् प्रत्ययानाह तव्यानीयौ । धातोरेतौ प्रत्ययौ स्तः भावकर्मणोः । तव्यप्रत्ययमनीयप्रत्ययं चाह । एध वृद्धौ कृत इतीट् एधितव्यं। एधनीयं त्वया । आस उपवेशने । आसितव्यं । आसनीयं । भावे औत्सर्गिकमेकवचनं क्लीबत्वं च ॥

(तत्त्वदीपिका–) तव्यानीयाविति । एधनीयमिति । भावे एकवचनमेव । औत्सर्गिकत्वात् क्लीबत्वं च लिंगविशेषात् । कृत्यानां कर्तरि वा षष्ठी ॥

मू०--वसेस्तव्यःकर्त्तरिणिच्च ॥ वसतीति वास्तव्यः ।

(सुबोधिनी–) वसेस्तव्यःकर्तरिणिच्च । वस निवासे इत्यस्यैव ग्रहणं न तु वस आच्छादने इत्यस्य । लुग्विकरणत्वात् । वस निवासे अस्मात् कर्तरि तव्यः। स्यात् । स च णित् । णित्वाद्वृद्धिः ॥

(तत्त्व०-)वसेरिति । वसति वस निवासे इत्यस्यैव ग्रहणं नतु वस आच्छादन इत्यस्यः। वास्तव्य इति णित्वाद्वृद्धिः ।वास्तुनि भवो वास्तव्य इति ण्यप्रत्ययेणैव रूपसिद्धिमिच्छन्तः केचिदेतन्न मन्यंते ।

मू०--केलिमः ॥ सौकर्ये धातोः केलिमः प्रत्ययो भवति । पचेलिमा माषाः । भिदेलिमाः सरलाः ।

(सुबोधिनी–) केलिमः । धातोः कर्मणि केलिमः प्रत्ययः स्यात् । कित्वान्न गुणः । भिदिर् विदारणे । भिदेलिमाः सरलाः । डुपचष् पाके । पचेलिमा माषाः । पक्तव्या इत्यर्थः ॥

मू०--स्वराद्यः॥ स्वरांताद्धातोर्यः । चेयम् । जेयम् । तव्यादयोऽपि । चेतव्यः । चयनीयः । दित्स्यम् ।

(सुबोधिनी--) स्वराद्यः । स्वरग्रहणं धातोर्विशेषणं विशेषणेन तदंतविधिः चिञ् चयने । चेयम् । जि जये । जेयं । तव्यादयोपि भवंति । चेतव्यः । चयनीयः । डुदाञ् दाने अस्मादिच्छायामात्मनः स इति सः .। इस्से इति इसादेशः द्वित्वलोपश्च। सस्तोनपीति सस्य तः । दित्सति । सांताद्यप्रत्यये यत इत्यलोपः दित्स्यते इति दित्स्यम् ॥

(तत्त्वदीपिका–)स्वराद्य इति । यद्भाव्यं तद्भविष्याति इत्यत्र तु ओरावश्यक इति घ्यण् । अत्र स्वरग्रहणं चिंत्यं धातोर्द्विविधत्वेनैव हसान्ताद्घ्यणो विधानेन परिशेषात्स्वरान्तलाभात् । यदि तु यत इत्यत्रानपीति विषयसप्तमी तदाभूतपूर्वस्वरान्तादपि यदित्येतदर्थं स्वरग्रहणं। तेन दित्स्यमित्यादौ एव । वस्तुतस्तत्र स्वरप्रयोजनाभावात् घ्यण्यपि न क्षतिरिति ध्येयं।

मू०--ईचातः ॥ आदन्ताद्धातोर्य आकारस्य च ईकारः । देयम् । ग्लेयम् । गेयम् ।

(सुबोधिनी-) ईचातः। डुदाञ् दाने। देयं। गै शब्दे गेयं। ग्लै हर्षक्षये ग्लेयं॥

(तत्त्वदीपिका-) ईचातइति। ह्रस्व एव सुपठः। यत्तु वासुदेवेनोक्तं दीर्घेकारविधानं खेयमित्यत्र चकारात्खनेर्ये नस्येत्वे रूपसिद्धये। अन्यथापक्षे आत्वं स्यादिति तद्भाष्यविरोधादुपेक्ष्यम्।

मू०--पुशकात्॥ पवर्गांताच्छकादेश्च य प्रत्ययः। शप्यम्। यम्यं। जप्यम्। शक्यम्। सह्यम्।

(सुबोधिनी-) पुशकात्। अत्र घ्यण् न भवति तव्यादयस्तु स्युरेव। शप उपालंभे। शप्यम्। यमु उपरमे। यम्यं। जप व्यक्तायां वाचि। जप्यम्। शकादेस्तुः शकॢ शक्तौ। शक्यं। षह मर्षणे। सह्यं॥

(तत्त्वदीपिका-) पुषकादिति। पुश्च शकश्च पुशकं तस्मात्।

ऋहसान्ताद्घ्यण्॥ ऋवर्णान्तात् हसान्ताद्धातोर्घ्यण्। भावकार्ययोः। कार्यं हार्यम्। वाह्यम्। घात्यम्। वाक्यम्। पाक्यम्। रोग्यम्।

(सुबोधिनी-) ऋहसांताद्घ्यण्। ऋ इति धातोर्न ग्रहणं। किंतु ऋवर्णस्य हसासाहचर्यात् घित्त्वाच्चजोः कगाविति कगौ। णित्त्वाद्वृद्धिः डुकृञ् करणे। कार्यं। हृञ् हरणे। हार्यं। वह प्रापणे। वाह्यं। हन हिंसागत्योः हनो घादिति घत्। घात्यम्। डुपचष् पाके। पाक्यम्। रुज् रोगे। रोग्यम्। वच परिभाषणे वाक्यम्॥

(तत्त्व०-)ऋहसान्तादिति।आच हसश्च ऋहसं तस्मात्। घो वित्कार्यार्थः।णो वृद्ध्यर्थः।

मू०--घ्यणिक्वचित्कुत्वाभावः॥ याज्यम्। याच्यम्। वाच्यम्। रोच्यम्। अर्च्यम्।

(सुबोधिनी-) घ्यणिक्वचित्कुत्वाभावः। यज् याच् प्रवच् रुच् एषां कुत्वं न घ्यणि। यज देवपूजादौ। याज्यं। टुयाचृ याञ्चायां। याच्यं। वच परिभाषणे प्रपूर्वः। प्रवाच्यं ग्रंथविशेषः। रुच् दीप्तौ। रोच्यं। ऋच स्तुतौ। अर्च्यम्। ऋदुपधात् क्विपि तु न भवति॥

मू०--ओरावश्यके॥ उवर्णान्तादावश्यकेऽर्थेघ्यण्।

(सुबो०-) ओरावश्यके। अवश्यमेवेत्यावश्यकं तस्मिन्॥

(तत्त्व०-) ओरावश्यक इति। अवश्यं भाव आवश्यकं। अवश्यमेष्टिलोपस्तद्धिते। अव्ययत्वात्।

मू०--ओदौतोर्यस्स्वरवत्॥ ओकारौकारयोर्निमित्तं यः प्रत्ययः स्वरवत्। 'लुम्पेदवश्यमः कृत्ये तुम्काममनसोरपि। समो वा हिततत्योर्मांसस्य पचि युड्घञोः।' अवश्यं भाव्यो ऽवश्यभाव्यः। भो-

भुक्तुकामः। श्रोतुमनाः। संहितम्, सहितं। संततम्, सततम्। मांसस्य पचनम्। मांस्पचनम्, मांसपचनम्। मांसस्य पाकः। मांस्पाकः, मांसपाकः।

(सुबोधिनी-) ओदौतोर्यः स्वरवत्। यं प्रत्ययं निमित्तत्वेनाश्रित्य गुणेन यत्र ओकारो भवति वृद्ध्या च यत्र औकारो भवति स च प्रत्ययः स्वरवद्भवतीत्यर्थः। 'लुंपेदवश्यमः कृत्ये तुम्कामनसोरपि। समो वा हिततततयोर्मांसस्य पचि युड्घञोः' अवश्यमनिपातस्यांऽत्यं लुंपेत्। लोपं कुर्य्यात्। कृत्ये कृत्यसंज्ञके प्रत्यये परे। यथा अवश्यलाव्यः। तुम्प्रत्ययस्यांत्यं लुंपेत् काममनसोः शब्दयोः परयोः। यथा भोक्तुकामः। श्रोतुमनाः। समुपसर्गस्यांत्यं वा लुंपेत् हिततत्तयोः शब्दयोः परयोः। यथा सहितं, संहितं। सततं, संततं। मांसशब्दस्यांत्यं वा लुंपेत्। पचिप्रकृतियुट्घञ्प्रत्यययोःपरयोः। यथा मांस्पचनं मांसपचनं। मांसपाकः। मांस्पाकः॥

(तत्त्व०-) वातितार्थस्यापि क्वचित्प्रयोगो दृश्यते। लाघवं प्रत्यनादरादित्यत आह। अवश्यलाव्यं।

मू०- हनोवधादेशोये॥ वध्यम्।

(सुबोधिनी-) हनोवधादेशोये। हन हिंसागत्योरस्मात् यप्रत्ययः स्यात् धातोर्वधादेशश्च। वध्यः। पक्षे घ्यणपि। हनोघदिति घत् घात्यः॥

मू०- ऋदुपधात्क्यप्॥ ऋकारोपधाद्धातोः क्यप्। कृती कृत्यम्। वृत्यम्।

(सुबोधिनी-) ऋदुपधात्क्यप्। कित्वाद्गुणो न पित्वात् ह्रस्वस्यपितीति तुक् कृती छेदने। कृत्यं। वृतु वर्त्तने। वृत्यं। वृधु वृद्धौ। वृध्यम्। तपकरणं किं। कॄत संशब्दने। युट् कीर्तनम्॥

(तत्त्व०--) ऋदुपधादिति तपरत्वाद्दीर्घोपधान्न तेन कृत इतिकीर्त्य।

मू०-कृपिचृत्योर्न॥ कल्प्यम्। चृत दीप्तौ। चर्त्यम्।

(सुबोधिनी-) कृपिचृत्योर्न। आभ्यां क्यप् न स्यात्। घ्यण्। कृपू सामर्थ्ये। कल्प्यं चृती हिंसायां। चर्त्यं॥

मू०-- मृजोवा॥ मृज्यम्। मार्ग्यं।

(सुबोधिनी-) मृजोवा। ऋदुपधादिति नित्यं प्राप्ते विकल्पार्थमारंभः। मृजूष् शुद्धौ। मृज्यम्। क्यबभावेघ्यण्। मृजेर्वृद्धिरिति वृद्धिः। चजोरिति गः मार्ग्यः॥

मू०-भुवोभावे॥ नाम्न्युपपदे भुवो भावे क्यप्। ब्रह्मणो भावः। ब्रह्मभूयम्। नाम्नि किम्। भव्यम्।

(सुबोधिनी-) भुवोभावे। भू सत्तायां। ब्रह्मभूयं। नाम्न्युपपदे इति किं। भव्यं। स्वरान्तात् इति यः॥

मू०— इणुस्तुभृद्वृशासुजुषृखनःक्यप्च ॥ इत्यः । स्तुत्यः । दृङ्आदरे । दृत्यः । वृत्यः । शासेरिः । शिष्यः । जुषीप्रीतिसेवनयोः।जुष्यः।

(सुबोधिनी-) इणुस्तुभृद्वृशासुजुषृखनःक्यप्च । एभ्यो धातुभ्यः क्यप् स्यात् इण् गतौ इत्यः । ष्टुञ् स्तुतौ । स्तुत्यः । वृ इति वृञ् वरणे इत्यस्य ग्रहणं । वृङ्सं भक्तावस्मात्तु घ्यणेव । वार्यः । दृ आदरे । दृत्यः । भृञ्भरणे । भृत्यः । कर्मकरः भर्त्तव्य इत्यर्थः। क्रियाशब्दोयं न तु संज्ञा। शासु अनुशिष्टौ । शासेरितीत्वम् । घसादेरिति षः । शिष्यः । जुषी प्रीतिसेवनयोः । जुष्यः ॥

(तत्त्व०--)इणुस्तु । वृ इति वृञ् नतु वृङ् तस्यवार्यः ऋत्विजः घ्यणेव । शासु अनुशिष्टौ । शासु इच्छायामपीति कश्चित् स्वरभेदार्थमेव ।

मू०— खनइत्वंक्यपि ॥ खेयम् ।

(सुबोधिनी-) खनइत्वंक्यपि । खन खनने इत्यस्य नस्य इत्वं स्यात् क्यपि खेयं ॥

मू०- भिद्योद्ध्यौनदे ॥ भिनत्ति कूलमिति भिद्यः । उज्झति जलमित्युद्ध्यः ।

(सुबोधिनी-) भिद्योद्ध्यौनदे । भिदिर् विदारणे । उज्झ त्यागे । आभ्यां क्यप् स्यात् कर्तरि उज्झेर्धत्वं च निपात्यते नदे वाच्ये। भिनत्ति कुलमिति भिद्यः । उज्झत्युदकमिति उद्ध्यः । नदे किं । भेत्ता । उज्झिता तृप्रत्ययः ॥

(तत्त्वदीपिका-) भिध्यौद्ध्यौ । धत्वं निपात्यं । नदेइति । भेत्ता । उज्झिता ।

मू०— कृवृषोर्वाक्यप् ॥ कृत्यम् । कार्यं । वृष्यम् । वर्ष्यम् ।

(सुबोधिनी-) कृवृषोर्वाक्यप् । कर्त्तरि । डुकृञ् करणे । वृषु सेचने । आभ्यां वा क्यप् स्यात् । करोतेः क्यप् अप्राप्तौ वृषस्तु ऋदुपधादिति नित्यं प्राप्ते विकल्पः । ह्रस्वस्य पितीति तुक् कृत्यम् । वृष्यम् । क्यबभावपक्षे घ्यण् । कार्यम् । वर्ष्यम् ॥

मू०— पुष्यसिध्यौनक्षत्रे ॥ पुष्णन्ति कार्याण्यस्मिन्निति पुष्यः । सिध्यंति कार्याण्यस्मिन्निति सिद्ध्यः ।

(सुबो०—)पुष्यसिद्ध्यौनक्षत्रे । पुष पुष्टौ । षिधु गत्यां आभ्यामधिकरणेऽर्थे क्यप् निपात्यते पुष्यः। सिद्ध्यः।नक्षत्रे किम्। पोषणं। सेधनं ।साधनाधारयोरिति युट् ।

मू०— राजसूयादयः ॥ राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः । राजसूयः । सरत्याकाशे सूर्यः ।

(सुबोधिनी-) राजसूयादयः । क्यबंताः शब्दा निपात्यंते । षुञ् अभिषवे । राज्ञा सोतव्यः इति राजसूयः । अभिषवद्वारा निष्पादयितव्य इत्यर्थः । यद्वा राजा

सूयते कंडयतेऽत्रेति राजसूयः। राजेति सोमः अधिकरणे क्यप्। निपातनाद्दीर्घः अर्द्धर्चादित्वात् पुन्नपुंसकः सृ गतौ। सरत्याकाशे इति सूर्यः। कर्तरिक्यप् निपातनादुरादेशः र्वोर्विहसेति दीर्घः। यद्वा षू प्रेरणे तुदादिः। सुवति कर्मणि लोकं प्रेरयतीति सूर्यः। क्यपोरुट् निपातनात् ॥

(तत्त्वदीपिका) राजसूयादय इति लतात्मकः सोमोराजा ससूयतेकण्ड्यतेऽत्रेति अधिकरणे क्यप् निपातनाद्दीर्घः अर्द्धर्चादिरयं। सूर्यइति। सरत्याकाशे। सुवति कर्मणि लोकं प्रेरयति वा।

मू०- तव्यादयोऽर्हेर्थेविधौशक्तौचवक्तव्याः॥ दर्शनार्हो द्रष्टव्यः। दर्शनीयः। दृश्यः। स्वाध्यायोऽध्येतव्यः। अध्ययनीयः। अध्येयः श्रोतव्यः। मंतव्यः। वोढव्यः। तव्यादीनांकृत्यसंज्ञा।

(सुबोधिनी-) तव्यादयोऽर्हेर्थेविधौशक्तौचवक्तव्याः। दृशिर् प्रेक्षणे ऽस्मात्तव्यप्रत्यये गुणे कृते रारोझसेदृशामिति रः छशषेति षत्वं ष्टुत्वं। द्रष्टव्यः। अनीयप्रत्यये तु दर्शनीयः। क्यपि तु दृश्यः। इङ् अध्ययने ऽस्मात्तव्यप्रत्यये गुणे कृते अध्येतव्यः। अनीये तु अध्ययनीयः। यप्रत्यये अध्येयः। श्रु श्रवणे! श्रोतव्यः। श्रवणीयः। क्यपि तु श्रुत्यः। मन ज्ञाने। मंतव्यः। मननीयः। वह प्रापणे। अस्मात्तव्यप्रत्यये होढ इति ढत्वे तथोर्द्ध इति धत्वं ष्टुत्वं ढिढोलोप इति ढलोपपूर्वदीर्घौ सहवहोरित्योत्वं वोढव्यः। वहनीयः। कृत्यक्तखलार्थाः प्रत्ययाः भावकर्मणोर्भवंति॥ इतिकृत्यप्रत्ययाः॥

मू०- स्त्रियांयजांभावे॥ यजादेर्धातोःस्त्रियांभावे क्यप्। इज्या। व्रज्या। समज्या। निषद्या। निपत्या। मन्या। विद्या। सुत्या। शय्या। भृत्या। इत्या। कृत्या।

(सुबोधिनी--) स्त्रियांयजांभावे। क्यप्प्रत्ययमाह। पित्त्वात्तुक् कित्त्वाद्गुणनिषेधः संप्रसारणं च। यज देवपूजादौ। यजामिति संप्रसारणं यजनमिज्या। व्रज गतौ व्रजनं व्रज्या। अज गतौ क्षेपणे च। समजंतस्यामिति समज्या सभा। अजेः क्यपि वीभावो न निपातनात्। षद्लृ विशरणादौ। निषीदंत्यस्यामिति निषद्या आपणः। प्रादेश्चेति षत्वं पतॢ पतने। निपतंत्यस्यामिति निपत्या। पिच्छिला भूमिः। मन ज्ञाने मन्यतेऽनयेति मन्या गलपार्श्वनाडी। विद ज्ञाने। विदंत्यनयेति विद्या। षुञ् अभिषवे। ह्रस्वस्येति तुक्। सुत्या। अभिषवः। शीङ् स्वप्ने। शेरतेऽस्यामिति शीङो यङ्। येङ्किंतीत्ययङ्। शय्या। डुभृञ् धारणादौ। भृत्या। जीविका। इण् गतौ। ईयतेऽनयेति इत्या। शिविका। डुकृञ् करणे। कृत्या॥

(तत्त्वदी०) स्त्रियां यजामिति । बहुवचनमाद्यर्थं । तेनयजशीङ् व्रजविदः षुञ्शु मनविद्भृञ्अटाटचः इण समज निषद निपत कृञ् हन् एषां ग्रहणं । इज्येति । किलात्संप्रसारणं । समज्या सभा । निषद्या । आपणः । निपात्या पिच्छिला भूमिः मन्यतेऽनया । कुद्धादिरिति मन्या गलपार्श्वशिरा । विद्यते ज्ञायतेऽर्थतत्त्वमनया विद्या सूयते सोमोऽत्रेति सूत्याऽभिवा दिवसः। शय्यतेऽस्या शय्यां खट्वादि । भरणं भृत्यवेतनं।ईयत गम्यतेऽनयेति इत्य शिबिकादिः । भृतिर्मतिरासूतिरिति तु सूत्रेषु निपातनात्।

मू०— कृञोयग्वा ॥ अयकि । क्रिया । इषेरिच्छेति निपातः। इषेरपुच्छत्वादेशः। इच्छा । सर्तेर्गुणः । परिसर्या । अटाटचा । आस्या जागर्तेर्गुणः । जागर्या ।

(सुबोधिनी--) कृञोयक्वा । करोतेर्यक् प्रत्ययो वा स्यात । यक् प्रत्ययाभावे शप्रत्ययो निपातनात् भवति भावकर्मणोरर्थयोः यक्प्रत्यये अयकीति रिङ् आप् च । क्रिया । इषु इच्छायामस्मात् शप्रत्ययो निपात्यते शित्त्वाच्चतुर्वत्कार्यं तेन गमामितिछः । आवत इत्याप् । इच्छा । सृ गतौ । अस्मात् शप्रत्ययकप्रत्ययौ निपात्येते धातोर्गुणश्च । शप्रत्यये यकूचतुर्ष्विति यक् यत इत्यल्लोपः आप् । परिसर्पणंपरिसर्या । यकि तु निपातनाद्गुणः । परिसर्या । अट गतौ । अस्मादापि शयकौ निपात्येते शप्रत्यये तु यकूचतुर्ष्विति यक् यत इत्यल्लोपः निपातनात् । टचशब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घावपि निपातनात आवत इत्याप् । अटाटचा । याकि तु टचशब्दस्य द्वित्वं यकारानिवृत्तिर्दीर्घौ पूर्ववदेव । अटाटचा । अन्ये तु अटगतावस्मात् सूचिसूत्रिमुत्र्यटीति यङ्स्वरादोरिति टचशब्दस्य द्वित्वं आत इति पूर्वस्यात्वं । अटाटचेत्यस्मात् प्रत्ययांतादीत्यङ् प्रत्ययः अनापिचेति यलोपः यत इत्यलोपः आप्च आटाटचा । आस उपवेशने निपातनाद्यक् आस्या । जागृ निद्राक्षये । अस्मात् शयगकारप्रत्यया निपातनाद्भवंति शप्रत्यये शित्त्वाच्चतुर्वत्कार्य्यं तेन यकूचतुर्ष्विति यक् जागर्तेर्विइण् णप् ङितुमिन्नेति गुणः आप् च । जागर्या । यकि तु जागर्तेरिति गुणः । जागर्या । आकारप्रत्यये गुणः । जागरा ॥

(तत्त्वदीपिका--) इच्छेति इच्छादयां निपात्याः परिसर्येति । परिसरणं ।

मू०— हनस्तः ॥ हत्या ।

(सुबोधिनी—) हनस्तः । अनुपसर्गे नाम्न्युपपदे हंतेर्भावे क्यप् स्यात् धातोर्नस्य तश्च । ब्रह्मणो हननं ब्रह्महत्या ॥

मू०- क्तिः ॥ धातोः क्तिः स्त्रियां भावे । कृतिः । बुद्धिः । स्मृतिः । अमान्तस्य दीर्घः । शान्तिः । दान्तिः । कान्तिः । क्षान्तिः । ह्वेञ् हूतिः । ऊढिः । स्फातिः ।

(सुबोधिनी-) क्तिः । धातोः स्त्रीलिंगे भावादौ क्तिप्रत्ययः स्यात् । घञोऽपवादः । डुकृञ् करणे । कृतिः । बुध अवगमने । तथोर्द्ध इति तस्य धः झभेजबा इति पूर्वधस्य दः । बुद्धिः । स्मृ चिंतायां । स्मृतिः शमु दमु उपशमे । कमु कांतौ । क्षमूष् सहने ग्मांतस्य क्ङितीति दीर्घः । शांतिः । दांतिः । कांतिः । क्षांतिः ।

(तत्त्वदीपिका--) क्तिः स्त्रियां यजामित्यतः स्त्रियामनुवर्त्तते ।

सू०--हवक्त्योर्नेट् ॥ संशीतिः

(सुबोधिनी-) हवक्त्योर्नेट् । हवप्रत्याहारःक्तिप्रत्ययस्तयोरिण्न स्यात् । शीङ् स्वप्ने । संशीतिः ॥

(तत्त्व०-) हवक्त्योरिति । हव प्रत्याहारः हवश्च क्तिश्च हवक्ती तयोरित्यर्थः ।

सू०- ग्रहादीनामिट् ॥ निगृहीतिः ।

(सुबोधिनी-) ग्रहादीनामिट् । ग्रहादीनां क्तिप्रत्ययस्येट् स्यात् । ग्रह उपादाने । ग्रहामिति संप्रसारणं इटो ग्रहामिति दीर्घः । निगृहीतिः । पठ व्यक्तायां वाचि । निपठातिः ॥

(तत्त्व०-) ग्रहादीनामिति । पूर्वेण निषेधे प्राप्ते वचनं । स्फायी । फीतिः। बवयोरिति यलोपः फीतिकाम इत्यत्र क्तांतात् औप्रत्यये समाधेयं न च फायः फीतिकितीत्युक्तेरचापि भविष्यतीति वाच्यं । क्तक्तवत्वोरेव तत्राधिकृतत्वेन लाभात् नान्यस्य ।

सू०- ग्लादेर्निः ॥ ग्लानिः । म्लानिः । त्वरतेर्वस्योत्वम् । तूर्णिः ।

(सुबोधिनी-) ग्लादेर्निः । ग्लादेर्धातोर्निः प्रत्ययः स्यात् । ग्लै म्लै हर्षक्षये। ग्लानिः । म्लानिः । ञित्वरा संभ्रमे जरत्वरेत्यूः तूर्णिः ॥

सू०- ऋल्वादिभ्यःक्तेर्निः ॥ कीर्णिः । गीर्णिः । लूनिः । धूनिः ।

(सुबोधिनी-) ऋल्वादिभ्यःक्तेर्निः । ऋदंतात् ल्वादिभ्यश्च परस्य क्तेस्तस्य निः स्यात्। कॄ विक्षेपे । ऋत इरीतीर् । य्वोर्विहसे इति दीर्घः । कीर्णिः । गॄ निगरणे । गीर्णिः । लूञ् छेदने लूनिः धूञ् कंपने । धूनिः ॥

सू०- संपदादेःक्विब्वा ॥ संपदनं सम्पत् । संपत्तिः । कर्तरि क्तिः।

(सुबोधिनी-) संपदादिभ्यःक्विब्वा । पक्षे क्तिः । पद गतौ । संपत् । विपत्। संपत्तिः । विपत्तिः कर्तरिक्तिः ॥

सू०- संज्ञायाम् ॥ प्रकुरुते इति प्रकृतिः ।

(सुबोधिनी-) संज्ञायां । धातोः कर्तरि क्तिः स्यात संज्ञायां वाच्यायां । प्रकुरुते इति प्रकृतिः ॥

सू०- षिद्भिदामङ् ॥ षितोधातोर्भिदादेश्च स्त्रियामङ् । पचा । मृगया ।

(सुबोधिनी—) षिद्भिदादिभ्योऽङ् । षितो धातोर्भिदादिभ्यश्च स्त्रियामङ् स्यात् । डुपचष् पाके । आबत इत्याप् । पचा । मृजूष् शुद्धौ । मृजा । भिदिर् विदारणेऽर्थे भिदा । अन्या भिद्यते इति भित्तिः । कुड्यं । कथं तर्हि 'मुखाब्जं गंधलब्धे रिति माघः । प्रेक्षोपलब्धिश्चित् संविदित्यमरश्च' । षित्त्वादिङ्प्रत्यय उचितः । सत्यं । अनर्थकास्तु प्रतिवर्णमनुपलब्धेरिति भाष्यप्रयोगाद्बाहुलकात् क्तिः प्रत्ययोपि बोध्यः ॥

(तत्त्व०--) षिद्भिदामिति । ष इद्येषां ते षितः तेच भिदश्च तेषां भिदेरिति । विदारणे एव । अन्यत्र भित्तिः छित्तिः ।

मू०— ऋतोऽङ्गिगुणः ॥ जरा । भिदा । छिदा । क्षिपा । गुहा ।

(सुबोधिनी—) ऋतोऽङ्गिगुणः । ऋतो धातोर्गुणः स्यात् अङि परे । जॄष् इर् वयोहानौ । जरा । छिदिर् द्वैधीकरणे । छिदा । द्वैधीकरणे एवायं । अन्यत्र तु छिद्यते इति छित्तिः । छिद्रं । कृपेः संप्रसारणं च । क्रप कृपायामस्य संप्रसारणं स्यात् अङि परे । कृपा । क्षिप प्रेरणे । क्षिपा । गुहू संवरणे । गुहा ॥

(तत्त्व०--) गुहेति । कंदरौषध्योः अन्यत्र गूढिः ।

मू०- गुरोर्हसात् ॥ गुरुमतो हसान्तात्स्त्रियामङ् । नक्तिः । ईहा । ऊहा । कुण्डा ।

(सुबोधिनी—) गुरोर्हसात् ॥ ईह चेष्टायाम् । ईहा । ऊह वितर्के । ऊहा । कुडि दाहे । कुंडा । गुरुमत इति किं । भक्तिः । हसांतादिति किं नीतिः ॥

(तत्त्वदीपिका—) गुरोरिति । हसेन धातोर्विशेषणात्तदन्तलाभ इत्याह हसान्तादिति । तथा च तादृशसमुदायो न गुरुर्भवितुमर्हतीति गुरुपदं तद्वल्लक्षकमित्याशयेनाह । गुरुमत इति । प्रशंसायां रूप इत्यादिनिर्देशाद्विपर्ययोपि नाशक्यः ।

मू०— प्रत्ययांतात् ॥ स्त्रियामङ् । चिकीर्षा । लोलूया । कण्डूया । पुत्रकाम्या ।

(सुबो०—) प्रत्ययांतात् । प्रत्ययांताद्धातोरङ् प्रत्ययः स्यात् स्त्रियां । डुकृञ् करणे ऽस्मात् इच्छायामात्मन इति सप्रत्यये कृते वुः से इतीण् न । नानिटिसे इति न गुणः । सेदीर्घ इति दीर्घे कृते ऋतइरितीर् य्वोर्विहसे इति दीर्घः द्वित्वादि पूर्ववत् सधातुरिति धातुत्वादङ् । कर्तुमिच्छतीति । चिकीर्षतीति चिकीर्षा । लुञ् छेदने ऽस्मादतिशये हसादेरिति यङ् द्वित्वं च यङीति पूर्वस्य गुणः । लोलूयते इत्यस्मादङ्प्रत्यये यत इत्यल्लोपः । अतिशयेन लूनातीति लोलूयते इति लोलूया । कंडूञ् गात्रविघर्षणे । अस्मात् कंड्वादिभ्य इति यक् यगंतादङि परे यत इत्यलोपः । कंडूयते इति कंडूया । पुत्रशब्दात्काम्यश्चेति काम्यप्रत्ययस्ततोऽङ्चत इत्यलोपः । पुत्रमिच्छतीति पुत्रकाम्यति पुत्रकाम्यतीति पुत्रकाम्या ॥

(तत्त्व०)प्रत्ययान्तात् । कंडूयेति । कंड्वादिपदान्तात् केवलात्क्तिरपि कंडूतिः ।

मू०-- धात्वर्थनिर्देशेवुण्वक्तव्यः ॥ आशिका । शायिका ।

(सुबोधिनी-)धात्वर्थनिर्देशेवुण्वक्तव्यः। आशिका। शायिका। काप्यतइतीत्वं ॥

मू०- इक्श्तिपौधातुनिर्देशे ॥ पचिः । पचतिः ।

(सुबोधिनी-) इक्श्तिपौधातुनिर्देशे । इक्श्तिपौ प्रत्ययावाह । कित्त्वाद्गुणो न शित्वाच्चतुर्वत् । डुपचष्पाके । पचिः । अप्कर्त्तरीत्यप् । पचतिः । बहुलमित्यनुवृत्तेः क्वचिन्नैतौ । भुवैवुगिति ॥

(तत्त्व०-) इकश्तिपाविति । निर्देशोनुकरणं बाहुलकत्वात् कचिन्न । गुब्भ्य इत्यादौ ।

मू०- ण्यन्तार्थासश्रंथघटिवन्दिविदिइषिभ्यः स्त्रियांयुः ॥ कारणा । अर्थना । आसना । श्रंथना । घटना । वन्दना । वेदना । एषणा ।

(सुबो०) ण्यंतार्थासश्रंथघटिवंदिविदिइषिभ्यः स्त्रियांयुः । एभ्यो युः स्यात् । अङोपवादः । युप्रत्ययमाह । युवोरित्यनादेशः । डुकृञ्करणे । णेरिति णिलोपः । कारणा । हृञ् हरणे । हारयतीति हारणा । अर्थ याच्ञायां । अर्थयतीति अर्थना । त्रीण्यपि ण्यंतोदाहरणानि । आस उपवेशने । आस्यंतेऽस्यामिति आसना । ण्यण् प्रत्यये तु आस्या । श्रंथ संदर्भे । श्रंथना । घट चेष्टायां । घटना । वदि अभिवादनस्तुत्योः । वंदना । अत्र विद्लृलाभे अयमेव गृह्यते । वेदना । ज्ञानार्थस्य विदेस्तु संवित्तिः । अनिच्छार्थस्येषेरत्र ग्रहणं । इष गतौ अन्वेषणा ॥

(तत्त्वदीपिका-) ण्यन्तासंवटचलने । भ्वादेः चुरादेस्तु ण्यन्तत्वादेव विद्लृलाभार्थः । ज्ञाने तु विदचेतनादिष्विति चुरादिण्यन्तस्यैव । ईषेस्तु गत्यर्थस्याभीक्ष्णार्थस्य च नत्विच्छार्थस्य

मू०- इञ्अजादिभ्यः ॥ आजिः । आतिः

(सुबोधिनी-) इञ्अजादिभ्यः । अजप्रभृतिभ्यो धातुभ्य इञ् स्यात इञ् प्रत्ययमाह । ञित्त्वाद्वृद्धिः । अज गत्यादौ । बाहुलकादजेर्वीभावो न । आजिः । संग्रामः । अट गतौ । आटिः । अत सातत्यगमने । आतिः ॥

(तत्त्वदीपिका--) इञजा । ञित्वाद्वृद्धिः । आजिरिति । वीभावस्तु न बाहुलकात् ।

मू०-विभाषाख्यानपरिप्रश्नयोरिञ्च ॥ आक्रोशेनञ्यनिः अकरणिः । अजननिः ।

(सुबो०-) विभाषाख्यानपरिप्रश्नयोरिञ्च् । परिप्रश्ने आख्याने च गम्येधातोरिञ् वा स्यात वुञ् च । यथाप्राप्तमन्येपि प्रत्यया भवंति । का त्वं कारिं कारिकां कृत्यां कृतिं वाऽकार्षीः एवं गणिं गणिकां गणनां । पचिं पाचिकां पचां पक्तिम् आख्यानेप्येवं ॥

मू०-इक्कृष्यादिभ्यः ॥ कृषिः । गिरिः ।

(सुबोधिनी-) इकृष्यादिभ्यः। इकुप्रत्ययमाह कित्त्वान्न गुणः कृष् विलेखने। कृषिः। गॄ निगरणे। ऋतइरितीर्। गिरिः। कॄ विक्षेपे किरिः। आवश्यकाधमर्ण्य योर्णिनिः अवश्यंकारी। शतंदायी। भविष्यदर्थेणिनिश्च। ग्रामंग्रामी॥

(तत्त्व०) इक् कित्वान्न गुणः। कृषिरिति। ऋतइर्। गिरिः।

सू०- पूर्वकालेक्त्वा॥ धातोः समानकर्तृके धातौ प्रयुज्यमाने पूर्वकालेऽर्थे क्त्वा प्रत्ययः।

(सुबोधिनी-) पूर्वकालेक्त्वा। समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। पूर्वकाले ऽत्र बहुव्रीहिः। क्त्वा तु अव्ययकृतो भाव इति भावे। भावोपि घञादाविव नेह सिद्धावस्थापन्नः। किंतु साध्यावस्थापन्नः। स च धातुनैव लब्धः। क्त्वा प्रत्ययार्थभूता क्रिया च क्रियांतरं प्रति विशेषणं भवति क्त्वाप्रत्ययमाह। कित्त्वान्न गुणः। क्त्वाद्यंतमित्यव्ययत्वाद्विभक्तेर्लुक्॥

(तत्त्वदीपिका--) पूर्वकाले। धातोरिति। पूर्वकालक्रियावचनादित्यर्थः समानकर्तृके धातौ प्रयुज्यमाने॥ यस्माद्धातोः क्त्वाविधीयते तत्क्रियाकर्त्ता यस्य धातोः कर्त्ता तस्मिंन् प्रयुज्यमाने क्त्वा प्रत्ययो भवतीत्यर्थः स्नात्वा भुंक्ते इत्यत्र स्नानभोजनक्रिययोरेक एव कर्त्ता। स्नानक्रियायाः पूर्वभावित्वेन स्ना धातोः क्त्वा। यद्यपि शक्तिः कारकं सा च प्रतिक्रियं विद्यते तथापि शक्तिमतोरभेदादेककर्तृकत्वमुक्तं। एवमेककर्तृकाणामपि नत्वा स्तुत्वा व्रजति। ननु चात्र सर्वपूर्वाया एव भविष्येत्यथामीषां विप्राणां पूर्वमानीयतामित्युक्ते सर्वपूर्व एवानीयते। अत्र वदंति। आख्यातवाच्यायाः विशेषणत्वेन प्राधान्यं तेन तामेव प्रति सर्वासां विशेषणत्वात् परस्परेण सम्बन्धः नहि भिक्षुको भिक्षुकान्तरं याचते किन्तु सर्व एव प्रभुमिति न तैरिह न स्तुत्यपेक्षं पौर्वकाल्यमिति। पूर्वं भुंक्ते ततो व्रजतीत्यत्र तु पूर्वशब्देनैककालस्योक्तत्वान्न क्त्वा प्रत्ययः। अस्यते भोक्तुमित्यपि भवति। असित्वा भोक्तुमिति न भवति। अनभिधानात्। किन्त्वसित्वा भुंक्त इत्येव।

सू०- क्त्वासेट्किन्न॥ धातोः सेट् क्त्वा किन्न। वर्तित्वा। शयित्वा।

(सुबोधिनी-) क्त्वासेट्किन्न। धातोः परः सेट् क्त्वा किन्न स्यात्। वृतु वर्त्तने कृत इतीट्। वर्तित्वा शीङ् स्वप्ने। शयित्वा। सेट् किं। कृत्वा। कित इतीण्ण॥

सू०-- मृडमृदगुधकुषक्लिशवदवसरुदविदमुषग्रहिभ्यःकित्॥ मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा। क्लिशित्वा। उदित्वा। उषित्वा। रुदित्वा। विदित्वा। मुषित्वा गृहीत्वा।

(सुबोधिनी--) मृडमृदगुधकुषक्लिशवदवसरुदविदमुषग्रहिभ्यः कित्। एभ्यो धातुभ्यः। सेट् क्त्वा कित्। मृड सुखे। मृद क्षोदे। गुध परिवेष्टने। गुध रोषे च कुष निष्कर्षे। क्लिशु हिंसायां दिवादिः। क्लिशु विबाधने क्र्यादिः वद व्यक्तायां वाचि। वस निवासे। रुदिर् अश्रुविमोचने। विद ज्ञाने। मुष स्तेये।

ग्रहउपादाने। मृड मृडित्वा। मृद मृदित्वा। गुध गुधित्वा। कुष कुषित्वा। क्लिशु ऊदित्वाद्विट् क्लिशित्वा क्लिष्ट्वा। वद यजामिति संप्रसारणं उदित्वा। वस वसिक्षुध्योरितीट्। यजामिति संप्रसारणं। वसादेरितिषः। उषित्वा। रुदिर् रुदित्वा। विद् विदित्वा। मुष मुषित्वा। ग्रहामिति संप्रसारणं। ईटोग्रहामिति दीर्घः। गृहीत्वा॥

मू०--नोपधात्थफान्ताद्वा॥ कित्। ग्रंथित्वा, ग्रथित्वा। गुंफित्वा, गुफित्वा।

(सुबोधिनी-) नोपधात्थफांताद्वा। नोपधाद्धातोः थफान्ताच्च परः सेट् क्त्वा वा कित् स्यात्। ग्रंथ संदर्भे। कित्त्वान्नोलोप इति नलोपः। ग्रथित्वा। ग्रंथित्वा। गुंफ गुंफने। कित्त्वात्पक्षे नलोपः। गुफित्वा, गुंफित्वा। नोपधात् किं। कोथित्वा। रेफित्वा। कुथ पूतीभावे। रिफ कत्थन युद्धानिंदाहिंसादानेषु। इह इवर्णोपधादिति विकल्पोपि न भवति नोपधग्रहणसामर्थ्यात्॥

मू०- अलंखल्वोःप्रतिषेधे॥ अलंभुक्त्वा। खलुकृत्वा।

(सुबोधिनी-) अलंखल्वोःप्रतिषेधे। धात्वर्थे अलंखल्वोरुपपदयोर्धातोः क्त्वा स्यात्। भुज पालनादौ। अलंभुक्त्वा डुकृञ् करणे। कित इतीट् न खलुकृत्वा। अलंखल्वोः किं। माकार्षीत्। प्रतिषेधयोः किं। अलंकारः॥

मू०- उदितःक्त्वोवेट्॥ एषित्वा, इष्ट्वा। भ्रमित्वा, भ्रान्त्वा।

(सुबोधिनी-) उदितः क्त्वोवेट् उदितो धातोः परस्य क्त्वाप्रत्ययस्येड् वा स्यात्। इषु इच्छायां। उदित्वाद्वेट्। इट्पक्षे क्त्वासेडित्याकित्वाद्गुणः। एषित्वा। इडभावे ष्टुत्वं। इष्ट्वा। भ्रमु चलने। उदित्वाद्वेट्। भ्रमित्वा। इडभावे अमांतस्येति दीर्घः भ्रान्त्वा।

(तत्वदीपिका-) उदित इति। उदिद्यस्य स तथा तस्मात्।

मू०- अदोजग्धुः॥ जग्ध्वा।

(सुबोधिनी-) अदोजग्धुः। अद भक्षणे। अस्य जघादेशः क्त्वा प्रत्यये। तथोर्द्धइति धः खसेचपा इति घस्य कः झभेझबाइति कस्य गः जग्ध्वा॥

मू०-- समासेक्यप्॥ समासे सति पूर्वकाले क्यप् समानकर्तृकेधातौ प्रयुज्यमाने। सम्भृत्य करोति। प्रणम्य गच्छति। अनञ्पूर्व इत्येके। अकृत्वा।

(सुबोधिनी-) समासेक्यप्। अव्ययपूर्वपदे अनञ्समासे समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्यप् स्यात्। क्यप्प्रत्ययमाह कित्त्वाद्गुणो न। पित्त्वात् ह्रस्वस्य पितीति तुक् डुभृञ् धारणादौ। णम् प्रह्वत्वे शब्दे च। प्रणमशब्दो नाम्नश्चकृतेति क्त्वांतेन नित्यं समस्यते संभृत्य। प्रणम्य। अनञ्किम्। अकृत्वा अव्ययपूर्वपदे इति किम्। परमकृत्वा मांतानिटां धातूनां तु मस्य लोपो वा भवति

क्यपि। वनति तनोत्यादीनां तु लोपस्त्वनुदात्ततनामिति नित्यं। अमस्य लोपः। आगत्य। आगम्य। प्रणत्य। प्रणम्य। अन्यत्र तु नित्यम्। प्रहत्य। प्रमत्य। वितत्य।

(तत्त्व०--)समासे क्यप्। समानकर्तृकत्व एव यत्तु मत्प्रसूतिमनाराध्य इत्यादिमहाकविप्रयोगाद्भिन्नकर्तृकेपि। क्यबिति वासुदेवेनोक्तं। तन्महान्तो न क्षमंते स्थितस्येत्यध्याहार्येणैव तत्र निर्वाहः ओदनः पक्त्वा भुज्यत इत्यत्र प्रधानशक्त्याभिधाने गुणशक्तिरभिहितवत्प्रकाशते इति न्यायात् प्रधानक्रियया कर्मोक्तमतो गुणक्रियायाप्राप्तिकर्मविभक्तिर्नभवति।

मू०-- क्यपिलघुपूर्वात्परस्यञेरय्॥ परिणमय्य। लघुपूर्वात्किम्। संप्रधार्य।

(सुबोधिनी-) क्यपिलघुपूर्वात्परस्यञेरय्। लघुः पूर्वो यस्माद्वर्णात् लघुपूर्ववर्णात्परस्य ञेरयादेशः स्यादित्यर्थः। णम् प्रह्वत्वे शब्दे च। अस्मात्प्रयोजकञिप्रत्यये जनीजॄषित्यमंतत्वान्मित्त्वम्। मितांह्रस्व इति ह्रस्वस्ततोञेरयादेशः। प्रणमय्य गण संख्याने। चुरादिरदंतः। अस्मात् स्वार्थे ञिप्रत्यये यत इत्यलोपः। नन्विह कृतस्याऽल्लोपस्य स्थानिवद्भावेन लघुपूर्वकवर्णात्परत्वं नास्ति कथमयादेशः स्यात्। उच्यते। अत्रायादेशे कर्तव्ये अल्लोपस्य स्थानिवत्त्वं भाष्यादौ न स्वीकृतमस्ति। विगणय्य। लघु पूर्वादिति किम्। संप्रधार्य। संपूर्वात् धृधारणे अस्मात् प्रयोजकञिप्रत्ययांतात् क्यपि कृते ञेरिति ञिलोपः॥

मू०-- आप्नोतेर्वा॥ प्रापय्य, प्राप्य।

(सुबोधिनी-) आप्नोतेर्वा। आप्लृव्याप्तावस्मात्परस्य ञेरयादेशो वा स्यात्। अप्राप्तविभाषेयं। तथाच श्रीहर्षः। 'अयमयोगिवधूवधपातकी भ्रमिमवाप्य दिवः खलुपात्यते'। इत्यत्रावाप्येत्यस्यावापय्येत्यर्थो बोध्यः॥

मू०-- क्यपीत्वाभावः॥ प्रदाय। प्रधाय। प्रस्थाय। प्रसाय। मिनोतिमीनातीत्यात्वम्। प्रमाय। निमाय। एव लिलीङोरात्वम्वेत्यादि। विलीय। विलाय।

(सुबोधिनी-) क्यपीत्वाभावः। दादेरितित्वम् स्थामीत्वं च प्राप्तमनेन निषिध्यते। डुदाञ् दाने प्रदाय। ष्ठा गतिनिवृत्तौ। प्रस्थाय। षोंतकर्मणि प्रसाय। डुधाञ् धारणादौ। विधाय। कथं तर्हि। निपीय यस्येति श्रीहर्षप्रयोग इति चेदत्राहुः। दिवादिगणस्थस्य पीङ् पाने इत्यस्य रूपमिति॥

मू० तत्कालेऽपिक्वचित्॥ नेत्रे संमील्य हसति। मुखं व्यादाय स्वपिति

(सुबोधिनी-) तत्कालेपिक्वचित्। क्यपि स्यात्। डुदाञ् दाने। व्यादाय यदैव स्वपिति तदैव मुखं व्यादत्ते। मील निमीलने निमील्य यदैव हसति तदैव नेत्रे संमीलयतीत्यर्थः।

मू०- पौनःपुन्येणम्पदंद्विश्च ॥ समानकर्तृकेषु धातुषु प्रयुज्यमानेषु पूर्वकाले धातोर्णम् क्त्वा च णमन्तस्य द्विर्वचनम् । पायंपायङ्गच्छति । भोजंभोजम् । स्मारंस्मारम् । मितां ञ्यन्तानामिणि णमि च वा दीर्घः । गामंगामम् । गमंगमम् । लाभंलाभम् । लंभं लंभम् ।

(सुबोधिनी--) पौनःपुन्येणम्पदंद्विश्च । पौनःपुन्ये। द्योत्ये समानकर्तृकयोः पूर्वकाले धातोर्णम् स्यात् चकारात् क्त्वाच । णमंतस्य द्वित्वं च।णम्प्रत्ययमाह । णित्त्वाद्वृद्धिः क्त्वाद्यंतंचेत्यव्ययत्वाद्विभक्तेर्लुक् ।पा पानेऽस्मात् णमि कृते आतोयुगिति युक् पायंपायं । पक्षे पीत्वापीत्वा । स्थामीतीत्वं । भुज पालनादौ । भोजंभोजं । भुक्त्वा २। स्मृ चिंतायां । स्मारं २ । पक्षे स्मृत्वा २ । गम्लृ गतौ । ञ्यंतादस्मात् णमि कृते जनीजृषित्यमंतत्वात् मित् संज्ञायां मितांन्हस्व इति ऱ्हस्वे कृते मितांञ्यंतानामिणि णमिचेति वा दीर्घः । गामं २ गमम् २। पक्षे गत्वा २ । डुलभष् प्राप्तौ । अस्मात् णमि कृते लभेरिणमोरिति वा नुम् । लंभम् २ । नुमभावे वृद्धिः । लाभम् २ । पक्षे लब्ध्वा २ ॥

(तत्त्व०-) पौनःपुन्ये णम् । पदं द्विश्च । णमन्तस्य नामत्वात्स्यादौ पदत्वं । पापमिति । आतोयुगिति युक् । गाममिति । ञमांतस्येति दीर्घः । लंभमिति । णमिवानुम् । व्यवस्थितत्वादुपसृष्टस्य प्रलंभमित्यादौ नित्यमेव ।

मू०- कथमादिषुस्वार्थेकृञोणम् ॥ कथंकारम् । अन्यथाकारं । एवं कारम् । इत्थंकारम् । पठति । एवंकारं पठतीत्यर्थः ।

(सुबोधिनी-) कथमादिषुस्वार्थेषुकृञोणम् । कथमित्थमन्यथैवमित्यादिषूपपदेषु कृञो णम् स्यात् यदि कृञ् प्रयोगाऽनर्हः स्यात् । कथंकारं पठति । कथंपठतीर्थः । अन्यथाकारं भुंक्ते अन्यथा भुंक्ते इत्यर्थः । एवंकारं करोति एवं करोतीत्यर्थः- इत्थंकारं वदति । इत्थं वदतीत्यर्थः प्रयोगानर्ह इति किम् । शिरोऽन्यथा कृत्वा भुंक्ते॥

मू०- अग्रेप्रथमपूर्वेषूपपदेषुक्त्वाणमौवा ॥ अग्रेभोजं व्रजति, अग्रेभुक्त्वा । प्रथमम्भोजम्,प्रथम्भुक्त्वा । पूर्वम्भोजम्,पूर्वम्भुक्त्वा । पक्षे प्रत्ययाभावः । अग्रे भुंक्ते ततो व्रजति। आभीक्ष्ण्ये तु पूर्वेण नित्यमेव णम् । अग्रेभोजं व्रजति ।

(सुबोधिनी-) अग्रेप्रथमपूर्वेषूपपदेषुक्त्वाणमौवा । पौनःपुन्ये इति नानुवर्त्तते । एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमौ वास्तः । अग्रेति सप्तम्यंतस्यानुकरणं प्रकृतिवदनुकरणमित्यस्य वैकल्पिकत्वाद्विभक्तेर्लुक् न कृतः । अग्रेभोजं अग्रेभुक्त्वा

वा व्रजति। अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीत्यर्थः । पक्षे लडादायः । अग्रेभुंक्ते । पौनःपुन्ये तु नित्यमेवणम् क्त्वाच । अग्रेभोजं २ भुक्त्वा २ वा व्रजति ॥

मू०— कर्मण्याक्रोशेकृञः खमुञ् ॥ चौरंकारमाक्रोशति । चौरशब्दमुच्चार्येत्यर्थः ।

(सुबोधिनी—) कर्मण्याक्रोशेकृञःखमुञ्। कर्मण्युपपदे आक्रोशे गम्ये करोतेः खमुञ् स्यात् । खमुञ्प्रत्ययमाह । खित्वात्खितिपदस्येति मुम् । ञित्वाद्वृद्धिः। उकारउच्चारणार्थः । करोतिरुच्चारणेऽर्थे वर्तते । अत्र चौरंकारमाक्रोशति । चौरशब्दमुच्चार्येत्यर्थः ॥

(तत्त्व०—) चौरंकारमिति खित्वान्मुम् । करोतिरत्रोच्चारणार्थः । चौरादयश्च शब्दप्रधानाः। चौरस्त्वमित्युच्चार्य क्रोशतीत्यर्थः नात्र चोरत्वं करणं किं त्वाक्रोशसंपादनार्थमचौरोपि चोर इत्युच्यते ।

मू०— च्व्यर्थेषुस्वाद्वर्थे ॥ कृञो णम्स्यादेककर्तृकयोः पूर्वकाले । पूर्वपदस्य मान्तत्वं निपात्यते । अस्वादुं स्वादुंकृत्वा भुंक्ते । स्वादुंकारं भुंक्ते । संपन्नंकारम्। लवणंकारं। सम्पन्नलवणशब्दौ स्वादुपर्यायौ । क्त्वापि। स्वादुंकृत्वा भुंक्ते ।

(सुबोधिनी—) च्व्यर्थेषुस्वाद्वर्थे। कृञो णम् स्वादुपर्यायेषूपपदेषु एककर्तृकयोः पूर्वकाले करोतेर्णम् स्यात्। पूर्वपदस्य मांतत्वं निपात्यते ॥

(तत्त्व०—) स्वाद्वर्थेइति । प्रकृतेन खमुञासिद्धेपि अव्ययत्वान्न नुम् स्यात्। ईपश्च निवृत्तिरित्याद्यर्थंनिपातनं ।

मू०— यथातथयोरसूयाप्रतिवचने ॥

(सुबोधिनी—) यथातथयोरसूयाप्रतिवचने । यथातथयोरुपपदयोः ॥

(तत्त्वदीपिका—) यथातथयोरिति ।

मू०— कृञःसिद्धाऽप्रयोगेणम् ॥ यथाकारमहं भोक्ष्ये तथाकारम् भोक्ष्ये किंतवानेन । सिद्धाप्रयोगे किं। सिद्धंकृत्वा भुंक्ते ।

(सुबोधिनी—) कृञःसिद्धाप्रयोगेणम् । करोतेः सिद्धाऽप्रयोगे णम् स्यात् । सिद्धः अप्रयोगोऽस्य एवं भूतश्चेत् कृञ् व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः। गुणेषु दोषारोपणमसूया। असूयया प्रतिवचनं असूयाप्रतिवचनं तस्मिन् वाच्ये सति । यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये । यथा भोक्ष्येऽहं तथा भोक्ष्य इत्यर्थः ॥

(तत्त्व०—)सिद्धाप्रयोगे इति।सिद्धः अप्रयोगोऽस्य कृञो निःप्रयोजनत्वात्प्रयोगानर्ह इत्यर्थः।

मू०— कर्मणिदृशिविदोःसाकल्ये ॥ कन्यादर्शं वरयति । सर्वाः

न्या इत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति ल-
ते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः ।

सुबोधिनी–) कर्मणिदृशिविदोःसाकल्ये । कर्मण्युपपदे दृशिविदोर्णम् स्यात
ये। सकलस्य भावः साकल्यं तास्मिन् । दृशिर् प्रेक्षणे। विद ज्ञाने विदॢ ला-
वद विचारणे इति त्रयाणां ग्रहणम् ॥

सू०– यावतिविन्दजीवोः ॥ यावद्वेदं भुङ्क्ते । यावल्लभते तावदित्य-
र्थः । यावज्जीवमधीते विप्रः ।

सुबोधिनी–) यावतिविंदजीवोः । यावच्छब्दे उपपदे विदॢ लाभे जीव
प्राणधारणे आभ्यां णम् स्यात ॥

तत्त्वदीपिका–) यावदिति । पूर्वकाल इतीह नास्ति । असाकल्यार्थमिदं । साकल्ये
विदोरित्येव सिद्धेः ।

सू०– कर्मणोश्चर्मोदरयोःपूरेः ॥ चर्मपूरं स्तृणाति । उदरपूरं भुंक्ते ।

सुबोधिनी–) कर्मणोश्चर्मोदरयोःपूरेः । चर्मोदरयोः कर्मणोरुपपदयोः पूरी आ-
प्यायने ऽस्मात णम्स्यात् । चर्मपूरं स्तृणाति । आच्छादयतीत्यर्थः ॥

सू०– कर्मण्युपपदेपूरेरूलोपश्चवा ॥ वर्षप्रमाणे गम्ये णम् । गो-
ष्पदप्रमाणम् वृष्टो देवः । गोष्पदपूरं वा । मूषिकाबिलप्रम् वृष्टोदेवः ।
मूषिकाविलपूरंवा।

सुबोधिनी–) कर्मण्युपपदेपूरेरूलोपश्चवा । वर्षप्रमाणे गम्ये णम् स्यात
...येन वर्षप्रमाणे गम्ये । 'वर्षे वृष्टिरि'त्यमरः । वर्षस्य वृष्टेः प्रमा-
णं वर्षप्रमाणं तास्मिन् ॥

सू०– चैलार्थेषुकर्मसूपपदेषुक्नोपेर्वर्षप्रमाणे ॥ णम् । चैलक्नोपं
वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ।

सुबोधिनी–) चैलार्थेषुकर्मसूपपदेषुक्नोपेर्वर्षप्रमाणे । चैलमर्थो येषां तानि
चैलार्थानि तेषु कर्मसूपपदेषु क्नूयी शब्दे उंदे च ण्यंतादस्मात् णम् स्यात् ।
...तोः प्रयोजके णिप्रत्यये कृते र्हीव्लीरीक्नूयीक्ष्माय्यातामिति पुक् । यव-
ते हकारे चेति यलोपः । पुकीति गुणः । क्नोपीति ण्यंताण्णम् । णेरिति णिलो-
पः । चैलं क्नोपयत्यार्द्रीकरोतीति चैलक्नोपं ॥

सू०– निमूलसमूलयोःकषः॥ कषादिषु यथाविध्यनुप्रयोगः प्रयो-
क्तव्यः । अत्र प्रकरणे पूर्वकाल इति न संबध्यते । असम्भवादप्रती-
तेश्च । निमूलकाषं कषति। समूलकाषं कषति । निमूलं समूलं वा
कषतीत्यर्थः ।

२२

(सुबोधिनी-) निमूलसमूलयोःकषः । निमूलसमूलयोः कर्मणोरुपपदयोः
षाहिंसायामस्मात् धातोर्णम्स्यात् ॥

(तत्त्वदीपिका--) निमूल-प्रकृतिधातोरेवकषादेर्न त्वन्यधातुयोगेपीति बो
निमूलकाषमीति । निगतं मूलमस्येति निमूलं । एकस्यापि धात्वर्थस्य निमूलादि
षणसंबंधाद्भेदे सति सामान्यविशेषभावेन विशेषणविशेष्यभावः एवमग्रेपि ।

मू०- शुष्कचूर्णरूक्षेषुकर्मसूपपदेषुपिषः ॥ शुष्कपेषं पिनष्टि
शुष्कं पिनष्टीत्यर्थः । चूर्णपेषम् । रूक्षपेषम् ।

(सुबोधिनी-) शुष्कचूर्णरूक्षेषुकर्मसूपपदेषुपिषः । एषु कर्मसूपपदेषु पिषॢ
चूर्णनेऽस्मात् धातोर्णम् स्यात् ॥

मू०- समूलाकृतजीवेषुकर्मसुहन्कृञ्ग्रहांणम् ॥ समूलघातं
हन्ति । समूलं हन्तीत्यर्थः । अकृतकारं करोति । जीवग्राहं गृण्हा-
ति । जीवं गृण्हातीत्यर्थः ।

(सुबोधिनी-) समूलाकृतजीवेषुहन्कृञ्ग्रहांणम् । समूलादिषु कर्मसूपपदे
नादिभ्यो णम् स्यात् । हनादीनामेव यथाविध्यनुप्रयोगश्च कर्त्तव्यः । समूलोप
हंतेर्णमि कृते हनोघादिति घत् ततोऽतोपधाया इति वृद्धिः । समूलघातं । जीव
। कशाद् गृण्हातेर्णमि कृते वृद्धिः । जीवग्राहं । जीवतीति जीवः । नाम्युपधा
। जीवंतं गृण्हातीत्यर्थः ॥

मू०- करणेहनः ॥ पादघातं हन्ति । पादेन हन्तीत्यर्थः ।

(सुबोधिनी-) करणेहनः । करणकारकोपपदात् हंतेर्णम् स्यात् हंतेरनुप्र
श्च । नित्यसमासार्थमिदंसूत्रं । भिन्नधातुसंबंधे तु हिंसार्थानामिति वक्ष्यते ॥

मू०-- स्नेहनेपिषः । उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः ।

(सुबोधिनी--) स्नेहनेपिषः । स्नेहनकरणोपपदात् पिषॢ संचूर्णने ऽस्मात्
स्यात् स्निह्यते येन तत् स्नेहनं तस्मिन् । पेषंवासवाहनधिषु परेषु उदकस्योद
वक्तव्यः । इत्युदादेशः । उदपेषं ॥

मू०-हस्तार्थेकरणेवर्तिग्रहोः॥हस्तवर्त्तं वर्त्तयाति। करवर्त्तम् । हस्ते
गुटिकां करोतीत्यर्थः । हस्तग्राहं गृण्हाति । करग्राहम् । पाणिग्राहम्

(सुबोधिनी--) हस्तार्थेकरणेवर्तिग्रहोः । हस्तार्थकरणकारकोपपदाभ्यां व
हिभ्यां णम् स्यात् अनयोर्यथाविध्यनुप्रयोगश्च । वृतु वर्तने । ण्यंतादस्मात् णमि
ते णेरिति णिलोपः हस्तवर्तं । हस्तग्राहम् गृण्हाति । हस्तेन गृह्णातीत्यर्थः ॥

मू०- धनार्थेकरणेपुषः ॥ धनपोषं पुष्णाति । स्वपोषम् । गोपोष

(सुबोधिनी--) धनार्थेकरणेपुषः । धनपर्यायविशेषे चोपपदेषु पुष पुष्टावर
णम् स्यात् अनुप्रयोगश्च ॥